(महाभारते)

भगवद्गीताष्टादश
टीकासहितषष्ठाध्यायः

२७१६

षष्टोध्याय

शांकर भाष्यं
आनंदगिरिकृत टी.
श्रीधरी स्वामिकृत
पिशाचभाष्य
रामानुजभाष्य
अभिनवगुप्ती
परमार्थप्रपा
वनमाली
कुसुमवैजयन्ती
मधुसूदनी
सदानंदी
नीलकंठी
आनंदी
रामकंठी
लासिकी
पंचोली ॥

भाषा अनुवाद ॥

श्रीभगवानुवाच अनाश्रितःकर्मफलंकार्यंकर्मक
रोतियः ससंन्यासीचयोगीचननिरग्निर्नचाक्रियः १

शाङ्करभाष्यं

अतीतानन्तराध्यायान्ते ध्यानयोगस्य सम्यग्दर्शनं प्रत्यन्तरङ्गस्य सूत्रभूताः श्लो
काःस्पर्शान् कृत्वा बहिरित्यादय उपदिष्टास्तेषां वृत्तिस्थानीयोयं षष्ठोध्याय आर
भ्यते तत्र ध्यानयोगस्य बहिरङ्गं कर्म्मेति यावद्ध्यानयोगारोहणासमर्थस्ताव
द्गृहस्थेनाधिकृतेन कर्त्तव्यंकर्म्मेति अतस्तत् स्तौति अनाश्रित इति ननुकि
मर्थं ध्यानयोगारोहणसीमाकरणं यावतानुष्ठेयमेव विहितं कर्म्म यावज्जीव
नारुरुक्षोर्मुनेर्योगं कर्म्मकारणमुच्यत इति विशेषणादारूढस्य च शमेनैव स
म्बन्धकरणादारुरुक्षोरारूढस्य च शमः कर्म्म चोभयं कर्त्तव्यत्वेनाभिप्रेतंचेत्
स्यात्तदारुरुक्षोरारूढस्येति शमकर्म्मविषयभेदेन विशेषणं विभागकरणं
चानर्थकं स्यात् तत्राश्रमिणां कश्चिद् योगमारुरुक्षुर्भवत्यारूढश्च कश्चिद्
न्येनारुरुक्षवोन चारूढास्तानपेक्ष्यारुरुक्षोरारूढस्य चेति विशेषणं विभाग
करणञ्चोपपद्यत एवेति चेन्न तस्यैवेति वचनात् पुनर्योगग्रहणाच्च योगारू
ढस्येति य आसीत् पूर्वं योगमारुरुक्षुस्तस्यैवारूढस्य शम एव कर्त्तव्यं का
रणं योगफलं प्रत्युच्यत इत्यतो न यावज्जीवं कर्त्तव्यत्वप्राप्तिः कस्यचिदपि क
र्म्मणः योगविभ्रष्टवचनाच्च गृहस्थस्य चेत् कर्म्मिणो योगोविहितः षष्ठे
ध्याये स योगविभ्रष्टोपि कर्म्मगतिं कर्म्मफलं प्राप्नोतीति तस्य नाशाशङ्कानु
पपन्ना स्यादवश्यं हि कृतं कर्म्म काम्यं नित्यम्वा मोक्षस्य नित्यत्वादनारभ्यत्वे
पि स्वं फलमारभत एव नित्यस्य च कर्म्मणो वेदप्रमाणावबुद्धत्वात् फलेन
भवितव्यमित्यवोचामान्यथा वेदस्यानर्थक्यप्रसङ्गादिति नचकर्म्मणि सत्यु
भयविभ्रष्टवचनमर्थवत् कर्म्मिणो विभ्रंशकारणानुपपत्तेः कर्म्मकृतमी
श्वरे संन्यस्येत्यतः कर्त्तुः कर्म्मफलं नारभत इति चेन्नेश्वरे संन्यासस्याधिकत
रफलहेतुत्वोपपत्तेर्म्मोक्षायैवेति चेत् स्वकर्म्मणां कृतानामीश्वरे संन्यासो मो
क्षायैव न फलान्तराय योगसहितः योगाच्च विभ्रष्ट इत्यतस्तं प्रति नाशाशङ्का
युक्तैवेति चेन्नैकाकी यतचित्तात्मा निराशीरपरिग्रहो ब्रह्मचारिव्रते स्थित इ
ति कर्म्मसंन्यासविधानान्नचात्र ध्यानकाले स्त्रीसहायत्वाशङ्का येनैकाकि
त्वं विधीयते नच गृहस्थस्य निराशीःपरिग्रह इत्यादिवचनमनुकूलं उभयभ्र

गी॰ टी॰ ष॰

ष्ठप्रश्नानुपपत्तेश्च अनाश्रित इत्यनेन कर्मिण एव संन्यासित्वं योगित्वं चोक्तं प्र
तिषिद्धं च निरग्नेरक्रियस्यैव संन्यासित्वं योगित्वं चेति चेन्न ध्यानयोगं प्रति बहि
रङ्गस्य सतः कर्मणः फलाकांक्षासंन्यासस्तुतिपरत्वात् केवलं निरग्निरक्रिय
एव संन्यासी योगी च किं तर्हि कर्म्यपि कर्मफलासङ्गं संन्यस्य कर्मयोग
मनुतिष्ठन् सत्त्वशुद्ध्यर्थं संन्यासी योगी च भवतीति स्तूयते न चैकेन वाक्येन
कर्मफलासङ्गसंन्यासस्तुतिश्चतुर्थाश्रमप्रतिषेधश्चोपपद्यते न च प्रसिद्धं
निरग्नेरक्रियस्य परमार्थसंन्यासिनः श्रुतिस्मृतिपुराणेतिहासयोगशास्त्रे
षु विहितं संन्यासित्वं योगित्वं च प्रतिषेधति भगवान् स्ववचनविरोधाच्च। स
र्वकर्माणि मनसा संन्यस्य नैव कुर्वन्न कारयन्नास्ते मौनी सन्तुष्टो येन केनचिद
निकेतः स्थिरमतिर्विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः सर्वारम्भप
रित्यागीति च तत्र तत्र भगवता स्ववचनानि दर्शितानि तैर्विरुध्येत चतुर्था
श्रमप्रतिषेधः तस्मात् मुनेर्योगमारुरुक्षोः प्रतिपन्नगार्हस्थ्यस्याग्निहोत्रादि
कर्मफलनिरपेक्षमनुष्ठीयमानं ध्यानयोगारोहणसाधनत्वं सत्त्वशुद्धिद्वारे
ण प्रतिपद्यत इति स संन्यासी च योगी चेति स्तूयते अनाश्रित इति अनाश्रितो
न आश्रितोऽनाश्रितः किं कर्मफलं कर्मणः फलं कर्मफलं यत्तदनाश्रितः
कर्मफलतृष्णारहित इत्यर्थः यो हि कर्मफले तृष्णावान् स कर्मफलमाश्रि
तो भवति अयन्तु तद्विपरीतोऽतोऽनाश्रितः कर्मफलमेवम्भूतः सन् कार्यं कर्त
व्यं नित्यं काम्यविपरीतमग्निहोत्रादिकं करोति निर्वर्तयति यः कश्चिद् ई
दृशः कर्मी स कर्म्यन्तरेभ्यो विशिष्यत इत्येवमर्थमाह स संन्यासी च योगी
चेति संन्यासः परित्यागः स यस्यास्ति स संन्यासी च योगी च योगश्चित्तसमा
धानं स यस्यास्ति स योगी चेत्येवं गुणसम्पन्नोऽयं मन्तव्यो न केवलं निरग्निरक्रि
य एव संन्यासी योगी चेति मन्तव्यः निर्गता अग्नयः कर्माङ्गभूता यस्मात् स
निरग्निरक्रियश्च अनग्निसाधना अप्यविद्यमानाः क्रियास्तपोदानादिका यस्या
सावक्रियः ननु च निरग्नेरक्रियस्यैव श्रुतिस्मृतियोगशास्त्रेषु संन्यासित्वं यो
गित्वं च प्रसिद्धं कथमिह साग्नेः सक्रियस्य संन्यासित्वं योगित्वं चाप्रसिद्ध
मुच्यते इति नैष दोषः कयाचिद् गुणवृत्त्या उभयस्य सम्पिपादयिषितत्वा
त् कथं कर्मफलसंकल्पसंन्यासात् संन्यासित्वं योगाङ्गत्वेन च कर्मानु
ष्ठानात् कर्मफलसङ्कल्पस्य वा चित्तविक्षेपहेतोः परित्यागाद्योगित्वं चेति १ ॥

आनन्दगिरिटीका

ध्यानयोगप्रस्तावानन्तरं तद्योग्यताहेतुकर्म्मणः स्तुतिं भगवानुक्तवानित्याह
श्रीभगवानिति एवोमेतराध्याययोः सङ्गतिमभिदधानो हेतुमन्तमध्यायान्तर
मवतारयति अतीतेति सम्यग्दर्शनप्रकरणे ध्यानयोगस्य प्रसङ्गाभावं बुद्
ध्येति सम्यगिति सेत्र्हूविवरणयोरतीतानन्तराध्याययोरुक्ते हेतुहेतुमत्त्वमि
तिभावः अध्यायसम्बन्धमभिधायानाश्रितः कर्म्मफलमित्यादिश्लोकद्वयस्य
तात्पर्य्यमाह तत्रेति कर्म्मयोगस्य सन्न्यासहेतोर्म्मर्य्यादां दर्शयितुं साङ्ख्ययो
गे विचारयितुमध्याये प्रवृत्ते सतीति समस्यार्थः सन्न्यासिना कर्त्तव्यं कर्म्मेत्येवं
प्रतिभासं व्युदस्यति गृहस्थेनेति कर्त्तव्यं स्तुतियोग्यत्वमनःशब्दार्थः समु
च्चयवादी सीमाकरणमाक्षिपति नन्विति यावज्जीवश्रुतिवशात् ध्यानारोहण
सामर्थ्येऽप्यपि कर्म्मानुष्ठानस्य दुर्व्वारत्वादिति हेतुमाह यावतेति आर्य्यावि
योगादिप्रतिबन्धाद्यावज्जीवश्रुतिचोदितकर्म्मानुष्ठानवत् वैराग्यप्रतिबन्धा
दपि तदननुष्ठानसम्भवाद्भगवतो विशेषवचनाच्च न यावज्जीवं कर्म्मानुष्ठानप्रस
क्तिरिति परिहरति नारुरुक्षोरिति उक्तमेवार्थं व्यतिरेकद्वारेण विवृणोति आरु
रुक्षोरित्यादिना आरोढुमिच्छतीत्यारुरुक्षुस्तस्य इत्यारोहणेच्छा विशेषणमारोह
णे कृतवानित्यत्र पुनरिच्छाविषयत्वेन [illegible] मारोहणं विशेषणमेवं शमकर्म्मवि
षयोर्भेदेन विशेषणं मर्य्यादाकरणाङ्गीकरणे विरुद्धमापद्येत तयोरेव विभा
गकरणाच्च भागवत सीमाङ्गीकारेण युज्यतेत्यर्थः विशेषणविभागकरण
योरन्यथोपपत्तिमाशङ्क्य तत्रेति व्यवहारभूमिः समस्यार्थः षष्ठीनिर्द्देशेन भवत
यधिकारिणोर्द्वैविध्यं स्यादपि सकृते विशेषणाद्वोक्तिमायातमित्याशङ्कान्तरमीपाप
त्तया तदुपपत्तिरित्याह तावदपेक्षेति आरुरुक्षोरारूढस्य च भेदेन सैव तत्प्रकृ
तपरामर्शानुपपत्तिरिति निरूपयति तन्मस्येति यथ नारुरुक्षुत्वं पुरुषमपेक्षारुरु
क्षोरिति विशेषणं तस्य च कर्म्मारोहणकारणमतारूढस्य पुरुषमपेक्षारूढ
स्येति विशेषणं तस्यैव शमः सन्न्यासो योगफलप्राप्तौ कारणमिति विशेषण
विभागकरणयोरुपपत्तिस्तदारुरुक्षोरारूढस्य च भिन्नत्वात् प्रकृतपरामर्शि
नः तच्छब्दस्यानुपपत्तेर्नैष प्रकृतमिति विशेषणाद्युपपादनमित्यर्थः किञ्च योग
मारुरुक्षोस्तदारोहणे कारणं कर्म्मेत्युक्त्वा पुनर्योगारूढस्येति योगशब्दप्रयोगा
त् यो योगं पूर्व्वमारुरुक्षुस्तस्यैवारूढस्येति वा प्रतीतेर्योगमारूढस्य तत् फलप्राप्तौ क
र्म्मसन्न्यासः शमशब्दवाच्योऽनेनैव कर्त्तव्य इति वचनादारुरुक्षोरारूढस्य चा

गी॰
टी॰
४

भिन्नत्वप्रत्यभिज्ञानान्न तयोर्भिन्नत्वं शङ्कितुं शक्यमित्याह पुनरिति यत्तु या
वज्जीवश्रुतिविरोधात् योगारोहणमीमांसाकरणं कर्म्मणोनुचितमिति तत्राह उ उच्यते
ति पूर्वोक्तरीत्या कर्म्मतत्त्यागयोर्विभागोपपत्तौ श्रुतेरन्यविषयत्वात् योगमारुरुक्ष
स्य मुमुक्षोर्जिज्ञासमानस्य नित्यनैमित्तिककर्म्मस्वपि परित्यागसिद्धिरित्यर्थः।
रतस्य यावज्जीवकर्म्मकर्त्तव्यत्वं न भवतीत्याह योगेति सन्न्यासिनो योगभ्रष्टस्य
विनाशशङ्कावचनान्न यावज्जीवकर्म्मकर्त्तव्यं प्रतिभातीत्यर्थः ननु योगभ्रष्टश
ष्टेन गृहस्थस्यैवाभिधानात्तस्यैवास्मिन्नध्याये योगविधानाद्योगारोहणयोग्य
त्वे सत्यपि यावज्जीवकर्म्मकर्त्तव्यमिति नेत्याह गृहस्थस्येति तेनापि मुमुक्षुणा
कृतस्य कर्म्मणो मोक्षातिरिक्तफलानारम्भकत्वाद्योगभ्रष्टोसौ छिन्नाभ्रमिव न
श्यतीति शङ्कासावकाशेत्याशङ्क्याह अवशोपीति अपोहिषेयान्निर्देशाद्देवा
त् फलदायिनी कर्म्मणः स्वाभाविकी शक्तिरवशात्स्वभावस्य वस्तुतः सिद्धत्वा
त्कर्म्मफलवत्त्वमतो मोक्षातिरिक्तस्यैव फलस्य कर्म्मारम्भकमिति कर्म्मिणि
योगभ्रष्टोपि कर्म्मगतिं गच्छतीति निरवकाशा शङ्केत्यर्थः ननु मुमुक्षुणा का।
म्यप्रतिषिद्धयोरकरणात् कृतयोश्च नित्यनैमित्तिकयोरफलत्वात् कथं तदीय
स्य कर्म्मणो नियमेन फलारम्भकत्वं तत्राह नित्यस्येति चकारेण नैमित्तिकं
कर्म्मानुकृष्यते वेदप्रमाणकत्वेपि नित्यनैमित्तिकयोरफलत्वे दोषमाह वा
यत्येति कर्म्मणोनुष्ठितस्य फलारम्भकत्वध्रौव्यात् गृहस्थो योगभ्रष्टोपि कर्म्म
गतिं गच्छतीति न तस्य नाशशङ्केति शेषः इतोपि गृहस्थो योगभ्रष्टो शाह वाच्या
न भवतीत्याह नचेति तानकर्म्मवत्तभयं तेनाभ्रष्टयन्नश्यतीति वचनं गृहस्थे
कर्म्मणि सति नार्थवद्दविलमलं तस्य कर्म्मनिष्ठस्य कर्म्मणो विशेषोहत्वभा
वात् तत्फलस्यावश्यकत्वादित्यर्थः कृतस्य कर्म्मणो मुमुक्षुणा भगवति
समर्पणात् कर्त्तरि फलानारम्भकत्वादस्ति विशेषकारणमिति शङ्कते नेमं। कृ
ति राज्ञा राजपुरुषाद्यापनयामादिसमर्पणस्याधिकफलहेतुत्वोपलम्भादीश्वरे
समर्पणेन विशेषकारणमिति हस्तयति नेत्यादिना अधिकफलहेतुत्वेपि मोक्षहे
त्वमिष्यतामिति शङ्कते नेमोक्षायेति नैदेववचोद्यं विहन्यतेति स्वकर्म्मणामि
ति सहकारिसामर्थ्यात्तस्य फलान्तरे प्रसूपायत्वात्सिद्धिरिति हेतुस्तत्त्वयतियो
गतिध्यानसहितस्य सन्न्यासस्य मोक्षोपायिकत्वे कृते योगभ्रष्टमपिकृत्य नाशा।
ङ्कनाशशङ्क्याह योगाद्वेति सहकार्य्याभावे सामर्थ्याभावात् फलानुपपत्तेश्चका

नाशाशङ्क्यार्थः ध्यानसहितमीश्वरे कर्म्मसमर्पणं मोक्षायेत्यत्र प्रमाणा
भावात् गृहस्थो योगभ्रष्टशब्दवाच्यो न भवतीति दूषयति नेति गृहस्थस्य
योगभ्रष्टशब्दवाच्यत्वाभावे हेत्वन्तरमाह एकाकीति न खल्वेतानि विशेष
णानि गृहस्थसमवायीनि सम्भवन्ति तेनतस्य ध्यानयोगविध्यभावात् तं
प्रति योगभ्रष्टशब्दवचनमनुचितमित्यर्थः एकाकित्ववचनेन गृहस्थस्यापि
ध्यानकाले स्त्रीसहायत्वाभावाभिप्रायेण भविष्यतीत्याशंक्य अग्निहोत्रा।
दिवद्ध्यानस्य पत्नीसाध्यत्वाभावात् प्रागमप्रतिषेधप्रसङ्गान्नैवमित्याह न
चेति विशेषणान्तरपर्य्यालोचनयापि नायमेकाकिशब्दो गृहस्थपरो
भवितुमर्हतीत्याह नचेति किञ्च गृहस्थस्यैवैकाकित्वादि विवक्षितत्वाध्या
नयोगविधौ तस्योभयभ्रष्टप्रश्नो नोपपद्यत इत्याह उभयेति नहि गृह
स्थं प्रति उभयस्मात् ज्ञानात् कर्म्मणश्च विभ्रष्टत्वमुपेत्य प्रष्टुं शक्यते न
स्यज्ञानात् भ्रंशोऽपि कर्म्मणस्तदभावादनुष्ठीयमानकर्म्मभ्रंशोऽपि प्राग
नुष्ठितकर्म्मवशात् फलप्रतिलम्भात् तन्नो यथोक्तप्रश्नालोचनया न गृह
स्थं प्रति ध्यानविधानोपपत्तिरित्यर्थः ननु भगवता संन्यासस्य प्रतिषि
द्धत्वात् गृहस्थस्यैव योगविधानात् तस्यैव योगभ्रष्टशब्दवाच्यत्वमिति श
ङ्कते अनाश्रित इत्यनेनेति भगवद्वाक्येन प्रतिषेधपरमिति परिहरति
नध्यानेति स्तुतिपरत्वमेव स्फोरयति न केवलमिति सत्वस्य अर्थमनु
तिष्ठन्निति सम्बन्धः वाक्यस्योभयपरत्वमाशंक्य वाक्यभेदप्रसङ्गान्नैव
मित्याह नचेति इतोऽपि भगवतः संन्यासाश्रमप्रतिषेधोऽभिप्रेतो न भ
वतीत्याह नचप्रसिद्धमिति तस्य प्रसिद्धं संन्यासित्वं योगित्वञ्चेति सम्ब
न्धः प्रसिद्धत्वमेव व्याकरोति श्रुतीति इतोऽपि संन्यासाश्रमं भगवान् प्रति
षेधतीत्याह स्ववचनेति विरोधमेव साधयति सर्वकर्म्माणीत्यादिना।
अनाश्रित इत्यादिवाक्यस्य यथाश्रुतार्थत्वानुपपत्तेः स्तुतिपरत्वमुपपादि
तमुपसंहरति तस्मादिति कर्म्मफलसंन्यासित्वमत्र स्तुतिशब्दार्थः स्तु
तिपरं वाक्यमक्षरयोजनयार्थमुदाहरति अनाश्रित इति कर्म्मफलेऽभिलाषो
नास्तीत्येतावता कथं तदनाश्रितत्ववाचोयुक्तिरित्याशंक्य व्यतिरेकमुखेन ता।
विशदयति यो हीति कार्य्यमित्यादि व्याकरोति एवम्भूतः सन्निति कथं
कर्म्मिणः संन्यासित्वं योगित्वञ्च कर्म्मित्वविरोधादित्याशंक्याह यंस

गी॰
टी॰
ष

3

इति स्तुतेरत्र विवक्षितत्वान्नानुपपत्तिश्चोदनीयेति मन्वानः सन्नाह इत्येवमिति
न निरग्निरित्यादेरर्थमाह नकेवलमिति अग्नयो गार्हपत्याहवनीयान्वाहार्यप
चनप्रभृतयः तत्र नत्वनग्निरेव सिद्धमक्रियत्वमग्निसाध्यत्वात्क्रियाणां तथा च न निर
ग्निरित्येतावतैवापेक्षितसिद्धेर्नचाक्रिय इत्यनर्थकमर्थं पुनरुक्तेरिति तत्राह
अनग्नीति उत्तरश्लोकस्य तात्पर्यं दर्शयितुं व्यावर्त्यामाशङ्कां दर्शयति ननु चे
ति प्रसिद्धपरित्यागाप्रसिद्धिरुपादीयमाना प्रसिद्धिविरुद्धेति दोषं दूषयति
नैष दोष इति उभयस्य त्यागो सक्रियेच सत्त्वादित्यस्य चेदर्थः गुणत्वेनाभय
सम्यासत्वे प्रश्नपूर्वकं प्रकटयति ननु कथमित्यादिना ॥ १ ॥

स्वामिकृतटीका

शुद्धचित्तेनापि ध्यानं विना संन्यासमात्रतः मुक्तिः स्यादिति षष्ठेस्मिन् ध्यानयो
गो वितन्यते ॥ १ ॥ पूर्वाध्यायान्ते संक्षेपेणोक्तं योगं प्रपंचयितुं षष्ठाध्यायारम्भः त
त्र तावत्सर्वकर्माणि मनसा संन्यस्येत्यारभ्य संन्यासपूर्विकायाः ज्ञाननिष्ठा
यास्तात्पर्येणाभिधानात् दुःखरूपत्वाच्च कर्मणः सहसा संन्यासातिप्रसंगे प्राप्ते
वारयितुं संन्यासादपि श्रेष्ठत्वेन कर्मयोगं स्तौति अनाश्रित इति द्वाभ्यां कर्मफ
लमनाश्रितः अनपेक्षमाणः अवश्यं कर्तव्यतया विहितं कर्म यः करोति स ए
व संन्यासी योगी च न निरग्निः अग्निसाध्येष्टाख्यकर्मत्यागी च नचाक्रियः अनग्नि
साध्यपूर्ताख्यकर्मत्यागी च ॥ १ ॥

सत्

पैशाचभाष्यं

अतीताध्यायान्ते योगस्य सम्यग्दर्शनं प्रतिश्रुत्वं योगस्य ध्यानस्य सूत्रभूतांश्लो
कान् स्पर्शान्कृत्वा बहिर्बाह्यानित्यादयः उपदिष्टास्तेषां वृत्तिस्थानीयोयं षष्ठो
ध्याय आरभ्यते अनाश्रितः कर्मफलमित्यादि स संन्यासी च अनाश्रितः नाश्रि
तः कर्मफलस्य यानप्रयुज्यत इत्यर्थः कार्यं कर्म कर्तव्यं नित्यं कर्माग्निहोत्रा
दि करोति यः स संन्यासी च योगी च फले संन्यासी च योगी च योगांगत्वेन कर्मा
नुष्ठानात्मनः न केवलमनग्निरक्रियः नैव सिद्धो लोक इति तत्संपादयति भ
गवान् ॥ १ ॥

रामानुजभाष्यं

उक्तः कर्मयोगः सपरिकरः इदानीं ज्ञानयोगकर्मयोगसाध्यात्मावलोकन
रूपयोगाभ्यासविधिरुच्यते तत्र कर्मयोगस्य निरपेक्षयोगसाधनत्वं द्रढयि

वेत्तानाकारकर्मयोगोयोगशिरस्कः अदर्शयतेकर्मफलंस्वर्गादिकमनाश्रितः
कार्यंकर्मकर्मानुष्ठानमेवकार्यं सर्वात्मनाःस्मन्तस्तूनपरमगुरुणारापरन्
रूपतयाकर्मैवममप्रयोजनं तत्साध्यनकिंचिदितियःकर्मकरोतिससंन्यासी
चज्ञानयोगनिष्ठश्चयोगीचकर्मयोगनिष्ठश्च आत्मावलोकनसाधनभूमाम।
यनिष्ठश्चननिरग्निर्नचाक्रियः नचोदितयज्ञादिकर्मस्वप्रहृत्तः नकेवलंज्ञान
निष्ठः तस्यहिज्ञाननिष्ठैव कर्मयोगनिष्ठस्यतूभयमित्यभिप्रायः १॥

अभिनवगुप्तकृतटीका

एवंप्राक्तनेऽध्यायगणेनसाधितोऽर्थः श्लोकद्वयेननिगद्यते कार्यंसज्ञात्यादि
विहितं संन्यासीति योगीतिपर्यायावेतौ अनयवाह १॥

परमार्थप्रपाटीका

अवश्यंकार्यतयाविहितंकर्मयःकरोतिसएवसंन्यासीयोगीच कर्मफलानपे
क्षत्वमेवकर्मसंन्यासः विहिताचरणमेवकर्मयोगःएतद्व्याख्यातेनिषेधयति
ननिरग्निर्नचाक्रियइति अयमर्थः कश्चिदस्नुरोतःकरणःशास्त्रीप्रतीतिमा
त्रेणाहंमुक्तइतिमत्वाःग्निहोत्रादिकंत्यजति सनिरग्निःनिर्गतोग्निर्यस्मात्
तथातद्वदवशीकृतांतःकरणःकरचरणचेष्टारहितःसन्नूस्णीं नेत्रेनिमील्य
मिथ्याचारस्तिष्ठतिसोऽक्रियस्तथाविधःसंन्यासीयोगीवानभवतीत्यर्थः १

वनमालीटीका

पंचमेऽतेवदद्योगंसंक्षेपेणरमापतिः तस्यव्याख्यानरूपोयंषष्ठाध्यायःप्रतन्य
ते १ तत्रसर्वकर्माणिमनसा...योगनिष्ठावक्तव्यातत्रन्याज्यत्वेनकर्मयोगस्य
हीनत्वशंकास्यात्तन्निरासायाधिकारिणःकर्मयोगंस्तौति अनाश्रितइतिद्वा
भ्यांकर्मणःफलमनाश्रितोअनपेक्षमाणःसन्कार्यंस्वस्यकर्तव्यतयाशा
स्त्रेणविहितंनित्यमग्निहोत्रादिकर्मकरोतियःससकर्मापि...संन्यासी
चयोगीचेति संन्यासोहित्यागः चित्तगतविक्षेपाभावश्चयोगःतौचास्यस्तः
फलत्यागात्फलतृष्णाकृतचित्तविक्षेपाभावाच्च कर्मफलतृष्णात्यागएवात्र
गौणाभ्यांसंन्याससयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्यशास्त्रस्यकर्त्र
नाय एतादृशकर्मानुष्ठानंसंन्यासयोगावश्यंभाविनावित्यर्थः अतोयएव
ननिरग्निःत्यक्ताग्निसाध्यश्रौतकर्मत्यागी नचानिःक्रियःअग्निनिरपेक्षश्रौतस्मा
र्तक्रियात्यागी तथापिसंन्यासीयोगीचेतिमतव्यः अनाश्रितइत्यनेनैवसर्वक

गी॰
टी॰
ष

र्मसंन्यासितिलक्षणैरग्निरितिव्यर्थंस्यादित्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्यन्ते नि
रग्निरिति संन्यासी क्रियाशब्देन चित्तवृत्तीरुपलक्ष्याक्रिय इति निरुद्धचित्तवृत्तिर्यो
गीचकथ्यते तेन न निरग्निः संन्यासीमतो न चाक्रियो योगी मतव्य इति यथा
संख्यमुभयव्यतिरेकोदर्शनीयः एवं सति न न्यूनमप्युपपन्नमिति द्रष्टव्यम् १ ॥

ऊत्तमवैजयन्तीटीका

पञ्चमान्ते सूत्रभूतो यो योगः परिकीर्तितः तस्यार्थो विस्तरः श्लोकषष्ठेः स्मिंस्थि
निरूप्यते १ इत्येवं ज्ञानगर्भकः स्वस्वरूपदर्शनासाधारणसाधनभूतः सपरिक
रः कर्मयोगः श्लोकः इदानीं यः पञ्चमान्ते श्लोकत्रयेणोक्तो ज्ञानकर्मसाध्यात्म
दर्शनाभ्यासरूपः साङ्गः सविस्तरः सपरिकरः ध्यानयोगः स प्रोच्यते तत्रादौ
योगस्यासाधारणसाधनत्वरूपं कर्मयोगं वक्ति योगशिरस्कस्य कर्मयोगस्य ज्ञा
नकारत्वं पार्थसारथिर्भगवान्पार्थं प्रोवाच अनाश्रित इति यथेह कर्मजितो
लोकः क्षीयते एवमेवामुत्र पुण्यजितो लोकः क्षीयते परीक्ष्य लोकान् कर्मजिता
न् ब्राह्मणो निर्वेदमायादित्यादिश्रुतस्तुच्छमिहामुत्र च कर्मफलं ततस्तदगतरूपमना
श्रितः नाकाङ्क्षितवान्सन् यो मुमुक्षुः कार्यं श्रीपुरुषोत्तमसमाराधनकारिणा
मदुपदेशाराधनरूपं मम परमपुरुषार्थभूतमेतद्व्यतिरिक्तं किंचिदपि वस्तु
तन्मम प्रयोजनं नास्तीत्येवं प्रयोजनेन निश्चयेन करणीयं कर्मानुष्ठानं करोति
एकस्य शब्दो वधारणार्थकः स योगाख्यवक्ष्यमाणरूपाद्वितीयस्तृतीयस्य पुनरर्थे
कः स संन्यासी एव ज्ञानयोगनिष्ठ एव च पुनः स योगी एव कर्मयोगनिष्ठ एव
भवति स उभयनिष्ठ एव भवतीत्यर्थः न निरग्निः निर्गतोऽग्निर्होत्रलक्षणकर्म
यस्मात्स तथा पूर्वोक्तयज्ञादिकर्माप्रवृत्तो न किन्तु तेषु प्रवृत्त एव न चाक्रियः स
वकेवलं ज्ञानयोगनिष्ठ एव भवतीति न किं तु कर्मयोगनिष्ठोऽप्यर्थः २ ॥

मधुसूदनीटीका

कर्मणां फलमनाश्रितोऽनपेक्षमाणः फलाभिसंधिरहितः सन् कार्यं कर्तव्यतया
शास्त्रेण विहितं नित्यमग्निहोत्रादिकर्म करोति यः स कर्म्यपि सन् संन्यासी
च योगी चेति स्तूयते संन्यासो हि त्यागः चित्तगतविक्षेपाभावश्च योगः तौ चास्य
विद्येते फलत्यागात्फलतृष्णात्यागाच्चित्तविक्षेपाभावाच्च कर्मफलतृष्णात्याग एवा
त्र गौण्या वृत्त्या संन्यासयोगशब्दाभ्यामभिधीयते सकामानपेक्ष्य प्रशस्यकथना
य अवश्यंभाविनो हि निष्कामकर्मानुष्ठानाद्योगिनो भवतीति न वा ज्ञाननिष्ठयोः संन्यासयोगो

तेन सूत्रं त्रिभिः श्लोकैः
पञ्चमान्ते यदीरितं बहु
आरभ्यते ध्यायस्तज्ज्ञा
नेनायविस्तरात् अत्र
सर्वकर्मत्यागेन योग वि
धास्यन् तत्याज्यत्वेन हि
नत्मा शंक्य कर्मयोगं
द्वाभ्यां स्तुवन्

नचाक्रियः अग्निनिरपेक्षस्मार्तक्रिया
त्यागी च न भवति

तस्माद्यद्यप्ययं न निरग्निः अग्निसाध्यश्रौतकर्मत्यागी न भवति" तथापि संन्या
सी च योगी चेति मंतव्यः अपवादान्न निरग्निर्न चाक्रियः संन्यासी योगी चेति मंतव्यः
किं तर्हि सक्रियश्च निष्कामकर्मानुष्ठायी संन्यासी योगी चेति मंतव्य इति स्तूय
ते अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वा इत्येव प्रशंसा लक्षणया यावत् इयोप
पत्तिः अथवा अक्रियश्चानेनैव सर्वकर्मसंन्यासिनि लब्धे निरग्निरिति व्यर्थं स्यादि
त्यग्निशब्देन सर्वाणि कर्माण्युपलक्ष्य निरग्निरिति संन्यासी क्रियाशब्देन चित्तवृ
त्तीरुपलक्ष्य अक्रिय इति निरुद्धचित्तवृत्तिर्योगी च कथ्यते तेन न निरग्निः संन्यासी मं
तव्यो न चाक्रियो योगी मंतव्य इति यथासंख्यमुभयव्यतिरेको दर्शनीयः एवं
सति न त्रयमप्युपपन्नमिति द्रष्टव्यं १ ॥

सदानंदी टीका

एवं ध्यायं ध्यायं सज्जनमनिवेद्य मधुरिपोर्गुणान् स्मारं स्मारं भवजलधिपारंगम।
यतः रसेणयेणाय यडुपतिगिरां वेदशिरसां मतिभ्यो भूयो मम हरिपदाब्जे प्रवि
शतु १ ज्ञानयोगः पुराप्रोक्तः ससंन्यासो विमुक्तिदः कर्मापि चित्तशुद्ध्यर्थं प्रोक्तं।
कृत्स्नार्चनपरं २ चित्तशुद्धावपीदानीं विक्षेपे सति योगिनां निर्वाणशांतिरूपं यत्त
त्वं तस्मात्तदंजसा ३ येनोपायेन तत्सिद्धिः स्यादुपायः स उच्यते तत्तद्रूपतया यो
गः पंचमांते यईरितः ४ स एव विस्तरेणात्र षष्ठाध्याये प्रपंच्यते तत्रादौ कर्म
णा चित्तशुद्धिहेतुतया स्तुतिः ५ क्रियते कामसंत्यागाद्योगसंन्याससाम्यतः फ
लाभिसंधिशून्यः सन्नित्यं कर्म करोति यः ६ सोऽत्रस्मात्तु संन्यासयोगयोः फल।
मश्नुते निरग्निरक्रियो यस्तु संन्यासस्तुर्य आश्रमः ७ न तन्निषेधो हरिणा क्रियते क
र्मणस्तु नो किंतु कामपरित्यागमात्रेणैवास्य कर्मिणः ८ क्रियते स्तुतिरित्येव मा
शयो गम्यते हरेः फलाभिलाषसंत्यागी चित्तसंरोधनात्परः स संन्यासी फलत्या
गाद्योगी चित्तसमाधितः निरग्निरिति नेनोक्तः संन्यासी कर्मवर्जितः १० अक्रिय
श्चित्तसंरोधाद्योगी नैव विवेचने यद्यपीदृक् कर्मयुक्तस्तथापि स्तूयते न तथा ११ का
मनात्यागसाम्येन संन्यासीत्यादिशब्दितः १२ ॥ १ ॥

नीलकंठी टीका

पूर्वाध्यायांते सूचितं ध्यानयोगं विवरीतुमिच्छंस्तदधिकारहेतुत्वात्कर्मयोगं ता
वत्स्तौति द्वाभ्यां अनाश्रित इति यः कर्मणां फलं अनाश्रितोऽनपेक्षमाणः कार्यं अ
वश्यकर्तव्यं नित्यं कर्म करोति स एवं फलसंकल्पत्यागात् संन्यासी च योगी च भव

ति न तु निरग्निर्यो विधिवतः श्रौतस्मार्तकर्मत्यागी स एव संन्यासी नापि अक्रियस्त्या
क्तवाङ्मनःकायक्रिय एव वा योगीति १॥

आनन्दीटीका

अतीतानंतराध्याये हि योगपारंपर्यात्फलं च प्रपंचयितं संन्यासस्तु महाबा
होऽदुःखमाप्तुमयोगतः इति यदुपक्रांतं तत्र संन्यासयोगशब्दयोरनिर्वचना
दर्जुनस्य वर्तते याश्रमे कर्मसंन्यासशंकानिवारणार्थं श्रीभगवानुवाच
कर्मणः फलमनाश्रितः फलासंगं त्यक्त्वा कार्यं चोदितमवश्यकरणीयं
यः कर्म करोति स एव यद्यप्याश्रमे वर्तमानः गृहस्थः संन्यासी च कर्मकृदे
व फलत्यागात्संन्यासिशब्दवाच्यो भवति योगी च पुनर्ध्यानपूर्वक
र्मानुष्ठानाद्योगिशब्दवाच्यो भवति चकारद्वयमेकस्यैवैकदा द्वावेवा
नुष्ठातुमसमुच्चयार्थं न निरग्निर्न चाक्रियः अग्नित्यागात्कर्मत्यागाच्च संन्या
सिशब्दवाच्यो न भवति १॥

रामकंठीटीका

आत्मज्ञानविहितकर्मसमुच्चयानुष्ठानरूपस्य सकलप्रकरणसिद्धांतस्य
प्रथमेनाध्यायेन प्रस्तावनामात्रमुपक्रांतम् द्वितीयेन ज्ञानकर्मणोः स्व
रूपमुपदर्शितम् तृतीयेन तयोर्ज्ञानकर्मणोर्भिन्नानुष्ठानविषयत्व
भ्रांतिरपाकृता चतुर्थेनैवंविधसमुच्चयानुष्ठानरूपस्य योगस्य परस्मात्
कारणात्प्रवृत्तिरुपदर्शिता कर्मणश्च नानारूपत्वं पंचमेन तदेव ज्ञान
कर्मणी संन्यासयोगाविति प्रदर्शितम् इदानीं तयोर्ज्ञानकर्मणोः समुच्च
येनानुष्ठानमनयोः पदार्थयोः किं सर्ववर्णाः सर्वाश्रमाश्चाधिक्रियंते उत
नियताः केचनेति संशयनिरासार्थं सर्वसाधारण्यमस्य प्रतिपादयितुम
ध्यायांतरेणाह श्रीभगवानुवाच कर्मफलं तस्य तस्य कर्मणो यज्ञादेः
क्रियमाणस्य फलं स्वर्गादिभोगात्मकमनाश्रितोऽनभिसंधानादनालं
बितः सन् यः पुमान् कार्यं शास्त्रकर्तव्यमिति वर्णाश्रमनियमेन चोदितं क
र्म करोति अनुतिष्ठति स संन्यासी त्यागवान् योगी च समाहित उच्यते
तेन सर्ववर्णाः सर्वाश्रमिणश्चात्रमोक्षफलसमुच्चयानुष्ठानेऽधिकृता॥

इत्युक्तम् कर्मफलानभिसंध्यानमात्रेण संन्यासत्वं तद्युक्तविहित
कर्मानुष्ठानेन च योग इति संग्रहेण सकलप्रकरणप्रतिपाद्योऽर्थः स्फुटी
कृतः तत्र च यथाप्रतिपादितात्मज्ञानैकतानतान्तःकरणतया व्यति
रिक्तस्वाभाविककर्मफलनिरभिकाङ्क्षः सन् रागादिदोषनिर्मुक्तस्वभाव
त्वादधिकारकालात् प्रभृति प्रसक्तं कर्म योऽनुतिष्ठति स ब्राह्मणोक्तत
त्रिविधो विशेषः गृही वा ब्रह्मचारी गृहस्थो वानप्रस्थो यतिर्वा सर्वथैव संन्या
सी योगी च भवति न तु निरग्निरेवाक्रिय एव वा निरग्न्यक्रियशब्दाभ्यां
ब्रह्मचारी यतिश्च लक्ष्यते यतः केचिदनयोरेवाश्रमयोरपर्यालोचितप
रमार्थत्वान्नैष्कर्म्याभिमानिनो मोहात् हेतुत्वं मन्यमाना ब्रह्मचारियतीरे
व संन्यासित्वं योगित्वं च प्रतिजानते यो हि ब्रह्मचर्यादेव परिव्राजकध
र्मं समाश्रितः सदारपरिग्रहाभावादनाहिताग्निः सन् मूलादेव परित्यक्तय
ज्ञादिक्रियो ब्रह्मचार्येकः संन्यासी च योगी चेतेषां मतः यो वाश्रमत्रया
नुष्ठितः स्वाध्यायपाठयागदानाध्यापनयजनप्रतिग्रहादिकाः सकलाः क्रि
याः परित्यज्य निराशिषमाश्रममाश्रितः स यतिर्द्वितीयः संन्यासी यो
गी चेतेषां च मतः द्वयोरप्यनयोरेवं परेषां तु नाक्रियाणां त्यागे सति मो
क्षफलभागित्वात् [illegible]

[illegible] ॥ लौकिकी [illegible]रीका

एवं कर्मयोगे नाविध्यानयोगं विनाऽमुक्तिमावहन् ज्ञानकाष्ठाधिरोहेन
स्यादित्यतः षष्ठोऽध्याय आरभ्यते तत्र प्राक्तनेनाध्यायगणेन साधितमर्थं
श्लोकद्वयेन श्रीभगवानुवाच" यः कर्मफलस्यानभिसंधानादनाश्रितः
कार्यमवश्यकर्तव्यं शास्त्रीयं स्वाभाविकं वा कर्म करोति स एव फलानभि
लाषेण संन्यासी स एव स्वस्वभावविहिततया योगी चोच्यते इति शेषः न
तु केऽप्यलाभे सर्वकर्माणि संत्यक्तुं न शक्यं देहधारिणा त्यजेत् कर्मफलं
यो वा स त्यागीत्यभिधीयते अग्निशब्दः शास्त्रविहितकर्मोपलक्षकः तेन
निरग्निः शास्त्रीयकर्मत्यागी संन्यासी योगी वा न मंतव्यः न चाक्रियः स्वा
भाविककर्मत्यागी उक्तयुक्त्या संन्यासी योगी वा मंतव्यः न निरग्निरित्या
दिना यमर्थोऽभिधीयते निरग्निश्च न भवति निष्क्रियश्च न भवति अयमर्थः सं

स्यासीत्यद्भुतम [illegible] ॥ १ ॥

पंचोलीटीका

पंचमेध्याये ध्यानयोगस्य सम्यग्दर्शनं प्रति अन्तरंगस्य साधनस्य सू-
त्रभूताः श्लोकाः स्पर्शान्कृत्वेत्यादय उपदिष्टास्तेषां हि वृत्तिस्थानीयोयं।
षष्ठोध्यायः आरभ्यते तत्र सम्यग्दर्शनं प्रति संन्यासात् ध्यानयोगं बहि-
रंगमपि कर्म यावत् ध्यानयोगारोहणसमर्थत्वावत् गृहस्थेन अधि-
कृतेन तमारोढुमिच्छता पुरुषेण कर्म कर्तव्यमित्यतस्तं स्तौति अना-
श्रितेति यः कर्मफलमनाश्रितः कर्मफलेषु निःस्पृहः कार्यं नित्यनैमित्ति-
केकर्म करोति च पुनः स संन्यासी च पुनः स योगी चित्तसमाधानयुक्तो
तानवाः पुनः न निरग्निः अग्निसाध्यक्रियारहितः पुनः नाक्रियः न
स्मात् क्रियारहितः एवं संन्यासी योगी च भवति कथं कर्मफलसंन्या-
सात् संन्यासित्वं योगांगानेन च कर्मानुष्ठानात् कर्मफलसंकल्पस्य च।
चित्तविक्षेपहेतोः परित्यागात् योगित्वं चेति ॥ १ ॥

भगवीरसमिद्धोधिनी ॥

ॐ श्रीकार्तवीर्यार्जुनाय नमः ॥ अथ पूर्वैराध्यायगतेन प्रति-
पादितं मोक्षं पुनरपि निश्चयदार्ढ्याय भगवानुवाच अनाश्रि-
त इति कर्मणां स्ववर्णाश्रमोचितानां शुद्ध्यादिव्यापाराणां फलं
ज्ञातिहिंसाजन्यं पापमनाश्रितो मनसा कलयन् कार्यं यानां स्वेषां
चोदनादवश्याचरणीयं कर्म स्ववर्णाश्रमोचितं शुद्ध्यादिलक्षणं
व्यापारं यः करोति अनुतिष्ठति स संन्यासी योगी च भवति अन्य-
थाप्रतिपन्नानां पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः स्वज-
नं हि कथं हत्वा सुखिनः स्याम माधवेत्यादिरूपाणां संकल्पानां सं-
न्यसनात् अथवा नववेनावश्याचरणीयेषु कर्मसु प्रवृत्तिलक्षण

कौफलवत्वाच्च न निरग्निरिति निरग्निरनाहिताग्निरक्रियश्चतदाव
परिग्रह इति यावत् सर्वपरिग्रहस्वीकारेनंतरं तत्यागी वा न
ष्यादि अग्निसाध्येनाग्न गार्हस्थ्यं लक्षते तथाच अनेगार्हस्थ्यात्रि
क्रांतो निरग्निर्दारादित्यागी संन्यासी न भवति संकल्पनामत्या
गान्न वा क्रियश्चेति क्रियाःस्वजात्युचिताव्यापारास्तद्रहितो
क्रियः स च योगी न भवति कर्ममात्ररहितस्य ज्ञानमध्यस्थितेः
शारीरयात्राप्रसिद्धेश्च कर्मणामवश्यमाचरणीयत्वे सिद्धे समादि
ततालक्षणयोगासिद्धेरिति भावः अथवाच निरग्निरग्निसाध्ये
ष्टाख्यकर्मत्यागी अक्रियो नग्निसाध्यपूर्ताख्यकर्मत्यागीच
न संन्यासीति योगीतिच किंत्विष्टापूर्ते आचरन्नेव संन्यासी
विकल्पसंकल्पत्यागात् योगीच तत्सावधानमनस्कत्वादि
तिभावः १॥

अथ भाष्य

सानांतरंगं समाधियोगमाहात्म्येन त्यायेन विवक्षितं संन्या
समाह योगेन सहज्ञनाश्रित इति चतुर्थाश्रमिणोप्यग्निः कि
याचोक्ता दैवमेवेत्यादौ अग्निर्ब्रह्मचतत्सृजा क्रियान्यासाश्र
मेस्त्वेतिच तस्मान्निरग्निरक्रियः संन्यासी योगीच न भवा
येव संन्यासोपियोगात पूर्तइत्याह १

भाषानुवाद

श्रीधरस्वामी छठयें अध्यायके आरम्भमे वर्णन करते हैं कि मनुष्यों को चित्तशुद्ध होनेसे भी ध्यानके विना केवल सन्न्यास मात्रसे मुक्ति नहीं मिलती है इसी हेतु से श्रीभगवानछठयें अध्यायमे ध्यानयोग विस्तार करि कहते हैं कि पञ्चम अध्यायके अन्तभागमे संक्षेप से कहा गया जो ध्यानयोग सोई विस्तार करने को छठयें अध्यायका आरम्भ अर्थात् सर्व कर्म्माणि मनसा सन्न्यस्यास्ते सुखं वशी इस ५ अध्यायके श्लोक से सबकर्म त्याग पूर्वक ज्ञाननिष्ठा की प्रशंसा करने से और कर्म्म अनुष्ठान क्लेशकारी है इससे हठात् कर्मत्याग की अवस्था विना भी कर्म्म का त्याग मनुष्यों के मनमे होय उठे है सो तिसके निवारन के अर्थ कर्म्म छोड़ने से कर्म करना श्रेष्ठ हैं यह कहि कर्म्म योगकी बड़ाई करते हुये भगवान कहते हैं कि अनाश्रित कहे कर्म्म फल की आकाङ्क्षा रहित होय कर सब कर्म्म अवश्य ही कर्तव्य है इस विचार से जो विहित कर्म्म का अनुष्ठान करै सोई सन्न्यासी औ सोई योगी है नहीं तो निरग्नि कहे अग्निसाध्य यज्ञादि कर्म्म त्यागी औ अक्रिय अर्थात् वेअग्नि के कर्म्म कुआं ताल बावड़ी खनन तथा दानादि कर्म्म त्यागी होके लोग अपनेको योगी समझैंगे किन्तु ऐसा नहीं है तात्पर्य यह कि फल ही का त्याग उचित कर्म्मका त्याग नहीं अर्थात् ऊपर लिखे सब कर्म्म विसश्रीमर्थ करना ही चाहिये सोई कहा अनाश्रितः कर्म्मफलं कार्य्यं कर्म्म करोति यः १॥

दोहा॥

कर्मफलआश्रयत्यागकेकार्यकर्मकरेजोय सोसंन्यासीयोगी सोनहि निरग्नि अक्रिय होय १॥

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव । नह्यसं न्यस्तसंकल्पो योगी भवति कश्चन २॥

शाङ्करभाष्यं

गौणं तु भयं तत्र मुख्यसंन्यासित्वं योगित्वं चाभिमतमित्येतमर्थं दर्शयि तुमाह यं संन्यासमिति यं सर्वकर्मतत्परित्यागलक्षणं परमार्थसंन्यासं स न्यासमिति प्राहुः श्रुतिस्मृतिविदो योगं कर्मानुष्ठानलक्षणं तं परमार्थसं न्यासं विद्धि जानीहि हे पाण्डव कर्मयोगस्य प्रवृत्तिलक्षणस्य तद्विपरीतेन नि वृत्तिलक्षणेन परमार्थसंन्यासेन कीदृशं सामान्यमङ्गीकृत्य तद्भाव उच्यत इत्यपेक्षायामिदमुच्यते अस्ति परमार्थसंन्यासेन सादृश्यं कर्तृद्वारकं कर्म योगस्य यो हि परमार्थसंन्यासी सत्यक्तसर्वकर्मसाधनतया सर्वकर्मतत् फलविषयं संकल्पं प्रवृत्तिहेतुकामकारणं संन्यस्यति अयमपि कर्मयोगी कर्म कुर्वाण एव फलविषयं संकल्पं संन्यस्यतीत्येतमर्थं दर्शयन्नाह नहि। यस्मादसंन्यस्तसंकल्पः असंन्यस्तः अपरित्यक्तः फलविषयः संकल्पोऽभिसन्धिर्ये न सोऽसंन्यस्तसंकल्पः कश्चन कश्चिदपि कर्मी योगी समाधानवान् भवति न स म्भवतीत्यर्थः फलसंकल्पस्य चित्तविक्षेपहेतुत्वात् तस्माद्यः कश्चन योगी कर्मी संन्यस्तफलसंकल्पो भवेत् स योगी समाधानवान् भवति न विक्षिप्तचित्तो भ वति चित्तविक्षेपहेतोः फलसंकल्पस्य संन्यस्तत्वात् इत्यभिप्रायः योगाङ्गत्वे न कर्मानुष्ठानात् कर्मफलसंकल्पस्य वा चित्तविक्षेपहेतोः परित्यागान्नैयो गित्वेति संन्यासित्वं चेत्यभिप्रेतमुच्यते एवं परमार्थसंन्यासकर्मयोगयोः कर्तृद्वारकं संन्याससामान्यमपेक्ष्य यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्ड वेति कर्मयोगस्य स्तुत्यर्थं संन्यासत्वमुक्तं २॥

आनन्दगिरिटीका

सम्भवति मुख्ये संन्यासित्वादौ किमिति गौणं तदुभयमभीष्टमित्याशंक्य मु ख्यस्य कर्मण्यसम्भवाद्गौणमेव तत्रेति विवक्षित्वा तदिष्टमित्यभिप्रेत्याह नपुन रिति चित्तव्याकुलत्वहेतुकामनात्यागाच्चित्तसमाधानसिद्धेर्योगित्वं कर्मि णोऽपि युक्तं संन्यासित्वेन तस्य विरुद्धमिति शङ्कामानेनमनुक्तेऽर्थे श्लोकमव तारयति यमेतमिति परमार्थसंन्यासं प्राहुरिति सम्बन्धः इतीयं संन्यास स्य प्रामाणिकाभ्युपगतत्वादितीति शब्दो योऽसौ योगं फलतरसोपरित्यागसमा

हितचैतत्स्येति शेषः यदुक्तं संन्यासित्वं योगित्वं च रहस्य सर्वगौणमिति तदु
त्तराईयोजनया प्रकटयितुमुत्तराईमवतारयति कर्मयोगस्येति कर्मयोग
स्य परमार्थसंन्यासेन कर्तृत्वादेकं साम्यमुक्तं व्यक्तं करोति योहीति संकल्पाति
सर्वाणि कर्माणि साधनानि च येन मनसा तथाकर्तृत्वस्वभावस्तया तया सर्वकर्म
विषये तत्फलविषये च संकल्पमजनीत्यर्थः संकल्पत्यागे तत्कार्यका
मत्यागः तत्त्यागे तज्जन्यप्रवृत्तित्यागश्च सिध्यतीत्यभिसन्धाय विशिनष्टि प्रह
रीति कर्मण्यपि यथोक्तसंकल्पसंन्यासित्वमस्तीत्याह अयमपीति तदप
रित्यागे वा कुतश्चेतस्तया कर्मानुष्ठानस्यैव दुःशकत्वादित्यर्थः उक्तमेव सा
मर्थ्यव्यक्तीकुर्वन् व्यतिरेकं दर्शयति इहेतमिति फलसंकल्पापरित्यागे कि
मिति समाधानवत्ताभावस्तत्राह फलेति व्यतिरेकमुखेनोक्तमर्थमन्वय।
मुखेनोपसंहरति तस्मादिति हिशब्दार्थस्य यस्मादित्युक्तस्य तस्मादित्यनेन
सम्बन्धः कर्मणि प्रतिपथोक्तविधौ हेतुहेतुमद्भावमभिप्रेत्य द्वितीयविधौ
हेतुमाह चित्तविक्षेपेति पूर्वश्लोके पूर्वोत्तराईाभ्यामुक्तमनुवदति यमिति २॥

स्वामिकृतटीका

कृतरस्यपेक्षया कर्मयोगस्यैव संन्यासत्वं प्रतिपादयन्नाह यमिति यं सं
न्यासमिति प्राहुः प्रकर्षेणाश्रेष्ठत्वेनाहुः न्यासमपवेःत्यरेचयदित्यादिश्रुतेः
केवलं संन्यसनाद्धेतोः योगमेव तं जानीहि कृतरस्यपेक्षायामिति शङ्काको
हेतः योगेऽप्यस्तीत्याह नहीति नसंन्यस्तः फलसंकल्पो येन सः कर्मनिष्ठो।
ज्ञाननिष्ठो वा कश्चिदपि न हि योगी भवति अतः फलसंकल्पत्यागसाम्यात्सं
न्यासी च फलसंकल्पत्यागादेव चित्तविक्षेपाभावात् योगी च सम्भवत्येवेत्यर्थः २॥

पिशाचभाष्य

यं संन्यासमिति प्राहुः लौकिकाः प्राहुः योगं कर्मयोगं तं विद्धि विजानीहि पां
डव अस्ति हि तस्मिन्निरग्निनाऽक्रियेण परमार्थसंन्यासित्वं किं तदित्यत्राह
परमार्थसंन्यासी भूतभविष्यद्वर्तमानेषु सर्वविषयसंकल्पसंन्यस्यति अ
यं च कर्मी नत्यसंन्यस्तसंकल्पो योगी भवति कर्मी च सन् उच्यते कश्चन कश्चि
दपि संन्यासी नोच्यते २॥

रामानुजभाष्य

उक्तलक्षणकर्मयोगे ज्ञानमप्यस्तीत्याह यं संन्यासमिति ज्ञानयोग इति आत्मया
थात्म्यज्ञानविदः प्राहुः तं कर्मयोगमेव विद्धि तस्य परिकृतिनस्य संन्यस्तसंक
ल्पो योगी भवति कुशलेति आत्मयाथात्म्यानुसंधानेनानात्मनि प्रकृतावात्मसंकल्पः सं
न्यस्तः परित्यक्तो येन स संन्यस्तसंकल्पः अनेवंभूतोऽसंन्यस्तसंकल्पः न ह्युक्तेषु क
र्मयोगेष्वनेवंभूतः कश्चन कर्मयोगी भवति २॥

यं संन्यासमिति नयाच्च योगमंतरेण संन्यासो नोपपद्यते एवं कल्पसंन्या-
सं विना योगो न युज्यते तस्मात्तेन संबद्धौ योगसंन्यासौ न निरग्निरित्या-
दिनायमर्थोऽभिधीयते निरग्निश्च न भवति निष्क्रियश्च न भवति अयं संन्या-
सीत्युच्यते २ ॥

परमार्थप्रपाटीका

अथ साहचर्यं प्रकटयन्नाह यमिति भो पाण्डव सम्यक्प्रकारेण यं संन्यासं
प्राहुः प्रकर्षेण श्रेष्ठत्वेनाहुस्तं योगं विद्धि यस्मात्कारणादसंन्यस्तसं-
कल्पः न संन्यस्ता संकल्पा येन स तथा कर्मनिष्ठो ज्ञाननिष्ठो वा नच कर्मनि-
ष्ठस्त संन्यस्तफलसंकल्पः ज्ञाननिष्ठश्चासंन्यस्तचित्तविक्षेपरूपसंकल्प
एवंविधः कश्चिद्योगी न भवति अत्र भगवदभिमतः संन्यासशब्दार्थस्तु
सम्यक्प्रकारेण मनश्चित्तशुद्धिद्वारा ज्ञानमुपायस्तत एव कर्मोपरमः क-
र्मसंन्यासः न तु कर्मत्यागः तदुक्तमध्यात्ममीमांसायां सम्यङ्न्यासः स-
मासि विमलतरधियः कर्मणां संविदग्नौ संन्यासोऽयं यदध्वा स्वयमुपरमति
ग्रामवक्त्रं प्रविश्य रंभा तावद्धि वृद्धिं भजति फलभरं यावदुच्चैः प्रसूते न कामप
श्चान्त्येवाभ्यतमभिलषतो ज्ञानमुपायः कर्मेति भावः एवं सम्यक्प्रकारेण वि-
मलतरधियः शुद्धान्तःकरणस्य ज्ञेयः संविदग्नौ ज्ञानप्राप्तौ सत्यां कर्मणां या
समाप्तिः संपूर्णता सैव संन्यासशब्दव्याख्यानं तु कर्मत्यागः अत्र दृष्टान्तमाह
यदध्वेति यथा अध्वा मार्गः पथिकं ग्रामवक्त्रं ग्रामद्वारं प्रविश्य स्वयमुपरम-
ति यथा पथिकेनापि ग्रामद्वारप्राप्तिव्यतिरेकेण अन्तरे च मार्गो न मुच्यते किन्तु मा-
र्गः ग्रामद्वारं दर्शयित्वा स्वत एवोपरमति पुनर्दृष्टान्तान्तरमाह रंभेति रंभा
कदली तावद्वृद्धिं भजति यावत्फलभरं प्रसूते पश्चात्फलभरप्रसवा-
नन्तरं स्वयमुपरमं भजति तथैव अप्रसूते मोक्षे अभिलषतो मोक्षार्थिनः पुरु-
षस्य कर्म ज्ञानमुपायस्तत्स्वयमुपरमति २ ॥

वनमालीटीका

असंन्यासेऽपि संन्यासपदप्रयोगनिमित्तगुणयोगमाह यमिति यं कर्मतत्फ-
लपरित्यागं संन्यासमिति शब्दश्रुतयः पुत्रैषणायाश्च वित्तैषणायाश्च लोकै-
षणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीत्याद्याः योगे फलेच्छाकर्तृत्वाभिमान-
योस्त्यागेन विहितकर्मानुष्ठानात्संन्यासं विद्धि अबद्रतेन ब्रह्मदत्तमिमाह नैवयं
संन्यासमेष्टब्रह्मदत्तसदृशोऽयमिति न्यायादन्यवाचकशब्दोऽन्यत्र प्रयुज्यमानः सार

गी.
टी.
६

ष्यंबोधयतिगोणाहमा साहश्यमेवाह नहीतिहियतोसंन्यस्तसंकल्पो
त्यक्तफलसंकल्पः कश्चिदपियोगीनभवत्यपितुसर्वोयोगीत्यक्तफलसं
कल्पएवभवतीतिफलत्यागसाम्यात्तस्माद्रूपचित्तवृत्तिनिरोधसाम्याच्चगौ।
णाकर्मैवसंन्यासीचयोगीचभवतीत्यर्थः नत्वाहभगवान्पतंजलिः योग।
श्चित्तवृत्तिनिरोधइति २॥

10

कुसैवैनयनीटीका

ननुसकलकरणवृत्तिवहिः प्रसरणात्मकेकर्मयोगेनिखिलकरणवृत्ति
निरोधरूपोज्ञानयोगोभवनाकथाशीस्मानीयते इतिचेत्तत्राह यंसंन्यासमि
तिहेपांडवपांडुनंदनेनोत्तमकुलप्रसूतत्वात्त्वायंप्रज्ञाः सम्यग्विदएवेतिश्रु
वितः यंज्ञानयोगंसंन्यासमित्यमुनाप्रकारेणप्राहुः केज्ञानयोगकर्म
याथात्म्यस्वरूपज्ञाः तमेवज्ञानयोगंमोक्षरूपंयोयोगंकर्मयोगमेवत्वंविद्धि।
जानीहीरीतिदर्शयतिहियस्मात् असंन्यस्तसंकल्पःसंकल्पःसंन्यस्तःपरित्यक्तः
संकल्पःफलाभिलाषोभोगाद्यभिलाषश्चयेनसतथानसंन्यस्तसंकल्पोऽसंन्यस्तसं
कल्पोजनःकश्चनकश्चिदपियोगीकर्मयोगीनभवति किंतुयःसंन्यस्तसंक
ल्पःसएवज्ञानयोगीभवेत् सएवकर्मयोगीचापिभवेत् यदेवब्रह्मणाथा
पकर्माणिनवद्वारेपुरेदेहीनैवकुर्वन्नकारयन् कर्तृत्वंनकर्माणिलोकस्य
सृजतिप्रभुरित्याद्युक्तरीत्यात्मयाथात्म्यज्ञानेनप्रकृतोपरित्यक्तैहिकामुष्मि
कफलभोगादिसंकल्पःपुरुषोभवेत्तदैवाभयात्तोनकर्मणःकर्तासंभवे।
त्रान्यथेतिभावः २॥

मधुसूदनीटीका

असंन्यासेपिसंन्यासत्वमाह प्रयोगेनिमित्तभूतंगुणयोगंदर्शयितुमाह यंस
वंकर्मतत्फलपरित्यागंसंन्यासमितिप्राहुः श्रुतयः न्यासएवात्यरेचयती।
ति ब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षा
चर्यंचरंतीत्यादौयोगफलत्वात्साकर्तृत्वाभिमानयोःपरित्यागेनविहितकर्मा
नुष्ठानेनसंन्यासेविहिते पांडव अब्रह्मदत्तेब्रह्मदत्तमित्याहुः नेवयंसंन्यासेह
ब्रह्मदत्तमहर्षेणायमितिन्यायानुसाराः परत्रप्रयुज्यमानःसादृश्यंबोधयति गो
णाहत्यानत्वावारोपेणवा प्रकृतेनकिंसादृश्यमितितदाह नहीति हियस्मा
न असंन्यस्तसंकल्पः अत्यक्तफलसंकल्पः कश्चनकश्चिदपियोगीनभवति

अपि तु सर्वो योगी त्यक्तफलसंकल्प एव भवतीति फलत्यागसाम्यात्सत्त्वप
चित्तवृत्तिनिरोधसाम्याद्गौण्या वृत्त्या कर्मैव संन्यासी च योगी च भवतीत्यर्थः
तथा हि योगः चित्तवृत्तिनिरोधः प्रमाणविपर्ययविकल्पनिद्रास्मृतय इति चि
त्तवृत्तयः पंचविधाः तत्र प्रत्यक्षानुमानशाब्दोपमानार्थापत्त्यभावाख्यानि।
प्रमाणानि षडिति वैदिकाः प्रत्यक्षानुमानागमाः प्रमाणानि त्रीणीति योगा अ
न्तर्भावबहिर्भावाभ्यां संकोचविकासौ द्रष्टव्यौ अनयैव तार्किकादीनां मतभेदाः
विपर्ययस्तु मिथ्याज्ञानं तस्य पंच भेदाः अविद्यास्मितारागद्वेषाभिनिवेशाः त
एव पंच क्लेशाः शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः प्रमाभ्रमविलक्षणः
सदर्थव्यवहारः शशविषाणमसत्पुरुषस्य चैतन्यमित्यादिः अभावप्रत्यया
लंबना वृत्तिर्निद्रा च तत्स्थानां वृत्तीनामभावस्य प्रत्ययः कारणं तमोगुणस्तदा
लंबना वृत्तिरेव निद्रा न तु ज्ञानाद्यभावमात्रमित्यर्थः अनुभूतविषयासंप्र
मोषः स्मृतिः पूर्वानुभवसंस्कारजं ज्ञानमित्यर्थः सर्ववृत्तिजन्यत्वादेते
कथ्यंते लज्जादिवृत्तीनामपि पंचस्वेवान्तर्भावो द्रष्टव्यः एतादृशीनां सर्वासां चित्त
वृत्तीनां निरोधो योग इति च समाधिरिति च कथ्यते फलसंकल्पस्तु रागाख्य
स्मृतीयो विपर्ययभेदस्तन्निरोधमात्रमपि गौण्या वृत्त्या योग इति संन्यास इति
चोच्यत इति न विरोधः २॥

सदानंदीटीका

असंन्यासेऽपि संन्यासमाह योगेऽप्यकारणं गुणयोगं हरिः आह मुमुक्षूणां हिता
य च १ ये कर्मतत्फलत्यागप्राङ्गस्संन्याससमागमाः फलाभिलाषकर्तृत्वाभि
मानत्यागयोगतः २ योगं तद्विद्धि तत्त्वाभ्यां साधनत्वस्य साम्यतः अकर्णिक
र्णोऽस्मिन्नासहेतेनसंन्यासमहेवयं ३ कणितस्य यमिमेव त्यायाङ्गो गुणप्रयुज्यते।
परशाहः परत्रैव सादृश्यं ज्ञापनेजनैः सादृश्ये प्रकृते प्यस्ति कामत्यागो हि
कर्मिणः नात्यक्तफलसंकल्पो योगी भवति कश्चन ५ २॥

नीलकंठीटीका

केन साम्येनायं संन्यासी योगी चेति स्तूयते तत्राह यमिति यो हि त्यक्त
सर्वसंकल्पः स संन्यासी तादृश एव ध्यानयोगी अतो न तयोर्भेदः निःसंक
ल्पत्वस्य त्विह देवमौलत्त्वाणमिति मैत्रायणीयोपनिषदुक्तस्य मोक्षल
क्षणस्य निःसंकल्पत्वस्योभयत्रापि तुल्यत्वात् अतोऽयमपि कर्मयोगी फ
लसंकल्पत्यागात् निःसंकल्पत्वसाम्यात् संन्यासी योगी च भवतीति स्तूय

तदयमर्थः योगाधिकारसिद्धये निष्कामकर्माण्यनुष्ठेयानीति श्लोकद्वयता।
त्पर्यार्थः २ ॥

आनंदीटीका

एवं संन्यासिशास्त्रार्थं निरूपयित्वा योगिशास्त्रार्थमपि निरूपयति ॥ इति।
शब्दक्तनीत्या यं संन्यासं कर्मफलत्यागार्थमाहुः तं कर्मणां क्रियमाणा
नां ब्रह्मणि समस्तक्रियान्यासो योजनायोगं योगशास्त्रार्थं विद्धि कर्मयोग
मेवोक्तनीत्या संन्यासशास्त्रार्थं जानीहीत्यर्थः अत्र हेतुमाह यस्मात्तन्नसं
न्यस्तः संकल्पः फलास्पृहा येनेदृशः कश्चन योगी ज्ञानकर्मसमुच्चया
नुष्ठाता भवति अयच संयमेन यसंन्यासं जित्वा वशीकृतायाम्मेहत
रभ्यमिजिगीषया त्यागमाह तं योगं वित्तवृत्तिनिरोधाख्यं जानीहि तस्मिन्म
स्तेन निरुद्धसंकल्पवित्तवृत्तिर्यतेदृशः कश्चन योगी योगाभ्यासी न भ
वतीत्यर्थः [illegible] २ ॥

रामकंठीटीका

तदेतत्केवलज्ञानवादिमतमनुपपन्नमेवेति प्रतिपादयितुमाह ॥
येते ज्ञानमात्रवादिनः संन्यासमेव यानैष्कर्म्यज्ञानरूपमर्थं कथयंति
तं योगं कर्मानुष्ठानमेव त्वं जानीहि यस्मात्संन्यासं विना योगस्तेषु ना
स्ति किं तु संन्यासः संकल्पस्य फलाभिलाषस्यैवोपपद्यते न तु कर्म
णः सर्ववर्णेषु सर्वाश्रमेषु च कर्माविरहात् यो किल यतिब्रह्मचारिणो
परिव्राजकौ कर्मत्यागेनाभिमतौ तौ गृहस्थवानप्रस्थौ वितेकर्मत्या
जतः स्वलयतित्वादिसिद्धिकारणं केवित्तकर्मविशेषमनुतिष्ठत एव यथे
ष्टाचरणाहितयोर्विकर्मस्यैतेव पर्यवस्यति तस्मात्संकल्पमात्रसंन्यासि
त्वात्संन्यासित्वं सिद्ध्यतीति योगी यः सर्वेषां सर्वथा स्थानेशास्त्रतनियतत्त्वमप
रमात्मलक्षणो ब्रह्मणि प्रवृत्ताहं मत्वाय तया संन्यस्तकर्मफलसंकल्पः
स योगी कार्यं कर्मणां समाधिमान् भवति नान्य इति यथोक्तयोः संन्यास
योगयोरेकपुरुषानुष्ठानात् निःश्रेयाः सर्ववर्णाः सर्वाश्रमिणामाधिकृता
ग्रनेन श्लोकेन प्रतिपादिताः [illegible]

लाक्षिकी [illegible] टीका

संन्यासयोगशब्दावन्योन्यपर्यायौ तथा च योगमंतरेण संन्यासो नोपपद्यते एवं
संकल्पसंन्यासं विना योगो न युज्यते तस्मात्तत्तत्संबद्धौ योगसंन्यासावित्याह ॥

ज्ञानमात्रवादिनोयमर्थं नैष्कर्म्यरूपं संन्यासपदवाच्यं रोचयन्तीत्यादिश्रुतिं स्वेच्छ
मात्रित्य संन्यासंसंज्ञया कथयन्ति योगमक्रमपुनराकर्मानुष्ठानमेव तं संन्या
सं जानीहि ननु तयोः स्वरूपादध्यारोपोऽत्रच किं स्वरूपमित्याह न हीति न
संन्यस्तः कर्मफलयोः संकल्पो येन सो संन्यस्तसंकल्पो योगी न हि भवति
य एव सर्वदात्मनि प्ररूढाहंममप्रत्ययत्यक्तकर्मफलसंकल्पः स एव योगी
कार्यकर्मण्यात्मसमाधानवान् नान्यः कर्मत्यागी उक्तपुनराकर्माविरहात्
तस्मात्संकल्पत्यागेन चित्तविक्षेपाभावात् योगस्यापि संन्यासत्वं तदुक्तं ज्ञा
नार्णवे उत्पन्नसम्यग्ज्ञानेदृत्तमज्ञानतः प्रिये सर्वसंकल्पसंन्यासः सवि
द्वान्कर्म संत्यजेत् स्वरूपं प्राप्य यथा बालः पदं त्यजति निःस्पृहं तद्वत्प्राप्यत
था योगी त्यजेत्कर्मपरिग्रहमिति [illegible]
[illegible] २ ॥

पंचोलीटीका

योगस्य भयं न युक्तं संन्यासित्वं योगित्वं चेति अभिप्रायं दर्शयितुमाह यं
संन्यासमिति हे पांडव श्रुतिस्मृतिविदः यं संन्यासं सकर्मतत्फलत्यागल
क्षणं परमार्थसंन्यासमिति प्राहुः तं योगं कर्मानुष्ठानलक्षणं परमार्थसं
न्यासं विद्धि हि यस्मादसंन्यस्तसंकल्पः अपरित्यक्तफलसंकल्पः कश्चन यो
गी न भवति २ ॥

रसावीरसमिश्रबोधिनी ॥

अथ संन्यासयोगयोरैक्यं प्रतिपादयति यं संन्यासमिति यं प्रा
रभ्यमाणकर्मप्रत्यावर्तकसंकल्पजातत्यागं संन्यासमिति संन्यास
पदाभिधेयं प्राहुः कथयन्ति पंडिताः इति शेषः हे पांडव तं योगं
योगपदाभिधेयमपि विद्धि ननु कुतो नयोरैक्यमित्यत आह न ही
ति हि यतः असंन्यस्तसंकल्पः अत्यक्तान्यथाप्रतिपन्नपापमेवा
प्येदस्मानित्यादिरूपसंकल्पः कश्चिद्योगी सावधानो न भवत्यतः
एवच कर्मसु प्रवृत्तिमांश्च न भवति अयंभावः संन्यासं विना योग

स्यान्निष्कर्मतारूपा सिद्धिः योगं विना च संन्यासस्य नैष्कर्म्यरूपासिद्धिरित्येकस्य सिद्धौ सत्यामन्यस्यापि सिद्धिरविनाभाविनीति पर्यायावेवैताविति २ ॥

मधुभाष्य

यं संन्यासमिति कामसंकल्पाद्यपरित्यागे कथमुपायत्वमस्यादित्याशयः किंपर्यन्तकालं कर्म कर्त्तव्यमित्यत आह २

भाषा अनुवाद

यह सुनि अर्जुन ने पूछा कि हे कृष्ण किस कारण से वे मनुष्य योगी औ सन्यासी नहीं हैं इसपर कर्म योगको सन्यास प्रतिपादन करते हुये कहते हैं कि हे पाण्डव अर्जुन सन्यास मात्रही को जो सब श्रुतियोने श्रेष्ठ कहा है सोई फल सन्यास रूप कर्मको भी जानो जो कहो कि कैसे जाने तो कहते हैं कि श्रुति शास्त्रसे कहे जो है तैसा योगमे भी हैं सोई उक्त श्लोकसे कहते हैं कि कर्म्म निष्ठ या। ज्ञान निष्ठ जो होय पर फलकी इच्छा त्याग विना योगी नहीं इससे फल कामना मे जिसका चित्त निवृत्त नहीं सोई योगी औ सन्यासी है सोई कहा नह्यसन्न्यस्त संकल्पो योगी भवति कश्चन २॥

दोहा

जाको जो संन्यास कहैं तिहयोग हु पांडव जान नहि विना संकल्प तजें कोउ योगी होत प्रमान २॥

13

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते योगा।
रूढस्य तस्यैव शमः कारणमुच्यते ३ ॥

शङ्करभाष्यं

ध्यानयोगस्य फलविशेषतः कर्मयोगो बहिरङ्गसाधनमिति तं संन्यासत्वेन। स्तुत्वाधुना कर्मयोगस्य ध्यानयोगसाधनत्वं दर्शयति आरुरुक्षोरिति आरुरु क्षोरारोढुमिच्छतः अनारूढस्य ध्यानयोगेऽवस्थातुमशक्तस्येत्यर्थः कस्य तस्या रुरुक्षोर्मुनेः कर्मफलसंन्यासिन इत्यर्थः किमारुरुक्षोर्योगं कर्म कारणं सा धनमुच्यते योगारूढस्य पुनस्तस्यैव शम उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगारूढस्य साधनमुच्यत इत्यर्थः यावद्यावत् कर्मभ्य उप रमते तावत्तावन्निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते तथा सति स झटिति योगारूढो भवति तथा चोक्तं व्यासेन नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोप रमः क्रियाभ्य इति ३ ॥

म

आनन्दगिरिकृतटीका

परमार्थसंन्यासस्य कर्मयोगान्तर्भावे कर्मयोगस्यैव सदाकर्तव्यत्व। मापद्येत तेनेतरस्यापि कृतत्वसिद्धेरित्याशङ्क्याह्नवावधिपूर्वकमितरस्या कर्तव्यत्वमाह ध्यानयोगस्येति भाविना ध्यानानुने ध्यानमारोढुमिच्छोरि च्छमाणस्य योगारोहणस्य कर्मद्वारकत्वमित्येतेन योगमारूढस्यापि तत् फलशमो तदेव कारणं भविष्यति तस्य कारणत्वं क्रमशक्तिर्वा दित्याशं। क्याह योगारूढस्येति अनारूढस्येत्येतस्यैवार्थं स्फुटयति ध्यानेति मुनित्वं कर्मफलसंन्यासित्वमौपचारिकमित्याह कर्मफलेति साधनं चित्तशुद्धिद्वारा ध्यानयोगप्राप्तावित्यर्थमिति शेषः तस्येति प्रकृतस्य कर्मिणो ग्रहणं एवकारो भिन्नक्रमः शमशब्देन सम्बध्यते कस्मान्ययोगव्यवच्छेदेन शमो हेतुरिति तत्राह योगारूढत्वस्येति सर्वव्यापारोपरमरूपोपशमस्य योगा रूढत्वे कारणत्वं विवृणोति यावद्यावदिति सर्वकर्मनिवृत्त्यावायासाभा। वाद्वशीकृतस्येन्द्रियग्रामस्य चित्तसमाधाने योगारूढत्वं सिध्यतीत्यर्थः सर्वकर्मोपरमस्य पुरुषार्थसाधनत्वे पौराणिकी सम्मतिमाह तथा चेति। एकता सर्वेषु भूतेषु वर्तनो द्वैताभावापलक्षितत्वमिति प्रतिपत्तिः श मता तेषु चौपाधिकविशेषेष्वपि सत्सु निर्विशेषत्वधीः समता तेषामेव हि

गी.
टी.
ष

नवर्त्तते शीलं स्वभावसम्यक्ति:स्थिति: स्थैर्यं दारादिनिपातमहिमत्वं आर्जवम
वक्रत्वं क्रियाभ्य: सर्वाभ्य: सकाशादुपरतिश्चैतेनतदुक्तं भवेद्यथा यादृश
मेतादृशं नामग्रहणमस्य चित्तप्रसत्तिसाधनमस्ति तस्मादेतदेवास्य निवृत्ति
शब्दे पुरुषार्थसाधनमित्यर्थः ३ ॥

14

स्वामिकृतटीका

[illegible]
[illegible] ... इति
[illegible] ... करोति
[illegible] ... तीर्थकल्पा।
नहि यावज्जीवं कर्मयोग एवाश्रम इत्याशंक्य तस्यावधिमाह आरुरुक्षोर
ति ज्ञानयोगमारोढुं प्राप्तुमिच्छोः पुंसः तदारोहे कारणं कर्मोच्यते चित्त
शुद्धिकरत्वात् ज्ञानयोगमारूढस्य तस्यैव ध्याननिष्ठस्य शमः समाधिश्चि
त्तविक्षेपककर्मोपरमो ज्ञानपरिपाके कारणमुच्यते ३ ॥

पिशाचभाष्य

ध्यानयोगस्य बहिरंगं कर्मेति यावद्ध्यानयोगारोहणसमर्थस्तावत् गृह
स्थेनापि कृतेन कर्म कर्तव्यमनतैत्तोतिर्भगवान् ननु किमर्थं ध्यानयोगा
रोहणसीमाकरणं पश्चात्तद्रूपमेव विहितं कर्म यावज्जीवञ्चैतदारूढस्यतेयो
गमारुरुक्षोरारोढुमिच्छोर्मुनेः कर्मकारणं साध्यसाधनमुच्यते योगारू
ढस्य तस्यैव कर्मणः शमः उपशमः सर्वकर्मभ्यो निवृत्तिः कारणं योगा।
रूढस्य साधनमुच्यते इत्यर्थः आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यत इति
विशेषणादारूढस्य च शममेव संबंधकरणात् आरुरुक्षोरारूढस्य च शमः
कर्मबोधकं कर्तव्यत्वेनाभिमतं चेत् [illegible] तदारुरुक्षोरारूढस्य चेति विशे
षणं विभागकरणं चोपपद्यत एवेति चेन्न तस्यैवेति वचनाज्ज्ञानयोगग्रहण
स्य योगारूढस्य नियमासीत् सर्वमेवारुरुक्षुत्वं तस्यैवारूढस्य शम एव कर्तव्यं
कारणं योगफलं प्रत्युच्यत इति श्रोतानयावज्जीवकर्तव्यत्वेन प्राप्तिस्तस्यापि
कर्मिणः योगभ्रष्टादिवचनात् गृहस्थस्य चेत्कर्मयोगो विहितः षष्ठेऽध्याये
स योगभ्रष्टः कर्मणा नित्यकर्मफलं प्राप्नोतीति तस्या ना[illegible]शंकानुपपन्ना
स्यादेवं कृते कर्म काम्यनिमित्तामोतस्य निमित्तादनारभ्यत्वेन स्वफलमा
रभेत एवं नित्यस्य च कर्मणो वेदप्रमाणावबुद्धत्वात् फलेन भवितव्यमिति बो

स्यात्

ण

वाम। अप्रवृत्यावेदस्मानर्थक्यप्रसंगादितिनचकर्मणामतित्युभयप्रवृत्व
चनम। पूर्वकर्मणोविशेषकरणंनुपपन्नेः कर्मकृतमीश्वरेसंन्यस्यमनः
कर्त्तेरिकर्मफलंनारभतइतिचेत्रीश्वरेसंन्याससाधिकारफलहेतुत्वोपप।
नेमौत्वायेवेति कर्मणांकृतानामीश्वरेसंन्यासोमोक्षायैवननफलांतरा
ययोगमहितोयोगाद्वभ्रष्टइति अतएवप्रतिनाशाशंकेवेतिपूर्वपंका।
कीयनविनाभ्यानिराशीरपरिग्रहः ब्रह्मचारिणेस्थितइतिच गृहस्थवा
नप्रस्थयोःकर्मसंन्यासविधानात्तथाचध्यानकालेऽसीमदृष्यायाशंकायेनैका
किनेविधीयते नचगृहस्थस्यनिराशीरपरिग्रहइतिवचनमनुकूलं वि
हायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः सर्वारंभपरित्यागीत्यादिवचन
इवचनानिदर्शितानितेविरुध्येत वर्णाश्रमप्रतिषेधस्तस्मान्नतेयोग
मारुरुक्षोःपंचगार्हस्थस्याग्निहोत्रादिफलनिरपेक्षमनुष्ठीयमानेधा।
नयोगारोहणसाधनत्वेनमतस्तुद्धिःद्वारेणप्रतिपद्यतेइतिसंन्यासीचयोगी
चेतिस्मृयते ३॥

रामानुजभाष्यं

यस्यसर्वेसमारंभाःकामसंकल्पवर्जिताइत्युक्तेःहिकर्मयोगपर्वाप्रमादेनयो
गसाधयतीत्याह योगमात्मावलोकनंप्राप्तुमिच्छोर्मुमुक्षोःकर्मयोगप्
वकारणमुच्यते तमेवयोगारूढस्यप्रतिष्ठितयोगस्यशमःकर्मनिवृत्तिः
कारणमुच्यते यावदात्मावलोकनरूपमोक्षप्राप्तिस्तावत्कर्मकार्यमित्यर्थः ३॥

अभिनवगुप्तकृतटीका

यद्यपिस्वात्मसिंहासनेराज्यमितिप्रत्याचकेवलस्यनिष्क्रियस्यसंन्यासि
त्वमुपपद्यतइत्युक्तं तथापि मुनेर्ज्ञानवतःकर्मकरणीयंकारणंशापके
शमःशमभावनुपरमःकारणमवलक्षणम् ३॥

परमार्थप्रपाटीका

पृथक्कर्मज्ञानयोरवधिमाह आरुरुक्षोरिति॥ यमनियमादिसोपान
मार्गेण आरूढमूर्धगतिशासुमिच्छोः पुरुषस्यकर्मकारणमुच्यते आरोह
णावधिकर्मकर्त्तव्यंचित्तशोधकत्वात् आरुह्यचित्तस्यचवित्तेपजनकत्वा
न् तथातस्यैवारूढदशायांशमस्यध्यानतिष्ठस्यज्ञानपरिपाकार्थंशमःवि
क्षेपोपरमकारणं ३॥

चेतव त शंका नवतास्य ति कर्म

गी॰ टी॰ ष॰

15

वनमालीटीका

ननु किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेयस्तत्राह आरुरुक्षोरिति
योगो भगवति चित्तैकाग्र्यं आरुरुक्षोरारोढुमिच्छोर्मुनेः शास्त्रविहिताग्निहो
त्रादिकर्म भगवदर्पणधिया कृतं कारणमारोहणे साधनमुच्यते अनुष्ठेयमु
च्यते वेदमुखेन मया योगारूढस्य चित्तैकाग्र्यं प्राप्तस्य तस्यैव शाक्कर्मिणोऽपि।
सतः शमः कर्मसंन्यास एव भगवदापरोक्ष्ये मुख्यकारणं साधनमुच्यते ३ ॥

ऊतमवैजयन्तीटीका

एवं संन्यस्तसंकल्प एव जनः कर्मयोगी भवति स एव संन्यासी चेत्तर्हि केदानीमे
वंभूतो यः कर्मयोगः स एव ज्ञानस्यासाधारणसाधनं भवतीत्याह आरुरु
क्षोरिति योगमात्मदर्शनरूपं ध्यानयोगाभिधमष्टाङ्गं योगं आरुरुक्षोः आ
रोढुमिच्छोर्मुनेरात्मस्वरूपमननशीलस्य मुमुक्षोः कर्म कर्मयोगः कारणं
निदानमुच्यते यः पूर्वमारुरुक्षुस्तस्यैवारूढस्य यतनस्तोः न्तःकरणशुद्धिं कृत्वा
ध्याननिष्ठायां प्रवृत्तं प्रवर्तयति अतस्तस्यैव कारणत्वमित्यर्थः यः पूर्वम
आरूढस्तस्यैवारूढस्य ध्याननिष्ठाप्राप्तस्य शमः कर्मोपरतिः कारणं हेतु
रुच्यते तस्माद्यावदात्मदर्शनेन भवेत्तावत्कर्मकृद्विमर्षः ३ ॥

मधुसूदनीटीका

तत्र किं प्रशस्तत्वात्कर्मयोग एव यावज्जीवमनुष्ठेय इति नेत्याह ॥ योग
मन्तःकरणशुद्धिरूपं वैराग्यमारुरुक्षोरारोढुमिच्छोर्नेन्नारूढस्य मुनेर्भवि
ध्यानः कर्मफलत्यागिनः कर्मशास्त्रविहितमग्निहोत्रादिकं नित्यं भग
वदर्पणबुद्ध्या कृतं कारणं योगारोहणे साधनमनुष्ठेयमुच्यते वेदमुखेन
मया योगारूढस्य योगमन्तःकरणशुद्धिरूपं वैराग्यं प्राप्तवतस्तस्यैव पूर्वक
र्मिणोऽपि सतः शमः सर्वकर्मसंन्यास एव कारणमनुष्ठेयतया ज्ञानपरिपाक।
साधनमुच्यते ३ ॥

सदानन्दीटीका

तत्किं कर्म प्रशस्तत्वात्सदानुष्ठेयमास्तेः मैवं धीशुद्धिवैराग्यमारुरुक्षोर्हि कर्म
तत् १ शुद्धिं प्राप्तस्य तस्यैव तत्त्यागो ज्ञानसाधनं अधिकारविभागेन कर्मतत्त्या
गयोरपि २ कार्याकार्यव्यवस्थात्र प्रोक्ता भगवता मया ३ ३ ॥

नीलकंठीटीका

तत्र कर्मानुष्ठानस्यावधिमाह आरुरुक्षोरिति यावद्योगे यमनियमाद्य

ष्टांगोपेतमसौ कं ध्यानारोढुमिच्छति तावत्कर्माण्यनुतिष्ठेत् तस्यैवा
रूढस्यान्ते कारणांतीव्रवैराग्योत्पादनद्वारा कर्म भवति तस्यैव यो
गारूढस्य योगांगानुष्ठाने प्रवृत्तस्य विक्षेपाभावः अस्य योगारोहे कर्मणः शमः
संन्यासः कारणमुच्यते नहि कर्मसंन्यासं विना ध्यानयोगमनुष्ठा
तुमीष्टे ३ ॥

आनंदटीका

योगं कर्मणो ध्यानसमस्यसम्यक्परिपक्वमारुरुक्षोः वर्णाश्रमोक्तं कर्मैव कार
णं योगारूढस्य चरमनिष्ठां प्राप्तस्य शमः संकल्पविकल्पशांतिर्भवतु यः
कारणं संकल्पविकल्पसंत्वेभं तावत्शारीरिककर्मैव श्रुतिचोदित
मपि कर्मानुवर्तते एव ततः परं बहिःसंवेदनाभावे वाह्येंद्रियव्यापारोपरम
वत् श्रौतस्मार्तानामप्युपरमः उत्पद्यते निर्गीतमेव अथवा मुनेर्मनन
शीलस्य योगमारुरुक्षोः संयमेन सर्वाणि वैतरां भूमिमाक्रमितुमिच्छोः
कर्मयोगांगाष्टकस्य यमनियमादेः सेवनं कारणं साधनमुच्यते योगारू
ढस्यार्थं वत्संयमेनैव कुर्वन्नकारयन्निती यः प्रकारः शमः कारणमुच्यते
॥

रामकंठीटीका

किंतु पुष्टानुर्थोक्तयोगविध यारूरुक्षावस्थायां संभवतीति च तल्लक्षतं तस्य भेदं दर्शयति

दर्शयितुमाह ॥

मुनेः कर्मणि निष्प्रामसमाधानस्य तन्निष्ठत्वादनुष्ठातव्ययोक्तयोगमा
रुरुक्षोरारोढुकामस्य तत्र तिविध सर्वाणि निष्ठालिप्समानस्य कर्मवर्णाश्र
मोक्तमासाध्याक्रियाकारणं योगारोहहेतुः तस्यैव तथाविधस्य कारणा
भूतं कर्मोज्झितमेव पशपेषु स्थापवनस्पशेमिचक्षित्यादिना पूर्वोपदिष्टनिर्व
र्तनतित्याभ्यासवशात् योगारूढस्य योगे लब्धप्रतिष्ठवितस्य सतिपर
मात्मसमापन्नस्य शमः संकल्पविकल्पत्यागः ततः कारणं प्रयोजनकं नि
मित्तं किमुक्तं भवति आगममात्रेण प्राप्तोपदेशस्य प्राथमिककल्पकस्य यो
गिनो योगप्रतिष्ठालाभो तत्कस्यापि तव कारणं कर्मैवापेयतया
वर्तते तस्मिंश्च पुरुहारम्भा समाधानुष्ठिते ज्ञाने च प्रसादकाष्ठां प्राप्ते त
त्कर्मोत्पूजनत एव शमः परमोपेयतया कारणं संपद्यते
॥

गी॰ यद्यपि हृतमसिंहासनेरा लासिकी [illegible]टीका इममितिवन्निष्क्रियंस्य संन्यासत्वप्रसिद्धे

टी॰ ६ तथापि मुनेरुत्थानेपि मननशीलस्य योगं वक्ष्यमाणं ध्यानयोगमारुरुक्षोः
तत्रावस्थातुमसमर्थस्यैवारुरुक्षोरित्यर्थः कर्मश्रुत्युक्तकर्मानुष्ठानं का
रणं योगारोहहेतुरुच्यते मया तस्यैव ध्यानयोगकारणभूतं कर्म जहत
एव योगारूढस्य परमात्मसमापन्नस्य शमः संकल्पविकल्परूपलोभत कं
यः कारणं निमित्तमुच्यते वेदादिमुखेन मया ध्यानयोगनिष्ठस्य तस्यैव म
वेविकल्पोपरतिः परमात्मसमापत्तेः प्रयोजकेत्यर्थः अथवा तस्यैव योगा
रूढस्य योगे ध्यानयोगे आरूढस्य लब्धप्रतिष्ठस्य शमः कारणं लक्षणमुच्य
ते [illegible]ते ३॥

पंचोलीटीका

ध्यानयोगस्य कर्मफलनिरपेक्षः कर्मयोगः संन्यासासापेक्षायावहिरं
गसाधनमिति संन्यासत्वेन स्तुत्वा अधुना ध्यानयोगसाधनत्वं कर्मणो
पदर्शयति आरुरुक्षोः इति योगमारूढमिच्छतो मुनेः कर्मफलस
मासिनः कर्मैव कारणं साधनमुच्यते पुनः तस्यैव योगारूढस्य श
मः कर्मोपशमः कारणं हेतुः ३

रमावीरसमिद्धोधिनी॥

आरुरुक्षोरिति मुनेः शास्त्राचार्योपदिष्टार्थमननशीलस्य वि
रुद्धसंकल्पानां त्यागाज्जोषमासितस्य च योगं समत्वलक्षण
मारुरुक्षोरारोढुमिच्छोः कथमहं समतालक्षणं योगमाप्नुया
मितीच्छतः कर्म कर्मेन्द्रियव्यापारः कारणं स्वाभिलाषसाधन
मुच्यते योगारूढस्य सर्वांगं प्राप्तसमतारूपयोगस्य तस्यैव त
थाविधस्यैव कर्मजत्वेन पवमानो मनोविकल्पत्यागः कारणं फ
तज्जये साधनं कथ्यते अयमत्राभिप्रायः समतालक्षणयोगवि
शिष्टस्य स्वधर्माचरणेन चक्रवर्तीभिः फलमिति सिद्धान्तः तत्र

कर्मेंद्रियव्यापारेमत्येवविद्याविनयेत्यादौप्रतिपादितस्व
रूपसमतालक्षणायोगसाफल्यं कथंभीष्ममहंसंख्येइ
त्यादिरूपप्रारभ्यमाणप्रव्यावकमानसिकसंकल्पत्यागे
नकर्मकौशललक्षणकर्मयोगनिष्पत्तिरिति अतएवशु
नेरितिसाहूतोक्तिः पश्चार्धेनैवकिंविकरोमीत्यत्रस्फु
टीकृतोस्माभिः ३॥

मधुभाष्य

आरुरुक्षोर्मुनेरिति योगमारुरुक्षोरूपायमूर्तिमिच्छो
योगारूढस्यसंन्यासोपायस्यापरोक्षज्ञानिनइत्यर्थः कार
णपरमसत्वकारणं अपरोक्षज्ञानिनोपिसमाध्यादिफल
मुक्तं तत्रसर्वोपशमेनसमाधिरेवकारणंप्राधान्येनेत्यर्थः
तथापियथाभोक्तव्योपरमस्तदेवसम्यगसंप्रज्ञातसमा
धिर्जायते अन्यदाभगवच्चरितादौस्थितिः तथोक्तं येवा
पश्यंतिभगवंतमपवर्गविनः परं तेषामेववचसमसक्तसमा
धिर्जायतेन्यत्रां भोक्तव्यकर्मण्यत्तीणेजपेनकथयावि
वा वर्तयंतिमहात्मानस्त्वद्भक्तास्त्वत्परायणाइति ३॥

17

भाषा अनुवाद

तो फेरि जावत्जीवन कहे जिन्दगीभर कर्म्मयोग ही करना चहिये जो ऐसी शंका करो तो कर्मयोग की अवधि कहते हैं कि ज्ञानयोग मे आरूढ होने की इच्छा करने वाले पुरुष को उस राहके चढने मे कर्म्म ही कारण रूप कहा है क्यों कि निष्काम कर्म्म चित्तशुद्धि करता हैं और ज्ञानयोग आरूढ कहे ज्ञानी को शमकहे विक्षेपकारी। कर्म्म सकल का त्यागही उचित जिसलिये त्याग ज्ञान परिपाक का कारण रूप कहा है ३

दोहा

योग अभिलाषी जो मुनि ताको हेतुकसो कर्म योगारूढ होय
ताहिको समता कारण धर्म ३॥

18

यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते सर्वसं।
कल्पसंन्यासी योगारूढस्तदोच्यते ४॥

शंकरभाष्य

अथेदानीं कदा योगारूढो भवतीत्युच्यते यदेति यदा समाधीयमानचित्तो भ
वति योगी हि इन्द्रियार्थेषु इन्द्रियाणामर्थाः शब्दादयस्तेष्विन्द्रियार्थेषु कर्म
सु च नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुद्ध्या नानुषज्जते अनु
षङ्गं कर्तव्यताबुद्धिं न करोतीत्यर्थः सर्वसंकल्पसंन्यासी सर्वान् संकल्पा
निहामुत्रार्थकामहेतून् संन्यसितुं शीलमस्येति स सर्वसंकल्पसंन्यासी यो
गारूढः प्राप्तयोग इत्येतत्तदा तस्मिन् काले योगारूढमुच्यते सर्वसंकल्पसंन्या
सीति वचनात् सर्वांश्च कामान् कामात्मकान् सर्वाणि च कर्माणि संन्यसे
दित्यर्थः संकल्पमूला हि सर्वे कामाः संकल्पमूलः कामो वै यज्ञाः संकल्प
सम्भवाः काम जानामि ते मूलं संकल्पात्त्वं हि जायसे न त्वां संकल्पयिष्या
मि तेन मे न भविष्यसि इत्यादिस्मृतेः सर्वकामपरित्यागे च सर्वकर्मसं।
न्यासः सिद्धो भवति स यथाकामो भवति तत्क्रतुर्भवति यत्क्रतुर्भव।
ति तत्कर्म कुरुते इत्यादिश्रुतिभ्यो यद्यद्धि कुरुते कर्म्म तत्तत् कामस्य चे
ष्टितमित्यादिस्मृतिभ्यश्च न्यायाच्च न हि सर्वसंकल्पसंन्यासे कश्चित् स्पन्दितु
मपि शक्तस्तस्मात् सर्वसंकल्पसंन्यासीति वचनात् सर्वान् कामान् सर्वाणि
कर्माणि च त्याजयति भगवान् ४॥

आनन्दगिरिकृतटीका

योगशमयोः कारणत्वकथनानन्तरं तस्याधिकारिणं दर्शयितुं श्लोकान्तरमवता
रयति अथेति समाधानावस्था यदेत्युच्यते अत एवोक्तं समाधीयमानचि
त्तो योगीति शब्दादिषु कर्मसु चानुषङ्गस्य योगारोहणप्रतिबन्धकत्वात्तद।
भावस्य तदुपायत्वं प्रसिद्धमिति द्योतयितुं हीत्युक्तं सर्वेषामपि संकल्पानां
योगारोहणप्रतिबन्धकत्वमभिप्रेत्य सर्वसंकल्पसंन्यासीत्यत्र विवक्षितम
र्थमाह सर्वानिति सर्वसंकल्पसंन्यासेऽपि सर्वेषां कामानां कर्मणां च प्रतिब
न्धकत्वसम्भवे कुतो योगप्राप्तिरित्याशंक्याह सर्वेति सर्वसंकल्पपरित्यागे
यथोक्तविध्यनुष्ठानमयत्नसिद्धमिति मन्वानः सन्नाह संकल्पेति मूलोन्मूल

गी॰
टी॰
६॰

नैवतत्कार्यनिवृत्तिरयत्नसुलभेति भावः तत्र प्रमाणमाह संकल्पमूल इति
तत्रान्वयव्यतिरेकावभिप्रेत्योक्तमुपपादयति कामेति सर्वसंकल्पाभावे का
माभाववत् कर्माभावस्य सिद्धत्वेपि कर्मणां कामकार्यत्वात्तन्निवृत्तिश्शक्या
मपि निवृत्तिमुपन्यस्यति सर्वकामेति यद्वर्क्तं कर्मणां कामकार्यत्वं तत्र श्रुति
स्मृती प्रमाणयति सयथेति सपुरुषः स्वरूपमजानन् यत्फलकामो भव
ति तत्प्रापकमनुष्ठेयतया बुद्धौ धारयतीति तत्क्रतुर्भवति यच्चानुष्ठेयत
या संकल्पति तदेवकर्म बहिरपि करोतीति कामाधीनं कर्मेक्तमिति श्रुत्यर्थः
कामजत्वं कर्मसु अन्वयव्यतिरेकसिद्धमिति द्योतयितुं स्मृतौ हि शब्दः व्या
यमेव दर्शयति नहि सर्वसंकल्पेति स्वापादावदर्शनादित्यर्थः नित्यनैमित्तिक
कर्मानुष्ठाने हर्यतिरस्तमिति वक्तुमपि शब्दः श्रुतिस्मृतिन्यायसिद्धमर्थमुप
संहरति तस्मादिति ४॥

स्वामिकृतटीका

कीदृशोसौयोगारूढोयस्यशमः कारणमुच्यते इत्यत आह यदाहीति इंद्रियभो
गेषु शब्दादिषु तत्साधनेषु च कर्मसु यदा नानुषज्जते आसक्तिं न करोति तत्र हे
तुः आसक्तिमूलभूतान्सर्वान्भोगविषयान्कर्मविषयांश्च संकल्पान्संन्य
सितुं त्यक्तुं शीलं यस्य सः तदा योगारूढ उच्यते ४॥

पिशाचभाष्यटीका

अथेदानीं कैयोगारूढो भवतीत्युच्यते यदाहीति यदा समाधानचित्तो
योगी हि यस्मादिंद्रियार्थेषु इंद्रियाणामर्थाः शब्दादयस्तेषु इंद्रियार्थेषु क
र्मसु नित्यनैमित्तिककाम्यप्रतिषिद्धेषु प्रयोजनाभावबुध्या नानुषज्जते अनु
षंगं कर्तव्यताबुद्धिं न करोतीत्यर्थः सकलसंकल्पसंन्यासी सर्वान्संकल्पा
निहामुत्रार्थकामहेतून्संन्यसितुं शीलं यस्य स सर्वसंकल्पसंन्यासी योगारू
ढः श्रमयोगारूढस्तेनतत् तदा तस्मिन्काले उच्यते स सर्वसंकल्पसंन्यासीति भ
गवद्वचनात्सर्वाणि कर्माणि च संन्यसेदित्यर्थः संकल्पमूला हि सर्वे कामास्सं
कल्पमूलाः कामा वै यज्ञाः संकल्पसंभवाः कामजानामि ते मूलं संकल्पा
त्किल जायसे न त्वां संकल्पयिष्यामि समूलो विनशिष्यसीति स्मृतेः सर्वसंक
ल्पपरित्यागे सर्वकर्मपरित्यागः सिद्धो भवति सयथाकामो भवति तत्क्रतुः
भवति तत्कर्म कुरुते इत्यादिश्रुतिभ्यः यद्यद्धि कुरुते तत्तत्कामस्य चेष्टितमि

यत्क्रतुर्भवति

योगारूढः

दि

ने

कर्म

१९

निस्सृतिभ्यश्च न्यायाच्च सर्वसंकल्पसंन्यासेन हि कश्चित्संदिनमपि शक्तः
तस्मात्सर्वसंकल्पसंन्यासवचनात् सर्वान्कामान्सर्वाणि च कर्माणि त्याजय।
ति च भगवान् ४ ॥

रामानुजभाष्यं

कदा प्रतिष्ठितयोगो भवतीत्यत्राह यदाहीति यदायं कर्मयोगी आत्मैका।
नुभवस्वभावतया इंद्रियार्थेष्वात्मव्यतिरिक्तप्राकृतविषयेषु [illegible]।
तत्संबंधिषु कर्मसु च नानुषज्जते न संगमर्हति तदा हि सर्वसंकल्पसंन्यासी
योगारूढ इत्युच्यते तस्मादारुरुक्षोर्विषयानुभवार्हतया तदनुषंगाभ्यास
रूपः कर्मयोग एव निष्पत्तिकारणं अतो विषयानुषंगाभ्यासरूपकर्मयोग।
मेवारुरुक्षोः ऊर्यान्नदेवाह ४ ॥

अभिनवगुप्तकृतटीका

एष एवार्थः प्रकाश्यते इंद्रियार्था विषयास्तदर्थानि च कर्माणि विषया
र्जनादीनि (अस्यान्तव्यवच्छेदमेवावधेयमित्याह ४ ॥

परमार्थप्रपाटीका

अथ योगारूढस्य स्वरूपमाह यदेति यदा यस्मिन्काले इंद्रियार्थेषु रूपरसा
दिषु तथा तत्कारणभूतेषु कर्मसु चेष्टासु न सज्जते आसक्तिं न करोति अ
पि न केवलं कर्मेंद्रियनिरोधमात्रमित्याह सर्वेति सर्वविषयभोगानिमि
त्तीभूताः संकल्पास्तान्संन्यस्तुं शीलं यस्य स तदा तस्यामवस्थायां योगारूढ
इत्युच्यते नान्यः अतो विषयत्यागो मोक्षमासक्तेर्वबंधरूपो लोभरागादिस्व
भावे मग्ने[illegible]दित्याह ४ ॥

वनमाली टी०

कदा योगारूढः स्यादित्यत्राह यदेति यदा नियतचित्तसमाधानकाले इंद्रियार्थेषु शब्
दादिषु कर्मसु च नित्यनैमित्तिककाम्यनिषिद्धेषु नानुषज्जते स्वस्य स्वतो कर्तृ
त्वानुसंधानाद्विभक्तस्वरूपानंदानुभवेन च तत्प्रयोजनाभावादहमेतेषां
कर्ता ममैते भोग्या इत्य[illegible]भिनिवेशरूपमनुषंगं न करोति हि यतस्तस्मात्स
र्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया कर्तव्यमनेनैतत्फलं भोक्तव्य
मित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां कामानां तत्साधनानां च क
र्मणां त्यागशीलः सदा शब्दादिषु कर्मसु चानुषंगाभावात् अतोऽस्य संकल्पस्य योगा

रोहणप्रतिबन्धकस्याभावाद्योगे भगवति तैलधारावन्निश्चलामेकाग्रचित्तवृ-
त्तिमारूढो योगारूढस्तदोच्यते ४॥

ऊसमवैजयन्तीटीका

ननु योगारूढस्य मुमुक्षोः किं लक्षणं कदा वा योगारूढो भवतीत्यपेक्षायामाह।
यदाहीति यदा यस्यामवस्थायां हि निश्चयेनेन्द्रियार्थेषु प्राकृतेषु शब्दादिविषये-
षु कर्मसु च न तत्र हि विषयसाधनरूपेषु नानुषज्जते आत्मदर्शनानन्देन तत्क्षी(?)कृ-
ताशेषप्राकृतविषयानुभवानुपपत्तेरासक्तिं न करोतीति कीदृशः सर्वसंकल्पसं-
न्यासी सर्वान्ब्रह्मस्तम्बेन्द्राय्यमरादीशाद्याधिपसज्जन्ति तत्सुखभोगाभिलाष-
रूपान्प्राकृतविषयकामसंकल्पान्सम्यक्त्यक्तुं शीलं यस्य स तथा
ईदृशश्च यदा भवति तदैव योगारूढः स्वस्वरूपध्याननिष्ठ उच्यते कथ्यते ४॥

मधुसूदनीटीका

कदा योगारूढो भवतीत्युच्यते यदा यस्मिंश्चित्तसमाधानकाले इन्द्रियार्थे-
षु शब्दादिषु कर्मसु च नित्यनैमित्तिककाम्यलौकिकप्रतिषिद्धेषु नानुषज्जते
तेषां मिथ्यात्वदर्शनेनात्मनः कर्तृभोक्तृपरमानन्दाद्वयस्वरूपदर्शनेन च प्र-
योजनाभावबुद्ध्याहमेतेषां कर्ता ममैते भोग्या इत्यभिनिवेशरूपमनुषङ्गं न
करोति हि यस्मात् तस्मात्सर्वसंकल्पसंन्यासी सर्वेषां संकल्पानामिदं मया क-
र्तव्यमेतत्फलं भोक्तव्यमित्येवंरूपाणां मनोवृत्तिविशेषाणां तद्विषयाणां च
कामानां तत्साधनानां च कर्मणां त्यागशीलः तदा शब्दादिषु कर्मसु चानुषङ्ग-
स्य तद्धेतोश्च संकल्पस्य योगारोहणप्रतिबन्धकस्याभावात् योगं समाधिमा-
रूढो योगारूढस्तदोच्यते [illegible]
[illegible]: ४॥

सदानन्दीटीका

यस्मिंश्चित्तसमाधानकाले कर्मसु तत्फले तन्मिथ्यात्वधिया स्वात्मा कर्तृभो-
क्तृधियानया १ अहं कर्तास्य भोग्यं तत्फलं मे वृत्तिरंजनो न करोति परित्य-
क्तसर्वकामतया मुनिः २ इहामुत्रार्थकामानां हेतून्नाध्यासिकान्यतः संसक-
ल्पशीलमस्यासौ प्राप्तयोगस्तदोच्यते ३ [illegible]
[illegible]
[illegible] इति योगारोहणम्: ४॥४

नीलकण्ठीटीका

ननु योगपदेन मुख्यया वृत्त्या निर्बीजः समाधिरुच्यते न तमारूढस्य कर्मणो त्या-
गः स्वतः सिद्धत्वाद् विधेय इत्याशंकाप्रकृते योगारूढपदस्यार्थमाह यदा हीति
इंद्रियार्थेषु शब्दादिषु रमणीयेषु कर्मसु च तत्साधनेषु तद्दर्शनेषु नानुषज्ज-
ते वैराग्यदार्ढ्यात्सक्तो न भवति नापि मनसा इदं मे भूयात् एतदर्थमहमिदं कर्म
कुर्यामिति संकल्पयति तादृशश्च सर्वसंकल्पसंन्यासी यदा भवति तदा योगारू-
ढ उच्यते यथा तीव्रबुभुक्षया पीडितो यत्र नीरोगो व्यासंगान्न रम्यका भोजनारूढ
एव भवति तथा तीव्रारूढत्वावान् सर्वत्र वीतरागस्त्यक्तसर्वकर्मा योगारूढ एव
व भवति तावत्कर्माणि कर्तव्यानि ततः परं संन्यासीत्यर्थः ४ ॥

आनंदटीका

योगारूढं लक्षयति ॥
अविभूतेंद्रियजयस्य ग्रहणादिपिवकसंयमार्थः ज्ञानकर्मसमुच्चयार्थम-
संगमः एवं [illegible] ४

रामकंठीटीका

एतएव प्रशंसन् स योगारूढस्य लक्षन्
एतमाह यदा हि यस्यामेवावस्थायामिंद्रियार्थेषु विकृतहेतुविषयेषु इंद्रियैः स्पृश्यमा-
नेष्वपि कर्मसु वा तत्साधनेषु यज्ञतपः प्रभृतिषु क्रियमाणेष्वपि नानुष-
ज्जते सहजानंदतृप्तितया सक्तिं भजते केवलमेव तत्स्वपदार्थजातं स्पृश-
न्नपि स्वभावधामप्रतिष्ठ एव भवति तदा सर्वेषां संकल्पानां फलाभिसं-
धीनां संन्यासिता त्यागिता योगारूढः योगी कर्मसमाधावारूढो लब्धप्रति-
ष्ठ उच्यते [illegible]
[illegible] ४ ॥

एवमेवार्थः प्रकाश्यते ॥ लासिकी [illegible]टीका

वदा यस्यामवस्थायां विषयेष्विंद्रियैः स्पृश्यमानेष्वपि तदर्थेषु कर्मसु क्रि-
यमाणेष्वपि नानुषज्जते आसक्तिं न भजते केवलमेव तत्स्वभावजातं स्पृ-
श्यमानमपि स्वभावधामप्रतिष्ठ एव भवति अत्र हेतुगर्भितं विशेषणं सर्वेति
सर्वेषां कर्मणां फलानां च संकल्पसंन्यासनशीलो यस्य स तदा योगा-
रूढ उच्यते योगसमाधावारूढो लब्धप्रतिष्ठ इति [illegible]
[illegible] ४ ॥

पंडोलीटीका

कदासौ योगारूढो भवतीत्यपेक्षायामिति तदुभयमाह यदा हीति द्वियसा

गी॰
टी॰
४

तु यदा न इंद्रियार्थेषु शब्दादिविषयेषु श्रवः कर्मसु नित्यनैमित्तिककाम्य
निषिद्धेषु नानुषज्जते कर्तव्यताबुद्धिं न करोति न तदा सर्वसंकल्पसंन्यासी इहा
मुत्रार्थकामहेतून्सर्वसंकल्पान्संन्यसितुं शीलं यस्य सः योगारूढः योगमारू
उच्यते ४

शगावीरसमिद्धोयिनी ॥

अथ योगारूढस्वरूपमाह यदाहीति हि प्राज्ञो निश्चयेन इंद्रियार्थे
ष्विति च्छेदः इंद्रियार्थेषु चक्षुरादिग्राह्येषु शत्रुमित्रबंधादिसंबंधरू
पादिषु विषयेषु यानि कर्माणि अर्थाच्चक्षुरादीनां स्वस्वविषयग्र
हणरूपदर्शनादिव्यापारास्तेषु सत्स्वपि नायोक्तृत्वश्रवणावि
ष्टः स्त्रियवीरः नानुषजते अर्थात्तु शत्रुमित्रबंधादिसंबंधिरूपादिषु
विषयेषु रागभयवीभत्सामोहादिभिरष्टो नातः करणो यदा न भ
वति तदा योगारूढ इत्युच्यते अतीनामजन इत्यपेक्षायां हेतुग-
र्भं विशेषणमाह सर्वेति सर्वान् संकल्पान् अयं मम शत्रुः कथं हं
तव्य एवं हत्वा योगं तिष्ठास्यामि अयं च शत्रोर्न वधार्हः एतं हत्वा
राज्यमपि जीविताश्रितेत्यादिरूपान्मानसिकव्यापारान् सं
न्यसितुं त्यक्तुं शीलं यस्य सः ४ ॥

मधुभाष्य

योगारूढस्य लक्षणमाह यदेति सम्यगनुषंगकसेव भवति
उक्तं च स्वतो दोषलपोहक्षाविनरेषां प्रयत्नत इति स च योगारो
ढः प्रयत्नेन कर्तव्य इत्याह ४॥

भाषा अनुवाद

जो पूंछो कि वह ज्ञानयोग आरूढ़ पुरुष जिसको वितेपकारी कर्म्मका त्याग कहा गया कैसा होता है तो कहते हैं कि जब इन्द्रियों के भोग जो विषय तिनमे और भोगके साधन भूत कर्मों मे आशक्त न होय और कर्म्म संकल्प को छोड़िसके तब उसको जोगारूढ़ कहते हैं ४

दोहा

जबनहिंइंद्रीविषयमे कर्महिमे बंधहोय सभीकल्पनात्याग
तबयोगरूढ़कह्योसोय ४॥

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ५॥

शंकरभाष्यं

यदैवं योगारूढस्तदा तेनात्मनोद्धृतो भवति संसारादनर्थजातात् अतः उद्धरेदिति उद्धरेत् संसारसागरे निमग्नमात्मनात्मानं ततस्तत उद्धरेत् योगारूढतामापादयेदित्यर्थः नात्मानमवसादयेत् नाधो नयेत् नाधो गमयेत् आत्मैव हि यस्मादात्मनो बन्धुर्न ह्यन्यः कश्चिद्बन्धुर्यः संसारमुक्तये भवति बन्धुरपि तावन्मोक्षं प्रति प्रतिकूल एव स्नेहादिबन्धनायतनत्वात् तस्माद्युक्तमवधारणमात्मैव ह्यात्मनो बन्धुरिति आत्मैव रिपुः शत्रुर्योऽन्योऽपकारी बाह्यः शत्रुः सोऽप्यात्मप्रयुक्त एवेति युक्तमेवावधारणमात्मैव रिपुरात्मन इति ५॥

आनन्दगिरिकृतटीका

योगारूढस्य किं स्यादित्याशंक्याह यदैवमिति योगारोहस्य इष्टहेतोरुपायेऽवश्यकर्तव्यतार्थं मुक्तिहेतुत्वं तद्विपर्ययस्याधःपतनहेतुत्वं च दर्शयति अत इति तत्र हेतुमाह आत्मैव हीति उद्धरणापेक्षामात्मनः सूचयति संसारेति संसारादुद्धरणं कीदृगित्याशंक्याह योगारूढतामिति योगशमावतात्स्यात्तत् कर्तव्यमाह नात्मानमिति योगप्राप्त्युपाययत्नानुष्ठीयते तस्य योगाभावे संसारपरिहारासम्भवादात्माधोनीतः स्यादित्यर्थः ननु आत्मानं संसारे निमग्नं तदायो बन्धुस्तस्मादुद्धरिष्यतीत्याह आत्मैव हीति कुतोऽवधारणमन्यस्यापि प्रसिद्धस्य बन्धोः सम्भवादित्याह न हीति यो बन्धुः सन्नपि संसारमुक्तये न भवतीत्येतदुपपादयति बन्धुरपीति स्नेहादीत्यादिशब्दात्तदनुसरणप्रवृत्तिविषयवैरस्येन आत्मातिरिक्तस्यापि शत्रोरपकारिणः सुप्रसिद्धत्वादवधारणमनुचितमित्याशंक्याह योऽन्य इति ५॥

स्वामिकृतटीका

अतो विषयासक्तित्यागे मोक्षं तदासक्तौ च बन्धं पर्यालोच्य रागादिस्वभावं त्यजेदित्याह उद्धरेदिति आत्मना विवेकयुक्तेनात्मानं संसारादुद्धरेत् न त्ववसादयेत् अधो न नयेत् हि यस्मादात्मैव मनः संगादुपरतमात्मनः स्वस्य बन्धुरुपकारकोऽरिपुरपकारकश्च ५॥

पिशाचभाष्यं

संसारसागरे

तेना

गी. टी. म.

यदैवं योगारूढस्तदात्मा[illegible]नोद्धृतो भवति संसारादनर्थप्रदादतो उद्धरेदिति उ
द्धरेन्निमग्नमात्मानमात्मना तत ऊर्ध्वं हरेत् योगारूढतामापादयेदित्यर्थः।
नात्मानमवसादयेत् नाधो नयेत् आत्मैव हि यस्मादात्मनो बन्धुः संसारमुक्त
ये भवति बन्धुरपि तावत्सोऽपि प्रतिकूलभावे स्नेहादिनिबन्धनायतनत्वान्मुक्त
मवधारणमात्मैव ह्यात्मनो बन्धुरिति आत्मैव रिपुः शत्रुः योऽन्यः अपकारी श
त्रुः शत्रुः सोऽप्यात्मनि प्रयुक्त एवेति युक्तमवधारणमात्मैव रिपुरात्मन इत्युक्तं ५॥

रामानुजभाष्यं

उद्धरेदिति आत्मना मनसा विषयाननुषक्तेनात्मानमुद्धरेत् विपरीतेन म
नसा नात्मानमवसादयेत् आत्मैव मन एव ह्यात्मनो बन्धुस्तदेव ह्यात्मनो रिपुः ५॥

अस्यां त्वबुद्धावत्र रूपमेवादधेयमित्याह उद्धृति [illegible]

अभिनवगुप्तकृतटीका स्पष्टार्थम्

अतो विषयत्यागे मोक्ष आसक्तौ च बन्धः इत्यालोच्य रागादिसद्भावं त्यजेत् इत्याह +

परमार्थप्रपाटीका

उद्धरेदिति विवेकयुक्तेनात्मना मनसा कृत्वा आत्मानं जीवं दग्धापन्नसंसारा
दुद्धरेत् परं तत्र अवसादयेत् नाधः पातयेत् हि यस्मात्कारणादात्मनो बन्धु
रुपकारकः रिपुरपकारकः आत्मैव स्वयमेव नान्यः मन एव मनुष्याणां।
कारणं बन्धमोक्षयोरिति स्मृतत्वात् ५॥

वनमालीटीका

यो यदैव योगारूढो भवति तदा तेनात्मनैवात्मा संसारादुद्धृत इत्याह उद्धरेदि
ति आत्मना वेदान्तश्रवणादिना वासितेन मनसात्मानं स्वं जीवं संसारा[illegible]
मग्नं उद्धरेत् विषयसङ्गपरित्यागेन योगारूढतां प्रापयेत् न तु विषयासक्त्याव
सादयेत् न संसारसमुद्रे मज्जयेत् हि यत आत्मैव मन एवात्मनो जीवस्य बन्धुः
हितकारी संसारात् मुक्तिहेतुः आत्मैव मन एवात्मनः स्वस्य जीवस्य रिपुरहि
तकारी मन एव मनुष्याणां कारणं बन्धमोक्षयोः बन्धाय विषयासङ्गि मुक्त्यै
निर्विषयं मन इति स्मृतेः ५॥

[illegible]

हनुमद्वैजयन्तीटीका

नन्वनमन एव कारणमित्याह [illegible] एवं सर्वसंकल्पसंन्यासीति यदुक्तं
रहितेनात्मावलोकनप्रवणेन उद्धरेदिति योगी आत्मना आकृतविषयासक्ति
नानादिविचित्रशुभाशुभकर्मजनितेन संसारार्णवनिमग्नं गर्भजन्मजरामरणादि
[illegible] मनसा आत्मानं स्वक

रूपावस्थान्तरं गतानाद्दितेन तत्तत्तोभ्रममानेकामादिषड्वर्गातिक्रूरग्राहग्रस्तंनि
रतिशयप्रबलातिवीर्याननिमिषारगकवलीभूतं जीवमुद्धरेत् उद्धर्हरेत् स्वा
कृतविषयं माजयित्वा परमात्मानं प्रापयेदित्यर्थः विषयानुरागाद्वर्जितेन
धनधामदाराद्याशक्तेः तन्मनसात्मानं स्वेनावसादयेत्संसारेन निमज्जयेत्
हीति निश्चयेनात्मनः स्वस्यात्मैव मन एव बंधुर्हितकारी आत्मनस्यात्मैव रिपुः
शत्रुरिममेवार्थं पाराशरी स्मृतिरपि वदति तथाहि मन एव मनुष्याणां का
रणं बंधमोक्षयोः बंधाय विषयासंगि मुक्तै निर्विषयं मन इति ५॥

मधुसूदनी टीका

यो यदैवं योगारूढो भवति तदा तेनात्मनैवात्मोद्धृतो भवति संसारानर्थ
व्रातादतः आत्मनाविवेकयुक्तेन मनसात्मानं स्वं जीवं संसारसमुद्रे निमग्नं ततः
उद्धरेत् तमूर्ध्वं नयेत् विषयासंगपरित्यागेन योगारूढतामापादयेदित्यर्थः
न तु विषयासंगेनात्मानमवसादयेत् संसारसमुद्रे मज्जयेत् हि यस्मात्
आत्मैवात्मनो बंधुर्हितकारी संसारबंधमोचनहेतुः नान्यः कश्चिल्लौकिक
स्य बंधो यः स्नेहानुबंधेन बंधहेतुत्वात् आत्मैव नान्यः कश्चिद्रिपुः शत्रुरहित
कारी विषयबंधनागारप्रवेशकोशकारवदात्मनः स्वस्य वाह्यस्यापि रिपो
रात्मप्रयुक्तत्वादुक्तमवधारणमात्मैव रिपुरात्मन इति ५॥

सदानंदीटीका

योगारूढोपदाज्ञानस्त्वैदवात्मनात्मना अनर्थभ्रातसंसाराद्बंधनाख्यात्म
मुद्धरेत् १ संसारपंकनिर्मग्नमात्मानमतियत्नतः उद्धरेत तऊर्ध्वं नैवैराग्या
दियुतः पुमान् २ त्यागेन विषयासक्तेः समाध्यारूढतां नयेत् अनात्मविष
याध्यस्तदेहाद्यात्ममतिं त्यजेत् ३ ब्रह्मात्मैक्यावबोधेन धीमान्नात्मानि समाश्र
येत् संसारे त्यतचोरेस्मिन् रागद्वेषादिसंकुले ४ स्वात्मानं यातयेन्नैव विष
यासक्तचेतसा बंधान्मोक्षकरो यस्मात् हितकारी स आत्मनः ५ नान्यः कश्चि
द्बंधुः संसारोद्धारणोत्तमः प्रसक्तस्नेहपाशेन बंधुरन्यो ह्यनर्थदः ६ आत्मै
वाहितकारित्वादात्मनः शत्रुरुच्यते विषयासक्तिबंधाख्यकारागारप्रवेशना
त् ७ पुनर्जन्मप्रवर्तनः पुनर्भोगेषु दीनता स्वात्माज्ञानाद्यतो नूनं तनऊर्ध्वं
नयेत्स्वयं ८ आत्मानं तत्त्वबोधेन वैराग्यादियुतेन च ९॥५॥

नीलकंठीटीका

उद्धरेदिति एवं क्रमेण कर्मद्वारा चित्तशुद्धिं संपाद्य योगारूढो भ्यासवैराग्यव

गी
टी॰
६

२४

लेनात्मानमुद्धरेत् हि यस्मात् आत्मैव आत्मनो बंधुर्न पुत्रादयस्तदुक्तमात्मा:
आत्मैव रिपुरात्मन: नान्ये शत्रव: संसारे मज्जयितुमेनं तमात्मसमर्थ: ५ ॥

अत्र श्रद्धां जनयति ॥ आनन्दगिरि [illegible] टीका

आत्मना स्वयमस्थिरीकृतेन मनसात्मानं समुद्धरेत् पूर्वं सर्वां भूमिं जितो
नरात्मानं रागाद्यपायप्रकृतिरूपरमंते कैवल्येन पदि इति शेषं स्पष्टम् ५
[illegible] ५ ॥

तदेवंविधस्य परमप्रशांतब्रह्मसमा रामकंठीटीका पत्तिकारणस्य योगारूढत्वस्य नात्मव्य-
तिरेकेन बाह्यं किंचित् साधनं भवितुमर्हतीत्यत: ॥ दुर्वारद्वैतप्रत्ययप्रवनपरितो भिन्नभीषणाविकल्पकल्लोलमहत्संकुलापारगंभीरभवसागरनिमग्नमात्मानं स्वभावमात्मनैव यथोक्त-
ज्ञानोपदेशप्रत्युदितोत्साहेनोद्धरेत् यथोक्तयोगलक्षणतीरदेशमा-
रोपयेत् न त्वेनं विस्मृतस्वबलनयोपेक्षितं तत्रैवावसादयेत् मज्जयेत्
[illegible] ५ ॥ यस्मात्प्रतिकूल आत्मैव तस्मात् [illegible]

अस्यां भूमावस्यैवावधेर्लासिकी [illegible] टीका
यमित्याह — आत्मानं स्वस्वभावमात्मनैव यथोक्तोपदेशेन प्रत्युत्साहेनोद्धरेत्
संसारात् न त्वेवं विस्मृतस्वबलतयोपेक्षावसादयेन्मज्जयेत् पुरु-
षस्यात्मन आत्मैव स्वस्वभाव एव यतो बंधुरुपकारक: आत्मैव रिपु:
स्वस्यापकारक: नान्य: कश्चित् यदुक्तं आत्मैव यदि नात्मानमहिते-
भ्यो विवारयेत् कोन्यो हितकरस्तस्मायमेवं वारयिष्यतीति [illegible]
[illegible] ५ ॥

पंचोलीटीका

यदैवं योगारूढो भवति तदात्मना आत्मानं संसारानर्थसमूहादुद्धरेदिति
भवतीत्याह उद्धरेदिति आत्मना संसारसागरे निमग्नमात्मानमुद्धरेत्
उद्धरेत् योगारूढतामापादयेत् आत्मानं नावसादयेत् हि यस्मादात्मैव
आत्मनो बंधुर्हितकारी संसारमोक्षको भवति नान्य: आत्मैव आत्मन:
शत्रु: रिपु: योपि बाह्य: शत्रु: स आत्मापराधेनैव शत्रुर्भवति ५ ॥

रणवीरसमिद्धोधिनी॥

अत एवांतरायभूतं रागादिस्वभावं त्यजेदित्याह उद्धरेदिति आ
त्मना निश्चयात्मिकया बुद्ध्या धृत्या वात्मानं मनः शब्दादिस्नेहा
र्णवे निमग्नमुद्धरेत् स्वधर्माचरणनिश्चयरूपतीरभूमिकामा
रोहयेत् न पुनरवसादयेत् मज्जयेत् अथवात्मना यत्नेनात्मा
नं स्वशरीरं संसारार्णवे निमग्नमुद्धरेत् परसैन्यजलानि यतस्त
तो विक्षिप्य पारं प्रापयेत् परसैन्यजलानि यतस्ततो विक्षिप्य पा
रं प्रापयेत् न पुनर्निष्क्रियत्वेनाधो नयेत् पवैवानयेदिति यावत्
हि यत आत्मैव बंधुरिति यत्नरूप आत्मनः स्वस्य बंधुः संसारार्ण
वोद्धारकरणादुपकारी निश्चयात्मिकतया बुद्धेरैक्यात् अत ए
वधृतेश्च चिरावस्थायित्वात् स्वजात्युचितस्य यत्नस्य निरर्गलं
प्रवृत्तिसंभवात् आत्मैव बुद्ध्यादिरयमेवात्मनः स्वस्य शत्रुः प्रति
कूलः नरकादिप्रापणहेतुत्वात् अनंतप्रकारवाधिष्ठानाध्यव-
सायलक्षणायाः संशयात्मिकाया बुद्धेः सघोभ्रंशात् धृतेश्च
निरालंबनतया चिरमनवस्थायित्वात् यत्नस्य च मध्य एव वि-
च्छिन्नत्वात् ५॥

मधुभाष्य

उद्धरेदित्यादिना कस्य बंधुरात्मेत्यत आह ५॥

भाषा अनुवाद

देखो विषयों से इच्छा निवृत्ति होनेसे मोक्ष औ विषयोमे आशक्ति से बन्ध होता है यह विचारि रागद्वेषादि सभावसे रहित होना उचित सोई कहते हैं कि विवेक युक्त आपही अपने आत्माको बुद्धिके। द्वारा संसारसे उद्धार करेगा और अधोगति को न ले जायगा जिस हेतु कामना से निवृत्त जो आत्मा कहे मन सोई अपना बन्धु रूप उपकारी है और कामनामे आशक्त जो मन सो शत्रुरूप अपकारी है तो अपना शत्रु मित्र आपही है ५॥

दोहा

आपहि आपकहुं उद्धरैंनहि आपहिपीडत जोय आपहि अपनो बंधुहै आप अपनो रिपुहोय ५॥

26

बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः अ
नात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ६ ॥

शांकरभाष्यं

आत्मैव बन्धुरात्मैव रिपुरात्मन इत्युक्तं तत्र किंलक्षण आत्मा आत्म
नो बन्धुः किंलक्षणो वा आत्मात्मनो रिपुरित्युच्यते बन्धुरिति बन्धुरात्मात्मनस्त
स्य तस्यात्मनः स आत्मा बन्धुर्येनात्मनात्मैव जितः आत्मा कार्यकारणसंघा
तो येन जितो वशीकृतो जितेन्द्रिय इत्यर्थः अनात्मनस्तु अजितात्मनस्तु शत्रु
त्वे शत्रुभावे वर्तेतात्मैव शत्रुवत् यथानात्मा शत्रुरात्मनोऽपकारी त
थात्मात्मनोऽपकारे वर्तेत इत्यर्थः ६ ॥

आनन्दगिरिकृतटीका

उक्तमनूद्य प्रश्नपूर्वकं श्लोकान्तरमवतारयति आत्मैवेत्यादिना एकस्यैवात्म
नो मिथो विरुद्धं बन्धुत्वं रिपुत्वं च लक्षणभेदमन्तरेणायुक्तमिति चोदिते व
शीकृतसंघातस्यात्मानं प्रति बन्धुत्वमितरस्य शत्रुत्वमित्यविरोधं दर्शयति
बन्धुरित्यादिना वशीकृतसंघातस्य विक्षेपाभावादात्मनि समाधानसम्भवा
दुपपन्नमात्मानं प्रति बन्धुत्वमिति साधयति तस्येति अवशीकृतसंघातस्य
पुनर्विक्षेपोपपत्तेरात्मनि समाधानायोगादात्मानं प्रति शत्रुभावे प्रसिद्ध
शत्रुवत् आत्मैव शत्रुत्वेन वर्तेतेत्युत्तरार्द्धं व्याकरोति अनात्मन इति दृष्टान्तं
व्याचष्टे यथेति उक्तदृष्टान्तवशादवशीकृतसंघातः स्वस्य हितानाचरणा
दात्मानं प्रति शत्रुरेवेति दार्ष्टान्तिकमाह तथेति ६ ॥

स्वामिकृतटीका

कथंभूतस्यात्मैव बन्धुः कथंभूतस्य चात्मैव रिपुरित्यपेक्षायामाह बन्धुरि
ति येनैवात्मनैवात्मा कार्यकारणसंघातरूपो जितो वशीकृतः तथाभू
तस्यात्मनः आत्मैव बन्धुः अनात्मनोऽजितात्मनस्तु आत्मैवात्मनः शत्रुत्वे श
त्रुवत् अपकारित्वे वर्तेतेत्यर्थः ६ ॥

पैशाचभाष्यं

तत्र किंवा पुनर्लक्षण आत्मनो बन्धुः किंवा लक्षणो वा रिपुः आत्मन इत्युच्य
ते बन्धुरात्मात्मनस्तस्य आत्मा तस्यात्मनो बन्धुः येनात्मैवात्मना जितः आत्मा
कार्यकारणसंघातः कार्यं शरीरं कारणानीन्द्रियाणि येन स्वीकृतः जितेन्द्रिय

गी॰
टी॰
ष॰

इत्यर्थः अनात्मनस्तु शत्रुभावे वर्तेतात्मैव शत्रुवत् यथा शत्रुरात्मनोऽपका
रीतथात्मनोपकारी अयत्नत इत्यर्थः ६ ॥

रामानुजभाष्यं

येन पुरुषेण स्वेनैव स्वमनो विषयेभ्यो जितं तन्मनस्तस्य बंधुः अनात्मनः अजि
तमनसः स्वकीयमेव मनः स्वस्य शत्रुवत् शत्रुत्वे च वर्तेत स्वनिःश्रेयसविपरी
ते वर्तेतेत्यर्थः यथोक्तं भगवता पराशरेणापि मन एव मनुष्याणां कारणं
बंधमोक्षयोः बंधाय विषयासंगि मुक्त्यै निर्विषयं मन इति ६ ॥

अभिनवगुप्तकृतटीका

अत्र च नाम उपायः अपि नात्मैव मन एवेत्यर्थः जितं हि मनो मित्रं चोरवत्तर
संसारोद्धरणं करोति अजितं तु तीव्रनिरययातनाक्लेशं वितनुते ६ ॥

परमार्थप्रपाटीका

अथात्मनो बंधुत्वं रिपुत्वं वा प्रकटयन्नाह बंधुरिति ॥ तस्य पुरुषस्यात्मा म
नः आत्मनो जीवस्य बंधुः सुहृद्रूपः तस्य कस्य येन पुरुषेण आत्मनैव स्वेनै
व आत्मा कार्यकारणसंघातरूपो जीवो जितः वशीकृतः अथ अनात्मनः
अजितात्मनः पुरुषस्य शत्रुत्वे आत्मैव स्वयमेव वर्तेत नान्यः ६ ॥

वनमालीटीका

भिन्न

आत्मनः शत्रुत्वमित्रत्वे विवृणोति बंधुरिति येन जीवेनात्मना भूम्नात्मा मनो
देहेंद्रियादिर्जितस्तस्यात्मनो जीवस्यात्मा मनो बंधुः अनात्मनो निर्जितम
नस्कस्य पुरुषस्यात्मैव मन एव शत्रुत्वे शत्रुभावे वर्तेत शत्रुवद्यथा शत्रुवत् ६ ॥

[illegible]वैजयन्ती

तत्र कस्य मनो बंधुः कस्य वा शत्रुः स्यादित्यपेक्षायां जितमनस्कस्याजितम
नस्कस्य मित्रशत्रुश्च मनो भवेदित्याह बंधुरात्मेति तस्य पुरुषस्य बंधुरा
त्मन आत्मा मनो बंधुरुपकारी भवति कस्य येन पुरुषेण आत्मनैव स्वेनैवा
त्मा मन एव जितः स्ववशीकृतः अनात्मनस्तु अजितमनसः पुरुषस्य तु आ
त्मैव मन एव शत्रुवत् शत्रुत्वे अपकारकत्वे वर्तेत प्रवर्तेत ६ ॥

मधुसूदनीटीका

आत्मा

इदानीं किंलक्षण आत्मनो बंधुः किंलक्षणो वात्मनो रिपुरित्युच्यते । आत्मा
कार्यकारणसंघातो येन जितः स्ववशीकृत आत्मनैव विवेकयुक्तेन मनसैव

नतशत्वादिना तस्यात्मा स्वरूपमात्मनो बंधुरुक्तं खलैरहितभावेन स्वहितक
रणात् अनात्मनस्तु अजितात्मनस्तु इत्येतत् शत्रुत्वे शत्रुभावे एव वर्तेतात्मैव
शत्रुवत् बाह्यरिपुरिवोक्तं खलमहत्त्यास्य स्वस्य तेनानिष्टाचरणात् ६ ॥

सदानंदटीका

वंधुरात्मात्मनः कीदृक् कीदृक् शत्रुरितीर्यते कार्यकारणसंघातो येनात्मैव
वशीकृतः १ विवेकतुल्यात तस्यात्मा विषयासक्ति वारणात् बंधुरस्यात्मनः आ
त्मस्वरूपस्यामोक्षसंसुखदः २ आत्मैव शत्रुवत् स्वस्वरूपस्याप्यजितात्मनः वर्तते
शत्रुभावेन विषयासक्तिबंधनात् ३ उक्तं खलमहत्त्याचस्व स्वस्यैव बंधन
म् तन्निहत्यात्मसमो तो पि स्वयं सिद्ध उपस्थितः ४।६ ॥

नीलकंठटीका

आत्मा मनः आत्मना मनसा अनात्मनः अजितचेतसः आत्मा मन एव शत्रुः ६ ॥

धनेरीटीका

आत्मनो वन्धुरिपुत्वं दर्शयति ६ ॥ स्पष्टमेतत्

रामकंठटीका

कथमित्याह ॥
तस्य पुरुषस्य स्वेनात्मिन आत्मनः आत्मैव स्वभाव एव बंधुः सर्वापत्त्राती
कात्र रक्षकत्वमतः यदुक्तं आत्मैव यदि नात्मानमहितेभ्यो निवारयेत् ।
को न्योहिततरस्तस्माद्य एवं वारयिष्यतीति कस्यात्मैव बंधुः येन पुरुषेण
स आत्मा स्वभावः आत्मनैव ज्ञानामृताभ्यवहाराभ्यासलब्धबलेन जि
तः प्रत्यवमर्षगोचरापादनाद्वशीकृतः येन तु सावात्मा प्रमादपरोगाह
नोपेक्षितः स त्वजितो नवशीकृतस्तस्याविधस्य तस्यायं शत्रुत्वे सर्वक्षया
घातकारि वै वर्तते तथा चोक्तम् न तत्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याघ्रवि
षोल्वणः अरिर्वा नित्यसंक्रुद्धो यदात्मा दुरधिष्ठित इति ६ ॥

कस्यात्मैव बंधुः कस्य चात्मैव लासिकी [illegible] टीका वरिउरित्यपेक्षायामाह ॥
जितः प्रत्यव
येन पुरुषेणात्मा स्वस्वभाव आत्मनैव ज्ञानाभ्यासबलेन जितः प्रत्यव
मर्शगोचरापादनाद्वशीकृतः तस्यात्मैवात्मनो बंधुः अनात्मनः प्रमा
दपरतयोपेक्षितात्मनः पुरुषस्यात्मैव शत्रुत्वे वर्तेत बाह्यशत्रुवत् तथा
चोक्तं न तत्कुर्यादसिस्तीक्ष्णः सर्पो वा व्याघ्रो वा विषोल्वणः अरिर्वा नित्यसं
क्रुद्धो यदात्मा दुरधिष्ठित इति [illegible] ॥

गी॰
टी॰
६

२८

पंढोलीटीका

तत्र किं लक्षण आत्मा आत्मनो बंधुः किं लक्षणश्चात्मात्मनो रिपुरिति
उभयं दर्शयति बंधुरिति तस्यात्मन आत्मा बंधुः येन तेनात्मना आत्मैव
देहेंद्रियसंघातः जितः वशीकृतः तद्युतः अनात्मनः अजितदेहेंद्रिय
संघातस्य शत्रुवत् आत्मैव शत्रुत्वे वर्तते ६

रणवीरसमिद्धोद्यिनी॥

एतदेव विवृणोति बंधुरिति तस्य पुंस आत्मा यत्न एव आत्मनः
स्वस्य बंधुः सर्वापत्प्रतीकारकृत्स्वजनः समरार्णवपारतरणो-
साह्यकृच्च येनात्मनानिश्चयात्मिकया बुद्ध्यात्मैवांतःकरण
मेव जितः स्ववशे स्थापितः न तु नस्तद्वशे स्वात्मा कृतः इति अना
त्मनो जितांतःकरणस्य तु आत्मैव यत्न एवायोग एवेति यावत्
शत्रुत्वे सर्वेच्छाव्याघातकारित्वे वर्तते स्वेदादिवयात्मध्येयत्ना
त्यागात्पारप्राप्ते मध्य एव निमज्जनहेतुभूतत्वात् अयं भावः य
दि आरंभ एव तरणे यत्नेन क्रियते तर्हि वारे एव स्थितिः स्यात् न तु न
दीतीरपि कृते च यत्ने समरार्णवमध्ये तत्त्यागेन पारप्राप्तिर्हि देत्रा
स्तामवारस्थितितोपिधं पितामध्य एव च निमज्जय परयोर्हेतात्मा
या सितः इति महाभूतेर्यः प्रारभ्य कर्माणि न समापयति अतए
वाभियुक्तैरुक्तं अनारंभो मनुष्याणां प्रथमं बुद्धिलक्षणं आरब्ध
स्यांतगमनं द्वितीयं बुद्धिलक्षणमिति ६॥

मधुभाष्य

बंधुरात्मेति आत्मा मनः आत्मनो जीवस्य आत्मना मनसा आत्मा
वजीवं आत्मैव मनः आत्मना बुद्ध्या जीवेनैव वा सद्बुद्ध्या विजय
ति उक्तं च मनः एव कारणमामननेति मन एव मनुष्याणां कारणं
बंधमोक्षयोः उद्धरेन्मनसा जीवं न जीवमवसादयेत् जीवस्य बंधुः

शत्रुश्चमनपवनसंघातः जीवेनबुद्ध्यादिद्वारामनोजितंतदा
बंधुःशत्रुरन्यच्चवास्य ततोजयेद्बुद्धिबलेनरस्तदेवेनभक्त्या
मधुकैटभारातित्यादिवक्ष्यैवेति अनात्मनः अजितात्मनः
पुरुषस्य अजितमनस्कस्यतदपिमनोनपकारीत्यनात्मा
अत्रापिशत्रुत्वायस्यनशत्रुत्वपदेवर्त्ततेसमशत्रुत्वः तस्यात्मामन
एवशत्रुवच्छत्रुरेववर्त्तते ६॥

29

भाषा अनुवाद

अब आत्मा ही जो किसी मनुष्यका बन्धु औ किसीका रिपु है इस
अपेक्षा पर कहते हैं जिसने अपने आत्मासे आत्माको जीता अर्थात्
विज्ञानमय आत्मा कर्तृक कार्य कारण मिलित रूप जो आत्मा स्थू
लसूक्ष्म शरीरादि वशीभूत होती है सोई विज्ञानमयजीव अपना ब
न्धुहै और आत्मा कहे शरीरादि अवशीकृत जो है सोई आप अपना
शत्रु तुल्य है ६ ॥

दोहा ॥

आत्महि बंधु है आत्मको जिह आत्म आत्मसें जीत जीत्यो नाजि
न आत्म तिह आत्मा वर्ते तुल्य अमीत ६॥

30

जितात्मनः प्रशान्तस्य परमात्मा समाहितः शीतो।
ष्णसुखदुःखेषु तथा मानापमानयोः ७ ॥

शाङ्करभाष्यं

जितात्मन इति जितात्मनः कार्यकरणादिसंघात आत्मा जितो येन स जितात्मा तस्य जितात्मनः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्त्तत इत्यर्थः किंच शीतोष्णसुखदुःखेषु तथा माने ऽवमाने च मानावमानयोः पूजापरिभवयोः समः स्यात् इत्यध्याहारः ७ ॥

आनन्दगिरिकृतटीका

कथं संयतकार्यकरणस्य बन्धुरात्मेति तत्राह जितात्मन इति जितकार्यकरणसंघातस्य प्रकर्षेणोपरतबाह्याभ्यन्तरकरणस्य परमात्मा विक्षेपणापुनः पुनरनभिभूयमानो निरन्तरं चित्ते प्रख्यात इत्यर्थः जितात्मानं सेवमानस्य तत्कर्माणं प्रदर्शयोगाङ्गानि दर्शयति शीतेति समः स्यादित्यध्याहारः पूर्वार्द्धं व्याचष्टे जितेत्यादिना न केवलं तस्य परमात्मा साक्षादात्मभावेन वर्त्तते किन्तु शीतोष्णादिभिरपि नासौ बाध्यते तत्र ज्ञानादिसम्मार्द्धं विभजते किंचेति तेषु समः स्यादिति सम्बन्धः ७ ॥

स्वामिकृतटीका ॥

जितात्मनः स्वस्मिन्बन्धुत्वं स्फुटयति जितात्मन इति जित आत्मा येन तस्य प्रशान्तस्य रागादिरहितस्यैव परं केवलमात्मा शीतोष्णादिषु सत्स्वपि समाहितः स्वात्मनिष्ठो भवति नान्यस्य यद्वा तस्य हृदि परमात्मा समाहितः स्थितो भवति ७ ॥

पिशाचभाष्यं

जितात्मनः प्रशान्तस्य कार्यकारणसंघातो जितो येन स जितात्मा तस्य जितात्मनः प्रशान्तस्य परमात्मा समाहितः साक्षादात्मभावेन वर्त्तत इत्यर्थः किंच शीतोष्णसुखदुःखेषु तथा मानापमानयोः पूजापरिभवयोः समः स्यात् ७ ॥

रामानुजभाष्यं

योगारम्भयोग्यावस्थोच्यते जितात्मन इति शीतोष्णसुखदुःखेषु मानापमानयोश्च जितमनसः प्रशान्तस्य मनसि परमात्मा समाहितः सम्यगाहितः स्वरूपेणावस्थितः प्रत्यगात्मात्र परमात्मेत्युच्यते तस्यैव प्रकृतत्वात् तस्यापि पूर्वं पूर्वावस्थापेक्षया परमात्मत्वात् आत्मा परं समाहित इति वा सम्बन्धः ७ ॥

अभिनवगुप्तकृतटीका

गी. टी. ४

नत्र जितमनस इंद्रियं प्रशांतो निरहंकारः परेश्वात्मनि शीतोष्णादिषु वा भेदधीः न रागद्वेषौ तानमथांतावुद्भिः विविधं तानेय त्रतद्दितानं प्रा... कर्म ७ ॥

31

परमार्थप्रपाटीका

अथ जितात्मनस्तस्मिन् वेधुत्वं प्रकटयति जितात्मन इति ॥ जित आत्मा मनो येन तस्य प्रशांतस्य रागादिरहितस्य परे केवलमात्मा शीतोष्णादिषु सत्स्वपि तथा मानापमानयोरुपस्थितयोः सतोरपि समाहितः स्वात्मनिष्ठो भवतीत्यस्य ॥ ...नेति ॥७॥

वनमालीटीका

जितात्मनो वेधत्वमाह जितेति शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्वपि तथा मानापमानयोः सन्मानादरयोश्चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेन जितात्मनः प्रयुक्तजितमनस्कस्य प्रशांतस्य रागद्वेषशून्यस्य परमात्मा परमेश्वरः समाधिविषयो भवति अतो जितात्मा प्रशांतश्च भवेदिति भावः ७ ॥

उत्तमवैजयन्तीटीका

वृयस्यां योगारूढः यते साकावस्थेत्य तायां तामाह त्रिभिः जितात्मन इति शीतोष्ण सुखदुःखेषु शीतोष्णादि ...

अथ केषु सुखदुःखादिषु तथा तेन प्रकारेण मानापमानयोश्च मानमादरोपमा नमनादरस्तयोश्च जितात्मनः जित आत्मा मनो येन स तथा तस्याविक्रतमनसः प्रशांतस्य रागद्वेषादिवर्जितस्य मुमुक्षोः पुरुषस्य परम सर्वोत्तमात्मा स्वस्वरूपः समाहितः सम्यगाहितः स्वस्वरूपेण स्थितः समाधिस्थो भवतीत्यर्थः यद्वा परमश्चासावात्मा च परमात्मा उपरमात्मा शहौ जीव वाचको तत्त्वीश्वरपरः तस्यैव प्रकरणात्सर्वोपरशमस्तत्वन्यात्ज्ञेयमर्थः ७ ॥

मधुसूदनी

जितात्मनः स्वबंधत्वं विवृणोति । शीतोष्णसुखदुःखेषु चित्तविक्षेपकरेषु सत्स्वपि तथा मानापमानयोः पूजापरिभवयोः चित्तविक्षेपहेत्वोः सतोरपि तेषु समत्वेनेति वा जितात्मनः प्रयुक्तस्य जितेंद्रियस्य प्रशांतस्य मंत्रसमत्वाद्रागद्वेषशून्यस्य परमात्मा स्वप्रकाशज्ञानस्वभाव आत्मा समाहितः समाधिविषयो योगारूढो भवति परमिति वा छेदः जितात्मनः प्रशांतस्यैव परं केवलमात्मा समाहितो भवति नान्यस्य तस्माज्जितात्मा प्रशांतश्च भवेदित्यर्थः किंच ७ ॥

नरानंदीटीका

जितात्मनः स्ववंशवर्तिविग्रहणो निरमापतिः सत्त्वविक्षेपकेषु शीतोष्णादि
षु यस्य तु: १ न जहाति समत्वं धीरात्मतत्वसमीक्षणात् जितेन्द्रियस्य शान्तस्य
रागद्वेषपरित्यागात् २ समाधिविषयस्तस्य स्वप्रकाशो हरिर्भवेत् नान्यस्य सा
प्रायो विक्षोभसाध्यानो भवेन्मतिः ३ संसारदुःखदफकारणमाधिबीजं शान्ते
र्द्वेहविविधकामभयादिमूले चित्ते नियम्य चिरान्यभवेति धीरायमादपम्
निरतः स हरिर्मम इह: ४ । ७

नीलकंठीटीका

मनसो जये फलमाह जितात्मन इति शीतोष्णादिषु प्राप्तेषु जितात्मनः नि
र्विकारचित्तस्य आत्मा चित्तं परं उत्कर्षेण समाहितः समाधिप्राप्तो भवति शा
न्तः समाधिसिद्ध्यर्थं मनोजेतव्यमेवेत्यर्थः ७ ॥

आनंदीटीका

परमात्मस्वपरदेहे स्वदेहे च समात्मतुल्यामतिर्भवति स्वतेन श्रूयतां धर्मस
र्वस्वं श्रुत्वा चैवावधारय आत्मनः प्रतिकूलानि परेषां न समाचरेत् ७ ॥

रामकंठीटीका

यथोक्तस्यात्मजयस्य फलमाह जितेति यथोक्तेन प्रकारेण वशीकृत आ
त्मा येन तस्य जितात्मनः अत एव प्रशान्तस्य स्वस्वभावनिर्दोषपरमात्मस
मापत्तिवशान्निवृत्तविकल्पविलवस्य परेषु मतिरिक्तत्वेन प्रतिपन्नेषु सर्व
देहेषु तथात्मस्वहं तया प्रतीयमानेतल्यासामान्यसंविदेकस्वरूपग्रा
हिणी मतिर्भवति तथा शीतोष्णसुखदुःखादिषु बाह्याभ्यन्तरनिमित्तेषु
प्रयुज्यमानेमाने द्वंद्वोपप्लवेषु तथा परेण पूजायां तथापि तथावमानेपराभवेत त्वैवसमा
मानामतिर्भवति न तस्य तेषामपि सर्वगतादेकस्मात्स्वभावनिर्विकारात
रमात्मनोहं प्रतीतिर्व्यतिरिच्यते नानाविधेषु विकारकारणेषु उपस्थितेष
पि तस्य सत्येस्वात्मन्यवसंधानं लोकवन्न विक्षिप्यत इत्यर्थः [illegible]
[illegible] ७ ॥

[illegible]नीटीका

यथोक्तस्यात्मजयस्य फलमाह — जित उक्तविधया वशीकृत आत्मा येन तस्मात् एव प्रशान्तस्य परमात्मापत्ति वशा
त्निवृत्तविकल्पस्य शीतोष्णसुखदुःखेषु सत्स्वपि मानापमानयोः सतोर
पि परमात्मा [illegible] समाहितः स्वात्मनिष्ठो भवति सानादात्मभावेन वर्त
त इत्यर्थः विकारहेतुषु सत्स्वपि स्वात्मन्यनुसंधानेन लोकवन्न विक्षिप्यत इति

लौकिकी · त्मसमा

मी.
टी.
ब.

एवंविपर्ययोगारूढस्य लक्षणमपमेहरति ७॥

पंठोलीटीका

जितात्मनः स्वस्मिन्स्वं पुनं स्पष्टयति जितात्मन इति शीतोष्णसुखदुः
खेषु तथा मानापमानयोः पूजाभिभवयोः समस्य जितात्मनः जित
देहेंद्रियसंघातस्य प्रशांतस्य रागादिदोषरहितस्य परमात्मा समाहि
तः स्वस्वरूपनिष्ठो भवति ७॥

रणवीरसमिद्धोयिनी॥

जितात्मन इति जितात्मनः स्वायत्तीकृतांतःकरणस्यात एव प्र
शांतस्य प्रारभ्यमाणकर्मप्रवृत्ति देहभूतपापमेवाश्रयेदस्मान्
कथं भीष्ममहं संख्ये इत्यादिसंकल्पप्रशमवतः परं केवलमात्मां
तःकरणं समाहितः सावधानो भवति न विकृतिमापद्यते निश्च
याच्च प्रस्खलतीति यावत् कदा शीतोष्णादिषु सत्स्वपि तत्र परप्र
युक्तहिमांशुदेवतासु संजातहिमकरकादिषु स्फुरत्पन्नं शीतं यस्मि
न्नतिजलादिद्रवद्रव्याणि घनायंते उष्णं च ग्रैष्मकालिकमाध्या
ह्निकरविकिरणसंतापः परप्रयुक्ताग्नेयायस्त्रजनितमोस्यं सु
खं शत्रुवधादिजनितानंदः दुःखं स्वकीयाहितमरणजनितो विषादः
मानः स्वकीयकृतादरः अवमानः परकृततेजोवधादिलक्षणः य
हृप्रीतरूपसुखं उष्णादिरूपं दुःखं च मानः तादृशमहापापस्य प्रहृत
दिनासंजातव्यथपरकृतः साधु महावीर साधु सत्यं चाद्वितीयोसि
पुनः प्रहरेत्येवं रूपश्लाघावभासमानस्यादरः अवमानस्यानंत
रं विधीयमानो दर्पोपस्य पौरुषमनंतरं महारणविषयीभूतस्त्वं नभ
विष्यसीत्येवं रूपेणादरः अथ वा शीतोष्णादिषु सत्स्वपि प्रशांतस्या
विहितांतःकरणस्य महत्त्वं ततरायभूत दुर्ज्ञैः कलत्वाणसंकल्पानां
प्रशमनात्स्वजात्युचितधर्माचरणे वर्तमानस्येति यावत् यतो
जितात्मनः स्वायत्तीकृतांतःकरणापरमात्मापरमेश्वरः समाहितः

सम्यगात्मसमाहितो भवति तदभिलषितं संसाधयती
तिभावः ८॥

मधुभाष्य

जितात्मनः फलमाह जितात्मन इति जितात्मा हि प्रशान्तो
भवति न तस्य मनः प्रायो विषयेषु गच्छति तदा च परमात्मा
सम्यग्हृद्याहितः सन्निहितो भवति अपरोक्षज्ञानी स भवती
त्यर्थः अपरोक्षज्ञानिनो लक्षणं स्पष्टयति शीतोष्णेत्यादि
ना शीतोष्णादि कूटस्थः ज्ञानविज्ञानतृप्तात्मा विजितेन्द्रिय
इति कूटस्थ एव देहः विज्ञानं विशेषज्ञानं अपरोक्षज्ञानं वा
तथोक्तं सामान्येनैव विज्ञेया विशेषा मनगोचराः देवादी
नां तु तज्ज्ञानं विज्ञानमिति कीर्तितं श्रवणान्मननाच्चैव य
ज्ज्ञानमुपजायते तज्ज्ञानं दर्शनं विशो विज्ञानं शाश्वदवीत
विज्ञानं ज्ञानसंगादे विशिष्टं दर्शनं तथेत्यादि कूटस्थो नि
विकारः कूटवत्स्थित इति व्युत्पत्तेः कूटमाकाशः कूटं
स्वं विद्लं व्योम संधिगकाशमुच्यत इत्यभिधानात् यो
गी योगेन युक्त युक्तः योगसंपूर्ण एवंभूतो योगानुष्ठाता
योगसंपूर्ण उच्यत इत्यर्थः स एव च सर्वसाहि शिष्यते
साधुपापादिषु समबुद्धिर्जीवविनः परमात्मनः सर्वस्य
तन्निमित्तस्य च सर्वेषैकरूप्येण विरूपा एव हि जीवाः
विशेषतस्तु तत्कारणकृताः सर्वेषां च साध्वादिकं सर्वमी
श्वरकृतमेव स्वतो न किंचिदपि उक्तं चैतत्सर्वं स्वतः सर्वे
पि विरूपाः सर्वे दोषविवर्जिताः जीवास्तेषां तु ये दोषास्ते
उपाधिकृता मताः सर्वं वेश्वरतस्तेषां न किंचित्स्वत एव
तु समाप एवमतः सर्वेष्वेव साम्यं भ्रान्ति सम्भवं एवं समानजी

वास्तवविशेषो देवतादिषु स्वाभाविकस्तन्नियमादत एव मता
तनः श्रेष्ठादेस्तथा दोषा नित्याः स्वाभाविका अपि गुणदो
षौ मनुष्याणां नित्यौ स्वाभाविकौ मतौ गुणैकमात्ररूपास्तु
देवा एव सदा मता अतिव्याप्ते न ह्यसाधुपापादीनां ब्रह्मादि
साम्यं तत्र दोषस्मृतेः समानाविषमाः सृष्टा विषमाणां स
मा तथा क्रियते येन देवोपि स्वपरा ह्यसतेषु मा नितिपाप्म
विनं बंधुवधः कर्मविपाकेव एवमी एतानि मान्यस्या
नानिगदीयो सुतरोजरमिति वामने गुणानुसरणीं सृष्टा
समदर्शिं च यो नरः सर्वभूतेषु ऊकृतेनस्य विष्णुः प्रसीदति
वैषम्यं सुजनमस्वहृदत्तातिनरसंचयात् सृष्टा या विषमादृ
हिः समासाम्यं विदुः स्वजमिति ब्रह्मवैवर्ते सुहृदादिषु
प्राप्तोक्तसृष्टादिकृतिरन्यनाऽनधिकापीमापि समास
मातदप्पादृ यथा सुहृत्स्वकर्तव्यं पितृभ्रातृसुतेषु च तथा
करोति सुहृत्समबुद्धिः स उच्यत इति गारुडे प्रत्युपकार
निरपेक्षयोपकारकृत् सुहृत् लोके मध्यस्थानं निरूप्य योद्वा
करोति स मित्रं अरिर्वधादिकर्ता कर्तव्ये उपकारे अपका
रेय उदास्ते स उदासीनः कर्तव्यमुभयमपि यः करोति स
मध्यस्थः अवासितकृद्द्वेष्यः आदवेतत् द्वेष्य अवासित
कृत्कार्यमात्रकारी तु मध्यमः शिष्टकाच्छियोऽनिरूप्याधि
लोकमयः पतिरक्षति समित्रमुपकारं न मनेपेक्ष्योपका
रकृत् वस्तुतः समहृत्सौकः पात्रस्यापि वधादिकृदि
ति समाधियोगमकारमाह ॥१०॥

भाषा अनुवाद

जितात्म पुरुष को जो अपने आत्मामे वन्धुता है सो खुलासा करिके कहते हैं कि जिसने आत्मा जो शरीर आदि तिसको जीता अर्थात् अप ने आधीन किया केवल वह प्रीति विरोध आदिसे रहित मनुष्य का म न शीत उष्ण सुख दुःख आदिमे समाहित कहे सावधान रहता है अ र्थात् वही आत्मनिष्ठ है अथवा उसीका हृदय परमात्मा मे समाहित अर्थात् विक्षेप रहित निश्चल होना किसीका ओरहे नही होसकता है ७

दोहा॥

आत्मजितको प्रशांतको ईश्वर समता ज्ञान शीतोष्ण सुख दुःख मे तथा मान अपमान ७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः ८॥

शांकरभाष्यं

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विज्ञानं तु शास्त्रतो ज्ञातानां तथैव स्वानुभवकरणं ताभ्यां ज्ञानविज्ञानाभ्यां तृप्तः संजातालंप्रत्यय आत्मान्तःकरणं यस्य स ज्ञानविज्ञानतृप्तात्मा कूटस्थोऽप्रकम्प्यो भवतीत्यर्थः विजितेन्द्रियश्च य ईदृशो युक्तः समाहित इति स उच्यते कथ्यते स योगी समलोष्टाश्मकांचनः लोष्टाश्मकांचनानि समानि यस्य सः समलोष्टाश्मकांचनः ८॥

आनन्दगिरिकृतटीका

चित्तसमाधानमेव विशिष्टफलं चेदिष्टं तर्हि कथंभूतः समाहितो व्यवह्रियते तत्राह ज्ञानेति परोक्षापरोक्षाभ्यां ज्ञानविज्ञानाभ्यां संजातोलंप्रत्ययोऽक्रियो हर्षविषादकामक्रोधादिरहितो योगी युक्तः समाहित इति व्यवहारभागी भवतीति पादत्रयव्याख्यानेन दर्शयति ज्ञानमित्यादिना स च योगी परमहंसपरिव्राजकः सर्वत्रोपेक्षाबुद्धिरतिशयवैराग्यभागीति कथयति स योगीति ८॥

स्वामिकृतटीका

योगारूढस्य लक्षणं श्रेष्ठ्यं चोपपाद्य उपसंहरति ज्ञानविज्ञानेति ज्ञानमौपदेशिकं विज्ञानमपरोक्षानुभवस्ताभ्यां तृप्तो निराकांक्ष आत्मा चित्तं यस्य अतः कूटस्थो निर्विकारः अतो विजितानीन्द्रियाणि येन अत एव समानि लोष्टादीनि यस्य मृत्पिंडपाषाणस्वर्णेषु हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८॥

पैशाचभाष्यं

ज्ञानविज्ञानेति ज्ञानं शास्त्रोक्तपदार्थानां परिज्ञानं विशेषतो ज्ञानं स्वानुभवकरणं ताभ्यां तृप्तात्मा कूटस्थः अप्रकंप्यो भवतीत्यर्थः विजितेन्द्रियश्च ईदृशः युक्तः समाहितः स उच्यते समलोष्टाश्मकांचनः ८ [illegible]

रामानुजभाष्यं

[illegible]

ज्ञानेति ज्ञानविज्ञानतृप्तात्मा आत्मस्वरूपविषयेण ज्ञानेन तस्य च प्रकृतिविजातीयाकारविषयेण च विज्ञानेन तृप्तमनाः कूटस्थः देवाद्यवस्थास्वनुवर्तमानः सर्वसाधारणज्ञानैकाकारात्मनि स्थितः तत एव विजितेन्द्रियः समलोष्टाश्मकांचनः प्रकृतिविविक्तस्वरूपनिष्ठतया प्राकृतवस्तुविशेषेषु भोग्यतयाभा

वात् लोष्टाश्मकाञ्चनेषु समप्रयोजनो यः कर्मयोगी स युक्त इत्युच्यते आत्माव
लोकनरूपयोगाभ्यासार्हः उच्यते ८ ॥

अभिनवगुप्तकृतटीका। [illegible] ८

ज्ञानमभ्रान्ता बुद्धिर्विविधं ज्ञानं यत्र तद्धिता **परमार्थप्रपा** नं ज्ञानयुक्त इति तं कर्म ॥ ८॥

अथ योगारूढत्वमुपपाद्योपसंहरति ज्ञानविज्ञानेति ॥ ज्ञानं शास्त्रगुरूपदि
ष्टं विज्ञानमनुभवस्ताभ्यां तृप्तो निरपेक्ष आत्मा चित्तं यस्य अतः कूटस्थो निर्विका
रः अत एव विजितेन्द्रियः अत एव समलोष्टाश्मकाञ्चनः मृत्पिण्डपाषाणसुव
र्णेषु समः हेयोपादेयबुद्धिशून्यः स युक्तो योगारूढ इत्युच्यते ८ ॥

वनमालीटीका

ज्ञाने शास्त्रीये विज्ञाने श्रवणमनननिदिध्यासनाज्जाते भगवदपरोक्षे ताभ्यां तृ
प्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसंनिधावपि विका
रशून्यः अत एव विजितानि रागद्वेषपूर्वकविषयग्रहणाद्व्यावर्तितानीन्द्रियाणि
येन सः अत एव हेयोपादेयधीशून्यत्वेन समानि मृत्पिण्डपाषाणकाञ्चनानि य
स्य सः योगी भगवति निरुद्धचित्तः स युक्तः योगारूढ इत्युच्यते ८ ॥

कृष्णमैजयन्तीटीका

किंच ज्ञानविज्ञानतृप्तेति ज्ञानविज्ञानतृप्तात्मा ज्ञाने स्वस्वरूपविषयके विज्ञाने
प्रकृतिविजातीयाकारविषयके ताभ्यां तृप्तः संतुष्ट आत्मा मनो यस्य स तथा य
द्वा ज्ञाने शास्त्रजनिते विज्ञाने आत्मस्वरूपविषयके ताभ्यां तृप्त आत्मा मनो यस्य स तथा य
शास्त्रजनितचेतनाचेतनविषयके विज्ञाने परमात्मविषयके ताभ्यां तृप्तमनाः यद्वा ज्ञाने
नाः कूटस्थः कूटेषु प्रकृतिकार्येषु सुरनराद्याकारेषु परमात्मविषयके ताभ्यां तृप्तमम
वानुभवेनात्मनि तिष्ठतीति स तथा अत एव स्वात्मैकज्ञानस्वरूपस्वभा
वशीकृता[illegible]नीन्द्रियाणि वासनाभ्यासेन [illegible]रूपाणि येन स तथा विजितेन्द्रियः विशेषेण जितानि स्व
देवसमलोष्टाश्मकाञ्चनः लोष्टं मृत्पिण्डः अश्मा पाषाणः काञ्चनं सुवर्णं समानि
तुल्यानि लोष्टाश्मकाञ्चनानि यस्य स तथा प्रकृतिविप्रकृत्यात्मस्वरूपानुभवानन्द
स्वैवैवन दितरेषु प्राकृतेषु लोष्टादिषु वस्तुषु पृथक् पृथक् स्वरूपदर्शनविवेका
भावात्तुल्यदृष्टिरित्यर्थः तर्हि किं बालः नेत्यत आह योगी कर्मयोगी कर्मयोगवा
न् बालस्तु विवेकपूर्वकं कर्म कर्तुमशक्त इत्यर्थः ईदृशो यः स युक्त आत्मावलो
कना[illegible]भ्यासयोगयुक्त इत्युच्यते एवं कथ्यते ८ ॥

मधुसूदनी

ज्ञानं शास्त्रोक्तानां पदार्थानामौपदेशिकं ज्ञानं विज्ञानं तदप्रामाण्यशंकानिराकरणफलेन विचारेण तथैव तेषां स्वानुभवेनापरोक्षीकरणं ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स तथा कूटस्थो विषयसंनिधानेपि विकाररहितः अत एव विजितानि रागद्वेषपूर्वकाद्विषयग्रहणाद्व्यावर्तितानींद्रियाणि येन सः अत एव हेयोपादेयबुद्धिशून्यत्वेन समानि मृत्पिंडपाषाणकांचनानि यस्य सः योगी परमहंसपरिव्राजकः परमवैराग्ययुक्तो योगारूढ इत्युच्यते [illegible] ८ ॥

सदानंदीटीका

शास्त्रोक्तानां पदार्थानां ज्ञानं स्यादौपदेशिकं असंदिग्धाविपर्यासं विज्ञानं स्वानुभूतितः १ जातालंप्रत्ययस्ताभ्यामात्मा चित्तं हि यस्य सः संनिधानेपि भोगानां निर्विकारोतिधीरधीः २ व्यावर्तितानि भोगेभ्यो येन सर्वेंद्रियाणि सः हेयोपादेयधीशून्यतया यस्य समानि च ३ मृत्पाषाणसुवर्णानि वीततृष्णो निजात्मवित् ईदृशो युक्त इत्युक्तो योगारूढ इतीर्यते ४॥८॥

नीलकंठीटीका

समाधिसिद्धेरपि किं फलमत आह ज्ञानेति ज्ञानं शास्त्रोपदेशजा बुद्धिः विज्ञानं शास्त्रार्थध्यानजः साक्षात्कारोनुभवस्ताभ्यां तृप्तः संजातालंप्रत्यय आत्मा चित्तं यस्य स ज्ञानविज्ञानतृप्तात्मा यत एवं तृप्तात्मातः कूटस्थः अकंपः संसारतापानास्कंदितो भवतीति समाधिफलं अस्य लोकप्रसिद्धं लक्षणमाह विजितेंद्रिय इति समलोष्टाश्मकांचन इति एवंविधो योगी स युक्तः प्राप्तयोग इत्युच्यते विद्वद्भिः ८ ॥

आनंदीटीका

योगीह प्राप्तयोगः विजितेंद्रियः ग्रहणादिपंचकसंयमवान् कूटस्थो मनोहंकारबुद्धीनामुपरतत्वावलंभनेन शैलशिखर इवोन्नप्रदेशे निर्लेपः स्थितः शास्त्रात्यथार्थधारणं ज्ञानं शास्त्राव ए तस्य साक्षात्कारो विज्ञानं ताभ्यां तृप्तः इतरस्पृहाहीनः आत्मा अंतःकरणं यस्येदृशः तीर्णतेनक्यः ज्ञानतेजः समलोष्टाश्मकांचनः बहिःसंविन्निविरहेणाज्ञानोपादानोपेक्षाहानेन निर्विकारः युक्तः परब्रह्मणि योजित इत्युच्यते ॥

गी· सचैवंविधोयोगारूढउच्यतेइत्या रामकंठी टीका

टी·ब· ह ज्ञानं शास्त्रतः स्वरूपावगममात्रं विज्ञानं शास्त्रावगतस्य तत्त्वस्य साक्षा-
त्कारः ताभ्यां तृप्तो निराकांक्ष आत्मा स्वभावो यस्य स तथा तत एव कूटा-
स्थः आत्मपरमार्थे नित्यात्मप्रत्ययत्वात् कूटस्थः शैलादिवन्निष्प्रकंपः
यतो विजितेंद्रियः वशीकृतवाह्यांतःकरणो न तु हठशः एवं लोभा-
दिदोषरहितत्वात् समौ लोष्टाश्मानौ मृत्पिंडपाषाणौ कांचनं च हेम-
यस्य स तथाविधो युक्तो योगारूढ उच्यते ८॥

एवंविधस्य योगारूढस्य लक्षणमुपसंहरति

लासिकी [illegible]टीका

ज्ञानमौपदेशिकम् विज्ञानमपरोक्षानुभवः ताभ्यां तृप्तो निराकांक्ष आ-
त्मा स्वस्वभावो यस्य सः अतः कूटस्थो निर्विकारः यतो विजितेंद्रियः वशी-
कृतवाह्यांतःकरणो न तु हठशः अत एव समानि हेयोपादेयबुद्धिशून्य-
तया लोष्टादीनि यस्य सः एवंविधो युक्तो योगारूढ इत्युच्यते [illegible] ८॥

पंचोलीटीका

योगारूढस्य लक्षणं श्रेष्ठत्वमुपसंहरति ज्ञानेति ज्ञानविज्ञानतृप्ता-
त्मा ज्ञानं आत्मविषयं शास्त्रजनितं विज्ञानं आत्मसाक्षात्कारस्वरूपं ता-
भ्यां तृप्तः आत्मा अंतःकरणं यस्य सः कूटस्थः अप्रकंप्यः विजितेंद्रियः स-
मलोष्टाश्मकांचनः युक्तः समाहितः स तु योगी कथ्यते ८

रसावीरसमिद्धायिनी॥

ज्ञानेति ज्ञां निश्चयात्मिकां बुद्धिमानयति प्रापयतीति ज्ञानं बुद्धुक
बोधायकं विज्ञानं शास्त्रार्थविषयो बोधस्तेन तृप्त आत्मा बुद्धिर्यस्य
स ज्ञानविज्ञानतृप्तात्मा शास्त्राचार्योपदेशो निश्चयदार्ढ्यं वा नित्यार्थः
अथवा ज्ञानमर्थशास्त्रादितस्तदर्थावगममात्रं विज्ञानं शास्त्रावग-
तस्य तत्तदर्थज्ञातस्य साक्षात्कारस्ताभ्यां तृप्तो निरंतराभ्यासवशा-
न्निराकांक्ष आत्मांतःकरणं यस्येत्यर्थः विजितेंद्रियः निगृहीतबा-
ह्यगृहीन्द्रियः कूटस्थः कूटे यो लक्षणगवदन्तर्भूयस्थ न्ताकेतिष्ठती

तिकूटस्थः स्पंदनादावारूढस्य प्रागुक्तसत्त्वं प्रस्थितमिति यावत् अथ
चकूटवद्वतिष्ठतीति योऽचलादिवन्निष्प्रकंपइत्यर्थः यताद्यास्य
कर्मयोगी युक्तइति युक्तपार्यवतद्यथयोग्यउच्यते यतःसमलो
ष्टाश्मकांचनः लोष्टं लोष्टवदुपेक्ष्यउदासीनः अश्मपाषाणस्मा
यः पिंडादिवद्दतिकठोरत्वेन पीडाजनकोदृयोतिद्युवर्गः कांच
नं स्वर्णादिवदुपादेयः स्नेहपात्रभूतः पुत्रमित्रादिवर्गः तेत्रयो
पि समावच्छ्रतास्तुल्याः आततायित्वमाश्रयस्यतः यथोक्तं
आततायिनमायांतं हन्यादेवाविचारयन्निति अथवा युथायभा
वे लोष्टाश्मानौ प्रसिद्धौ कांचनं च स्वर्णं यत्नेकृते पाषाणा पाशु
ये संपादनाय व यवोवेत्यत त्रयं समं यस्य सत्यानेतुल्यमाशुयेयस्ये
ति निरापेक्षे पि वीरे सति तुष्टादनिवृत्तिः प्रतिपादिता ८ ॥

मधुभाष्य

८ ॥

37

भाषा अनुवाद

योग आरूढ पुरुष के लक्षण औ अवस्था कहते हैं कि ज्ञान कहे । शास्त्रसे अथवा गुरुके उपदेश से जो होय और विज्ञान जो अनुभव । सिद्ध अर्थात् हम सोई ब्रह्म हैं यह प्रमत्त ज्ञान इन दोनो से जिसका आत्मा कहे चित्त सन्तुष्ट है और जिस ने इन्द्रियगण को जीता है तथा ढेला पत्थर सोना ये जिसको समान अर्थात् लेने छोड़नेकी बुद्धि जिसे नहीं ऐसाजो निरपेक्ष निर्विकार कूटस्थ कहे अचल के तुल्य निश्चल पुरुष सोइ युक्त योगी कहे योगारूढहै ८

दोहा

ज्ञान विज्ञानसें तृप्तमति कूटस्थ जितेंद्रिजान युक्तकह्यो यो
गी सम जिह हेम मृतक पाषान ८॥

36

सुहृन्मित्रार्युदासीनमध्यस्थद्वेष्यबन्धुषु साधुष्वपि च
पापेषु समबुद्धिर्विशिष्यते ९॥

शंकरभाष्यं

किंच सुहृदिति सुहृदित्यादिश्लोकार्द्धमेकपदं सुहृदिति प्रत्युपकारमनपेक्ष्यो
पकर्त्ता मित्रं स्नेहवान् अरिः शत्रुः उदासीनो न कस्यचित् पक्षं भजते मध्यस्थो यो वि
रुद्धयोरुभयोर्हितैषी द्वेष्यः आत्मनोऽप्रियो बन्धुः सम्बन्धीत्येतेषु साधुषु शास्त्रानु
वर्तिष्वपि च पापेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृ
तबुद्धिरित्यर्थः विशिष्यते विमुच्यत इति वा पाठान्तरं योगारूढानां सर्वेषाम
यमुत्तम इत्यर्थः ९॥

आनन्दगिरिकृतटीका

योगारूढस्य प्रशस्तत्वमभिप्रेत्य योगस्याङ्गान्तरं दर्शयति किंचेति पदच्छेदः
पदार्थोक्तिरिति यावत् सोऽनाकाङ्क्षः सम्पादयति सुहृदितीति अरिर्नाम परोक्तमपकार
कः प्रमत्तमप्रियो द्वेष्य इति विभागः समबुद्धिरिति यावद्बोधकः किमिति प्र
थमो हि प्रश्नो जातिगोत्रादिविषयः द्वितीयो व्यापारविषयः उक्तप्रकारेणोक्त ध्या
बुद्धित्वे सर्वोत्कर्षो वा सर्वोपायविमोक्षो वा सिध्यतीत्याह विशिष्यत इति पाठद्वये
पि सिद्धमर्थं संगृह्य कथयति योगारूढानामिति ९॥

स्वामिकृतटीका

सुहृन्मित्रादिषु समबुद्धिस्तु ततोऽपि श्रेष्ठ इत्याह सुहृदिति सुहृत् स्वभावे
नैव हिताशंसी मित्रं स्नेहवशेनोपकारकः अरिर्घातकः उदासीनो विवदमानयो
रुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हिताशंसी द्वेष्यो द्वेषवि
षयः बन्धुः संबन्धी साधवः सदाचाराः पापा दुराचाराः एतेषु समो रागद्वेषशून्या बुद्धि
र्यस्य स तु विशिष्यते ९॥

पिशाचभाष्यं

किंच श्लोकार्धमेकं पदं सुहृदिति प्रत्युपकारमनपेक्ष्य उपकर्त्ता मित्रं स्नेहवान्
अरिः शत्रुः उदासीनो न कस्यचित्पक्षं भजते मध्यस्थो विरुद्धयोरुभयोः हितैषी।
द्वेष्यः आत्मनः अप्रियो बन्धुः संबन्धी इत्येतेषु साधुषु शास्त्रार्थानुवर्तिषु अपि च पा।
पेषु प्रतिषिद्धकारिषु सर्वेष्वेतेषु समबुद्धिः कः किंकर्मेत्यव्यापृतबुद्धिरित्यर्थः
विशिष्यते योगारूढाणां सर्वेषां उत्तम इत्यर्थः ९॥

रामानुजभाष्यं

गी॰
टी॰
ष॰

39

तथाच सुहृदिति वयोविशेषानंगीकारेण हितैषिणः सुहृदः सवयसो हितैषिणो मित्राणि अरयोऽमित्रास्तेषु नयैकवः उभयहेत्वभावादुभयरहिता उदासीनाः जन्मत एवोभयरहिता मध्यस्थाः जन्मत एवानिष्टकर्तारो द्वेष्याः जन्मत एव हितैषिणो बंधवः साधवो धर्मशीलाः पापाः पापशीलाः आत्मैकप्रयोजनतया सुहृन्मित्रादिभिः प्रयोजनाभावादहिताभावाच्च तेषु समबुद्धिर्योगारूढः सर्वैर्विशिष्यते ९॥

अभिनवशंकरटीका

सुहृत्प्रत्युपकारमनपेक्ष्योपकारी मित्रं स्नेहवानरिः शत्रुः उदासीनः पक्षद्वयरहितः मध्यस्थः केनचिद्देशेन मित्रं केनचिच्छत्रुः द्वेष्यः स्वद्वेषविषयः बंधुः पुत्रादिसम्बंधेन पक्षेषु सर्वेषु समधीः पवेसाधुषु पापेषु च सर्वविशिष्यते क्रमात्क्रमेण संसारान्तरति ... द्वैषि ... आत्मनः ... रहित सर्वसम्बंधसंगो जितसाम्यावस्थत्वात्स्वभावस्य बंधकत्वं जीवन्मुक्तिर्येषां साम्ये हिते प्रतिष्ठिताः सारूप्यब्रह्म ९॥

परमार्थप्रपा

अथ समबुद्धित्वमतो विशिनष्टि सुहृदिति सुहृत्स्वभावेनैव हिताशंसी मित्रः स्नेहवशेनोपकारकः अरिर्घातकः उदासीनो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थः तयोरुभयोरपि हिताशंसी द्वेष्यो द्वेषविषयः बंधुः संबंधी साधवः सदाचाराः पापाः दुराचाराः एतेषु समा रागद्वेष ... रहिता बुद्धिर्यस्य सर्वविशिष्यते विशिष्टो भवति ९॥

वनमालीटीका

सुहृत्प्रत्युपकारमनपेक्ष्य एवं स्नेहसंबंधं च विनैवोपकर्ता मित्रं स्नेहेनोपकारकः अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता उदासीनो विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हितैषी द्वेष्यः स्वकृतापकारमपेक्ष्यापकर्ता बंधुः संबंधेनोपकर्ता एतेषु साधुषु शास्त्रानुकारिषु पापेषु शास्त्रनिषिद्धकारिषु चकारादन्येषु च सर्वेषु नर्यामिणो हृष्यज्जीवानां समवस्थानां समः रागद्वेषशून्यः सर्वविशिष्यते सर्वतः उत्कृष्टो भवति यतो दृश्यमानत्वबुद्धिर्मीतेः ... स्थापनमिति साम्यमनीयेति भावः ९॥

क्रममैवेजयन्तीटी॰

किंच सुहृदिति समलोष्टाश्मकांचनादपियोगिनः सकाशाद्यतः सुहृदादिषु समबुद्धिः सर्वविशिष्यते श्रेष्ठो भवति तत्र पयवयोविशेषाद्यनपेक्ष्य स्वभावेनैव हि।

वि/

१८ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः १९

तेष्ववमेलसुहृदः यानि केनापि स्नेहेन हितैषीणि सर्वथा स्निग्धानि मित्राणि यानि मि
त्राणि न तथैव स्नेहवन्तः रयः ये विवदमानयोर्द्वयोरन्यपक्षकास्त उदासीनाः ये विवदमा
नयोस्तयोर्विवादापहारार्थिनस्ते मध्यस्थाः ये जन्मतएवानिष्टकृत्त्वेन द्वेष्याः ये ज
न्मतएव हितैषिणस्ते बन्धवः ये धर्मशीलास्ते साधवः ये पापशीलास्ते पापाः सा
मेकदर्शनमप्रयोजनयाम सुहृदादिभिः प्रयोजनाभावाद्विरोधाभावाच्च तेषु समबु
द्धिरिमर्थः ९ ॥

सुहृन्मित्रादिषु समबुद्धिस्तु सर्वयोगिश्रेष्ठ इत्याह ॥

मधुसूदनी टीका

सुहृत्प्रत्युपकारमनपेक्ष्य पूर्वस्नेहसंबंधं विनैवोपकर्ता मित्रं स्नेहेनोपकर्ता
अरिः स्वकृतापकारमनपेक्ष्य स्वभावक्रौर्येणापकर्ता उदासीनः विवदमानयो
रुभयोरप्युपेक्षकः मध्यस्थो विवदमानयोरुभयोरपि हितैषी द्वेष्यः स्वकृ
तापकारपेक्ष्यापकर्ता बंधुः संबंधेनोपकर्ता एतेषु साधुषु शास्त्रविहितकारि
षु पापेषु शास्त्रप्रतिषिद्धकारिष्वपि च कारादमेषु च सर्वेषु समबुद्धिः कः कीदृ
क्कर्मेत्यव्यापृतबुद्धिः सर्वत्र रागद्वेषशून्यः विशिष्यते सर्वत उत्कृष्टो भवति मुच्या
नन्तिगापादः ९ ॥

सदानंदी टीका

विना प्रत्युपकारेणोपकर्मी सुहृत् स्मृतः स्नेहवान्मित्रमित्युक्तमरिः स्यादप
कारकः १ उदासीनो द्वयोः प्रेम्णा द्वेषाद्विवदमानयोः पक्षपातविहीनत्वादुभ
योरप्युपेक्षकः २ मध्यस्थो यो हितान्वेषी द्वयोर्विवदमानयोः स्वस्याप्रियो भ
वेद्द्वेष्यः संबंधी बंधुरुच्यते ३ येन्तु शास्त्रविहितकर्मकारिषु साधुषु पापेषु शा
स्त्रमर्यादासमुल्लंघ्य प्रवर्तिषु ४ वाक्येष्वपि सर्वेषु समबुद्धिर्विमुच्यते कः किं
कर्मेति धीशून्य उत्कृष्टः समतोमम ५ ९ ॥

नीलकंठीटीका

समत्वमेव स्तौति सुहृदिति सुहृत् प्रत्युपकारमनपेक्ष्य उपकर्ता मित्रं स्नेहवा
न् अरिः शत्रुः उदासीनः उभयत्र पक्षपातशून्यः मध्यस्थः उभयहितैषी द्वेष्य आ
त्मनोऽप्रियः बंधुः संबंधी तेषु साधुषु पुण्यकर्तृषु पापेषु पापाचारेषु कस्य किं का
र्यमनालोचयन् तेषु सर्वेषु यः समबुद्धिः स विशिष्यते ९ ॥

आनंदीटीका

योगीकृष्णाभक्त्यायोगः इति सुहृत्स्वभावतस्त्वदयः मित्रं कारणवशात्स्
नेहप्रीतिः अरिः कारणवशाद्द्वेष्टा उदासीनः नारिः न मित्रं मध्यस्थः कारणा
वशान्मित्रत्वेन शत्रुत्वेन च संभाव्यः द्वेष्यो जातिवैरी बंधवः मातृपितृव्यादयो ना

गी॰
टीव

60

तथः साधवः सदाचाराः पापा दुराचाराः एतेषु समबुद्धिर्योगयारूढत्वात् सामरस्यप्राप्तो मोहादिरहितः स्वः विशिष्यते ब्रह्मप्राप्तिविशिष्टो भवतीत्यर्थः ॥ तदेवं मनोबुद्ध्यहंकाराणां ध्यानधारणासमाधिभिर्हृदि निरोधात् स्वाध्याया सम्यक् परमयोगावस्थायां स्थिरपदप्राप्तये सह उपायं यमनियमासनादिप्रकारकं बहिरंगमाह ९ ॥

रामकंठटीका

यस्य सुहृदरिप्रभृतिषु प्रीतिद्वेषहेतुषु नानाविधेषु अन्यस्य भिन्नरूपेषु संत स्वसमाब्रह्मतत्त्वमाणाविशेषैकतत्त्वदर्शनादेकरूपा बुद्धिः स विशिष्यते नैहरतियद्वा तदानुगुण्यात्कोऽजरते नाभ्यां तस्य द्वेष्यप्रियाभ्यां रागद्वेषोप्रका ग्रपते यत्तु सर्वसाम्यप्राप्तः सक्रियासु वर्तमानोपि समबुद्धिः वेति विशिष्यतरत्वं सुहृदादीनां भेदो व्याख्यायते सुहृत्यः स्वभावतः प्रत्युपकारमनपेक्ष्य उपकारकः मित्रं मैत्रीकरणान्निर्हेतुस्नेहोऽस्य अरिः शत्रुः कारणवशाद्द्वेष्टा द्वेष्य स्वविनापि कारणं न प्रियः उदासीनो न मित्रं न शत्रुः मध्यस्थः केनापि सहितः सदाचारनिरताः पापास्तद्विपरीताः दुष्टाचारसंकल्पास्तेषु सर्वेषु समबुद्धिः हितमस्य कर्मयोगिनः पदवीद्वयं यच्छुभभावं प्रतिपन्नेषु शास्त्रचोदितत्वात् साधवधारिकर्म सह त्यागविविक्तिकारेकात्मनिष्ठत्वम् न तु शास्त्रोक्तशास्त्रविहितत्वात् स्याद्ध्यामिन प्रतिपत्तिः यद्येवमभविष्यन्नवदतत्त्वात्मनां नमस्तेन स्योपदिश्यत स्मात् फलस्वेन सुप संहारेणाभ्यधास्यत तस्मात्कर्मयोगिनः स्ततदाग्निपूर्वकमागतां शास्त्रचोदितां क्रियामनतिक्रम तपवसर्वसाम्यभावनात्रविवक्षिता [illegible] ॥९॥

लास्तिकी [illegible]टीका

सुहृत् स्वभावेन हितांशंसी मित्रं स्नेहवशेनोपकारकं अरिः घातकः उदासीनः विवदमानयोरुभयोरपि हितांशंसी द्वेष्टः द्वेषविषयः बन्धुः संबंधी साधवः सदाचाराः पापाः दुराचाराः एतेषु समानिविशेषैकदर्शनादेकरूपा रागद्वेषशून्या या बुद्धिर्यस्य स तु विशिष्टः यस्तु तदानुगुण्यात्स्वीकरुते तस्य द्वेष्यप्रियाभ्यां रागद्वेषप्रकोऽमिथ्याचारत्वमेव [illegible]

[illegible]

विवदमानयोरुभयोरप्युपेक्षकः मध्यस्थः

वा

[illegible] ९॥

पंचोलीटीका

सुहृन्मित्रादिषु समबुद्धिस्ततोऽपि श्रेष्ठमाह सुहृन्मित्रेति सुहृन्मि त्रार्युदासीनमध्यस्थद्वेष्यबंधुषु सुहृदिति प्रत्युपकारमनपेक्ष्योपकर्ता मित्रं स्नेहवान् अरिः उदासीनो न कस्यापि पक्षं भजते मध्यस्थो यो विरु द्धयोरुभयोर्हितैषी द्वेष्य आत्मनोऽप्रियः बंधुः संबंधी एतेषु साधुषु व शास्त्रानुवर्तिषु अपि च पापेषु प्रतिनिषिद्धकारिषु सर्वेष्वेतेषु स मबुद्धिस्तेषां जातिवर्णादिके स्वरूपं अविचारयन् सममेव ब्रह्मैव प श्यन् विशिष्यते श्रेष्ठो भवति ९॥

शत्रुः

रणवीरसमिद्धोपिनी॥

उक्तमेवार्थं स्फुटयति सुहृदिति सुहृत्स्वभावत एव यो भनस्हृद यो हिताशंसी च मित्रं मैत्रीकरणान्निहृतसौहृदमत एव स्नेहवशो नोपकारकं अरिः कारणवशाद्द्वेष्टा उदासीनो विवदमानयोरु भयोरप्युपेक्षकोऽत एव न मित्रं न शत्रुः मध्यस्थो विवदमानयोर पि हिताशंसी अत एव केनापि प्रकारेण यो मित्रत्वं वा प्यितमहे ति द्वेष्यो विनापि कारणमप्रियः बंधवो ज्ञातयः साधवः शास्त्रोदि तसदाचारनिरताः पापास्तद्विपरीता दुराचारसंकल्पाः तेषु सर्वे ष्वाततायिषु मस्तसमापन्नोक्तत्वान्न्यायवधादिकमप्रहृताव पि निर्विकारबुद्धिर्यस्य सः तेष्वनः पाखो मित्रत्वं प्रतिपद्यमानः पा स्वाविहितत्वेन तादृशप्रतिपत्तेरन्याय्यत्वादिति भावः स च वि शिष्यते सर्वस्माज्जनाद्वर्यादिति शेषः ९॥

मधुभाष्य

९॥ ॥

41

भाषा अनुवाद

ओर शत्रु मित्र आदि मे जो समदर्शी मनुष्य सो योगी से भी अधि
क है यह कहते हैं किसुहृद कहे स्वभाव ही से हित कारी औ मि
त्र जो स्नेह वशते उपकारी औ अरि कहे घातक जो शत्रु औ उदासीन
अर्थात् उपकार अपकार दोनो से अलग निरपेक्ष जो औ मध्यस्थ कहे
पक्षपात बिना दोनो ओर हित कारी औ द्वेष्य अर्थात् निःप्रयोजन श
त्रु जो अकारण क्रोधी औ बन्धु जिनसे कुछ सम्बन्ध है औ साधु कहे सु
शील सुन्दर आचरण जिनका है तथा पाप जो दुराचारी इन सब के
विषे जिसकी बुद्धि समान कहे प्रीति विरोध रहित है सो विशिष्ट क
हे योगीसे अधिक है ९ ॥

दोहा ॥

सुहृद मित्र उदासी अरि मध्यम बंधु लेख साधु असाधु के वि।
षें सम मति कसो विशेष ९॥

योगी युञ्जीत सततमात्मानं रहसि स्थितः एकाकी
यतचित्तात्मा निराशीरपरिग्रहः १०॥

शांकरभाष्यं

अत एवमुत्तमफलप्राप्तये योगीति योगी ध्यायी युञ्जीत समादध्यात् सततं
सर्वदात्मानमन्तःकरणं रहस्येकान्ते योगी गिरिगुहादौ स्थितः सन्नेकाकी अस
हायो रहसि स्थित एकाकी चेति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा
चित्तमन्तःकरणमात्मा देहश्च संयतौ यस्य स यतचित्तात्मा निराशीर्वीततृष्णोऽ
परिग्रहश्च परिग्रहरहित इत्यर्थः संन्यासित्वेऽपि सति त्यक्तसर्वपरिग्रहः सन्
युञ्जीतेत्यर्थः १० ॥

आनन्दगिरिकृतटीका

यथोक्तविशेषणवतो योगारूढस्योत्तमत्वे योगानुष्ठाने प्रयतितव्यमित्युक्ताभि
धानानन्तरं प्रयत्नमभिदधाति अत एवमिति आदरनैरन्तर्यदीर्घकालत्वं वि
शेषणत्रयं योगस्य सूचयति सततमिति तस्यैव पर्यायं गात्मपरयति रहसीत्या
दिना सर्वदेत्यादरदीर्घकालयोरुपलक्षणं प्रयोगात्मानं व्यावर्तयति अन्तःकरण
मिति गिरिगुहादावित्यादिशब्देन योगप्रतिबन्धकदुर्जनादिविधुरो देशो गृह्य
ते विशेषणद्वयस्य तात्पर्यमाह रहसीति योगं युञ्जानस्य संन्यासिनो विशे
षणान्तराणि दर्शयति यतेति सति संन्यासित्वे किमिति परिग्रहग्रहणमित्या
शङ्क्य तत्केरित्याशंक्य कौपीनाच्छादनादिष्वपि शक्तिनिरासार्थमित्याह संन्यासि
त्वेपीति १० ॥

स्वामिकृतटीका

एवं योगारूढस्य लक्षणमुक्त्वेदानीं तस्य सांगं योगं विधत्ते योगीत्यादिना स योगी
परमो मत इत्यन्तेन ग्रन्थेन योगी योगारूढ आत्मानं मनो युंजीत समाहितं कुर्यात्
सततं निरंतरं रहसि एकान्ते स्थितः सन् एकाकी संगशून्यः यतं संयतं चित्तमा
त्मा देहश्च यस्य निराशीर्निराकांक्षः परिग्रहशून्यश्च १० ॥ अपरिग्रहः

पैशाचभाष्यं

अत एवायमुक्तफलप्राप्तये योगी ध्यायी युंजीत समादध्यात् सततमात्मानमन्तः
करणं रहसि स्थितः एकान्ते गिरिगुहादौ स्थितः सन् एकाकी असहायः एकाकी
ति विशेषणात् संन्यासं कृत्वेत्यर्थः यतचित्तात्मा निराशीर्वितृष्णः अपरिग्रहश्च
परिग्रहरहितः संन्यासित्वेऽपि त्यक्तसर्वपरिग्रहः सन्नेव युंजीतेत्यर्थः १०

यतं चित्तमन्तःकरण
मात्मा देहश्च संयतौ
यस्य स यतचित्तात्मा

रामानुजभाष्यं

गी. टी. ष.

योगीउक्तप्रकारकर्मनिष्ठः सततमहरहर्योगकाले आत्मानं युञ्जीत एकान्ते कुर्वीत स्वदर्शनं निष्ठं कुर्वीतेत्यर्थः रहसि जनवर्जिते निःशब्दे देशे स्थितः एकाकी तत्रापि न सद्वितीयः तत्रापि यतचित्तात्मा यतचित्तमनस्कः निराशीः आत्माभ्यासातिरिक्ते कस्मिंश्चिद्वस्तुनि निरपेक्षः अपरिग्रहः तदतिरिक्ते कस्मिंश्चिदपि संगिनारहितः ॥ १० ॥

अभिनवगुप्तकृतटीका

ननु जितात्मन इत्युक्तं न तत्तु कथं तज्जयं इत्याशंक्याह तदेकः कश्चिदुपायः कः परमार्थप्रपा यस्मद्वारकः चित्तसंयम उपदिश्यते आत्मानं च चित्तं च युञ्जीत स्थ्री कुर्यात् सततमिति निरवच्छिन्नकालं एकाकीत्यादिषु सत्स्वेतद्युज्यते नान्यथा ॥ १० ॥

एवं योगारूढस्य लक्षणानि रूपेदानीं योगी युञ्जीतेत्यादिना श्लोकेन योगी परमो मत इत्यन्तेन सप्तविंशतिभिः श्लोकैः सांगमभ्यासयोगं निरूपयति योगीति योगशास्त्रे तावद्योगत्रयमुपदिष्टं तत्र प्राणापानयोर्योगो मनःपवनयोर्योगो जीवब्रह्मणोर्योगश्च एतत्क्रमेण योगत्रयं श्राम्यन्नुक्तरात्मानं मनः सततं युञ्जीत समाहितं कुर्यात् अथ चित्तक्षोभकाभावसाम्ये मत्तुवदंति रहसि एकान्ते एकाकी संगशून्यः यतः नियमिते आत्मा शरीरं येन निराशीः निराकांक्षः अपरिग्रहः परिग्रहशून्यः [illegible] ॥ १० ॥

वनमालीटीका

योगारूढस्य लक्षणं फलं चोक्त्वा तस्य सांगयोगं विधत्ते योगी सादिसमयोगी परमो मत इत्यन्तेन योगी योगारूढः आत्मानं चित्तं सततं निरन्तरम् युञ्जीत चित्तं समाहितं ध्यानविक्षेपपरिहारेणैकाग्रं निरोधं तस्मिन्भगवति समाहितं कुर्यात् चित्तस्यैकाग्रतां निरुद्धतां च चित्तभूमयः पञ्च क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः पञ्च योगाभ्यासार्थं क्षिप्तं रजसा विषयेषु वर्तमानं मूढं तमसा निद्रादिवृत्तिमत् क्षिप्ताद्विशिष्टं विक्षिप्तं सत्त्वाधिक्येन समस्थदपि चित्तं रजोमात्रयोगेन रहितं समस्त एकस्मिन्नेव विषये ध्येयशिखायस्य चित्तदीपस्य एकाग्रं संप्रज्ञातसमाधिनामा निरुद्धं निरुद्धसकलवृत्तिकं संस्कारमात्रशेषमसंप्रज्ञातसमाधिनाम् इत्यर्थः रहसि गिरिगह्वरादौ योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः एकाकी सकलगृहपरिजनः चित्तमनः करणमात्मा देहश्च संयतौ योगविरोधिव्यापारशून्यौ यस्य सः निराशीर्वैराग्यदार्ढ्येन विगततृष्णः अतएवापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगविरोधिपरिग्रहेण शून्यः ॥ १० ॥

कृष्णमैत्रेयपत्नीटीका

अथैवं भक्तस्य योगिनः सांगं योगसाधनप्रकारमाह योगीत्यारभ्याभ्यासेन युक्तेन चेतसा नान्यगामिनेत्यंतेन योगी युञ्जीतेति योगी उक्तकर्मयोगनिष्ठः सततमहरहर्योगावसरे समये आत्मानं मनः युञ्जीत समाधियुक्तं कुर्यात् किं कुर्वन् रहसि जा।

नवर्जिते शब्दशून्ये च देशे स्थितः सन् तत्राप्येकाकी द्वितीयरहितः तत्रा
पि यतचित्तात्मा नो चित्तं देहो येन स तथा शरणयामादिना चित्तस्य यम
नियमासनप्रत्याहारादिना देहस्य च संकोचयत्नवानित्यर्थः यतो निरा
शीः विषयवैराग्यातिशयत्वेन तत्रानिःस्पृहः यद्वा आत्मावलोकनैक
कामतयेतरसाकृतविषयाशारहित इत्यर्थः अतएवापरिग्रहः आत्म
व्यतिरिक्तस्य वस्तुनः संग्रहशून्यः १० ॥

मधुसूदनी टीका

एवं योगारूढस्य लक्षणं फलं चोक्तान्तस्य सांगं योगं विधत्ते योगीत्यादिभिः
स योगी परमो मत इत्यंतैस्त्रयोविंशत्या श्लोकैः तत्रैवं उत्तमफलप्राप्तये ॥
योगी योगारूढः आत्मानं चित्तं सततं निरंतरं युंजीत क्षिप्तमूढविक्षिप्तभू
मिपरित्यागेनैकाग्रनिरोधभूमिभ्यां समाहितं कुर्यात् रहसि गिरिगुहादौ
योगप्रतिबंधकदुर्जनादिवर्जिते देशे स्थितः एकाकी त्यक्तसर्वपरिग्र
हपरिवर्जनः संन्यासी चित्तमंतःकरणमात्मा देहश्च संयतौ योगप्रतिबं
धकव्यापारशून्यौ यस्य स यतचित्तात्मा यतो निराशीः वैराग्यदार्ढ्येन विग
तस्पृहः अतएवापरिग्रहः शास्त्राभ्यनुज्ञातेनापि योगप्रतिबंधकेन प
रिग्रहेण शून्यः १० ॥

सदानंदी टी॰

अतउत्कृष्टतासिद्ध्यै यतितव्यमितीर्यते श्रुत्वा वेदांतवाक्येभ्यो मत्वा सदु
पपत्तिभिः १ आत्मतत्त्वं ततस्तस्मिन्निदिध्यासनतत्पराः चित्तं समाहितं कु
र्यान्नित्यमेकांतदेशगः २ त्यक्त्वा विक्षेपकारित्वात्सममस्तममतास्पदं सं
यतौ चित्तदेहौ च येन सोऽत्यंतनिश्चलः ३ परवैराग्यदार्ढ्येन निराशीर्वी
तस्पृहकः चित्तविक्षेपकत्यागी योगी त्यक्तपरिग्रहः ४ १० ॥

नीलकंठी टी॰ ॥

योगीति योगी योगाभ्यासपरः रहसि एकांते स्थितः सन् आत्मानं बुद्धिं युं
जीत समादध्यात् सततमिति नैरंतर्यमुक्तं निराशीर्योगसिद्धेरन्यदप्रार्थ
यानः तदेकनिष्ठ इति यावत् नन सत्कारउक्तः एकाकी असहायः संन्या
सीत्यर्थः यतो स्थिरीकृतौ चित्तं मनः आत्मा सेंद्रियं शरीरं येन स यतचि
त्तात्मा तथा अपरिग्रहः एकाकित्वेपि कंथाकुंडलकादिबहुपरिग्रहशू
न्यः १० ॥

आनंदी टीका ॥

तदेवं मनोबुद्ध्यहंकाराणां ध्यानधारणसमाधिभिर्वृत्तिनिरोधात्प्राप्यायां
सम्यक्परमयोगावस्थायां स्थिरपदप्राप्तये सदुपायं यमनियमासनादिप्र॰

कारकंबहिरंगमाह यतेतिनिरुद्धवृत्तिचित्तंयस्यैतादृगात्मायस्यसआत्मनि
समाहितचित्तइत्यर्थः निराशीः शब्दादिविषयस्पृहाशून्यअतएवापरिग्र
हः ममेदमित्यभिमानरहितः १० ॥

रामकंठी टी॰

अथयथोक्तसाम्यानतिक्रमसमाहितस्य चित्तवृत्तिनिरोधलक्षणम
पियोगमितरक्रियावदहोरात्रमध्येव्यवस्थितापिताभ्यासकालंविशि
ष्टेतिकर्तव्यतान्वितमपिकर्मयोगिनः श्लोकषट्केनाभ्यनुजानन्नाह
क्रमेणैतद्व्याख्यायते योगीप्रबंधप्रतिपादितप्रतिपादयिष्यमाणस्व
रूपेणप्रस्तुतव्याख्यातयोगांतरविलक्षणपरिकर्मणासर्वकालदेशा
विरोधिनासमाधिविशेषनिरपेक्षेणसमस्तान्तर्बहिष्करणप्राणवृत्ति
क्षपिनिरुद्धप्रसरेणकर्मयोगेनयोगवान् शास्त्रविहितत्वात् आत्मान
मंतःकरणंजीवात्मानंवासततंप्रत्यहंव्यवस्थापितंनियतकालान
तिक्रमेणरहस्येकाग्र्यबाधकरहितेदेशेस्थितयत्रएकाकीकेवलः (
तथायतचित्तात्मा यतंनिगृहीतंचित्तंमनोयेनतादृशआत्मादेहेत्र
यस्यसतथाविधः सन्परमात्मनिसमादधीतचित्तवृत्तिनिरोधल
क्षणमपियोगमनुतिष्ठेदित्यर्थः किंतुनिराशीआशिषः फलाशंस
नोनिष्क्रांतः मोक्षलक्षणेपिफलेप्रार्थनारहितस्तथापरिग्रहः
सर्वत्रसमत्वाभिमानरहितः तथामस्थितत्वादिवक्ष्यमाणधर्मयुक्तोयु
जीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्युक्तम् १०

लासिकी टी॰

अथकर्मयोगिनश्चित्तवृत्तिनिरोधलक्षणंध्यानयोगमारूढस्येतरव
क्रियावदहोरात्रमध्यव्यवस्थिताभ्यासकालविशिष्टेतिकर्तव्यान्वितम
पियोगीत्यादिना सयोगीपरमोमतइत्यंतेनग्रंथेनोपदिशति योगीउ
क्तविधयानित्यसमाहितः आत्मानंसततंप्रत्यहंव्यवस्थापितनिय
तकालानतिक्रमेणयुंजीतसमाहितंकुर्यात् प्रत्यवमृशतत्कीदृशः
रहसिएकाग्र्यबाधकरहितेएकांतेदेशेस्थितः एकाकीअसहायः
तथायतचित्तात्मायतंनिगृहीतंचित्तंमनआत्माशरीरंचयेनसः नि
राशीर्निराकांक्षोपरिग्रहोममताशून्यःसस्थितत्वादिवक्ष्यमाणधर्मयु
क्तोयुंजीतेत्यनेनकर्मयोगसमाधानाप्रमत्तेनायंयोगोभ्यसनीयइत्यु
क्तम् एकाकीत्वादिप्रसक्तंतप्रयुज्यतेनान्यथा १० ॥

पंचोली टी.

एवंयोगारूढस्यलक्षणंश्रेष्ठत्वंचोक्त्वातस्यसर्वोत्तमफलप्राप्तयेसांख्य
योगंविधत्तेयोगीयुंजीतइत्यारभ्यसयोगीपरमोमतइत्यंतेनग्रंथेना
ह योगीति एकाकीअसहायः संयतोंतःकरणबुद्धिर्यस्यसयत
चित्तात्मानिराशीःविगततृष्णोयोगीध्यानवान् अपरिग्रहः रहसि
गिरिगुहादौस्थितःआत्मानमंतःकरणंयुंजीतसमाधियुक्तंकुर्या
त् १० ॥

रणवीरसमिद्धेयिनी॥

योगीति योगीकर्मयोगीरहसिरहस्येगुरूपदिष्टेध्यानविद्यामार्गे
स्थितःकृतस्थितः एकाकीमहावीरत्वेनसहायानपेक्षीयतचि-
त्तात्मानिगृहीतमनोदेहेंद्रियः निराशीः पुत्रादिविषयजीविताशं
सारहितः सिद्धासिद्ध्योःसमश्च अपरिग्रहः अःकेशवेतिपर्यायेचैक
काक्षरकोशादकारोवैविष्णुरितिश्रुतेश्च अःविष्णुःपरमेश्वरःसए
वपरिग्रहोयस्यसः परमेश्वरमेवशरणीकृत्यप्रवृत्तइतियावत्
स्त्रीपुत्रादिपरिवारंपरित्यज्यपुण्यभूमिमागतइतिवा अतएव वी
रसोऽहेकाकीकेवलएवानेकवीरप्रतिभटत्वेस्थितः सततंसर्वका
लेपक्षपञ्चमएवनित्यंप्रतिपादितास्वनेकविधास्ववस्थासुआ-
त्मानंबुद्धिंयुंजीतसमाहितंकुर्वीत अथवा आत्मानंवक्ष्यमाणउपल
क्षितानिद्रालस्यादिकर्मेंद्रियाणियुंजीतध्यानादिनासंयोजयेदिति १०॥

मधुभाष्य

योगीयुंजेत्यादिना युंजीतसमाधियोगयुक्तंकुर्यात् आत्मा
नंमनः योगंसमाधियोगंयुंज्यात् निर्वाणपरमांशांतिरित्यागो
त्तरकालीनां अनशनादिनिषेधोऽस्यास्य उक्तं हि नित्युपानभ
यस्थासवेषणंतद्यादिवर्जनं कृत्वानिमीलितावसस्यपक्षोध्याय

त्र्यसिष्यतीति नारदीये युक्ताहारविहारस्य सोपायाहारादेर्यावता
श्रमाद्यभावो भवति तावदाहारादेरित्यर्थः आत्मनि भगवति आ
त्मनः भगवद्विषयं योगं आत्मना मनसा आत्मनि देहे आत्मानं
भगवंतं पश्यंस्तत्वतो भगवद्रूपात् दुःखसंयोगो येन वियुज्यते
स दुःखसंयोगवियोगः न केवलमुत्पन्नं दुःखं नाशयति उत्पत्ति
मेव निवारयतीति दर्शयति संयोगमाहेन निश्चयेन योक्तव्यः
योक्तव्य एव बहुभूयोगो इत्यर्थः सर्वान्सर्वविषयान् अशेषतः एक
विषयोपि कामः स्वल्पः कादाचित्कोपि न कर्तव्य इत्यर्थः मन
सैव विनियंतुं शक्य तेनानेत्येव प्राह शुद्धेः कारणं हि मनोनिग्रहे
आत्मरमणे च यतो यतो यत्र यत्र यतो यतो यावतीत्यादिना सं
योगात् आत्मन्येव वशानयेत् आत्मविषय एव वशीकुर्यादि
त्यर्थः पूर्वोक्तश्लोकोक्तं प्रपंचयति १०॥

भाषाअनुवाद

योगी के लक्षण कहिकर अब उसका अङ्गरूप जो योग सो इस श्लोक से लेकर इसी अध्याय के स योगी परमोमतः इस ३२ श्लोक तक कहते हैं कि योग आरूढ पुरुष सङ्ग रहित होय जिस के अन्तःकरण औ शरीर वशीभूत हैं सो निराकांत सर्व परिग्रह रहित एकान्त मे अकेला सावधान बैठि कर अपने आत्माकरे मनको निरन्तर भगवत के मनन मे युक्त करे १०

दोहा

योगीयुक्त है आत्मको सदा एकांत स्थितहोय एकाकीजित इंद्रिजो अरहस अङ्गहैनी सोय १०॥

शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं ॥ ११ ॥

शांकरभाष्यं

अथेदानीं योगं युञ्जत आसनाहारविहारादीनां योगसाधनत्वेन नियमो वक्तव्यः प्राप्तयोगस्य लक्षणं तत्फलादि चेत्यत आरभ्यते तत्रासनमेव तावत् प्रथमम् उच्यते शुचाविति शुचौ शुद्धे विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मन आसनं नात्युच्छ्रितं नातीवोच्छ्रितं नाप्यतिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्चोत्तरे यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं पाठक्रमात् विपरीतोऽत्र क्रमश्चैलादीनां ॥ ११ ॥

आनन्दगिरिकृतटीका

योगं योगी युञ्जीतेति चोपदिश्य तदनन्तरसन्दर्भस्य तात्पर्यमाह अथेति योगस्वरूपकथनानन्तर्यमथशब्दार्थः विहारादीनामित्यादिशब्देन यथोक्तासनादिगतावान्तरभेदग्रहणं तत्फलादि चेत्यादिशब्देन योगफले सम्यक्ज्ञाने च तत्फले कैवल्ये ततो भ्रष्टस्यामुष्मिकाविनष्टत्वमित्यादि गृह्यते एवं समुदायतात्पर्यं दर्शयित्वा किमासीनः शयानस्तिष्ठन् गच्छन् कुर्वन् वा युञ्जीतेत्यपेक्षायामनन्तरश्लोकतात्पर्यमाह तत्रेति निर्धारणे सप्तमी प्रथमं योगानुष्ठानस्य प्रधानमासीनः सम्भवादिति स्मशानादिति यावत् विविक्तत्वं द्वेधा विभजते स्वभावत इति आसनस्य स्थैर्ये निश्चलोपविश्य योगमनुतिष्ठतः समाधानाद्योगात् योगसिद्धिरित्यभिसन्धाय विशिनष्टि अचलमिति आसने स्थितिं कुसुमतिमनुश्रित्याह आसनमिति आत्मन इति परकीयासनव्युदासार्थं पतनभयपरिहारार्थं नात्युच्छ्रितमित्युक्तं नाप्यतिनीचमिति भूतलपाषाणादिसंश्लेषवातशैत्याग्निमान्द्यादिसम्भवितदोषनिरासार्थं चैलं वस्त्रमजिनं चर्म्म व्याघ्रादेस्तच्च मृगस्य कुशा दर्भास्ते चोत्तरे यस्मिन्नुपरिष्टादास्तरणत्वाच्चोक्तं प्रथमं चैलं ततोऽजिनं ततश्च कुशा इति प्रतिपत्तिक्रमसमापात्तिकं क्रममतिक्रम्यादौ कुशास्ततोऽजिनं ततश्चैलमिति क्रमं विवक्षित्वाह विपरीतोऽत्रेति ॥ ११ ॥

स्वामिकृतटीका

आसननियमं दर्शयन्नाह द्वाभ्यां शुद्धे स्थाने आत्मनः स्वस्यासनं स्थापयित्वा कीदृशं स्थिरमचलं नात्युच्छ्रितं न चातिनीचं चैलं वस्त्रमजिनं व्याघ्रादिचर्म्म चैलाजिने कुशेभ्य उत्तरे यस्मिन् कुशानामुपरि चर्म्म तदुपरि वस्त्रमास्तीर्येत्यर्थः ॥ ११ ॥

वं

गी·
टी·
ष·

47

पैशाचभाष्यं

अथेदानीं योगं युञ्जानस्याहारादीनां योगसाधनत्वेन नियमो वक्तव्यः आसनयोगस्य लक्षणं फलं च स्थानादि वक्तव्यमिति तदारम्भेन तत्रासनमेव तावदुच्यते शुचाविति शुचौ विविक्ते स्वभावतः संस्कारतो वा देशे स्थाने प्रतिष्ठाप्य स्थिरमचलमात्मनः आत्मसमानं नात्युच्छ्रितं नातिनीचं तच्च चैलाजिनकुशोत्तरं चैलमजिनं कुशाश्चोत्तरा यस्मिन्नासने तदासनं चैलाजिनकुशोत्तरं विपरीतक्रमः ॥११॥

रामानुजभाष्यं

शुचौ देशे अशुचिभिः पुरुषैरपरिगृहीते अशुचिवस्तुभिरस्पृष्टे च पवित्रभूते देशे दारुनिर्मितं नात्युच्छ्रितं नातिनीचं कुशाजिनचैलोत्तरमासनं प्रतिष्ठाप्य तस्मिन्मनःप्रसादकरे समाश्रय उपविश्य अव्याकुलमेकाग्रमनः कृत्वा ॥

अभिनवगुप्तकृतटीका उपक्रमं ११ आसनस्थैर्यात्कालस्थैर्यं चित

परमार्थप्रपा टी·

अथासननियमं दर्शयति+

+शुचौ देश इति द्वाभ्यां । शुचौ पवित्रे तीर्थादिसन्निहिते देशे शीतलतरुच्छायोपचारे मनोरमे प्रदेशे आत्मनः स्वस्य स्थिरमचलं मृत्तकठोरकाष्ठपट्टवस्त्रं यथा भवति तथा आसनं प्रतिष्ठाप्य किंभूतं नात्युच्छ्रितं नात्युच्चं कदापि पतनसंभवात् तथा नातिनीचं भूसंघट्टनेन गात्रोपद्रवात् अतो मध्यममित्यर्थः अथासनस्वरूपमाह चैलेति चैलं वस्त्रं अजिनं व्याघ्रादिचर्म चैलाजिने कुशेभ्य उत्तरे उपरि स्थिते यस्मिन् कुशानामुपरि चर्म तदुपरि वस्त्रमित्यर्थः ॥११॥

वनमालीटीका

तत्रासननियममाह शुचाविति द्वाभ्यां शुचौ स्वभावतः संस्कारतो वा शुद्धे गंगातटगुहादेशे समे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रितं नात्युच्चं नाप्यतिनीचं चैलाजिनकुशोत्तरं चैलं सूक्ष्मवस्त्रं अजिनं मृगव्याघ्रादिचर्म ते कुशेभ्य उत्तरे उपरितने यस्मिन् तत् आसने स्थित्वा आसने कुशोपरि अजिनं तदुपरि चैलमित्यर्थः आत्मनः इति परासनव्यावृत्त्यर्थं ॥११॥

कृतमवेजपत्तीटी·

किंच आसनविधिमाह द्वाभ्याम् शुचौ देश इति शुचौ स्वतः शुद्धे गंगायमुनादितटे गोवर्द्धनादिगिरिगह्वरादौ वा देशे मधुवनपुष्करप्रयागाद्योध्यादौ आत्मनः स्वस्य तेन स्वाभिमते देशे स्वाभिमतमासनं कुर्यादित्येकपातयोगस्य प्रतिकूलत्वं स्यादिति सूचितम् आशानशुपवेशने प्रतिष्ठाप्य संस्थाप्य कीदृशे स्थिरे निरुपद्रव

त्वात्तस्यानादरेणाध्यानेदंशमशकसर्पादिविघ्नभयाव्याकुलमित्यर्थः पुनः की
दृशं नात्युच्छ्रितं न्यूनतानादिभयाज्ञात्युच्चं नातिनीचं भूमेः शीतोष्णादिगुणसंचार
भयाच्चातिनिम्नम् चैलाजिनकुशोत्तरं चैलं धौतं सूक्ष्मवस्त्रं अजिनं मृदु मृगव्या
घ्रादिचर्म कुशो दर्भः कुशास्तु अजिनं च चैलं चैते उत्तरोत्तरमिति तृतीयेण चैलस्य पू
र्वनिपातोऽभ्यर्हितत्वेमनेन कुशाजिनस्य पूर्वनिपात इति चैलाजिनकुशा उ
त्तरे यस्मिंस्तत् यद्वा अजिनस्योत्तरं यस्मात्सोऽजिनोत्तरः मध्यमोऽ कुशास्तेषामध्यम
पदलोपी समासः अजिनकुशा उत्तरमजिनकुशोत्तरं चैलमजिनकुशोत्तरं य
स्मिंस्तत् यद्वा कुशाश्चाजिनं चाजिनकुशौ अभ्यर्हितत्वादजिनस्य पूर्वनिपातः अ
जिनकुशाभ्यामुत्तरमजिनकुशोत्तरं चैलमजिनकुशोत्तरं यस्मिंस्तत् यद्वा अ
जिनं च चैलं च चैलाजिने स्वात्तरत्वाच्चैलस्य पूर्वनिपातः कुशा उत्तरे कुशोत्तरे चै
लाजिने कुशोत्तरे यस्मिंस्तत् कुशोपरि अजिनं तदुपरि चैलमित्यर्थः ११ ॥

मधुसूदनी टी०

तत्रासननियमं दर्शयन्नाह द्वाभ्यां ॥ शुचौ स्वभावतः संस्कारतो वा शुद्धे जनसमुदा
यरहिते निर्भये गंगातटगुहादौ देशे स्थाने प्रतिष्ठाप्य स्थिरं निश्चलं नात्युच्छ्रि
तं नात्युच्चं नातिनीचं चैलाजिनकुशोत्तरं चैलं मृदुवस्त्रं अजिनं मृगव्याघ्रादिच
र्म ते कुशेभ्य उत्तरे उपरितने यस्मिन् तदासनं तस्मिन्नासनं कुशमयवृष्युपरि
मृदुचर्म तदुपरि मृदुवस्त्ररूपमित्यर्थः तथा चाह भगवान् पतंजलिः स्थिरसु
खमासनमिति आत्मन इति परासनव्यावृत्त्यर्थं परस्यापि परेच्छानियमाभावेन योग
विक्षेपकरत्वात् ११ ॥

सदानंदी टीका

आसनाहारनियमानाह द्वाभ्यां जगद्गुरुः स्वभावतः संस्कारात् शुद्धे देशे स्थिरं खु
धः १ प्रतिष्ठाप्यासनं स्वस्य नात्युच्चं नातिनीचकं कौशं हस्तीसमास्तीर्य मृदुचर्म
कुशोपरि १ चर्मोपरि मृदुवस्त्रं च वस्त्रमास्तीर्य योगिराट् १ ॥

नीलकंठी टीका

योगं युंजीतेत्युक्तं तत्क्रममिमाकांक्षायां तदंगान्यासनादीन्याह शुचावित्यादि
ना शुचौ स्वभावतः संस्कारतो वा पूते देशे स्थाने प्रतिष्ठाप्य संस्थितं कृत्वा स्थिरं नि
श्चलं आत्मनस्त्रिविधासनं स्थण्डिलं निश्चलमित्यनेनास्यं पूर्वं स्थण्डिलं न तु काष्ठम
यपीठं आसनमिति परासनव्यावृत्त्यर्थं नात्युच्छ्रितं नात्युच्चं नातिनीचं चैलाजिनकु
शाः उत्तरे उपर्युपरि यस्य तच्चैलाजिनकुशोत्तरं अजिनाद्युपरि चैलं कुशेभ्य उपरि अ

जिनेस्येदिलस्योपरि कुशाद्यास्तरणे: ११॥

आनन्दी टीका ~~उपक्रमं~~ ११ सम्हार्थम्

रामकंठी टीका

अस्येदानीं परिकर्माभिधीयते किं कृत्वा युंज्यात् आत्मनः शुचौ देशे यत्याद्युपेक्षया शुद्धे सवित्परिसरगिरिगुहादौ गृहस्थापेक्षया सूपलिप्तविविक्तसदनादौ विशुद्धे स्थाने आसनं समाधिविष्टरं प्रतिष्ठाप्य स्थितिं प्रापय्य कीदृशं स्थिरं निश्चलं तथा स्वस्वत्वार्थ स्व त्वाय नित्रत्वातिशयरहितं तथा चैलं वस्त्रमजिनं मृगादिचर्म कुशा दर्भाः तदुत्तरं तथानेन गृहस्थस्य चैलाजिनोत्तरम् ११॥

लासिकी टीका

अस्येदानीं परिकर्माभिधीय ते किंकृत्वा युंज्यादित्याह ॥ स्वभावतः संस्कारतो वा शुद्धे स्थाने आत्मन आसनमात्मस्तेस्मिन्नित्यासनं प्रतिष्ठाप्य स्थापयित्वा कीदृशं स्थावार्थं नातीवोच्छ्रितं न चातिनीचम् स्थिरं निश्चलं तथा चैलाजिनकुशोभ्यः उत्तरेषु उत्तरं कुशामयहस्तुपरि मृदुचर्म तदुपरि मृदुवस्त्रमास्तीर्यं तथा स्थिरमिति नो कादित्याह स्मर्यं तदुक्तं स्थिरं सुखमासनमिति ११॥

पंचोलीटीका

अथेदानीं योगं युंजानस्याशनाहारविहारादीनां योगसाधनत्वेन नियमे वक्तव्ये आसननियमे तावत् प्रथममाह शुचौ देशे इति द्वाभ्यां आत्मनः आसनं नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरं पूर्वं कुशास्तेषामुपरि कृष्णाजिनं तस्योपरि वस्त्रं एवं विधं स्थिरमात्मासनं प्रतिष्ठाप्य ११॥

गणवीरसमिद्बोधिनी॥

शुचौ देशे इति शुचावतिमेध्ये देशे गोकृतलेपनादिके विषये आत्मनः स्व

स्वस्यासनं आस्तेस्मिन्निति व्युत्पत्त्या स्थानादिकं प्रतिष्ठाप्य प्रतिष्ठितं
कृत्वा तत्रैवासने उपविश्य मनश्चैकाग्रं प्रारभ्यमाणकार्यैकवि
षयं कृत्वा यतचित्तेंद्रियक्रियः यतानि नियमितानि चित्तस्येंद्रियाणां
च क्रियाः संशयस्तेदादयो दर्शनादयश्च व्यापारा येन तादृशो यो
गी योगं युञ्ज्यात् युज्यते संधीयते यत्र वृत्तिरिति योगः समाधिस्तं युंज्यात् अभि
संदधीत किमर्थं आत्मविशुद्धये आत्मनः स्वस्य विशुद्धिः परकृत
वैरनिर्यातनं तदर्थं अथवा विशुद्धिरनेकजन्मार्जितपापप्रोथ
नं तदर्थं शुद्धेनैव चित्तक्रियानिर्धूतकल्मषो मोक्षाय कल्पते इति हि
प्रसिद्धं अथवा प्रारब्धनिवृत्तेः संजायमानापथ्योनरकादिल
क्षणमलापसारणार्थमिति कथंभूतमासनं स्थिरं चलादि व
र्जितमशक्यं गौरवदार्ढ्यादिगुणयुक्तमिति यावत् तथा
नात्युच्छ्रितं नातिनीचं अत्युच्चस्य दुरारोहत्वात् अतिनीचस्य स
र्वैः क्षोदनीयत्वात् उच्छ्राय यावन्न त्यजति प्राप्य रहिते किंमयमावि
तो प्रमाणं तथा चैलाजिनकुशोत्तरं चैलं क्षौमादिवस्त्रं अजि
नं हीप्यादीनां चर्म कुशा दर्भाः चैलाजिनेकुशेभ्य उत्तरे यस्मिन्
कुशोपरि चर्मणा तदुपरि वस्त्रेण चास्तीर्णमित्यर्थः पवित्र
तया कुशादीनामास्तरणे प्रयोगः इति बोध्यं यद्वा चैलं कम्ब
लादिवस्त्रं अजिनं हीप्यादिचर्म कुशा लोहमालाकासादुत्तरं त
तया हृतमिति यावत् कांबलहैप्यादयो हि द्विधाः प्रसिद्धाः कुशा
हृतं च परैर्दुरारोहता उभयं घनताव्यंजकमिति ॥ ११ ॥

मधुभाष्य

भाषा अनुवाद

इसी योगका आसन औ नियम आदि दिखावते हुये सो स्लोकसे क
हते हैं कि पवित्र स्थानमे अपने आसन पर बैठने के अनन्तर योग अ
भ्यास करे आसन कैसा चहिये कि जो अचल और बहुत उचा न अति
नीचा होय और चेल कहे वस्त्र अजिन व्याघ्रचर्म अर्थात् नीचे कुशा तब
चर्म उपर वस्त्र ऐसा आसनकरे ॥ ११ ॥

दोहा

स्वच्छ स्थानमे आसन अपनो स्थिर कर लेहिं नाऊचें ना नीच अ
ति चेल अजिन कुशा जेहिं ॥ ११

50

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये १२॥

शांकरभाष्यं

प्रतिष्ठाप्य किं तत्रेति तत्र तस्मिन्नासने उपविश्य योगं युञ्ज्यात् कथं सर्वविषयेभ्य उपसंहृत्यैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः चित्तं च इन्द्रियाणि च चित्तेन्द्रियाणि तेषां क्रिया संयता यस्य स यतचित्तेन्द्रियक्रियः स किमर्थं योगं युञ्ज्यादित्याहात्मविशुद्धये अन्तःकरणस्य शुद्ध्यर्थमित्येतत् १२॥

आनन्दगिरिकृतटीका

यथोक्तमासने सम्पाद्य किं कर्तव्यमिति प्रश्नपूर्वकं कर्तव्यं तन्निर्दिशति प्रतिष्ठाप्येति योगं युञ्ज्यादित्येतत् कर्तव्यताकलापं पृच्छति कथमिति सर्वेभ्यो विषयेभ्यः सकाशात् प्रत्याहृत्य मनसो यदेकस्मिन्नेव ध्येये विषये समाधानं यच्चित्तस्येन्द्रियाणां च बाह्यक्रियाणां संयमनं तदुभयं कृत्वा योगमनुतिष्ठेदित्याह सर्वेति आसने यथोक्ते स्थित्वा यथोक्तया रीत्या योगानुष्ठानस्य प्रश्नपूर्वकं फलमाह स किमर्थमित्यादिना १२॥

स्वामिकृतटीका

तत्रेति तत्र तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यादभ्यसेत् यता उपरता चित्तस्येन्द्रियाणां च क्रिया यस्य आत्मनो मनसो विशुद्धये उपशान्तये १२॥

पैशाचभाष्यं

प्रतिष्ठाप्य किं तत्रैकाग्रमिति चेलाजिनकुशोत्तरे तत्र तस्मिन्नासने उपविश्य योगं युञ्ज्यात् कथं सर्वविषयेभ्य उपसंहृत्यैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः स किमर्थं योगं युञ्ज्यादित्यत आह आत्मविशुद्धये अन्तःकरणस्य विशुद्ध्यर्थमित्येतत् १२॥

रामानुजभाष्यं

सर्वात्मनोपसंहृतचित्तेन्द्रियक्रियः आत्मशुद्धये बन्धविमुक्तये योगं निर्युञ्ज्यात् आत्मावलोकनं कुर्वीत १२॥

अभिनवगुप्तकृतटीका उपक्रमे १२

चित्तक्रियाः संकल्पात्मानः अन्याश्चेन्द्रियक्रियाः नयताः नियमं नीताः १२

परमार्थप्रपा

तत्र तस्मिन्नासने उपविश्य एकाग्रं विक्षेपरहितं मनः कृत्वा योगं युञ्ज्यात्। किंभूतः यता अधीनेन्द्रियक्रिया येन स तथा आत्मनो मनःशुद्धये उपशान्तये १२॥

गी॰
टी॰
ब॰

51

वनमालाटीका

ततः किमत आह तत्रेति तस्मिन्नासने तु उपविश्यैव न तु शयानस्तिष्ठन्वा आसीनः
संभवादिति सूत्रात् यताः संयताश्चित्तेन्द्रियाणां च क्रिया येन स तथा योगं
भगवति समाधिं युञ्जीताभ्यसेत् आत्मनश्चित्तस्य लयविक्षेपशून्यत्वेनातिसूक्ष्मत्वेन।
याः स्थिरत्वेन च ब्रह्माकाराकारयोग्यत्वाय दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिरिति श्रुतेः किं कृत्वाभ्यसेत्तत्राह एकाग्रं राजसतामसमिश्रभूमित्रयपरित्या
गेनैकविषयकधारावाहिकानेकवृत्तिशक्तिमुद्रिक्तसत्त्वं मनः कृत्वा भगवदा
कारमनोवृत्तिप्रवाहं निदिध्यासनाख्यं योगमभ्यसेदित्यर्थः ॥१२॥

[illegible]जयन्तीटीका

किंच तत्रेति तस्मिन्मनःप्रसादकरेऽस्मिन्नासने समाश्रय उपविश्य प्रयत्नेनाद्रिहृक्क
यानेति सूत्रवित् सूत्रकारोप्येवमेवाह आसीनः संभवादिति एकाग्रं मनः कृत्वा।
कं विषयेभ्यः स्वरूपस्य मनः कृत्वात्मविशुद्धये आत्मनः स्वरूपस्य प्रकृतिसं
सर्गदोषेण मलिनत्वात् तस्य विशुद्धिस्तद्विविक्ततानस्यै यद्वा आत्मनोऽन्तःकरण
स्य विशुद्धये विषयवासनानिवृत्तये अन्तःकरणस्या[illegible]निशय निर्मलत्वे
नातिसूक्ष्मत्वेन वा ईश्वरावलोकनार्हत्वं स्यादित्याशयः अर्थः दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्म
या सूक्ष्मदर्शिभिरिति श्रवणात् यतचित्तेन्द्रियक्रियः यता नियमिताश्चित्तेन्द्रि
याणामाभ्यन्तरबाह्यकरणानां क्रिया व्यापारा येन स तथा नियमिताखिलेन्द्रियव्या
पारो योगी योगमात्मदर्शनरूपं समाधिं युञ्ज्यात्कुर्यात् ॥१२॥

मधुसूदनीटीका

एवमासनं प्रतिष्ठाप्य किं कुर्यादित्यत आह ॥ तत्र तस्मिन्नासने उपविश्यैव न तु श
यानस्तिष्ठन्वा आसीनस्यैव ध्यानसंभवादिति न्यायात् यताः संयता उपरताः चि
त्तेन्द्रियाणां क्रिया वृत्तयो येन स यतचित्तेन्द्रियक्रियः सन् योगं समाधिं युञ्जी
ताभ्यसेत् किमर्थमात्मविशुद्धये आत्मनोऽन्तःकरणस्य सर्वविक्षेपशून्यत्वेना
तिसूक्ष्मतया ब्रह्मसाक्षात्कारयोग्यतायै दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शि
भिरिति श्रुतेः किं कृत्वा योगमभ्यसेदित्यत आह एकाग्रं राजसतामसव्युत्थाना
ख्यप्राक्तनभूमिकाद्वयपरित्यागेनैकविषयकधारावाहिकानेकवृत्तिशक्त्युद्रि
क्तसत्त्वं मनः कृत्वा रजस्तमोभूमिकेन प्रयत्नेन संपाद्य एकाग्रताविहृद्ध्येयो यो
संप्रज्ञातसमाधिमभ्यसेत् स च ब्रह्माकारमनोवृत्तिप्रवाह एव निदिध्यासनाख्यः
तदुक्तं ब्रह्माकारमनोवृत्तिप्रवाहोऽहंकृतिं विना संप्रज्ञातसमाधिः स्याद्ध्यानाभ्या
सप्रकर्षतः इति एतदेवाभिप्रेत्य ध्यानाभ्यासप्रकर्षे हृदये भगवान् योगी युञ्जीत स

नतं युंज्याद्योगमात्मविशुद्धये शुक्रगासीतमनपरश्मादिवङ्कृत्वः १२ ॥

सदानंदीटीका

उपविश्यासने तस्मिन्मनः संयम्य सर्वतः कृत्वैकाग्र्यं सचित्तानामिन्द्रियाणां च हृत्तयः १ सम्यग्गुणरतो यस्य समाधिं समभ्यसेत् निर्विंतेपतया ब्रह्मसाक्षात्कारैकसिद्धये २ नशायानेन वातिष्ठन्नुपविश्येति शाहृतः ३ १२ ॥

नीलकंठटीका

प्रतिष्ठाप्य किं कुर्यादित्यत आह तत्रेति तत्रासने पद्मस्वस्तिकाद्यन्यतमेनासनेनोपविश्य यता: निगृहीता: चित्तस्य क्रिया: विषयाणां स्मरणानि इंद्रियक्रियास्तेषां ग्रहणं येन सोयतचित्तेन्द्रियक्रियः अत एव मनः बाह्याभ्यंतरविषयानुपरक्तं तथा एकं ध्येयमेव मन्यकं ग्रंथे यस्य स्फुरति ना यत् तदेकाग्र्यं कृत्वा तथा ध्येयमेव ब्रह्मैकाकारवृत्तिप्रवाहिकृत्वा आत्मविशुद्धये चित्तशुद्ध्यर्थं योगं हृतिप्रवाहस्यापि निरोधं युंज्यात् अनुतिष्ठेत् चित्तस्थैर्यं तत्पादनेन १२ ॥

आनंदीटीका

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः आसनजयाद्द्वन्द्वानां शीतोष्णादीनामनभिघात इति तत्रासने उपविश्य स्वस्तिकपद्मादिकं शारीरमासनं बद्ध्वा यतानि रुद्धानि चित्तस्य क्रिया संकल्पविकल्पौ इंद्रियाणां क्रियाश्रवणादिकं वचनादानादिकं येन स तथा: आत्मनो देहेन्द्रियादिसंघातान्तर्गतस्य जीवस्य विशुद्धये समरसतापादनाय योगमष्टांगं युंजीत समादधीत [illegible] १२ ॥

रामकंठीटीका

यत्पादेः ऊशोत्तरमेवं तत्र स्थिरसुखे आसने उपविश्य एकाग्रं ध्येयत्वेन परिगृहीतैकवस्तुनिष्ठं मनश्चित्तं कृत्वा तथा यतचित्तेन्द्रियक्रियः यता: निःपिदु बहिष्प्रसराः चित्तेन्द्रियाणां मनसो नेत्राणां च क्रियाः संकल्पविकल्पशब्दादिग्रहणरूपाणि कर्माणि येन तथाविधः सन् योगं चित्तवृत्तिनिरोधात्मकं युंज्यात् समादधीत किमर्थमात्मविशुद्धये आत्मनोन्तःकरणस्य बाह्योपरागलक्षणमलक्षालनाय क्षेत्रज्ञस्य वा देहाद्यहंप्रत्ययरूपकलंकपरिमार्जनाय ॥ १२ ॥ लासिकी नीटीका

एवंसति – तत्र तस्मिन्नासने उपविश्य न तु शयानः तिष्ठन्वा आसीनः संभवादिति न्यायात्

गी
टी ६

त् यतचित्तेंद्रियक्रियः यता उपरतानि गृहीतान्यखिलक्रियाः संकल्पा
त्मान इंद्रियक्रियाश्च येन स मनो मननात्मकं अंतःकरणमेकाग्रं ध्येयवस्तु
निष्ठं कृत्वा योगमभ्यासं समाधिरूपं युंजीतारभ्यसेत् किमर्थमात्मविशुद्धये कै
वल्याय देहाहंभावनिमज्जनायेत्यर्थः [illegible]
[illegible] १२ ॥

पंचोलीटीका

तत्रासनेउपविश्य यतचित्तेंद्रियक्रियः यता चित्तेंद्रियाणां क्रिया व्यापा
रो येन सः एकाग्रं सर्वविषयेभ्यः उपसंहृत्य मनः आत्मपरं कृत्वा अंतः
करणशुद्ध्यर्थं योगं कुर्यात् अभ्यसेत् १२ ॥

रणावीरसमिद्धायिनी ॥

स्पष्टार्थः १२ ॥

मधुभाष्य

१२ ॥

भाषा अनुवाद

और जिसका चित्त औ इन्द्रिय निष्क्रिय कहे व्यापार रहित हैं सो मन की शान्ति कहे शुद्धि के अर्थ उक्त आसन पर बैठने के बाद मन को एकाग्र विक्षेप रहित कर के योग अभ्यास करै १२

दोहा

तामे मन एकाग्र सें जित चित इंद्रि जोय बैठे आसन योग कों साधे मन शुद्धि कोय १२॥

53

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। संप्रेक्ष्य ना-
सिकाग्रं स्वं दिशश्चानवलोकयन् ॥ १३ ॥

शाङ्करभाष्यं

बाह्यमासनमासनमुक्तं अधुना शरीरस्य धारणं कथमित्युच्यते सममिति समं
कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं तत्समं धारयन् अचलं च
समं धारयतश्चलनं संभवमतो विशिनष्टि अचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः स्वं ना-
सिकाग्रं संप्रेक्ष्य सम्यक् प्रेक्षणं दर्शनं कृत्वेवेतीवशब्दो लुप्तो द्रष्टव्यो न हि स्वनासिका-
ग्रसंप्रेक्षणमिह विधित्सितं किं तर्हि चक्षुषोर्दृष्टिसंनिपातः स चान्तःकरणसमाधा-
नापेक्षो विवक्षितः स्वनासिकाग्रसंप्रेक्षणमेव चेद्विवक्षितं मनस्तत्रैव समाधीयेत ना-
त्मनि आत्मनि हि मनसः समाधानं वक्ष्यत्यात्मसंस्थं मनः कृत्वेति तस्मादिवशब्दलोपे-
नाक्ष्णोर्दृष्टिसंनिपात एव संप्रेक्ष्येत्युच्यते दिशश्चानवलोकयन् दिशां चावलोकनम-
कुर्वन्निमिषमन्तरा कुर्वन्नित्येतत् ॥ १३ ॥

आनन्दगिरिकृतटीका

उक्तमनूद्यानन्तरश्लोकस्यापूर्वमर्थमाह बाह्येति समत्वमृजुत्वं कायः शरीरम-
ध्यं अचलमिति विशेषणमवतार्य तस्य तात्पर्यमाह समस्येति कार्यकरणयो-
र्विषयपारवश्यमुक्त्वाचलत्वं स्थैर्यं किमितीवशब्दलोपोऽत्र कल्प्यते स्वनासिका-
ग्रसंप्रेक्षणमेव योगाङ्गत्वेनात्र विधित्सितं किं तस्यादित्याशङ्क्याह न हीति तर्हि कि-
मत्र विवक्षितमिति प्रश्नपूर्वकमाह किं तर्हीति दृष्टिसंनिपातो दृष्टेश्चक्षुषो रूपादि-
विषयग्रहणनिराहित्यं कथं भावनायामेव सिध्यति नत्राह न चेति समाधानस्या-
धान्येनात्र विवक्षितत्वात् दृष्टेर्बहिर्विषयत्वेन तदङ्गप्रसंगात्तस्या विषयेभ्यो व्याहृत्यान्त-
रेव संनिपातो विवक्षितो भवतीत्यर्थः तथापि कथं स्वनासिकाग्रसंप्रेक्षणमत्रानु-
क्तमविवक्षितमित्याशङ्क्याह स्वनासिकेति तत्रैव मनःसमाधाने का हानिरित्याश-
ङ्क्य वाक्यशेषविरोधादेवमित्याह आत्मनि हीति किं तर्हि संप्रेक्ष्येत्यादौ विवक्षित-
मित्याशङ्क्याह तस्मादिति दृष्टेर्लोपेनान्तर्वक्तव्यो दृष्टिस्तस्या बाह्यविषयाद्व्यावृत्त्य स्वा-
न्तरेव संनिपतनमत्र स्वकीयं नासिकाग्रं नासिकान्तं संप्रेक्ष्येति विवक्षितमि-
त्यर्थः तत्रैवोत्तरमपि विशेषणमनुकूलमित्याह दिशश्चेति अनवलोकयन्ना-
सीतेत्युत्तरत्र सम्बन्धः अन्तरा दिगवलोकनमपि योगप्रतिबन्धकमिति त-
स्य निषेधः ॥ १३ ॥

स्वामिकृतटीका

गी॰
टी॰
ष॰

चित्तैकाग्र्योपयोगिनीं देहादिधारणां दर्शयन्नाह द्वाभ्यां सममिति काय इति देहमध्य
भागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्य
न्तं सममवक्रमचलं निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वीयं नासाग्रं संप्रेक्ष्या
र्धनिमीलितनेत्रः सन्नित्यर्थः १३ ॥

पैशाचभाष्यं

वायुमासनमुक्त्वेदानीं शरीरधारणमुच्यते समं कायशिरोग्रीवमिति कायश्च शिर
श्च ग्रीवा च कायशिरोग्रीवं कायशिरोग्रीवं तत्समं धारयन् अचलं समं धारयतोऽपि च
लनं भवतीत्यतो विशिनष्ट्यचलमिति स्थिरः स्थिरो भूत्वेत्यर्थः संप्रेक्ष्य सम्यक्प्रेक्षणं सं
दर्शनं कृत्वेव निरवशेषालम्बनोऽस्थः स्वनासिकाग्रं संप्रेक्षणमिह न विधीयते किं
तर्हि चक्षुषो दृष्टिसन्निपातः सञ्जातः करणं समानापेक्षा विवक्षितः संप्रेक्षणमेव
चेद्विवक्षितं तर्हि मनस्तत्रैव समाधीयेत नात्मनीति दिग्मनस्समाधानं किं तु वक्ष्यति आत्म
संस्थं मनः कृत्वेति तस्मादिवशब्दलोपस्तेनात्मान्दृष्टिपानं प्रवसंप्रेक्षस्वकं दुनेस्वयं दिश
श्चानवलोकयन् स्वयं दिशां नावलोकनं कुर्वन्निमेषन् तत् १३ ॥

रामानुजभाष्यं

सममिति कायशिरोग्रीवं सममचलं समाश्रयतया स्थिरं धारयन् दिशश्चानव
लोकयन्स्वनासिकाग्रमेक्ष्य १३ ॥

अभिनवगुप्तकृतटीका उपक्रमे १३ ॥ धारयन्प्रयत्नेन नासिकाग्रस्य
ध्याने दिशामनवलोकनम् १३

परमार्थप्रपाटीका

अथ चित्तैकाग्र्योपयोगिनीं देहधारणामाह सममिति द्वाभ्यां कायं देहमध्यः शि
रश्च ग्रीवा चेति समाहारः कायशिरोग्रीवं सममवक्रं यथा भवति तथा धारयन् धा
रणां कुर्वन् आसीनेत्युत्तरेणान्वयः अयमर्थः योगशास्त्रप्रकारेणासनोपवेशो गुरु
लिंगान्तरे स्थितानां धारणानाम्ललं पादितं यस्मिंस्तौ आधिव्याधिमनोवेगोपश
मे सति कायग्रीवाशिरसां समत्वं स्यात् तवदनत्वं अचलत्वं च भवति एवं देहधारण
प्रकारं दृष्टिधारणामाह दिशश्चेति दिशः समन्ततः अनवलोकयन् पश्यन्न हि देहद्ध्
स्थिरवशिष्टानामपि निषेधयति स्वनासिकाग्रं संप्रेक्ष्य अनेन चित्तैकाग्र्योपलक्षणम
हितं [illegible] १३ ॥

वनमालीटीका

वायुमासनमुक्त्वाधुनातत्कर्तृशरीरधारणमित्युच्यते कायः शरीरमध्यं च शिर
श्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धान्तपर्यन्तं समम् अवक्रम् अचलमकं
पं धारयन् स्थिरः दृढप्रयत्नो भूत्वा स्वकीयं नासिकाग्रं संप्रेक्ष्यावलयवित्तेपरादि।

त्मानुविषयाप्रवृत्तिरनिमीलितनेत्रश्चत्यर्थः दिशश्चानवलोकयन् अंतरांतरादिशोचावलोकनमकुर्वन् योगविरोधित्वात्तस्य एवंभूतः सन्नासीतेत्युत्तरेणान्वयः १३ ॥

कृष्णमवैजयन्तीटीका

नन्वासने केनप्रकारेणोपविशेदित्यपेक्षायामुपविष्टस्य शरीरधारणप्रकारमाह समिति कायशिरोग्रीवं कायश्च शिरश्च ग्रीवा चैषां समाहारः कायशिरोग्रीवं प्राण्यंगत्वात्समाहारे नद्वंद्वावदः समं वक्ररहितम् अचलं कंपरहितं कायशिरोग्रीवं धारयन् धारणां कुर्वन् सन् स्थिरः सन् विघ्नादिनाऽव्याकुलः सन् स्वकीयं नासिकाग्रं संप्रेक्ष्य संदृश्य मनसो लयविक्षेपशांतये नासाग्रपदवृष्टिं कृत्वेत्यर्थः चपुनः दिशः पूर्वादीः अनवलोकयन्नितस्ततोऽसमीक्ष्य सन्नासीतेत्युत्तरेणान्वयः १३ ॥

मधुसूदनीटीका

तदर्थं बाह्यमासनमुक्त्वाधुनातनकं शरीरधारणमित्युच्यते ॥ कायः शरीरमध्यं स च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धांतपर्यंतं समं वक्रमचलमकंपं धारयन्नेकतत्त्वाभ्यासेन विक्षेपसहभावेऽगमेजयत्वाभावं संपादयन् स्थिरः दृढप्रयत्नो भूत्वा किंच स्वं स्वीयं नासिकाग्रं संप्रेक्ष्यैवलयविक्षेपराहित्याय विषयप्रवृत्तिरहितोऽर्द्धनिमीलितनेत्रश्चेत्यर्थः दिशश्चानवलोकयन् अंतरांतरादिशांचावलोनमकुर्वन् योगप्रतिबंधकत्वात्तस्य एवंभूतः सन्नासीतेत्युत्तरेणसंबंधः १३ ॥

सदानंदीटीका

यत्कासनं योगसिद्धेर्देहधारणमुच्यते समं कृत्वा शिरोग्रीवां कायं मूर्धमुन्नतिमले मूलाधारात्समारभ्य मूर्द्धांतं धारयन् स्थिरं सदृढप्रयत्नो भूत्वानिष्कंपो योगतत्परः १ लयविक्षेपशांत्यर्थं नासिकाग्रमवेक्ष्य च कृत्वेवदर्शनं सम्यगिवशद्भस्यलोपनात् नासासंप्रेक्षणं नात्र विवक्षितमितीक्षितः दिग्वीक्षणमकुर्वं स्योगस्य प्रतिबंधकम् ४ एवंभूतः सन्नासीतेत्युत्तरेणान्वयो मनः ५ १३ ॥

नीलकंठीटीका

आसन उपविश्य यत्कर्तव्यमित्यपेक्षायामाह समिति कायः शरीरमध्यं शिरः ग्रीवा च कायशिरोग्रीवं समं मूलाधारमारभ्य मूर्धांतमवक्रं अचलं निष्कंपं धारयन् स्थि

गी॰ टी॰ ध॰

रःभूत्वा संप्रेक्ष्य नासिकाग्रं स्वमिति नासिकाग्रावेक्षणं न विधीयते किं तर्हि निमीलने लयं उन्मीलने विक्षेपभयं मत्तो दिशोपि स्थ्यादि विक्षेपक विषयदर्शन भयादनवलोकयन् अर्धोन्मीलितनेत्र आसीनेतित्यर्थः ॥ १३ ॥

आनंदटीका

बद्धासनस्य चित्तैकाग्र्यसाधनाय देहस्थानमाह — कायः कंठादधः शरीरं च शिरश्च ग्रीवा च समम् ऋजु धारयन् एवमासनवन्ध मक्त्वो [illegible] ॥

रामकंठटीका

एवं चित्तसमाधानमभिधाय तत्साधनभूतं कायसंस्थानमाह का यः कंठादधः शरीरं शिरो मूर्धा ग्रीवा कंधरा कायशिरोग्रीवं तत्सममवक्रमृजु धारयन्बिभ्रत् तथाह्यपोप्यचलो निष्कंपो गमेजयन्त्वादिचित्तविक्षेपकारणरहितः स्थितस्तथा स्वनासिकाग्रं घ्राणप्रांतं संपश्यन् अत एव च दिशः काष्ठा अनवलोकयन् अपेक्ष्यमाणः दिक्षु दृग्विक्षेपपरिहारार्थं नासिकाग्रसंदर्शनमुक्तम् न तु तल्लीकतैवमित्यभिप्रायः १३ ॥

[illegible]टीका

आसनस्थैर्य्यात्कायस्थैर्यं चित्तस्थै लाक्षिकी ... र्यमित्यत आसनस्थैर्याय चित्तैकाग्र्या पयोगिदेहसंस्थानमाह — इतस्ततो दिशः प्रेक्षमाणः स्वनासिकाग्रं संप्रेक्ष्य अर्धनिमीलितनेत्र इत्यर्थः दिक्षु दृग्विक्षेपपरिहारार्थं नासिकाग्रावलोकने न तु तदेवलक्ष्यमित्यर्थः तथा कायो देहमध्यभागो विवक्षितः कायश्च शिरश्च ग्रीवा च कायशिरोग्रीवं मूलाधारादारभ्य मूर्धांतपर्यंतं समं निश्चयत्वतया नात्यवनते नातिनम्रं यथा भवति तथा धारयन् आसने उपविष्टः तदुक्तं प्रयत्नशैथिल्यानंत्यसमापत्तिभ्यामिति कीदृशमचलं चित्तविक्षेपकारणांगमेजयत्वादिरहितं एवं स्थिरो भूत्वा एवंविधं संस्थाने तत्त्वार्थमपि नातिक्रमन् योगं कुर्यादिति पूर्वेणान्वयः [illegible] ॥

पंचोलीटीका

विनैकाग्रेणाय योगिनां देहादिधारणं दर्शयति सममिति द्वा-
भ्यां कायशिरोग्रीवं कायः शिरोग्रीवा च येन तत्सममेवक्रमचलं
क्रियारहितं धारयन् स्थिरो भूत्वा दिशश्चानवलोकयन् नासिकाग्र-
मेव संप्रेक्ष्य ॥ १३ ॥

रणवीरसमिद्धोधिनी ॥

कथंभूतः सन् संदधीतेत्याह सममिति कायो देहमध्यभागः
स च शिरश्च ग्रीवा च कायशिरोग्रीवं समं वक्रतारहितं सरलमिति
यावत् अचलं पर्वतवन्निश्चलं धारयन् स्थिरो दृढप्रयत्नो भूत्वा स्वं
नासिकाग्रं संप्रेक्ष्येत्यनेनार्धनिमीलितनेत्रता व्यज्यते दूरस्य
लक्ष्यपाते हि प्रमादः प्रसज्यते अत्यर्थं नेत्रयोर्निमीलनं विधायेत्यर्थः अ-
थवा न संतिकौटिल्येनासामान्येन कोऽथ च प्राद्य वदंत्यस्यामिति
नासा गुरुभूमिः यद्वा आसनमासा गुरोरस्य इल इत्य प्रत्ययः न
विद्यते आसा आसनं विश्रमो यत्रेति नासा गुरुभूमिरेव न समा-
सः नासैव नासिका स्वार्थे संज्ञायां वा कः यद्वा आसनमासिका
पर्यायार्थे वुञ् न विद्यते आसिका यत्रेति नासिका गुरुभूमिरे-
व तस्या अग्रं मूर्धानं स्वं स्वात्मानं च स्वकीयं सारथ्यादिकं च संप्रे-
क्ष्य सम्यक्प्रमादरहितत्वेन प्रेक्ष्य दिशश्चानवलोकयन् योगं धा-
रणादिकं युञ्जीत संदधीतेति प्राक्तनेनान्वयः दिशामनवलोक-
नं च सावधानचित्तताव्यंजकं यद्वा ना असिकाग्रमिति छेदः ना
पौरुषलक्षणविशिष्टः कर्मयोगी स्वमसिकाग्रं असिशब्दोऽत्र
शस्त्रार्थः पाशादिकमपि लक्षयति तथा च सामान्यशस्त्राणामु-
ग्रलक्ष्यीभूतं प्रतिपक्षं संप्रेक्ष्येत्यर्थः ॥ १३ ॥

56

मधुमाध्व

५॥

भाषा अनुवाद

अब चित्तकी एकाग्रता के उपयोगी जो देह धारणादि सो दो श्लोक मे कहते हैं कि काय कहे शरीर का मध्यभाग औ शिर ग्रीवा अर्थात् मूल आधार से ले मस्तक पर्यन्त शरीर अति यत्न से सीधी राखि। के औ निश्चल करके धारणा के बाद अपनी नासिका के अग्रभाग मे अ ई उन्मीलन पूर्वक दोनो दृष्टी लगाय समाहित सावधान होय और दि शों मे दृष्टि न देय १२॥

दोहा

सूधे देह शिर ग्रीवको धार अचल स्थिर होय देखत नासा अग्र
निज दिशाहिं न देखें सोय १३॥

57

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः मनः संयम्य मच्चित्तो युक्त आसीत मत्परः १४ ॥

शांकरभाष्य

किंच प्रशान्तेति प्रशान्तात्मा प्रकर्षेण शान्त आत्मान्तःकरणं यस्य सोयं प्रशान्तात्मा विगतभीर्विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणो व्रते ब्रह्मचारिव्रते ब्रह्मचर्यं गुरुशुश्रूषभिक्षान्नभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मनः संयम्य मनसो वृत्तीरुपसंहृत्येत्येतत् मच्चित्तो मयि परमेश्वरे चित्तं यस्य सोयं मच्चित्तो युक्तः समाहितः सन्नासीतोपविशेत् मत्परोऽहं परो यस्य सोयं मत्परो भवति कश्चित् रागी स्त्रीचित्तो न तु स्त्रियमेव परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

आनंदगिरिकृतटीका

योगं युंजानस्य विशेषणान्तराणि दर्शयति किंचेति अन्तःकरणस्य प्रशान्तिः रागद्वेषादिदोषराहित्यं तस्याश्च प्रकर्षो रागादिहेतोरपि निवृत्तिः विगतभयत्वं सर्वकर्मपरित्यागे शास्त्रीयनिश्चयवशान्निःसन्दिग्धबुद्धित्वं भिक्षान्नभुक्त्यादीत्यादिशब्देन त्रिषवनस्नानशौचाचमनादि गृह्यते विशेषणान्तरमाह किंचेति उपसंहृत्य योगनिष्ठो भवेदिति शेषः मनोवृत्त्युपसंहारे ध्यानमपि न सिध्येत्तस्य तद्वृत्त्यात्मनिरूपत्वादित्याशंक्याह मच्चित्त इति विषयान्तरविषयमनोवृत्त्युपसंहारेण मय्येव तन्नियमनात् ध्यानानुपपत्तिरित्यर्थः मच्चित्तत्वेनैव मत्परत्वसिद्धत्वात् मत्पर इति पृथक् विशेषणमनर्थकमित्याशंक्याह भवतीति अन्तःकरणशुद्धियोगस्यावान्तरफलं १४ ॥

स्वामिकृतटीका

इतस्ततो दिशश्चानवलोकयन्निष्पासीनेत्युक्तेनान्वयः प्रशान्तेति प्रशान्त आत्मा चित्तं यस्य विगता भीर्भयं यस्य स ब्रह्मचारिव्रते ब्रह्मचर्ये स्थितः सन् मनः संयम्य प्रत्याहृत्य मय्येव चित्तं यस्य अहमेव परः पुरुषार्थो यस्य सः मत्परः एवं युक्तो भूत्वा आसीत तिष्ठेत १४

पैशाचभाष्यं

प्रशान्तात्मा विगतभीः विगतभयः ब्रह्मचारिव्रते स्थितः ब्रह्मचारिणां व्रते ब्रह्मचर्यं गुरुशुश्रूषणभिक्षान्नभुक्त्यादि तस्मिन् स्थितस्तदनुष्ठाता भवेदित्यर्थः किंच मन

गी॰
टी॰
ष

58

संयम्य मनसो वृत्तिरुपसंहृत्य मच्चित्तो मयि परमेश्वरे चित्तं यस्य सो यं मच्चित्तः यु
क्तः समाहितः सन् आसीत उपविशेत् मत्परः कश्चिद्रागी स्त्रीचित्तो न स्त्रियमेव
परत्वेन गृह्णाति किं तर्हि राजानं महादेवं वा अयं तु मच्चित्तो मत्परश्च १४ ॥

रामानुजभाष्यं

प्रशांतात्मा अत्यंत निर्वृतमनाः विगतभीः ब्रह्मचर्ययुक्तो मनः संयम्य मच्चित्तो यु
क्तः अवहितात्मा मत्पर आसीत मामेव चिंतयन् आसीत १४ ॥

[illegible] गीयते

अभिनवगुप्तकृतटीका उपक्रमं १४ मत्परमत्तया युक्त आसीत् एतम
१४

अथ मनोधारणमाह+

परमार्थप्रपाटीका

+प्रशांतात्मेति प्रशांतो निःसंकल्प आत्मा चित्तं यस्य विगतभीर्निरस्तभयः नि
र्जने एकाकिना कथं स्थातव्यमिति भयशून्यः यद्वा विगतभीरित्युपलक्षणं ह्री
धीभीरित्येतत् सर्वं मन एवेति श्रुतेर्मनोधर्मै रहितः अथावसरमाह ब्रह्मचा
रिणां यद्व्रतं तत्र स्थितः समासग्रहणात्सर्वमेव सर्प्यः अथैवंविधमहाकार्ये अ
हतस्याश्रयव्यतिरेकेण विक्षेपशमः कथं स्यादित्याह मच्चित्त इति मय्येव चित्तं
यस्य निरंतरं मत्स्मरणवान् नहि तावदेव मत्प्रयोजनमित्याह मत्पर इति अह
मेव परं प्राप्यं यस्य मत्परतया तदुक्तं मत्कुलागमे सुखासनेन समासीन
स्तत्वाभ्यासं समाचरन् सदाभ्यासेन तत्कुर्यात् परतत्त्वप्रकाशने १ आसनं प्रा
णसंरोधप्रत्याहारो धारणा ध्यानं समाधिरेतानि योगांगानि वदान्ते ए
कांते विजने रम्ये गुहायां पुण्यभूमिके रहिते मशकैर्दंशैर्देवायतनकेपि वा
सिद्धस्ते महानीर्ये ध्यानसिद्धिः प्रजापते तत्र सिद्धासनेन बध्वा ऋजुकायं तत्का
रयेत् ॥ ऊर्ध्वं मेढ्रादधो नाभेः कंदोग्रे स्थिरविस्थितः तत्र नाड्यः समुत्पन्नाः सहस्रा
णि द्विसप्ततिः ५ कतिरूपिणातपथ्यो हिता नाम नाड्यो द्वासप्ततिसहस्राणि
हृदयात्पुरीततमभिप्रतिष्ठंत इति अत्र पुरीततमिति हृदयाकाशे नाडी
भिर्निर्मितं स्थानं शेषं स्पष्टं ॥ तथा प्रधाना [illegible] प्राणवाहि
न्यो भूयस्तत्र दश स्मृताः इडा च पिंगला चैव तथा चैव यशस्विनी ६ अलंबुका कु
हूश्चैव शंखिनी दशमी तथा एतन्नाडीमयं चक्रं तिस्रस्तत्र प्रवाहिकाः ७ इडा च पिं
गला चैव सुषुम्णा प्राणवाहिकाः इडा वामे स्थिता भागे पिंगला दक्षिणे स्थिता ८
सुषुम्णा मध्यदेशे तु प्राणमार्गास्त्रयो मताः पूरयेद्वामनाड्या च रेचयेद्दक्षया त
तः ९ तथैव पूरयेद्भूयः पूरयेत्कुंभयेत्ततः एवमभ्यासयोगेन नाडीशुद्धिः प्रजा

२

यते १० वेदांगेप्राणमभ्यस्य योगीगः पानमभ्यसेत् श्रीगुरूपदेशेन मध्ये चिंतये
त्परमेश्वरं ११ सप्तमोनगंतं देवं विरूपं भावयेत्सदा प्रणवेनाक्षरं ब्रह्मनि
मं ध्यायंति योगिनः १२ तन्नाभेनंतरेणाग्निरुज्जीयते नात्र संशयः प्रणवा
भ्यासतो योगी गोमयानस्तावशानते १३ योगमानेते योनिस्थानकमथ्रिमूल
घटितं कृत्वा दृढं विन्यसेन्मेढ्रापादमथैकमेव नियतं कृत्वासमं विग्रहं स्था
णुः संयमितेंद्रियोऽचलदृशापश्यन्भ्रुवोरंतरं चैतन्मोक्षकपाटभेदजन
कं सिद्धासनं प्रोच्यते १ वामोरूपरि दक्षिणं च चरणं संस्थाप्य वामं तथा द
क्षोरूपरि पश्चिमेन विधिना धृत्वाकराभ्यां दृढं अंगुष्ठौ हृदये निधाय चिबु
कं नासाग्रमालोकयेदेतद्व्याधिविकारनाशि यमिनां पद्मासनं प्रोच्यते २ आधा
रं प्रथमं चक्रं स्वाधिष्ठानं द्वितीयकं योनिस्थानं द्वयोर्मध्ये कामरूपं निगद्यते ३
अपानप्राणयोरैक्यं क्षयो मूत्रपुरीषयोः युवा भवति वृद्धोपि सततं मूलबंधना
त् ४ पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्गुदं अपानमूर्ध्वमाकृष्य मूलबंधो
निगद्यते ५ उदरे पश्चिमे भागे नाभेरूर्ध्वं निगद्यते उड्डियाणो ह्ययं बंधः कं
ठदुःखौघनाशनः बध्नातीह शिराजालमधोयाति नभोजलं ततो जालंधरं
बंधं कंठसंकोचलक्षणः ७ जलंधरे कृते बंधे कंठसंकोचलक्षणे न पीयूषं
पतत्यग्नौ न च वायुः प्रकुप्यति ८ कपालकुहरे जिह्वा प्रविष्टा विपरीतगा
भ्रुवोरंतर्गता दृष्टिर्मुद्रा भवति खेचरी ९ अकारश्च समाकृष्य मकारश्च शि
रोधरः नासाग्रे दृष्टिरेकांते जपेदोंकारमव्ययं १० भूर्भुवःस्वरिमेलोकाः
सोमसूर्याग्निदेवताः यस्य मात्रासु तिष्ठंति तत्परं ज्योतिरोमिति ११ आस
नेन रुजं हंति प्राणायामेन पातकं विकारं मानसं योगी प्रत्याहारेण सेव
ति १२ धारणाभिर्मनोधैर्यं ध्यानान्निश्चलमद्भुतं समाधेर्मोक्षमाप्नोति त्यक्त्वा
कर्म शुभाशुभं १३ प्राणायामद्विषट्केन प्रत्याहारः प्रकीर्तितः प्रत्याहार
द्विषट्केन धारणा जायते शुभा १४ धारणाद्वादश ध्यानं प्रोक्तं ध्यानविशा
रदैः ध्यानद्वादशकेनैव समाधिरभिधीयते [illegible]॥

वनमालीटीका

प्रकर्षेण शांतो रागादिदोषरहित आत्मा मनो यस्य स शास्त्रीयनिश्चयप्रा
प्तिगताभीः सर्वकर्मणा गुरुकृत्वा शुकनशोकाच्च यस्य सः ब्रह्मचारिव्र
ते स्थितः ब्रह्मचर्यं गुरुशुश्रूषा भिक्षाभोजनादौ स्थितः सन् मनः संयम्य

गी॰
टी॰
ध॰

59

विषयाकारवृत्तिशून्यं कृत्वा मयि परमेश्वरे गणपालये सकलवेदान्तप्रतिपाद्ये
तत्त्वमसि इति सर्वेश्वरे शरणागतवत्सले विषयान्तरं विहाय चित्तं यस्य सः पुत्रादौ
प्रियान्तरे चिन्तनीये विद्यमाने त्वय्येव कथं चित्तवृत्तिः स्यात् तत्राह मत्परः अहमे
व परमानन्दरूपत्वात् परः पुरुषार्थो यस्य सः तदेतत् श्रेयः पुत्रात् प्रेयो वित्तात् प्रेयो
यस्मात् सर्वस्मादन्तरतरं यदयमात्मा इति श्रुतेः कश्चित् रागी चित्तेन स्त्रियमाराध्य
त्वेन गृह्णाति किं तु राजदेवादिकं कश्चिद्राजादिकमाराध्यत्वेन न तु स्वर्निशेषतरे
कवितः अयं त्वाराध्यत्वेन मां गृह्णन् हरिनिशं तैलधारावत् प्रवाहेण मदेकचि
त्तस्येति भावः १४

ऊरुमवैजयन्ती

किंच प्रशान्तात्मेति प्रशान्तात्मा प्रकर्षेण शान्तो विषयेभ्यः स्तम्भित आत्मा मनो
यस्य स तथा स्ववशीकृतमनाः विगतभीः विगता भीर्भयं यस्मात् स तथा निह
तजन्ममरणादिभयत्रयः ब्रह्मचारिव्रते ब्रह्म परब्रह्म स्वस्वरूपं वा मायोपा
वेदं वा चरितुं ताच्छील्ये यः सोऽनेन यात्तेषां व्रतेषु मदमादिसाधनेन स्थितः स्थितः
सावधानतया अवस्थितः मच्चित्तः द्विभुजचतुर्भुजादिरूपे मयि चित्तं यस्य स तथा
मत्परः मय्येव एकस्मिन् परः आत्मात्मीयपरमात्मा सा यस्य स तथा मनः संयम्य वाह्य
विषयादाकृष्य युक्तः स्वस्वरूपे शक्तस्तन्मयो योगी आसीत एवं भूतस्तिष्ठेदि
त्यर्थः १४ ॥

किंच

मधुसूदनी

निरातनिवृत्तिरूपेण प्रकर्षेण शान्तः रागादिदोषरहित आत्मान्तःकर
णं यस्य सः प्रशान्तात्मा शास्त्रीयनिश्चयदार्ढ्याद्विगता भीः सर्वकर्मपरित्यागे
युक्तायुक्तत्वशङ्का यस्य स विगतभीः ब्रह्मचारिव्रते ब्रह्मचर्ये गुरुशुश्रूषाभि
क्षाभोजनादौ स्थितः सन् मनः संयम्य विषयाकारवृत्तिशून्यं कृत्वा मयि परमे
श्वरे सगुणे निर्गुणे वा चित्तं यस्य स मच्चित्तो मद्विषयकधारावाहि
कचित्तवृत्तिमान् पुत्रादौ प्रिये चिन्तनीये सति कथमेवं स्यादत आह मत्परः अ
हमेव परमानन्दरूपत्वात् परः पुरुषार्थः प्रियो यस्य स तथा तदेतत्प्रेयः पुत्रात्प्रेयो
वित्तात्प्रेयो यस्मात्सर्वस्मादन्तरतरं यदयमात्मा इति श्रुतेः एवं विषयाकारसर्ववृ
त्तिनिरोधेन भगवदेकाकारचित्तवृत्तिप्रवाहः संप्रज्ञातसमाधिमानासीनः
पविरोधं यथाशक्ति न तु सेकयामुतिष्ठेदित्यर्थः भवति कश्चिद्रागी स्त्रीचि

त्रोनतुस्थिरमेवपरत्वेनाराध्यत्वेनगृह्णातिकिंतर्हिरागानेवादेवंवाश्रयेत।
मच्चित्तोमत्परश्चसर्वाराध्यत्वेनमामेवमन्यतइतिभाष्यकृतांव्याख्या
ख्यातत्वेपिमेनात्रभाष्यकारेणतत्परतागुञ्जायाः किंतर्हिस्वेकतत्त्वारोहे।
पितत्परता [illegible] ॥

सदानंदीटीका

रागादिदोषशून्यत्वात्क्षोभाभ्यामवर्जितः शुक्लाशुक्लनवसंदेहः कर्ममा
गेभयंस्मृतं १ नक्षमोनिर्भयोभूत्वायदासर्वभयोज्झितः ब्रह्मचर्यविनावि
नेहप्रीतेस्त्रीतत्पादिभिः २ निश्चलेनप्रतीविस्याद्ब्रह्मचर्यमतस्मरेत् नारा।
यणपरोभक्तिंविनाब्रह्मादयेमतः ३ नहमंतिश्चलेस्यातेभक्तिःकार्पीत
तोहरो यत्नहृदितिध्यायाहब्रह्मचारीतिमाधवः ४ गुरुशुश्रूषणाभि
ताब्रह्मचर्यमथापरं ययद्भनेभवेद्ब्रह्मचारिणस्तत्रवस्थितः ५ मनोनि
विषयेकृत्वावासदेवेमयीश्वरे प्रमक्तेनयमस्रूपचित्तंयस्यसमन्मनाः।
अहमेवपरानंदरूपत्वेनपरःप्रियः सर्वस्याज्जीवपर्यंतःशुरुषार्थःसमत्परः
एवंचित्तनिरोधेनब्रह्माकाराकृतायदा चित्तवृत्तिःसआसीतनवृत्तिहेत्वयं
ततः ८ ॥१४

नीलकंठीटीका

एवमासनेउपविष्टेनयत्कर्तव्यंतदाह प्रशांतात्मेति योगयुक्तोयोगी
ब्रह्मचारिव्रतेभैक्ष्यचर्यायांस्थितः संन्यासीमर्थः मच्चित्तोमयिपरमेश्वरेचित्तंय ‘श्वरे
स्यसएवंभूतोमद्ध्यवमनःसंयम्य मत्परआसीतसप्रशांतात्माभवतिविगत
भीर्भवतीतियोजना भवतिहिकश्चिदात्मनोन्यमीश्वरंमत्वातच्चित्तस्तमेवारा
ध्यत्वेनाभिगतः नचैवचमनसःसंयमंकरोतितत्तुमतमत्परस्तमेवपरमपुरु
षार्थतयाप्राप्यत्वेनमन्यते किंतर्हितस्मीमादेवफलंकामयते अयंतमच्चित्तो
मय्येवमनःसंयम्यमत्परोमामेवसर्वांतरंप्रत्यगात्मानंकामयतइति यतोम
त्परोतःतएवप्रशांतात्मासम्यग्बाह्याभ्यंतरविषयत्यागेनसमाधिस्था
स्यादत्यागेनवशांतउपरतः आत्मावित्तेयस्यसोस्मिन्नात्मावशेषोविगत
भीर्भवति इयमेवावस्थासत्वपुरुषान्यताख्यातिरितिब्रह्मसाक्षात्कारइति
चविकल्पते सर्वप्रमाणमत्सिद्धांतपुरुषः परमपुरुषार्थभाग्भवति ॥१४

आनंदीटीका

यमनियमादिसेवामाह ॥

गी॰
टी॰ ध॰

६०

प्रकृतो योगमभ्यसितुं प्रवृत्तः प्रशांतो हिंसादिभ्यो निवृत्त आत्मांत
करणं यस्य स तथा हिंसासत्यास्तेयानां यमानां ग्रहणं तथा प्रशांतो निर्म
ल आत्मा यस्येति शौचसंतोषयोर्ग्रहणं विगतभीर्द्वंद्वसहनात्तपसो ग्रह
णं ब्रह्मचारिव्रते स्थितः तस्य यमस्य संयमः ब्रह्मचर्यस्य स्वाध्यायाख्यस्य च
नियमस्य ग्रहणं मनः संयम्य विषयग्रहणान्निवर्त्य अपरिग्रहस्य यमस्यो
क्तिः मच्चित्तो मयि परमेश्वरे प्रणिहितचेताः अहमेव परः प्राप्यो यस्य स त
थाः आसीतेतीश्वरप्रणिधानम् तथा च योगसूत्रे अहिंसासत्यास्तेयब्र सा॰
ह्मचर्यापरिग्रहा यमाः शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि निय
मा इति १४ ॥

रामकंठी टीका

इत्थं विहितसमस्तसमाधिपरिकरस्य परमात्मसमापत्ति
लक्षणमोक्षप्राप्तिहेतुं विशेषणं प्रतिपादयितुमाह प्रशांतात्मा प्रशांतः
संदेहादिविकल्पक्षोभरहित आत्मांतःकरणं यस्य स तथा सर्वमात्मत्वेनाव
गम्य सर्वतश्चराचराद्भूताद्विगतभीः विहतसाध्वसः तथा ब्रह्मचारिव्रते स्थि
तः ब्रह्मचारिणः कामसंकल्पवर्जनव्रतं तस्मिन्स्थित इति सर्वार्थविषयप्रार्थ
नारहितत्वमनेन विशेषणेनोक्तम् इत्थं मनः संयम्य सर्वतश्चित्तं निगृह्य मय्येव
परमात्मन्येकस्मिंस्तत्त्वे चित्तसंवेदनं यस्य स तथाविधो युक्तः समाहितः संस्तन्मयतया

विधायोगादनन्यविषयम
नाआसीत तिष्ठेत् १४ ॥

एवं बद्धपरिकरस्य समाध्युपलासिकी ... टीका योगीनि विशेषणान्याह ॥
प्रशांतो रागादिकलंकशून्य आत्मा अंतःकरणं यस्य सः अत एव विग
तभीर्निर्भयः ब्रह्मचारिव्रते ब्रह्मचर्यादौ स्थितः ब्रह्मचारिव्रतग्रहणेन
यमाद्या गृह्यंते तदुक्तं अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमा इति
शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमा इति मच्चित्तो म
यि प्रत्यगात्मनि वृत्त्या नैवचित्तं यस्य स कर्मयोगी मत्परो मां परमेश्वरं भ
जनाय समाश्रितः मनो मननात्मकमंतःकरणं संयम्य सम्यग्वृत्तिशून्यं
तया निरुध्य युक्तः प्रत्यवमर्शाना आसीत तिष्ठेत् एवं ध्यानयोगाभ्यासफ
लमाह १४ ॥

४३

पंचोलीटीका

प्रशांतात्मेति प्रशांतात्माशांतचित्तः ब्रह्मचारिव्रते ब्रह्मचर्यगुरुशु
श्रूषाभिताभोजनादिके स्थितः तदानुष्ठाताभवेत् किंच मनसोव्या
पारं नियतेमत् परायणः युक्तः समाधियुक्तः सन् उपविशेत् १४

रणवीरसत्सिद्धोधिनी॥

प्रशांतात्मेति प्रशांतोऽहसंकल्पेभ्यः प्रतिनिवृत्त आत्माचित्तंय
स्य अतएव विगतभीः परेभ्यः सकाशाद्‌असंजातसाध्वसः ब्रह्म
चारिव्रते ब्रह्मणा धनुर्वेदेन चरंतिव्यवहरंति जीवंतिवा तच्छी
लाब्रह्मचारिणः क्षत्रियप्रवरास्तेषांव्रते युद्धादिकाचारे स्थितः
अथच युद्धकालेविस्मृतत्वादिविषयत्वेन प्रथमाभ्रमस्यः म
नोंतःकरणंसंयस्यस्ववशीविधाय मयिपरमेश्वरेचित्तंचेतोय
स्य परमेश्वरोमेसाध्यसिद्धिं करोत्विति परमेश्वरसमर्पितस्वं
कार्यभरसिद्धिरितियावत् युक्तःकर्मसुप्रवृत्तः कर्मयोगी आ
सीतरणांगे स्थितिंकुर्यात् कथंभूतोमत्परः अहमेवपरः उपा
लनसहरणयोरिति धातवनुसारात् पालयिता संहर्ता वलाया
यकश्चयस्येति १४॥

मधुभाष्य

१४॥

61

भाषा अनुवाद

जिस का चित्त प्रशान्त और जो निर्भय और ब्रह्मचर्य्य व्रतमे स्थित होके अपने मन को सब तरफसे खींच मेरे मे लगायाहै और जिसको मेरी परमपुरुषार्थ रूप करके रहे हैं ऐसा मत्परायण पुरुष उत्तमत योगमे समाहित रहता है १४

दोहा

शांति चित निर्भय सदा ब्रह्मचर्य व्रतस्थित मनहिं रोकें युक्त होय मो मत परमो चित्त १४॥

युञ्जन्नेवं सदात्मानं योगी नियतमानसः शान्तिं
निर्वाणपरमां मत्संस्थामधिगच्छति १५॥

शाङ्करभाष्यं

अथेदानीं योगफलमुच्यते युञ्जन्निति युञ्जन् समाधानं कुर्वन्नेवं य
थोक्तेन विधानेन सदा योगी नियतमानसः नियतं संयतं मनो यस्य सो
ऽयं नियतमानसः स शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षस्तत्प
रमा निष्ठा यस्याः शान्तेः सा निर्वाणपरमा तां निर्वाणपरमां मत्संस्थां
मदधीनतामधिगच्छति प्राप्नोति १५॥

आनन्दगिरिकृतटीका

संप्रति परमफलकथनपरत्वेनानन्तरश्लोकमादत्ते अथेति योगस्वरूपं त
दङ्गासनमपि न कर्तृविशेषणमित्यस्यार्थस्य प्रकथनानन्तरमित्यथशब्दा
र्थः आत्मानं युञ्जन्निति सम्बन्धः आत्मशब्दो मनोविषयः यथोक्तो विधि
रासनादिः उक्तविशेषणवत्त्वद्योतनार्थं सदेत्युक्तं योगी ध्यायी सञ्जातस्थै
र्यः मनःसंयमस्य योगे प्रत्यसाधारणत्वं दर्शयति नियतेति शान्तिशब्दि
तोपरतेः सर्वसंसारनिवृत्तिपर्यवसायित्वं मत्वा विशिनष्टि निर्वाणेति
यथोक्तया मुक्तेर्ब्रह्मस्वरूपावस्थानादनर्थान्तरत्वमाह मत्संस्थामिति म
दधीनां मदात्मिकामित्यर्थः १५॥

स्वामिकृतटीका

ततो योगाभ्यासफलमाह युञ्जन्निति एवमुक्तेन प्रकारेण सदात्मानं म
नो युञ्जन् समाहितं कुर्वन् नियतं निरुद्धं मानसं चित्तं यस्य स शान्तिं संसा
रोपरमं प्राप्नोति कथम्भूतां निर्वाणं परमं प्राप्यं यस्यां तां मत्संस्थां मद्रूपेण
वस्थितिं १५॥

पिशाचभाष्यं

अथेदानीं योगफलमुच्यते युञ्जन्नेवमिति युञ्जन्नन समाधानं कुर्वन्ने
वं च यथोक्तेन प्रकारेण योगी नियतमानसः नियतं संयतं मानसं यस्य सः
शान्तिमुपरतिं निर्वाणपरमां निर्वाणं मोक्षः परमा निष्ठा यस्याः शान्तेस्तां
निर्वाणपरमां मत्संस्थां मदधीनामधिगच्छति प्राप्नोति १५

रामानुजभाष्यं

गी॰ टी॰ श॰

एवं मयि परस्मिन् ब्रह्मणि पुरुषोत्तमे मनसः शुभाश्रयीभूते सदात्मानं
मनो युञ्जन्नियतमानसो निश्चलमानसः मत्स्पर्शपवित्रीकृतमानसस्त
यानिश्चलमानसः मत्संस्थां निर्वाणपरमां शान्तिमधिगच्छति निर्वा
णकाष्ठारूपां मत्संस्थां मयि संस्थितां शान्तिमधिगच्छति १५

पतः शान्तिं जायते यस्यां संस्था यं यत काष्ठा मत्प्राप्तिः योगो ति

अभिनवगुप्तकृतटीका स्पष्टार्थः १५ परमात्मानं युंजतस्समाद

परमार्थप्रपाटीका २५

+ अथ योगाभ्यासफलमाह

63

+ युञ्जन्निति एवमुक्तप्रकारेण योगी अभ्यासरत आत्मानं मनः युञ्जन् स
माहितं कुर्वन् नियतं स्वाधीनं मानसं यस्य स तथाविधः सन् शान्तिं संसा
रोपरमम् अधिगच्छति किंभूतां निर्वाणपरमे श्रामवश्यानेयस्यां म
यि संस्थाः स्थितिर्यस्याः सा मदाकारेण संस्थानमित्यर्थः श्रुतिरपि तैत्तिरी।
यके युञ्जानः प्रथमं मनस्तत्त्वाय सविता धियमिति भाष्ये प्रथममारंभेम
नो युञ्जानः स्वाधीनं कुर्वाणः अनेन तरतम्यायात्मशमये धियः बुद्धीर्युञ्जा
नः पुरुषः सविता सर्वस्य प्रसविता स्वयमात्मैव भवति १५

वनमालीटीका

ततः किं स्यादत आह युञ्जन्निति एवमुक्तप्रकारेणात्मानं मनो युञ्जन्नभ्या
सवैराग्याभ्यां समाहितं कुर्वन् योगी सदा योगाभ्यासातिशयेन नियतं नि
रुद्धं मानसं मनो येन सः निर्वाणलिङ्गदेहनाशात्परमामपुनरकालिकीं
शान्तिं विदेहमुक्तिमधिगच्छति न केवलं जीवन्मुक्तिमेव [illegible] मत्सं
स्थां मत्स्वरूपामित्यर्थः १५।

ऊसमवैजयन्तीटीका

एवंभूतस्य योगिनः फलमाह युञ्जन्नेवमिति एवमुक्तप्रकारेण मयि।
सर्वेश्वरे परमपुरुषे सदा प्रतिदिनमात्मानं मनो युञ्जन्नयतस्सन्नियत
मानसः विनियतं यच्चलं मानसं विनियतं यस्य स तथा मदेकस्पर्श[illegible]
तया प्राकृतविषयात्त्यक्तमनविनरस्यार्थः योगी योगवान् निर्वाणपर
मां निर्वाणस्य मोक्षस्य परमां काष्ठारूपां मत्संस्थां मय्येव तिष्ठन्तीं यदा मत्संस्था
मयि संस्था स्थितिर्यस्यास्सा मत्संस्था तां मत्स्वरूपसाम्यस्थितिमित्यर्थः शा गच्छति
न्तिं सरवमधिगच्छति लभते तमेव विदित्वातिमृत्युमेतीति श्रुतेः १५॥

मधुसूदनीटीका

एवं सम्प्रज्ञातसमाधिनासीनस्य किं स्यादित्युच्यते एवं रहोऽवस्थानादिस

वोक्तनियमेनात्मानं मनो युंजन् वैराग्याभ्यासाभ्यां समाहितं कुर्वन् यो
गी सदाभ्यासपरोऽभ्यासातिशयेन नियतेन निरुद्धमानसः मनो येन निय
तानिरुद्धमानसस्य हृन्निरूपाधिकारायेनेति वा नियतमानसः सनूशां
तिं सर्वेहस्तुपरतिरूपो प्रशांतवाहितां निर्वाणपरमां तत्सालोकातामति
हारेण सकार्याः विद्यानिवृत्तिरूपमुक्तिपर्यवसायिनी मत्संस्थां मत्स्वरूपपर
मानंदरूपो निष्ठामधिगच्छति ततः सांसारिकाण्यैश्वर्याणि यत्नान्म विषय
समाधिफलानामधिगच्छति तेषामपवर्गोपयोगि समाध्युपसर्गत्वात् त
थाच तत्र तत्र समाधिफलान्यूकाह भगवान् पतंजलिः ते समाधावुपस
र्गा व्युत्थाने सिद्धयश्चेति स्थान्युपनिमंत्रणे संगस्मयाकरणं पुनरनिष्ट
संगात् इति च स्थानिनो देवाः तथा चोद्दालको देवैरामंत्रितोऽपि तत्संगमा
दरं स्मयं गर्वं चाकृत्वा देवानवज्ञाय पुनरनिष्टप्रसंगनिवारणाय निर्वि
कल्पकमेव समाधिमकरोदिति वसिष्ठेनोपाख्यायते मुमुक्षुभिर्हेयः स
माधिश्च सूत्रितः पतंजलिना वितर्कविचारानंदास्मितानुगमात्संप्रज्ञातः
सम्यक् संशयविपर्ययानध्यवसायरहितत्वेन प्रज्ञायते प्रकर्षेण विशेष
रूपेण ज्ञायते भाव्यस्य रूपं येन स संप्रज्ञातः समाधि
भावनाविशेषः भावना हि भाव्यस्य विषयांतरपरिहारेण चेतसि पुनः पु
नर्निवेशनं भाव्यं च द्विविधं ग्राह्यग्रहणग्रहीतृभेदात् ग्राह्यमपि हि द्विविधं स्थू *ग्रह*
लसूक्ष्मभेदात् तदुक्तं क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु
तत्स्थतदंजनता समापत्तिः क्षीणा राजसतामसवृत्तयो यस्य तस्य चि
त्तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेंद्रियविषयेषु तत्स्थता तत्रैवैकाग्रता त *ग्रह*
दंजनता तन्मयता न्यग्भूते चित्ते भाव्यमानस्योत्कर्षः इति यावत् तथा
विधा समापत्तिस्तद्रूपः परिणामो भवति यथाभिजातस्य निर्मलस्य स्फटि
कमणेस्तत्तद्रूपाश्रयवशात्तत्तद्रूपापत्तिरेवं निर्मलस्य चित्तस्य तत्तद्भावनो
पवक्तुपरागात्तद्रूपापत्तिः समापत्तिः समाधिरिति च पर्यायः यद्यपि
ग्रहीतृग्रहणग्राह्येष्विदमुक्तं तथापि भूमिकाक्रमवशाद्ग्राह्यग्रहणग्र
हीतृष्विति बोद्धव्यं यतः प्रथमं ग्राह्यनिष्ठ एव समाधिर्भवति ततो ग्रह
णनिष्ठः ततो ग्रहीतृनिष्ठ इति ग्रहीत्रादिक्रमोऽप्यग्रे व्याख्यास्यते तत्र यदा स्थू *ग्रही*
लं महाभूतेंद्रियात्मकं षोडशविकाररूपं विषयमादाय पूर्वापरानुसंधा
नेन शब्दार्थोल्लेखेन च भावना क्रियते तदा सवितर्कः अस्मिन्नेवालंबने *समाधिः*

विघ्नत्वात्

गी.
टी.
य.

64

पूर्वापरानुसंधानशब्दार्थोल्लेखशून्यत्वेन यदा भावना प्रवर्त्तते तदा निर्वित
र्कः। एतावुभावप्यत्र वितर्कशब्देनोक्तौ। तन्मात्रान्तःकरणलक्षणं सूक्ष्मं विष
यमालंब्य तस्य देशकालधर्मावच्छेदेन यदा भावना प्रवर्त्तते तदा सविचारः।
अस्मिन्नेवालंबने देशकालधर्मावच्छेदं विना धर्मिमात्रावभासित्वेन यदा भाव
ना प्रवर्त्तते तदा निर्विचारः। एतावुभावप्यत्र विचारशब्देनोक्तौ। तथा च भाष्ये वि
तर्कश्चित्तस्य स्थूले आलंबने आभोगः सूक्ष्मे विचार इति। इयं ग्राह्यसमापत्तिरि
ति व्यपदिश्यते। यदा रजस्तमोलेशानुविद्धमन्तःकरणसत्त्वं भाव्यते तदा गुण
भावाच्चितिशक्तेः सुखप्रकाशमयस्य सत्त्वस्य भाव्यमानस्योद्रेकात् सानंदः
समाधिर्भवति। अस्मिन्नेव समाधौ ये बद्धधृतयस्तत्त्वान्तरं प्रधानपुरुषरूपं न
पश्यंति ते विगतदेहाहंकारत्वात् विदेहशब्देनोच्यंते। इयं ग्रहणसमापत्तिः। त
तः परं रजस्तमोलेशानभिभूतं शुद्धसत्त्वमालंबनीकृत्य या भावना प्रवर्त्तते
तस्यां ग्राह्यस्य सत्त्वस्य न्यग्भावाच्चितिशक्तेरुद्रेकात् सत्तामात्रावशेषत्वेन स
माधिः सास्मितेत्युच्यते। न चाहंकारास्मितयोरभेदः शंकनीयः। यतो यत्रांतः
करणमहमित्युल्लेखेन विषयान्वेदयते सोऽहंकारः। यत्रान्तर्मुखतया प्रतिलो
मपरिणामेन प्रकृतिलीने चेतसि सत्तामात्रमवभाति सा[स्मिता]। अस्मिन्नेव समाधौ
ये कृतपरितोषास्ते परं पुरुषमपश्यंतश्चेतसः प्रकृतौ लीनत्वात् प्रकृतिल
या उच्यंते। सेयं गृहीतृसमापत्तिरस्मितामात्ररूपगृहीतृनिष्ठत्वात्। ये तु प
रं पुरुषं विविच्य भावनायां प्रवर्त्तंते तेषामपि केवलपुरुषविषयविवेकख्याति
र्गृहीतृसमापत्तिरपि न सास्मिता समाधिर्विवेकेनास्मितायाः परित्यागात्। तत्र ग्र
हीतृभाने सर्वकमेव ग्रहणभानेन तत् सर्वके सूक्ष्मग्राह्यभानेन तत् सर्वके च स्थू।
लग्राह्यभानमिति। स्थूलविषयो हि विषयोऽपि वितर्कश्चतुष्टयानुगतः। द्वितीयो वितर्क
विकलस्त्रितयानुगतः। तृतीयो वितर्कविचाराभ्यां विकलो द्वितीयानुगतः। चतुर्थो
वितर्कविचारानंदैर्विकलोऽस्मितामात्र इति चत्वार एवायं प्रज्ञात इति। एवं सवि
तर्कः सविचारः सानंदः सास्मितश्च समाधिरंतर्योनादिसिद्धेन तया शुद्धि।
हेतुसमाधिविरोधित्वादुपेयवदनुमतिभिः गृहीतृग्रहणयोरपि भिन्नत्वादिति वि।
बधनादृशायां ग्राह्यकोटौ निक्षेपाद्धेयोपादेयविभागकथनाय ग्राह्यसमापत्ति
रेव विहिता सूत्रकारेण चतुर्विधा हि ग्राह्यसमापत्तिः स्थूलग्राह्यगोचरा द्विवि
धा सवितर्का निर्वितर्का च सूक्ष्मग्राह्यगोचरापि द्विविधा सविचारा निर्विचारा च
तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का शब्दार्थज्ञानविकल्पसंभिन्नामस्य।

लार्थावभासरूपा सवितर्का समापत्तिः स्थूलगोचरा सविकल्पकवृत्तिरि
त्यर्थः ॥ स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥ तस्मिन्ने
व स्थूलालंबने शब्दार्थस्मृतिप्रविलये प्रत्युदितस्पष्टग्राह्याकारप्रतिभा
सितया न्यग्भूतज्ञानांशत्वेन स्वरूपशून्येव निर्वितर्का समापत्तिः स्थूलगो
चरा निर्विकल्पकवृत्तिरित्यर्थः ॥ एतयैव सविचारा निर्विचारा च सूक्ष्मविष
या व्याख्याता ॥ सूक्ष्मस्तन्मात्रादिर्विषयो यस्याः सा सूक्ष्मविषया समापत्तिर्द्वि
विधा सविचारा निर्विचारा च सविकल्पकनिर्विकल्पकभेदेन एतयैव स
वितर्कया निर्वितर्कया च स्थूलविषयया समापत्त्या व्याख्याता । शब्दार्थ
ज्ञानविकल्पसहितत्वेन देशकालधर्माद्यवच्छिन्नः सूक्ष्मोर्थः प्रतिभाति ।
यस्यां सा सविचारा शब्दार्थज्ञानविकल्परहितत्वेन देशकालधर्माद्यन
वच्छिन्नत्वेन च धर्मिमात्रतया सूक्ष्मोर्थः प्रतिभाति यस्यां सा निर्विचारा
सविचारनिर्विचारयोः सूक्ष्मविषयत्वविशेषणात् सवितर्कनिर्वितर्क
योः स्थूलविषयत्वमर्थाद्व्याख्यातं ॥ सूक्ष्मविषयत्वं चालिंगपर्यवसानं ॥ स
विचारायाः निर्विचारायाश्च समापत्तेर्यत् सूक्ष्मविषयत्वमुक्तं तदलिंगप
र्यंतं द्रष्टव्यं तेन सानंदसास्मितयोर्ग्रहीतृग्रहणसमापत्त्योरप्यत्र स
मापत्त्योरेवांतर्भाव इत्यर्थः तथाहि पार्थिवस्याणोर्गंधतन्मात्रं सूक्ष्मो वि
षयः आप्यस्यापि रसतन्मात्रं तैजसस्य रूपतन्मात्रं वायवीयस्य स्पर्शत
न्मात्रं नभसः शब्दतन्मात्रं तेषामहंकारः तस्य लिंगमात्रं महत्तत्वं तस्या
प्यलिंगं प्रधानं सूक्ष्मो विषयः सप्तानामपि प्रकृतीनां प्रधान एव सूक्ष्म
ताविश्रांतेस्तत्पर्यंतमेव सूक्ष्मविषयत्वमुक्तं यद्यपि प्रधानादपि पुरुषः
सूक्ष्मोस्ति तथाप्यन्वयिकारणत्वाभावात्तस्य सर्वान्वयिकारणे प्रधान ए
व निरतिशयं सौक्ष्म्यं व्याख्यातं पुरुषस्तु निमित्तकारणं सदपि नान्वयिका
रणत्वेन सूक्ष्मतामर्हति अन्वयिकारणत्वाविवक्षायां तु पुरुषोपि सूक्ष्म
त्मो भवत्येवेति द्रष्टव्यं ॥ ता एव सबीजः समाधिः ॥ ताश्चतस्रः समापत्तयो
ग्राह्येण बीजेन सह वर्तंत इति सबीजः समाधिः वितर्कविचारानंदास्मि
तानुगमात्संप्रज्ञात इति प्रागुक्ताः स्थूलेर्थे सवितर्को निर्वितर्कः सूक्ष्मेर्थे
सविचारो निर्विचार इति तदंतिमस्य फलमुच्यते ॥ निर्विचारवैशारद्येध्या
त्मप्रसादः ॥ स्थूलविषयत्वे तुल्येपि सवितर्के शब्दार्थज्ञानविकल्पसंकीर्णम

क्ष्म्यं

गी.
टी.
घ.

65

पेक्षत इति तस्य निर्विकल्पकरूपस्य निर्वितर्कस्य प्राधान्ये ततः सूक्ष्मवि
षयस्य सविकल्पकप्रतिभासरूपस्य सविचारस्य ततोऽपि सूक्ष्मविषयस्य
निर्विकल्पकप्रतिभासरूपस्य निर्विचारस्य प्राधान्ये तत्र चैषां त्रयाणामपि
विचाराणां निर्विचारफलत्वेनैव फलत्वं निर्विचारस्य तत्प्रकृष्टाभ्यासव
लाद्वैशारद्ये तत्समानभिभूतमलोद्रेकस्य ध्यानप्रसादः क्लेशवासना
रहितस्य चित्तस्य भूतार्थविषयः क्रमाननुरोधी स्फुटः प्रज्ञालोकः प्रादुर्भवति
तथा च भाष्यं प्रज्ञाप्रसादमारुह्य अशोच्यः शोचतो जनान् भूमिष्ठानिवा
शैलस्थः सर्वान् प्राज्ञोऽनुपश्यतीति ऋतंभरा तत्र प्रज्ञा तस्मिन् प्रज्ञाप्र
सादे सति समाहितचित्तस्य योगिनो या प्रज्ञा जायते सा ऋतंभरा ऋतं सत्य
मेव बिभर्ति न तत्र विपर्यासगन्धोऽप्यस्तीति यौगिकेयं समाख्या सा चोत्त
मो योगः तथा च भाष्यं आगमेनानुमानेन ध्यानाभ्यासरसेन च त्रिधा प्रक
ल्पयन् प्रज्ञां लभते योगमुत्तममिति श्रुतानुमानप्रज्ञाभ्यामन्यविष
या विशेषार्थत्वात् श्रुतमागमविज्ञानं तत् सामान्यविषयमेव न हि वि
शेषेण सह कस्यचित् शब्दस्य संगतिर्ग्रहीतुं शक्यते तस्मात् श्रुतानुमा।
न विषयो न विशेषः कश्चिदस्ति न चास्य सूक्ष्मव्यवहितविप्रकृष्टस्य वस्तुनो
कि लोकप्रत्यक्षेण ग्रहणमस्ति किं तु समाधिप्रज्ञानिर्ग्राह्य एव स विशेषो भव
ति भूतसूक्ष्मगतो वा पुरुषगतो वा तस्मान्निर्विचारवैशारद्यसमुद्भवा
या श्रुतानुमानविलक्षणा या सूक्ष्मव्यवहितविप्रकृष्टस्य विशेषविष।
या या [illegible] ऋतंभरायामेव प्रज्ञायां योगिना महान् प्रयत्न आ[illegible]स्थे
य इत्यर्थः ननु इति समुत्थ[illegible] विति मा व्युत्थानसंस्काराणामेकाग्रता
यामपि सवितर्कनिर्वितर्कसविचाराजातानां संस्काराणां च सद्भावात् स्यात्स्व
मानस्य चित्तस्य कथं निर्विचारवैशारद्यपूर्वकाध्यात्मप्रसादलभ्याऽऋतं-
भराप्रज्ञा प्रतिष्ठितास्यादित्यत आह तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी तया
ऋतंभरया प्रज्ञया जनितो यः संस्कारः स तत्त्वविषयया प्रज्ञया जनितत्वे
न बलवत्त्वाद्व्युत्थानजान् समाधिजांश्च संस्कारान् अतत्त्वविषयप्र
ज्ञाजनितत्वेन दुर्बलान् प्रतिनिबध्नाति स्वकार्याक्षमान् करोति नाशयती
ति वा तेषां संस्काराणामभिभवात्तत्प्रभवाः प्रत्यया न भवन्ति [illegible]।
[illegible] निरुध्यते ततः समाधिरुपतिष्ठते ततः समाधिजा प्रज्ञा ततः प्रज्ञा

कृमाः संस्काराइति नवोनवः संस्कारातिशयोवर्धते ततस्तत्प्रज्ञाततस्तत्सं
स्काराइति तत्प्रभवतस्तस्मात्संस्काराणामतत्त्वविषयप्रज्ञाजनितानात्
त्वमात्रविषयसंप्रज्ञातसमाधिप्रज्ञाप्रभवैः संस्कारैःप्रतिबंधः तेषांतत्सं
स्काराणांप्रतिबंधकाभावादेकाग्रभूमावेवसबीजः समाधिः स्यात् त
त्वस्मिन्बीजोनिरोधभूमाविति तदाह तस्यापिनिरोधेसर्वनिरोधान्निर्वी
जः समाधिः तस्यसंप्रज्ञातस्यसमाधेरेकाग्रभूमिजस्यअपिशब्दात्क्षि
प्तमूढविक्षिप्तानामपिनिरोधेयोगिप्रयत्नविशेषेणविलयेसति सर्वनि
रोधात्समाधेः समाधिजस्यसंस्कारस्यापिनिरोधान्निर्बीजोनिरालंबनोऽ
^सं संप्रज्ञातसमाधिर्भवति सबसोपायाः प्राक्सूचितोविरामप्रत्ययाभ्यास
^मात्र पूर्वः संस्कारशेषोऽन्यइति विरम्यतेऽनेनेतिविरामोवितर्कविचारानंदास्मि
तादिरूपचिंतात्यागः तस्यप्रत्ययः कारणंपरवैराग्यमितियावत् विरामप्र
त्ययः चिंतावृत्तिविशेषइतिवातस्याभ्यासः पौनःपुन्येनचेतसिनि
वेशनंतदेवपूर्वंकारणंयस्यसतथा संस्कारमात्रविशेषः सर्ववृत्तिनिवृत्ति
कोऽन्यः पूर्वोक्तात्सबीजाद्विलक्षणोनिर्बीजोऽसंप्रज्ञातसमाधिरित्यर्थः
संप्रज्ञातस्यहिसमाधेर्द्वावुपायावुक्तावभ्यासोवैराग्यंच तत्रसालंबनत्वा
दभ्यासस्यतन्निरालंबनसमाधिहेतुत्वंघटतइति निरालंबनंपरवैराग्य
मेवहेतुत्वेनोच्यते अभ्यासस्तुसंप्रज्ञातसमाधिद्वाराप्रणाड्योपयुज्यते
तदुक्तं त्रयमंतरंगंपूर्वेभ्यः धारणाध्यानसमाधिरूपंसाधनत्रयं यमनि
यमासनप्राणायामप्रत्याहाररूपसाधनपंचकापेक्षयासबीजस्यसमाधे
रंतरंगंसाधनं साधनकोटौचसमाधिशब्देनाभ्यासएवोच्यते मुख्यस्य
समाधेःसाध्यत्वात् तदपिबहिरंगंनिर्बीजस्यनिर्बीजस्यतुसमाधेस्तदपि
त्रयंबहिरंगंपरंपरयोपकारि तस्यतुपरवैराग्यमेवांतरंगमित्यर्थः अथ
तमपिद्विविधंभवप्रत्ययउपायप्रत्ययश्च भवप्रत्ययोविदेहप्रकृतिलयानां
विदेहानांसानंदानांप्रकृतिलयानांचसास्मितानांदेवानांआगमख्याता
नांजन्मविशेषादौषधिविशेषात्मंत्रविशेषात्तपोविशेषाद्वायः समाधिः
सभवप्रत्ययः भवः संसारः आत्मानात्मविवेकाभावरूपः प्रत्ययः कारणं
यस्यसतथाजन्ममात्रहेतुकोवा पक्षिणामाकाशगमनवत् उक्तः सं
^२ मोहेतुत्वात् मुमुक्षुभिर्हेयइत्यर्थः श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वक

देव।

गी॰
टी॰
प॰

66

भूतेषां जन्मौषधिमंत्रतपःसिद्धिव्यतिरिक्तानामात्मानात्मविवेकदर्शि
नामयं समाधिः सम्प्रज्ञातपूर्वकः श्रद्धादयः पूर्वउपाया यस्य स तथा उपा
यप्रत्ययः इत्यर्थः तेषु श्रद्धा योगविषये चेतसः प्रसादः सा हि जननीव योगि
नं पाति ततः श्रद्दधानस्य विवेकार्थिनो वीर्यमुत्साहः उपजायते समुपजा
तवीर्यस्य पाश्चात्यासु भूमिषु स्मृतिरुत्पद्यते तत्स्मरणाच्च चित्तमनाकु
लं सत् समाधीयते समाधिरैकाग्र्यं तासमाहितचित्तस्य प्रज्ञा भाव्यगोच
रा विवेकेन जायते तदभ्यासात्पराच्च वैराग्याद्भवत्यसंप्रज्ञातः समाधिर्मुमु
क्षूणामिमर्थः प्रतिलक्षणपरिणामिनो हि भावा ऋते चितिशक्तेरिति न्याये
न तस्यामपि सर्ववृत्तिनिरोधावस्थायां चित्तपरिणामप्रवाहः तज्जन्यसंस्का
रप्रवाहश्च भवत्येव स संस्कारशेष इत्युक्तं तस्यैवं संस्कारस्य प्रयोजनमुक्तं
ततः प्रशान्तवाहिता संस्कारादिति प्रशान्तवाहितानाम वृत्तिकस्य चित्तस्य
निरिंधनाग्निवत्प्रतिलोमपरिणामेनोपशमः यथा समिदाज्याद्याहुतिप्र
क्षेपे वह्निरुत्तरोत्तरवृद्ध्या प्रज्वलति समिदादिक्षये तु प्रथमक्षणे किंचित्क्षा
म्यति उत्तरोत्तरक्षणेषु त्वधिकमधिकं शाम्यतीति क्रमेण शान्तिर्वर्धते तथा
निरुद्धचित्तस्योत्तरोत्तराधिकः प्रशमः प्रवहति तत्र पूर्वप्रशमजनितः
संस्कार एवोत्तरोत्तरप्रशमस्य कारणं ततश्च निरिंधनाग्निवच्चित्तं क्रमेण
प्रशाम्यद्व्युत्थानसमाधिनिरोधसंस्कारैः सह स्वस्यां प्रकृतौ लीयते तदेव
समाधिपरिपाकप्रभवेन विवेकख्यातिजेन सम्यग्दर्शनेनाविद्यायां निहता
यां तद्धेतुकदृश्यसंयोगाभावाद्वृत्तौ पंचविधायामपि निहतायां स्वरूपप्रति
ष्ठः पुरुषः शुद्धः केवलो मुक्त इत्युच्यते तदुक्तं तदा द्रष्टुः स्वरूपेऽवस्थानमिति त
दा सर्ववृत्तिनिरोधदशायां तु निःसापरिणामिचैतन्यरूपत्वेन तस्य सर्व
दा शुद्धत्वेप्यनादिना दृश्यसंयोगेनाविवेकेनान्तःकरणनाशात्म्याध्यासाद
न्तःकरणवृत्तिसारूप्यं प्राप्तवतः भोक्तापि भोक्तेव दुःखी भवतीत्युक्तं इह
वृत्तिसारूप्यमितरत्रेति परमार्थतस्तु निर्लेप एव सर्वदा इत्याह
तेऽमनौपे विममेव दृश्यरूपेण परिणमते विषयविषयनिर्भासं चेतनाऽस्वरूपाय चैतन्य
वैविध्यात्मकमप्यविषयात्मकमिवाचेतनमपि चेतनमिव स्फटिकमणिक
ल्पं सर्वार्थमित्युच्यते तदनेन चित्तसारूप्येण भ्रान्ताः केचित्तदेव चेतनमित्याहुः
तदसंख्येयवासनाभिः चित्रमपि परार्थं संहत्यकारित्वात् यस्य भोगापवर्गौ

र्थं तन्न स एव परः चेतनो संहतः पुरुषो न तु चेदादिवत् संहत्यकारि चि
त्ते चेतनत्वमित्यर्थः ॥ विशेषदर्शिन आत्मभावभावनानिवृत्तिः ॥ एवं यो
तः करणपुरुषयोर्विशेषदर्शी तस्यांतःकरणे प्राग्विवेकवशादा
त्मभावभावनासीत् सा निवर्तते भेददर्शने तत्स्वरूपभ्रमानुपपत्तेः एतच्च पुरु
षयोर्विशेषदर्शनं च भगवदर्पितनिष्कामकर्मसाध्यं ॥ तल्लिंगेन योगभा
ष्ये दर्शितं यथा प्रावृषि तृणांकुरस्योद्भेदेन तद्बीजसत्तानुमीयते तथा मोक्ष
मार्गश्रवणेन सिद्धांतरुचिवशात् यस्य लोमहर्षाश्रुपातौ दृश्येते तत्राप्यस्ति
विशेषदर्शनबीजमपवर्गभागीयं कर्माभिनिर्वर्तितमित्यनुमीयते यस्य
तु तादृशं कर्मबीजं नास्ति तस्य मोक्षमार्गश्रवणे पूर्वपक्षे रुचिर्भव
त्यरुचिश्च सिद्धांतपक्षे च तस्य कोऽहमासं कथमहमासमित्यादिरात्मभा
वभावना स्वाभाविकी प्रवर्तते सा तु विशेषदर्शिनो निवर्तत इति एवं सति
किं स्यादित्यत आह ॥ तदा विवेकनिम्नं कैवल्यप्राग्भारं चित्तं ॥ निम्नं जलप्रवा
हणयोग्यो नीचदेशः प्राग्भारस्तदयोग्य उच्चप्रदेशः चित्तं च सर्वदा प्रवर्त
मानं नदीप्रवाहेण प्रवहज्जलतुल्यं तत्प्रागात्मानात्मविवेकरूपविमार्गवा
हि विषयभोगपर्यंतमप्यासीदधुना त्वात्मानात्मविवेकमार्गवाहि कैवल्य
पर्यंतं संपद्यत इति ॥ अस्मिंश्च विवेकवाहिनि चित्ते येंतरायाः ते सहेतुकानि
वर्तनोपायश्चाह ॥ तच्छिद्रेषु प्रत्ययांतराणि संस्कारेभ्यः ॥ हानमेषां
क्लेशवदुक्तं ॥ तस्मिन् विवेकवाहिनि चित्ते छिद्रेष्वंतरालेषु प्रत्ययांतराणि
व्युत्थानरूपाण्यहं ममेत्येवंरूपाणि व्युत्थानानुभवजेभ्यः क्षीयमाणेभ्योपि
प्रादुर्भवंति एषां च संस्काराणां क्लेशानामिव हानमुक्तं यथा क्लेशा अविद्या
दयो ज्ञानाग्निदग्धबीजभावा न पुनः चित्तभूमौ प्ररोहं प्राप्नुवंति तथा ज्ञाना
ग्निना दग्धबीजभावाः संस्काराः प्रत्ययांतराणि न प्ररोढुमर्हंति ज्ञानाग्नि
संस्कारास्तु यावच्चित्तमनुशेरत इति ॥ एवं च प्रत्ययांतरानुदयेन विवेकवा
हिनि चित्ते स्थिरीभूते सति ॥ प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेकख्याते
र्धर्ममेघः समाधिः ॥ प्रसंख्यानं सत्त्वपुरुषान्यताख्यातिः शुद्धात्मज्ञान
मिति यावत् तत्र बुद्धेः सात्त्विके परिणामे कृतसंयमस्य सर्वेषां गुणपरि
णामानां स्वामिवदाक्रमणं सर्वाधिष्ठातृत्वं तेषामेव च शांतोदिताव्यपदे
श्यधर्मित्वेन स्थितानां यथावद्विवेकज्ञानं सर्वज्ञातृत्वं च विशोकानाम सि
द्धिः फलं तद्वैराग्याच्च कैवल्यमुक्तं सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्व

गी.
टी.
ष.

67

भावादिषु सत्त्वं सर्वज्ञातृत्वं च तद्वैराग्यादपि दोषबीजक्षये कैवल्यमिति।
सूत्रं भाष्यं तदेतदुक्तं तस्मिन्प्रसंख्यानेप्यकुसीदस्य फलमलिप्सोः सम
ग्रेतराणामनुदये सर्वप्रकारविवेकख्यातेः परिशेषाद्धर्ममेघः समाधिर्भ
वति। इज्याचारदमाहिंसादानस्वाध्यायकर्मणां अयं तु परमो धर्मो यद्यो
गेनात्मदर्शनमिति स्मृतेः धर्मं परमकैवल्यैकसाधनत्वात्कारमेदतिसिंच
तीति धर्ममेघः ततस्तात्त्वकारदेहपरिमर्थः ततः क्लेशकर्मनिवृत्तिः
ततो धर्ममेघात्समाधेर्धर्माद्वा क्लेशानां पंचविधानामविद्यास्मितारागद्वे
षाभिनिवेशानां कर्मणां च कृष्णशुक्लाकृष्णाशुक्लभेदेन त्रिविधानामवि
द्यामूलानामविद्याक्षये बीजक्षयात्सामूलकीनिवृत्तिः कैवल्यं भवति का
रणनिवृत्तौ कार्यनिवृत्तेरासंप्रज्ञातावितत्वादित्यर्थः एवं स्थिते प्रजात्रैवसं
प्रज्ञातेन स्थिरत्वेन संप्रज्ञातः समाधिरेकाग्रभूमावुक्तः निरुद्धभूमावसं
प्रज्ञातेन तत्फलभूतः संप्रज्ञातसमाधिनिरोधभूमावुक्तः शांतिमिति
निरोधसमाधिजसंस्कारफलभूतां प्रशांतवाहितां निर्वाणपरमामिति
धर्ममेघस्य समाधेः फलत्वेनाह तां कैवल्यहेतुत्वं मत्संस्थामित्यनेनोप
निषदाभिमतं कैवल्यं दर्शितं यस्मादेवं महाफलो योगस्तस्मात्स महता।
प्रयत्नेन संपादयेदित्यभिप्रायः [illegible]
[illegible] १५ ॥

सदानंदीटीका

एवं स्वीकरीत्यादि योगाभ्यासपरो भूतिः वैराग्याभ्यासयोगेन मनः।
कृतं समाहितं अभ्यासातिशयेनैव निरुद्धेन मानसे वृत्तिरूपविका
रावानिरुद्धोयेन मानसा सह तत्परतां शांतिं निर्वाणपरमां तथा तत्त्ववे
धुक्तमुख्यनिर्द्धारेणात्तमांतरं कार्यमपवाध्यात्मभक्तिपर्यवसायि
नी मत्स्वरूपपरानंदरूपां तिष्ठां समप्राप्ते ॥ १५

नीलकंठीटीका

अस्याः फलमाह युंजन्निति एवमनेन प्रकारेण सदा निरंतरं दीर्घकालं च
आत्मानं मनो युंजन्समादधानो योगी नियतं ख्यातिफलादपि निग्रहीतं
मानसं येन स नियतमानसः शांतिं परमवैराग्यबलात्ख्यातिमपि निरु।
ध्य निर्विकल्पं परं निर्वाणमानस्तदेव परमा निष्ठा यस्याः शांतेस्तां मत्संस्थाम
मयेव संस्थापकीभावेनावस्थानं समाप्तिर्वा यस्यास्तां अधिगच्छति प्राप्नोति

ख्यातिफलं च सूत्रकृता दर्शितं प्रसंख्यानेप्यकुसीदस्य सर्वथा विवेक
ख्यातेर्धर्ममेघः समाधिरिति तत्र परं पुरुषख्यातेर्गुणवैतृष्ण्यमिति स
त्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं चेति तत्र
येण प्रसंख्यानेध्याने अकुसीदस्य वाणिजस्येव फलानिच्छोः सर्वथा वि
वेकख्यातिरेव भवति तस्याश्च फलं धर्ममेघः समाधिः स च प्रागेव व्या
ख्यातः ततो वैराग्यं परं परमेत्य पुरुषख्यातेः फलं तस्य लक्षणं गुणेषु
दिव्यादिव्यविषयेषु वैतृष्ण्यम् एतस्यैव हि नान्तरीयकं फलं कैवल्यमि
ति योगाचार्येति तृतीयसूत्रोक्तं फलं सार्वज्ञ्यादिकं तत्राभिधीयते
कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति सर्वस्य वशी सर्वस्ये
शानः सर्वस्याधिपतिरित्यादिकं १५ ॥

आनंदीटीका

एवमष्टांगयोगमेवमनेन सदा प्रत्यङ्नत्तु मध्ये मध्ये विच्छिद्य आत्मा
नं युंजन् समाधिस्थः कुर्वन् [illegible] ॥

रामकंठटीका

अंतःस्थलीकर्तव्यमित्यभिप्रायः [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] एवमेतद्विशेषणा
विशिष्टः सदा प्रत्यङ्मात्मानमंतःकरणांशुं न समारूप्यानः सन्नसङ्कः
मामेवात्मत्वेन समाश्रितो तपवानन्यमनसो नास्मिं विषयांतरे तथस्व
मानसं मामेव भक्तो मत्समापत्तिमेव च समाधिफलत्वेन प्रतिपन्नः मत्
मत्संस्थां मयि वर्तमानं शांतिं स्वाभाविक सर्वविकाररहितत्वलक्षणां प्र
शममधिगच्छति स्वीकुरुते कीदृशीं शांतिं निर्वाणपरमां निर्वाणं शरीर

न४

गी
टी ६

68

शावनात्मस्मात्मप्रत्ययादिलोभुविरतिरूपा निर्वृतिः परमं प्रकृष्टफल
तया स्थितं यस्या सा तथोक्ता तां [illegible]
[illegible]
[illegible] माह १५ ॥

एवं ध्यानयोगाभ्यासफलमाह ॥ लक्ष्मीकी [illegible] टीका

योगी उक्तोपपन्नानित्यसमाहितः कर्मयोगी नियतमानसः निय
तं प्रत्याहृत्यात्मनि निरुद्धं प्रत्यगात्मनि युंजन्नत एवमभ्यसन् शांतिं सर्व
विकल्पोपशमं प्राप्नोति ननु सुषुप्तिमोहादावपि विकल्पोपरतिरस्ती
त्यत आह मत्संस्थां मद्रूपेणावस्थितया सम्यक् स्थितां एवंविधायाः शां
तेः फलमाह निर्वाणपरमां निर्वाणं मोक्षः परमं प्राप्यपर्यंतं काष्ठा
यस्यास्तां [illegible] १५ ॥ ॥

पंबोलीटीका

अथेदानीं योगफलमुच्यते युंजन्नेवमिति योगी ध्यानवान् नियत
मानसः संयतमनाः सदात्मानं एवं पूर्वोक्तप्रकारेण युंजन् समाधिं
कुर्वन् निर्वाणपरमां मोक्षफलां शांतिं निर्वृतिं मत्संस्थां मदधीनां म
धिगच्छति प्राप्नोति १५

रसावीरसमिद्धोधिनी ॥

युंजन्नेवमिति योगी कर्मयोगी एवं पूर्वोक्तप्रकारेण सदा स
र्वास्ववस्थासु आत्मानं चित्तं युंजन् समाहितं कुर्वन् नियतमा
नसो निगृहीतचित्तः मत्संस्थां मम सर्वेशितुः संस्थां मर्यादां म
या प्रवर्तितां समरचर्यामधिगच्छति सर्वप्रकारैर्जानाति प्र
वर्तयति च कथंभूतां मत्संस्थां शांतिं ऐहिकामुष्मिकसत्फल
साधनभूतत्वात् सुखपरिणामां तथा निर्वाणपरमां वदयोरैक्या
निर्वाणनिरागुथाश्चतेपराः माव्रवृत्ताम्मीनातिहिनस्तीति नि
र्वाणपरमां तां निरागुथरिभुजातसंपादिकामित्यर्थः १५ ॥

ਸਪੁਮਾਛ

੧੫॥

भाषा अनुवाद

अब योगाभ्यास करने का फल कहते हैं कि पूर्वोक्त प्रकार से स
दा आत्मा मे मन को युक्त करते नियत करे निरुद्ध है मानस।
अर्थात् चित्त जिस का सोई शान्ति कहे संसार निवृत्ति को प्राप्त हो
जाहै वह शान्ति किसरूप है सो कहते हे कि जिस से परम नि
र्वाण प्राप्त होय है सोई शान्ति और मत्संस्था कहे मेरे रूपमे।
अवस्थिति सो भी उसको मिले है १५

दोहा

जोडत यह विधि चित्तको योगी सदा मनरोक निर्वाणशांतिको
परमको सो पद लहे बिनशोक १५॥

70

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नतः
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन १६

शाङ्करभाष्यं

इदानीं योगिन आहारादिनियम उच्यते नात्यश्नत इति न अत्यश्नत
आत्मसंमितमन्नपरिमाणमतीत्याश्नतः अत्यश्नतो न योगोऽस्ति न च ए
कान्तमनश्नतो योगोऽस्ति यदु ह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति यद्भूयो हिन
स्ति तद्यत् कनीयो न तदवतीति श्रुतेः तस्मात् योगी नात्मसंमिता
दन्नादधिकं न्यूनं वाश्नीयात् अथवा योगिनो योगशास्त्रपरिपठितादन्नपरि सर्वंजनस्य
माणादतिमात्रमश्नतो योगो नास्ति उक्तं हि अर्धमशनस्य तृतीयमुदक
स्य तु वायोः सञ्चरणार्थं तु चतुर्थमवशेषयेदित्यादिपरिमाणं तथा।
न चातिस्वप्नशीलस्य योगो भवति नैव चातिमात्रं जाग्रतो योगो भवति
चार्जुन १६ ॥

आनन्दगिरिकृतटीका

आहारादीनामादिशब्देन विहारजागरितादि चोच्यते आत्मसंमितमन्न
परिमाणमष्टग्रासादि आहारनियमे शतपथश्रुतिं प्रमाणयति य
दिति तदन्नं भुज्यमानं पुरुषमवति प्रसिद्धा भुक्तमन्नं दिनमवसन्नं
योग्यतामापाद्यानुष्ठानद्वारेण मोक्षाय रक्षति नतु तस्यान्नस्यानर्था
य भवतीत्यर्थः यत्त्वन्नमात्मसंमितात् भूयोऽधिकतरं शास्त्रमतिक्रम्य भु
ज्यते तदात्मानं हिनस्ति मोक्षानर्हाय भवति यच्चान्नं कनीयोऽल्पतरं
शास्त्रनियमाभावाद्भुज्यते तदन्नमनुष्ठानयोग्यतादिद्वारा न रक्षति तमतः
तस्मादत्यधिकमत्यल्पं चान्नं योगमारुरुक्षता नाश्नीयमित्यर्थः श्रुतिसिद्ध
मर्थं निगमयति तस्मादिति नैमित्तिकीं व्याख्यानान्तरमाह अथवेति किं
तदन्नपरिमाणं योगशास्त्रोक्तं यदधिकं भुञ्जानस्याभिव्यवहरतो योगा
नुपपत्तिरित्याशङ्क्याह उक्तं हीति श्लोकद्वयेनार्धं तृतीयमुदकेनतु वा
योः सञ्चरणार्थाय चतुर्थमवशेषयेदिति वाक्यमादिशब्दार्थः यथा ना
त्यन्तमश्नतोऽनश्नतश्च योगो न सम्भवति तथा अत्यन्तस्वपतो जाग्रतश्च न
योगः सम्भवतीत्याह नचेति १६ ॥

स्वामिकृतटीका

गी॰
टी॰
ब॰

योगाभ्यासनिष्ठस्याहारादिनियममाह नात्यश्नतस्त्विति अत्यंतमधिकं भुंजा
नस्य एकांतमत्यंतमभुंजानस्यापि योगः समाधिर्न भवति तथातिनिद्राशील
स्यातिजाग्रतश्च योगो नैवास्ति १६॥ परिमाणमतीत्याश्नतः अत्यश्नतो न योगोस्ति न चै
कांतमनश्नतो योगोस्ति यदुक्तं वा आत्मसंमित
मन्नं तदवति तन्न हिनस्ति यद्भूयो हिनस्ति तत् यत्कनीयो

पिशाचभाष्य

योगिनः आहारादिनियम उच्यते नात्यश्नतः आत्मसं[illegible]मितमन्न[illegible]
[illegible] इति ह[illegible] निश्चनेसत्वा योगी नात्मसं।
मितादधिकं न्यूनं वाश्नीयात् अथवा योगिनो योगशास्त्रपरिमिताद
न्यपरिमाणादतिमात्रमश्नतो योगो नास्तीत्यर्थः अर्धमन्नस्य सव्यंजनस्य
तृतीयमुदकस्य तु वायोः संचारणार्थं तु चतुर्थमवशेषयेदिमादिपरि
माणेन तथा न चातिस्वप्नशीलस्य योगो भवति जाग्रतोर्जुन १६॥ नैवातिमात्रं जाग्रतो योगो भ[illegible]

(margin: नात्यश्नत इति; दि; दत्रा)

रामानुजभाष्य

एवमात्मयोगमारभमाणस्य मनोनैर्मल्यहेतुभूतो मनसो भगवति।
आश्रये स्थितिमभिधायान्यदपि योगोपकरणमाह नात्यश्नतस्त्विति
अत्यशनानशने योगविरोधिनी अतिविहारा[illegible]हारौ च तथास्वाप्या।
सानायासौ १६॥

अभिनवगुप्ताचार्यकृतटीका स्पष्टार्थम्

आत्मानेव[illegible] कारीकुर्यात् स[illegible] कालेप
[illegible] अतन[illegible]
[illegible] विनाक्रियासंकल्पात्मानः अत्यार्द्धेंद्रियक्रियायेन यतानिय
मैनीनाः धारयितव्येन नातिकायस्यावलोकने दिशामनवलोकने
म[illegible] आलीन एवमात्मानं युंजन्नः समाहयतः शांतिनिर्वा
णे परमां संस्थापयेत् [illegible] योगीत्येति १६॥

परमार्थप्रपाटीका

अथाभ्यासनिष्ठस्याहारादिनियममाह। नात्यश्नतस्त्विति द्वाभ्यां अ
तिअत्येनन्मात्रातिजेमतितस्य तथा एकांतमत्यंतमनश्नत उपोषितस्य
तथा अतिस्वप्नशीलस्य निद्रासक्तस्य अथवातिमेतेजाग्रतश्च योगो दुःखहा
दुःखोपशमायन भवति १६॥

वनमालीटीका

एवमभ्यासनिष्ठस्याहारादिनियममाह नातीति द्वाभ्यां अत्यधिकं भुंजी

र्यति शरीरस्य च कार्यं तां संपादयति तदात्मसंमितमन्नं तदतिक्रम्य लो
भेनाधिकमश्नतो न योगोस्ति अजीर्णदोषेण व्याधिपीडनात् नचैकांतम
नश्नतः स्वल्पाहारस्य योगोस्ति निराहारात् स्वल्पाहाराद्वा देहपोषणाभावेन
देहस्य कार्याक्षमत्वात् यदुह वा आत्मसंमितमन्नं तदवति तन्न हिनस्ति य
द्भूयो हिनस्ति तद्यत्कनीयोन्नं तन्नावतीति श्रुतेः अतो योगी नात्मसंमितादन
न्नादधिकं न्यूनं वाश्नीयादित्यर्थः यद्वा अर्धं सव्यंजनान्नस्य तृतीयमुदकेन तु
वायोः संचरणार्थं तु चतुर्थमवशेषयेदित्यादि योगशास्त्रोक्तपरिमाणाद
धिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः तथातिनिद्राशीलस्यातिजा
ग्रतश्च योगो नैवास्ति एवमतिशब्दः आहारातिक्रमस्य सर्वविषयः यथोक्तं
मार्कंडेये नाध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः युंजीत योगं रा
जेंद्र योगी सिद्ध्यर्थमात्मनः नातिशीते न चैवोष्णे न द्वंद्वे नानिलान्वि
ते कालेष्वेतेषु युंजीत न योगं ध्यानतत्पर इति १६॥

क्रमसवैजयन्तीटीका

एवं योगाभ्यासे कृतवतो योगिनो भोजनादिनियमप्रकारमाह द्वाभ्या
म् नात्यश्नतस्त्विति तु निश्चयेन एवकारस्य नास्तीति क्रियापदेन सर्वत्र सम्ब
न्धः हे अर्जुन अत्यश्नतः अतिशयभोजनं कुर्वतो योगिनो योगसंपन्नः एका
न्तं केवलमश्नतो भोजनमकुर्वतस्तस्य भोजनयोगसंपन्नः अतिस्वप्नशी
लस्यातिशयशयनस्वभावस्य पुरुषस्य योगसंपन्नः जाग्रतोतिशयजाग
रणशीलस्य जनस्य योगो नास्त्येव १६॥

एवं योगाभ्यासनिष्ठस्याहारा मधुसूदनीटीका दिनियममाह द्वाभ्यां ॥

यदन्नं भुज्यमानं जीर्यति शरीरस्य च कार्यं तमनां संपादयति तदात्म संमित
मन्नं तदतिक्रम्य लोभेनाधिकमश्नतो न योगोस्ति अजीर्णदोषेण व्याधिपी
डितत्वात् नचैकांतमनश्नतो योगोस्ति अनाहारात् स्वल्पाहाराद्वाहारस्य पोष
णाभावेन शरीरस्य कार्याक्षमत्वात् यदु ह वा आत्मसंमितमन्नं तदवति न आ
तद्धिनस्ति यद्भूयो हिनस्ति तत् यत्कनीयोन्नं तन्नावतीति शतपथश्रुतेः
तस्माद्योगी नात्मसंमितादन्नादधिकं न्यूनं वाश्नीयादित्यर्थः अथवा पूर
येदशनेनार्धं तृतीयमुदकेन तु वायोः संचरणार्थं तु चतुर्थमवशेषयेदि
त्यादि योगशास्त्रोक्तपरिमाणादधिकं न्यूनं वाश्नतो योगो न संपद्यत इत्यर्थः

गी॰
टी॰
६॰

न चातिनिद्राशीलस्यातिजाग्रतश्च योगो नैवास्ति हे अर्जुन सावधानो भवेत्यभि
प्रायः एकः चकार उक्ताहारातिक्रमसमुच्चयार्थः अपरो यात्तु कदोषसमुच्च
यार्थः यथा मार्कंडेयपुराणे नाध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः युंजी
त योगं राजेंद्र योगी सिद्ध्यर्थमात्मनः नातिशीते न चैवोष्णे न द्वंद्वे नानिलान्
१७ विते कालेते युंजीत न योगं ध्यानतत्परः इत्यादि [illegible]
[illegible] ॥

72

सदानंदीटीका

योगाभ्यासैकनिष्ठस्य प्राणाहाराहारादिनियमं मुक्तेरजीर्णत्वस्य परत्वेदे
हृधारणं १ तदान्नसंमितं तेयं न रनिकुम्य लोभतः अधिकं वा अश्नतो ना
स्ति योगो जीर्णादिदोषतः २ अत्यल्पाहारतो नास्ति नास्त्यनाहारतः सदा अ
थवा योगशास्त्रोक्तमाहारं नैव लेपयेत् ३ स्वयं देशमेनाईरतीयमुदके
न न वायोः संचरणार्थं न च नतुर्थमवशेषयेत् ४ निद्रयाक्रांतचित्तस्य योगा
भ्यासो न संभवेत् न तो नास्त्यतिनिद्रालोर्योगो नास्त्यतिजाग्रतः ५ १६ ॥

नीलकंठीटीका

एवं योगाभ्यासनिष्ठस्याहारादिनियममाह द्वाभ्यां नात्यश्नत इति एकां
तेऽप्रतिशयेन अतिजागरतः अत्याप्यतिशाह्लो योगः १६ ॥

आनंदीटीका [illegible] १६ सहार्थम्

+ इत्यमस्य योगस्य कर्मसमाधिलक्षण

रामकंठीटीका

महायोगांतरवर्तिनो यथोक्ताहेनात्मज्ञान

निष्ठतया उद्देश्यतया आत्मज्ञानस्यान्यदपि परिकर्म प्रतिपादयितुमाह ॥ +

+ एष यथोक्तो योगः एवंविधस्यानुष्ठातुर्नैवास्ति नैव संभवति कीदृशस्यात्य
र्थमश्नतः सौहित्यपर्यंतं भुंजानस्य तथैकांतमत्यंतमनश्नतोऽपि नास्ति त
थातिस्वप्नशीलस्य नित्यं निद्रारतस्य तथा सदैव जाग्रत उन्निद्रस्यापि नास्ति
अत्यशनादिका यतो रवमूलाभिघंरादयो दोषाः विघ्नमकर्म संपाद
यंति अत्यंतानशनाश्च धातुलयादयः शक्तिह्रासमावहंति अतिस्वप्नादा
लस्यादयः योगभंगमत्यंत निद्रापहाराद जीर्णादयो दोषं च संपादिकमापा
दयंति १६ ॥

अथ ध्यानयोगनिष्ठस्याहारादिनियम
माह —

[illegible]टीका

अत्यश्नतः सौहित्यपर्याप्तात्मसंमितादन्नादपि केभुंजानस्य तथैकांत
मत्यर्थमभुंजानस्यापि यथोक्तयोगः समाधिर्नास्ति तथातिस्वप्नशीलस्य

नित्यंनिद्राशीलस्य तथैवजाग्रत उन्निद्रस्यापिनभवति [illegible] १६॥

पंचोलीटीका

इदानींयोगिनः आहारादिनियममुच्यते नात्यश्नतस्ति तुपुनः अत्यश्न
तः आत्मीयादाहारादधिकंभुंजानस्ययोगोनास्तितथाऽत्यंतमनश्नशील
स्ययोनास्तितथा अतिस्वप्नशीलस्ययोगोनास्तिजाग्रतश्चैवअनेनयो
गोसमाधिर्नास्तिकथंभूतस्ययोगोभवतीत्युच्यते १६

रसवीरमणिहृदयिनी॥

कर्मकौशललक्षणयोगाभ्यासरतस्याहारादिनियममाह नात्य
श्नतस्त्विति द्वाभ्यां अत्यश्नतःक्षुत्परिपर्यंतंभुंजानस्ययोगःकर्मस
म्हतिलक्षणः कर्मयोगोमनःसावधानतालक्षणश्चनास्तिन
संभवति अत्यशनादिकायगौरवसत्वाभिष्यंदादयो दोषाश्चित
मकर्मण्यंसंपादयंति तथैकांतमनश्नतोपिनास्ति अत्यंता
नशनाद्धिधातुक्षयादयः शक्तिहानिमावहंति तथातिस्वप्नशी
लस्यनित्यंनिद्राशीलस्यापिनास्ति अतिस्वप्नाद्यालस्यादयउयोग
भंगंसंपादयंति तथासदैवजाग्रतउन्निद्रस्यापिनभवति अत्यं
तनिद्रापहाराद्ध्यजीर्णादयोदोर्मनस्यादिकमापादयंति १६॥

मधुभाष्य

१६॥

73

भाषा अनुवाद

योगाभ्यासी को आहार शयन आदिका नियम कहते हैं कि हे अर्जुन अत्यन्त अधिक आहारी और अत्यन्त निराहारी इन दोनों को भी योग जो समाधि सो नहीं होसकती है और अतिनिद्रा करने वाला तथा निद्रात्यागी इन को भी समाधि नहीं होती है १९

दोहा

योग नहि अतिभक्षसें अतिअभक्षसें नाहि नहि अतिनिद्रा उ
क्तसें जाग्रत अर्जुन याहि १८॥

युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु युक्त-
स्वप्नावबोधस्य योगो भवति दुःखहा ॥ १७ ॥

शाङ्करभाष्य

कथं पुनर्योगो भवतीत्युच्यते युक्तेति युक्ताहारविहारस्य युक्तचेष्ट-
स्य आह्रियत इत्याहारोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ निय-
तपरिमाणौ यस्य स युक्ताहारविहारस्तस्य युक्तचेष्टस्य तथा युक्ता
नियता चेष्टा यस्य कर्मसु तथा युक्तस्वप्नावबोधस्य युक्तौ स्वप्नश्चाव-
बोधश्च तौ नियतकालौ यस्य तस्य युक्ताहारविहारस्य कर्मसु युक्त-
स्वप्नावबोधस्य योगिनो योगो भवति दुःखहा दुःखानि सर्वाणि ह-
न्तीति दुःखहा सर्वसंसारदुःखक्षयकृद्योगो भवतीत्यर्थः ॥ १७ ॥

आनन्दगिरिकृतटीका

आहारविहारादिनियमविरहितो योगव्यतिरेकमुक्त्वा तन्नियमवतो ।
योगान्वयं आवश्यकं युक्तेत्यादिना युक्तस्य नियतत्वमर्द्धमशनस्ये-
त्यादि विहारस्य नियतत्वं योजनान्न परं गच्छेदित्यादि कर्मसु चेष्टाया
नियतत्वं वाङ् नियमादि रात्रौ प्रथमतो दशघटिकापरिमिते का-
ले जागरणं मध्यतः स्वपनं पुनरपि दशघटिकापरिमिते जागरण-
मिति स्वप्नावबोधयोर्नियतकालत्वमेवं प्रयतमानस्य योगिनो भवति
योगस्य फलमाह दुःखहेति सर्वाणि आध्यात्मिकादिभेदभिन्नानीत्य-
र्थः [illegible] यथोक्तयोगमन्तरेणापि स्वभावे दुःखनिवृत्तिरस्तीति
विशिनष्टि सर्वेति विश्वदुःखहानहारेति शेषः ॥ १७ ॥

स्वामिकृतटीका

तर्हि कथंभूतस्य योगो भवतीत्याह युक्ताहारेति युक्तो नियत आहारो वि-
हारश्च गतिर्यस्य कर्मसु कार्येषु युक्ता नियता चेष्टा यस्य युक्तौ नियतौ स्व-
प्नावबोधौ निद्राजागरौ यस्य तस्य दुःखनिवर्तको योगः सिद्ध्यति ॥ १७ ॥

पिशाचभाष्य

कथं पुनर्योगो भवतीत्युच्यते युक्ताहारविहारस्य आह्रियत इत्याहा-
रोऽन्नं विहरणं विहारः पादक्रमस्तौ युक्तौ नियतपरिमाणावाहारविहारौ

आ

गी. टी. ष.

तथा

यस्य तथा नियता चेष्टा यस्य कर्मसु युक्तस्वप्नावबोधस्य योगिनः योगो भवति दुःखहा सर्वसंसारदुःखक्षयकृत् योगो भवतीत्यर्थः १७॥

रामानुजभाष्यं

मिताहारविहारस्य मितायासस्य मितस्वप्नावबोधस्य सकलदुःखहा बंधनाशनो योगः संपन्नो भवति १७॥

अभिनवगुप्तकृतटीका [illegible] १७

आहारेषु आक्रियमाणेषु विषयेषु विहारः उपयोगाय युक्तानि तस्मात्सु युक्तत्वेन आसक्तिनीत्य त्यपरिवर्जनेन एव सर्वत्र स्वप्नेपि जागरन् इत्यादिषु नेःप्रमाणत्वाद्वेदव त्एवमत्रापि॥

परमार्थप्रपाटीका

किं तद्युक्तेति युक्तो नितमितः आहारो भोजनं यस्य विहारश्चेष्टा येन तथा कर्मसु कार्येषु तथा युक्तनिद्रावबोधस्य पुरुषस्य योगो दुःखहा दुःखनिहन्ता सिद्धिदो भवति १७॥

वनमालीटीका

युक्तो नियतपरिमाणो आहारविहारो यस्य भ्रमणादिर्नियमोपनिषदावर्तनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य युक्तो नियतकालो स्वप्नो निद्रावबोधो जागरश्च यस्य तस्य योगो भवति साधनपाटवात् समाधिर्भवति तदा तस्य योगफलमाह दुःखहेति संसाररूपदुःखोच्छेदकर इत्यर्थः १७

श्रसमवैजयन्तीटीका

किं च युक्ताहारेति युक्ताहारविहारस्य आहारश्च विहारश्च आहारविहारौ युक्तौ मितौ आहारविहारौ यस्य सः तस्य स्वल्पभोजनं चंक्रमणादिकं सोम र्थः युक्तचेष्टस्य कर्मसु क्रियमाणेषु नित्यनैमित्तिकादिव्यापारेषु युक्ता मिता चेष्टा वागादीन्द्रियव्यापारो यस्य सः तथा तस्य नियमरूपकर्मसु तस्य कर्मेन्द्रियव्यापारस्येत्यर्थः युक्तस्वप्नावबोधस्य युक्तौ स्वप्नावबोधौ शयनजागरौ यस्य सः तथा तस्य स्वल्पशयनजागरस्येत्यर्थः ईदृशस्य योगिनो योगो दुःखहा दुःखानि आध्यात्मिकादीनि जन्ममरणादीनि वा हन्तीति तथा सः प्रकृतिसंसर्गजनिताखिल[illegible]खनाशको योगो भवतीत्यर्थः १७॥

त

एवमाहारादिनियमविरहितो योगी

यमाह —

मधुसूदनीटीका

गच्छतीत्युक्तानन्नियमवतो योगान्व

आह्रियत इत्याहारो अन्नं विहरणं विहारः पादक्रमः तौ युक्तौ नियतपरिमाणौ यस्य तथा अन्येष्वपि प्राणवजपोपनिषदावर्तनादिषु कर्मसु युक्ता नियतकाला चेष्टा यस्य तथा स्वप्नो निद्रा अवबोधो जागरणं तौ युक्तौ नियत

अर्धमशनस्य सव्यंजनस्य
तृतीयमुदकस्य तु

कालो यस्य तस्य योगो भवति साधनपाटवात् समाधिः सिध्यति नाम
स एवं भयत्नविशेषेण संपादितो योगः किं फलः इति तत्राह दुःखहेति
सर्वसंसारदुःखकारणाविद्यातन्मूलनहेतुब्रह्मविद्योत्पादकत्वात् समूल
सर्वदुःखनिवृत्तिहेतुरित्यर्थः वायोः संचरणार्थं [illegible] मवशेषयेदित्यादिना
युक्ते विहारस्य नियतत्वे योजनान्न परं गच्छेदित्यादि कर्मस्वचेष्टा नियत
त्वे वागादिचापलपरित्यागः रात्रेर्विभागत्रयं कृत्वा प्रथमांत्ययोर्जाग
रणं मध्ये स्वपनमिति स्वप्नावबोधयोर्नियतकालत्वं एवमन्येपि योगशा
स्त्रोक्ता नियमा द्रष्टव्याः [illegible]
[illegible] ॥१७॥

सदानंदीटीका

अत्र विहरणं यस्य नियतेन परिमाणेन तथा परिमिता चेष्टा निद्रा जा
गरणे मिते १ सर्वदुःखनयहेतुस्तस्य योगोस्ति सन्मते अभियुक्तैस्त
थैवोक्तं योगिनो योगसिद्धये २ आहारार्थं कर्म कुर्यादनिंद्यं कुर्यादाहा
रं प्राणसंधारणार्थं प्राणाः संधार्यास्तत्त्वजिज्ञासनार्थं तत्त्वं जिज्ञास्यं येन
भूयो न दुःखं ३ रजन्याम्मध्यमौ यामौ कुर्यान्निद्रां न वा सदा विना प्रयोजनं
चेष्टां न कुर्याद्धस्तपादयोः ४ हृद्या चेष्टा हृद्या कर्म भवेत्संदर्शितार्हणा
हिते मध्यमितं यस्य भोजनं प्राणधारकं ५ गुरुसेवागुरुर्वेयस्य कर्मणि
वोत्थिसंक्रमः मिता निद्रा मिता वाणी यस्य भागवतस्य च ६ योगस्तस्य
सकार्यस्यासीनस्य स्याद्धितो कृतः ॥१७॥

नीलकंठीटीका

युक्ताः परिमिताः आहारादयो यस्य स तथा ॥१७॥

आनंदीटीका [illegible] ॥१७॥ स्पष्टार्थम्

रामकंठीटीका

अतो युक्ताहारविहारस्य युक्तोऽहितमात्रकालावच्छिन्नताद्यपवन् आहारोऽभो
जनं विहारः संक्रमणादिर्यस्य तादृशस्य तथा कर्मसु चेष्टा चेष्टाविषये युक्तव्या
पारे यः युक्तो वितनु शरीरान वसादित्वपर्यवसायिनी चेष्टा मनःकायव्यापारो
यस्य तस्य तादृशस्य तथा युक्तोऽयथाकालभाविता स्वापोऽवबोधो निद्रा
जागरौ यस्य तस्य तादृशस्य योगिनः एष योगो दुःखहा भवति अभ्यस्यमानः

गी॰ टी॰ ब॰

क्लेशं हंतीति सुखेन सम्पद्यते इत्यर्थः विकाराणां नियमोऽत्र छांदसः संस्कृतं
त॰ सम्यक्स्तुर्मदर्शनाणि योजयंति [illegible] १७ ॥

तर्हि कथंभूतस्य योगो भवतीत्याह —

लालिकी [illegible] टीका

युक्तो हितमात्रः कलावच्छिन्नत्वादपयन् आहारो भोजनं विहारः श्रमः क्रमणादिर्यस्य तथा कार्येषु कर्मसु युक्ता विततशरीरानवसारिनी चेष्टा यस्य तथा यथाकालं भावितौ स्वप्नावबोधौ निद्राजागरौ यस्य ईदृशस्य योगिनः एव योगो दुःखहा भवति अभ्यस्यमानः क्लेशं हंतीति सुखेन संपद्यते इत्यर्थः आहारादि समाधिसिद्ध्यर्थं यथा स्यात् तथा योगिना स्वयं परीक्षितव्यं नात्र हठयोगवद्विशेषेण नियमो नियंत्रितस्य ततः समाधेनाक्रं सर्वत्र युक्तम् तथा च श्रुतिः यद्गहात्मसमस्मिन् समत्वेतदवतितत्र हि नास्ति यद्भूयो हि नास्ति न घ कतीयो न ततदवतीति १७ ॥ [illegible]

युक्तौ

पंवोलीटीका

युक्तेति युक्ताहारविहारस्य आङ्क्रियत इत्याहारोऽन्नं तन्नियतं अर्द्धमन्नस्य तृतीयो भागः पानीयस्य चतुर्थो वायुसंचरणस्य एवं चतुर्भागैः उदरपूरयेत् योगिनां नियताहारपादचंक्रमणेन रूपि नियते कर्मसु कार्येषु नियते च इष्टस्य सकलसंसारदुःखतापहंता योगो भवति १७ ॥

रणवीरसमिद्धोधिनी ॥

अतो युक्ताहारविहारस्य युक्तो नियत आहारे भोजने विहारो वृत्तिर्यस्य युक्तत्वं च नात्यंतासक्तिर्नात्यंतपरिवर्जनं च तथा कर्मसु कार्येषु युक्ता नियतैव चेष्टा यस्य तथा युक्तौ यथाकालभाविता न्यायौ स्वप्नावबोधौ यस्य रात्रौ स्वप्नो दिवा जागरणं चेति नियमः तादृशस्य च कर्मयोगिनो योगो दुःखहा भवति दुःखं क्लेशं हंतीति क्लेशनिवर्तकः संपद्यते १७ ॥

मधुभाष्य

१७ ॥

भाषा अनुवाद

तो फेरि कैसे पुरुष को समाधि हो सकती है इस अपेक्षा पर कहते हैं कि नियत हुए आहार औ विहार है जिसका तथा कर्मों मे परिमित चेष्टा कहे व्यापार हैं जिसका और यथा उचित है सोवना जागना जिसका उसी को योग कहे समाधि होती है और दुख हर करती हैं १७

दोहा

युक्ताहार व्यवहारसें युक्तकर्म करें जोय युक्तशयन जागरण
करें योग दुखहा होय १७॥

यदाविनियतंचित्तमात्मन्येवावतिष्ठते निःस्पृ-
हः सर्वकामेभ्योयुक्तइत्युच्यतेतदा १८ ॥

शाङ्करभाष्यं

अथाधुना कदा युक्तो भवतीत्युच्यते यदेति यदा विनियतं चित्तं वि-
शेषेण नियतं संयतमेकाग्रतामापन्नं चित्तं हित्वा बाह्यचिन्तामात्मन्येव
केवलेऽवतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो
निर्गता दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहि-
त इत्युच्यते तदा तस्मिन् काले १८ ॥

आनन्दगिरिकृतटीका

सफलस्य साङ्गस्य योगस्योक्तानन्तरं यदा इत्यादावुक्तकालावधारेण
युक्तं लक्षयितुमनन्तरश्लोकप्रवृत्तिं दर्शयति अथाधुनेति विशेषेण सं-
यतत्वमेव स्फोरयति एकाग्रतामिति आत्मन्येवेत्येवकारार्थं कथयति
हित्वेति केवलत्वमद्वितीयत्वं तस्यात्मस्थितिं विशदयति स्वात्मनीति
चित्तस्य दृष्टकलितस्यात्मैव तत्त्वं तस्मिन् स्वतः सर्वतो निवारितमपि स्था-
ने निमग्नं तिष्ठतीति भावः तस्यामवस्थायां सर्वेभ्यो विषयेभ्यो व्यावृत्त-
तृष्णो युक्तो व्यपदिश्यत इत्याह निःस्पृह इति १८ ॥

स्वामिकृतटीका

कदा निष्पन्नयोगः पुरुषो भवतीत्यपेक्षायामाह यदेति नियतं संयतं चि-
त्तं यदात्मन्येव यदा निश्चलं तिष्ठति तदा युक्त इत्युच्यते १८ ॥

पैशाचभाष्यं

अथाधुना कदा युक्तो भवतीत्युच्यते यदेति यदा विनियतं चित्तं विशे-
षेण नियतं संयतं एकाग्रतामापन्नं चित्तं हित्वा बाह्यमात्मन्येव केवलेऽ-
वतिष्ठते स्वात्मनि स्थितिं लभत इत्यर्थः निःस्पृहः सर्वकामेभ्यो निर्गता स्पृहा दृ-
ष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य योगिनः स युक्तः समाहित इत्युच्यते
तदा १८ ॥

रामानुजभाष्यं

यदेति यदायं योगी योगप्रयोजनविषयं चित्तमात्मन्येव विनियतं विशेषेण नि-
यतं निरतिशयप्रयोजनतया तत्रैव नियुक्तं निश्चलमवतिष्ठति ततः स-
र्वकामेभ्यो निःस्पृहः सन् युक्त इत्युच्यते योगार्ह इत्युच्यते १८ ॥

78

अभिनवगुप्तकृतटीका अस्पष्टयोगिनश्चिह्नम् आत्मन्येव नियतमनानं किंचिदपि स्पृहयति ॥ १८ ॥

परमार्थप्रपाटीका

अथ निष्पन्नयोगस्य परीक्षामाह यदेति विनियतं निरुद्धं चित्तमात्मन्येव निश्चलं तिष्ठति यदा च सर्वकामेभ्यो निःस्पृहो भवति तदा युक्तो निष्पन्नयोग इत्युच्यते १८ ॥

वनमालीटीका

योगसंपूर्तिकालमाह यदेति यदा यस्मिन्काले वैराग्याभ्यासाभ्यां विनियतं निरुद्धं विगतरजस्तमस्कं चित्तं विषयान्तरादपनीय आहृतमात्मन्येव परमानंदघने सर्वेश्वरे मय्येवावतिष्ठते तदा तस्मिन्काले स युक्तः समाहित इत्युच्यते कीदृशः सर्वकामेभ्यो निस्पृहः निर्गतं दोषदर्शनेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः स्पृहा तृष्णा यस्य सः १८

कृष्णवेनयन्तीटीका

ननु सिद्धयोगी योगी कदा भवेदित्यपेक्षायामाह यदा विनियतमिति यदा यस्यामवस्थायां योगाभ्यासं कुर्वतो योगिनो विनियतं निश्चलं सच्चित्तं मनो निरस्तसमस्तलौकिकप्रयोजनं तया आत्मन्येव स्वस्वरूपे एवावतिष्ठते स्थिरं भवति तदा तस्यामवस्थायां सर्वकामेभ्यः सकलशास्त्रोक्तभोगकामेभ्यो निस्पृहः सन् निर्गता स्पृहा वाञ्छा यस्मात् एवंभूतः सन् योगी युक्तः सिद्धयोग इत्युच्यते इत्येवं कथ्यते १८

एवमेकाग्रभूमौ संप्रज्ञातसमाधिमभिधाय निरोधभूमावसंप्रज्ञातं समाधिं वक्तुमुपक्रमते

मधुसूदनीटीका

यदा यस्मिन्काले परवैराग्यवशाद्विनियतं विशेषेण नियतं सर्ववृत्तिशून्यतामापादितं चित्तं विगतरजस्तमस्कमन्तःकरणसत्त्वं स्वच्छत्वात् सर्वविषयाकारग्रहणसमर्थमपि सर्वतो निरुद्धवृत्तिकं सदात्मन्येव प्रत्यक्चिति अनात्माकारवृत्तिराहित्येऽपि स्वतः सिद्धस्यात्माकारस्य वारयितुमशक्यत्वाच्चित्ते शायास्यात् तस्मिन्नेव अवतिष्ठते निश्चलं भवति तदा तस्मिन् सर्ववृत्तिनिरोधकाले युक्तः समाहित इत्युच्यते कः यः सर्वकामेभ्यो निस्पृहः निर्गता दोषदर्शनेन सर्वेभ्यो दृष्टादृष्टविषयेभ्यः कामेभ्यः स्पृहा तृष्णा यस्य तेन परवैराग्यमसंप्रज्ञातसमाधेरन्तरंगसाधनमुक्तं तथा च व्याख्यातं प्राक् [illegible]

सदानंदीटीका

यस्मिन्काले विशेषेण स्वच्छत्वान्निर्मलं मनः प्रतीच्येव निरुद्धत्वाद्वि
षमेनावतिष्ठते १ दृष्टादृष्टास्तेभ्यश्च कामेभ्यो दोषदर्शनात् तस्मा
द्विनिर्गतायस्य परवैराग्ययोगतः २ तदा समाहितो योगी सिद्धश्च
च्यते बुधैः ३ १८ ॥

नीलकंठीटीका

निर्वाणपरमां शांतिं प्राप्तस्य लक्षणमाह यदेमादिभिः षड्भिः विनि
यतं विशेषेण एकाग्रतां भूमेरपि निरुद्धं आत्मनि प्रत्यगात्मन्येवावति
ष्ठते तत्त्वस्मितादिरूपेण उद्भियते तदा योगी सर्वेभ्यः जाग्रत्स्वप्नबीजस
माधिरूपस्थितेभ्यः त्वङ्गोपपंचमी सार्वात्म्यप्राप्तमेव तान्प्राप्य तेभ्यो
निःस्पृहो भवति तदा युक्तो निर्विकल्पस्थ उच्यते १८ ॥

आनन्दीटीका

योगस्य परिपाककालमाह तदा तस्मिंकाले युक्तो योगसिद्धिं प्राप्त
इत्युच्यते [illegible] १८

एवमाहारविहारनियमयुक्तासिद्धि रामकंठीटीका लक्षणं योगस्याह ॥

यदास्य योगिनः समाध्यभ्यासकाष्ठां प्राप्तस्य चित्तं विनियतं निगृहीतं
सत्संप्रज्ञातसमाधिभूमिकाः वितर्कविचारानन्दास्मितानुगताः अति
क्रान्तं सत्स्थूलसूक्ष्मेषु ध्येयेषु लब्धसंयमत्वात्तानि त्यक्त्वा एकस्मिन्ध्ये
ये आत्मन्येव स्वभावएवावतिष्ठते अवस्थितिं प्रतिष्ठां संयमं लभते तदा
तस्यां दशायां आत्मैकारामत्वात् सर्वेभ्यो व्यतिरिक्तेभ्यो भोगेभ्यः स्पृहारा
हितो निरभिकांक्षः सन् असौ युक्तः सम्पन्ननिर्वीजसमाधिरित्युच्यते त
स्यात्मध्याननिष्ठस्य योगिचित्तस्यैव [illegible] उपमामाह १९ ॥ नमा

लासिकी [illegible]टीका

अथ सिद्धयोगस्य लक्षणमाह — यदास्य योगिनश्चित्तं विनियतं विशेषेण निरुद्धं सदात्मन्येव प्रतीच्येवा
वतिष्ठते प्रतिष्ठां लभते तदासौ युक्तः प्राप्तसमाधिरित्युच्यते कीदृशो
युक्तो निःस्पृहः सर्वकामेभ्य इति [illegible]
[illegible] १८ ॥

पंचोलीटीका

अथ युक्तः कदा भवतीत्युच्यते यदेति यदा विनियतं विशेषेण सं
यतं चित्तं वाह्यचिंतां हित्वा आत्मन्येव केवले अवतिष्ठते स्थिरं भवति।
किंच सर्वकामेभ्यः ऐहिकामुष्मिकभोगेभ्यो निःस्पृहः विगततृष्णो भ
वति तदा युक्तः समाहितचित्त इत्युच्यते १८

धनवीरसमिश्रबोधिनी॥

यदेति यदा यस्मिन्काले सर्वकामेभ्यः सर्वेभ्यो दृष्टसंकल्पे
भ्यः कामपद क्रोधपदइत्यादिना पूर्वं प्रतिपादितेभ्यो विनि
यतं प्राप्त्या वर्तितं चित्तमात्मन्येव स्वरूप एवावतिष्ठते निश्चलं
भवति तदा निःस्पृहः भूमिरित्यादि स्पृहारहितः केवलं स्वय
मांचरणे एवावहितो युक्त इत्युच्यते योगारूढ इति कथ्य
ते प्रागसमता रूपयोग इतियावत् १८॥

मधुभाष्य

१८॥

भाषा अनुवाद

कौन समयमे योग सम्पन्न अर्थात् समाधि सिद्ध होगा सो कहते हैं कि जब पुरुषका चित्त एकाग्र करे अच्छीतरह सब ओर से रुककर अर्थात् वास करे बाहर के सकल विषयों को छोड़ि कर केवल आत्मामे निश्चल रूप से लगे अर्थात् अपने आत्मा मे स्थिति करे और सब मनोरथ की इच्छा न रहे अर्थात् देखी सुनी जो संसारिक विषय तिन की कामना मे स्पृहा करे इच्छा न उठे तब वह योगसिद्ध कहे युक्त समाहित कहा जाता है सोई कहा कि यदा विनियतं चित्तमात्मन्येवावतिष्ठते इति १८॥

दोहा

जबहि निवर्तै चित्तजो आत्म मे स्थित होय निस्पृह सब कामसे युक्त कहावे सोय १८॥

यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता । योगिनो यतचित्तस्य युञ्जतो योगमात्मनः ॥ १९ ॥

शांकरभाष्यं

योगिनः समाहितं यच्चित्तं तस्योपमोच्यते यथेति यथा दीपः प्रदीपो निवातस्थो निवाते वातवर्जिते स्थाने नेङ्गते नेङ्गति न चलति सा उपमा उपमीयतेऽनयेत्युपमा योगज्ञैश्चित्तप्रचारदर्शिभिः स्मृता चिन्तिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगमनुतिष्ठत आत्मनः समाधिमनुतिष्ठत इत्यर्थः १९

आनन्दगिरिकृतटीका

उपमा योगिनश्चित्तस्थैर्यस्योदाहरणमित्याह उपमाशब्दस्य प्रदीपविषयत्वं निरस्य करणव्युत्पत्तिं दर्शयति उपमीयत इति योगिनो यथोक्तविशेषणवतश्चित्तस्थैर्यस्येति शेषः १९

स्वामिकृतटीका

आत्मैकाकारतयावस्थितचित्तस्योपमानमाह यथेति वातशून्ये देशे स्थितो दीपो यथा नेङ्गते न विचलति सा उपमा स्मृता कस्यात्मविषयं योगमभ्यस्यतो योगिनो यतं नियतं चित्तं यस्य तस्य निष्कंपतया प्रकाशकतया चाचलं तच्चित्तं तिष्ठतीत्यर्थः १९ ॥

पैशाचभाष्यं

योगिनः समाहितस्योपमोच्यते यथा दीपो निवातस्थो निवाते वातवर्जिते देशे स्थितः नेङ्गते न चलति सोपमा उपमीयतेऽनयेत्युपमा स्मृता। योगज्ञैश्चित्तप्रचारदर्शिभिः चिंतिता योगिनो यतचित्तस्य संयतान्तःकरणस्य युञ्जतो योगं समाधिमनुतिष्ठत इत्यर्थः १९

रामानुजभाष्यं

यथेति निवातस्थो दीपो यथा नेङ्गते न चलति अचलः सप्रभस्तिष्ठति यतचित्तस्य निवृत्तसकलेतरमनोवृत्तेर्योगिनः आत्मनि योगं युञ्जत आत्मस्वरूपस्य सोपमा निवातस्थतया निश्चलप्रभदीपवन्निवृत्तसकलेतरमनोवृत्तितया निश्चलज्ञानप्रभः आत्मा भासत इत्यर्थः १९

अभिनवगुप्तकृतटीका

आहारेष्वाहियमाणेषु विषयेषु विहारउपयोगाय प्रवृत्तिः तस्या वृ
यथा दीपो न चलति एवं योगी चलनमस्य विषयादीनामर्जनादयः प्रयासाः १९

गी. कतेनात्मनासक्तिर्नीमंतपरिवर्जितं एवं सर्वत्र स्पष्टंशिष्टं ज्ञायतइत्याशयः।
टी. मुनेः प्रमाणतावेद्यते एवमग्रेपि अस्यवयोगिनस्थिरं आत्मन्येववृति।
ब. यतमनाकिंचिदपिस्फुरयते १९ ॥

परमार्थप्रपाटीका

अथात्माकारतयास्थितस्यचित्तस्योपमानमाह यथेति वातस्पंदेस्था
नेनिवातंतत्रस्थितोदीपोयथानेंगतेनचलतितत्रसेपदार्थमात्रंस्पष्टतया
प्रकाशयति एवं कृतेनसाउपमादृष्टांतःस्मृतःकस्य आत्मनोयोगंयुंजतो।
भ्रतनोयोगिनोविक्षेपशून्यचित्तस्य १९

वनमालीटीका

भगवत्सेकाग्रस्यवृत्तंतरस्यमनस्यचित्तस्योपमानमाह यथेति दीपचल
नहेतनावातेनरहितेदेशेस्थितोदीपोयथानेंगतेनचलति सोपमास्मृ।
तादृष्टांतस्थितितोयोगतैः कस्ययमुपमा योगिनः भगवतिसंप्रज्ञा
तसमाधिमतः यतचित्तस्यतत्रैवासंप्रज्ञातसमाधिमतःसंप्रज्ञातस
माधौभगवद्रूपादिविषयकचित्तवृत्तयोजायंते असंप्रज्ञातसमाधौवा
तःकरणवृत्तिमात्रस्योपरामोभगवत् प्रसादात् स्वरूपाकारैकाविद्या
गाःशैथिल्येनाविर्भूतस्वरूपभूतज्ञानेनभगवंतं स्वस्वरूपानंदेवानुभव
तिस्वरूपज्ञानस्याविर्भूतस्यतद्विषयकत्वस्याभावात् असंप्रज्ञातसमा
धौवासांतरज्ञानसाधनस्याभावेनजन्यज्ञानासंभवात् अंतःकरणवृ।
संप्रज्ञात मतंगीकारेसंप्रज्ञातावांतरभेदस्योक्तिमात्रत्वापत्तेः असंप्रज्ञातसमा
धावाविर्भूत[illegible]ज्ञानानंगीकारेतस्याप्युत्तरत्रध्यानोपमानदर्शनप्र ना
यत्नानापत्तेः कीदृशस्येत्यादृशसमाधिमतआह आत्मनःपरमात्मनस्सूतेः
परमात्मनोयोगंयुंजतः विषयांतरतोवैराग्येणविनिवृत्तीर्वाहमभ
गवदेकाकाराःकुर्वतः १९

ग्रसमवैजयन्तीटी.

निष्पन्नयोगस्ययोगिनस्सदृष्टांतस्थितिप्रकारमाह यथादीपइति
यथाशब्दोत्रसादृश्येयथावन्निवातस्थः निर्गतोवातोवायुर्यस्मात्सनि
वातोदेशविशेषस्तस्मिंस्तिष्ठतीतिसन्यथादीपःप्रदीपःनेंगतेनचल।
ति आत्मनःस्वस्वरूपस्ययोगंध्यानेयुंजतोऽनुतिष्ठतोयतचित्तस्यनिरुद्ध
निश्चलचित्तवृत्तेर्योगिनोनिष्पन्नयोगस्यसदीपउपमाउपमानंस्मृताचिं।
त्रितोयोगोयमाभिज्ञैरितिशेषः सोयमेवमत्रसोविलोपेवेमादृप्ररणमिति

स्तत्रात्मंधियः यथावायुशून्यगृहान्तर्वर्तीसम्यक्प्रदीपोविक्षेपाहितस्थि
मतयानचलतितथाचित्तवृत्तिनिरोधेनशाकुनशब्दादिविषयविक्षे
पहेतभूतेनिवृत्तमत्वादात्मदर्शनैकप्रयोजनत्वाच्चयोगीनचलतीत्यर्थः १९

समाधौनिश्चलतिकस्यचित्तस्योप मधुसूदनीटीका
ानमाह — दीपचलनहेतुनावातेनरहितेदेशेस्थितोदीपोयथाचलनहेत्वभावा
न्नेंगतेनचलति सोपमास्मृता सदृष्टांतःचिंतितोयोगज्ञैः तस्ययोगि
नएकाग्रभूमौसंप्रज्ञातसमाधिमतोभ्यासपाटवायत्तचित्तस्यनिरुद्ध
सर्ववृत्तिमहतेरसंप्रज्ञातसमाधिरूपंयोगंनिरोधभूमौयुंजतोऽनुति
ष्ठतोयथात्मनोंतःकरणस्यनिश्चलतयासत्वोद्रेकेणप्रकाशकतयाच
निश्चलोदीपोदृष्टांतइत्यर्थः आत्मनोयोगयुंजतइतिव्याख्यानेदार्ष्टांति
कालाभः सर्वावस्थस्यापिचित्तस्यसर्वदात्माकारतयाऽत्मपदवैयर्थ्य
नहियोगेनात्माकारताचित्तस्यसंपाद्यते किंतुस्वतएवात्माकारस्य
सतोऽनात्माकारतानिवर्त्यतइति तस्माद्दार्ष्टांतिकप्रतिपादनार्थ
मेवात्मपदं यतचित्तस्येतिवाभावपरोनिर्देशःकर्मधारयोवाय
तस्यचित्तस्येत्यर्थः [illegible]
[illegible] १९

सदानंदीटीका
समाहितधियःप्रसंगान्निश्चलस्यच योगिनोभगवानाहोप।
मानेवोधतायत्रुः वातेनरहितेदेशेस्थितोदीपोयथाचलः समाहित
धियःसोयंदृष्टांतश्चिंतितोबुधैः २ निरोधभूमौसततंसमाधिमनु।
तिष्ठतः सत्वोद्रेकेणयच्चित्तप्रकाशकतयाचलं ३ निश्चलोदीपव
त्तस्यदृष्टांतोहरिणोरितः ४ १९

नीलकंठीटीका
एकाग्रतावस्थायांयोगिचित्तस्योपमामाह यथेति नेंगतेनचल
तितद्वत् यतेचतच्चित्तंचयतचित्तंतस्य एकाग्रतोपात्तंचित्तंनिवा
तस्थदीपवन्नचलतीत्यर्थः आत्मनोयोगंसमाधिंयुंजतोऽनुतिष्ठतः १९

आनंदीटीका
इत्यंभूतस्यस्वरूपमुपमयाह ॥
आत्मनिसंयमजयात्प्रकृतेःपृथग्भावनार्थंयोगंयुंजतःयोगिनस्ता

गी
टी॰ ६

पमास्मृता येनेपमाप्रकारेण निवातस्थो दीपो नेंगते १९ ॥

रामकंठीटीका

आत्मनि निरुद्धे ध्येये योगं समाधिं युंजानस्य योगिनः सर्वतः प्रत्याहृतत्वात् यतं निगृहीतं चित्तं येन तादृशस्य सा उपमा तदुपमानं तत्त्वज्ञैः स्मृतम् यथा दीपः प्रदीप्तको निर्वातदेशे स्थितः सन्नेंगते न प्रकम्पते तथैवात्मालंबने समाधौ स्थितं योगिचित्तं न प्रकंपत इत्युपमेयवाक्यमध्याहार्यं अनेन दीपोपमानेनानुप्रत्यासन्नप्रबलविपक्षत्वात् यत्नसंरक्षणीयत्वं योगिचित्तस्य प्रतिपादितं [illegible] ॥

[illegible]टीका

अथ निरुद्धसर्वचित्तवृत्तिकस्यात्मनि समाहितस्य योगिन उपमानमाह — अथ वातशून्ये देशे स्थितो दीपो नेङ्गते न कंपते आत्मनो योगं समाधिमभ्यस्यतो यतचित्तस्योपरतचित्तस्य योगिनः सोपमा दृष्टांत उक्तस्तत्त्वज्ञैः तद्वद्योगी निश्चलः स्वप्रकाशश्च तिष्ठतीत्यर्थः १९ ॥

पंचोलीटीका

योगिनः आत्मैकाग्रतयावस्थितस्य उपमानमाह यथा दीप इति यथा दीपो निवातस्थः नेंगते न चलति आत्मनः मनसो योगं समाधानं कुर्वतः यतचित्तस्य संयतमनसः योगिनो ध्यानवतः सा उपमा तैर्योगज्ञैः कथिता १९ ॥

[illegible] ॥

यथेति निवाते वातशून्ये प्रदेशे तिष्ठतीति निवातस्थो दीपः प्रदीपो यथा नेंगते न कंपते सा योगिन उपमा स्मृता कस्मिन्नपि दीपवन्न प्रकंपते इत्यर्थः कथंभूतस्य योगिनो यतचित्तस्य संकल्पांतरेभ्यो निवर्तितचेतसः तथात्मनः स्वस्योपपंचमीयं आत्मानं बुद्धिसंस्थाप्य योगं प्राणादीनां युंजतः प्रयुंजानस्य अयमभिप्रायः यथा निवातस्थस्य दीपस्यैकाकारतया स्थितस्य निष्प्रकंपतया प्रकाशमभावेन स्वकार्यस्य प्रका

मानस्यावश्यंसिद्धिः एवंयतचित्तत्वेन बुद्धिपूर्वंयागादिकं यज्ञमसंदधानस्यकर्मयोगिनः संकल्पांतरैरचाल्यतया लब्धपवसमाहितस्यावश्यंजयोभवतीति १५ ॥

मधुभाष

१५ ॥

83

भाषा अनुवाद

आत्माकाराकारितरूप अवस्थित चित्त कहे आत्मरूपता को प्राप्त जो चित्त तिसका दृष्टान्तकहते हैं कि जैसे निर्वात स्थान मे दीपशिखा हलचल नहीं होती सोई उपमा कहे दृष्टान्त जानो यह कि। सका दृष्टान्त है जो पूछो तो कहते हैं कि आत्मविषयक योगाभ्यासी योगी पुरुष जिसका चित्त वशीभूत हैं उसीका चित्त निर्वात स्थान स्थित दीपशिखा के समान आत्मामे स्थिर हैं यहां चित्त शब्द का अर्थ अन्तः करण है सो अन्तःकरण वृत्ति भेद से चारि प्रकार का है संकल्पात्मक कहे संकल्प रूपअन्तः करणकी वृत्ति कहे। स्वभावको मन कहते हैं और निश्चयात्मक अन्तःकरण की वृत्ति को बुद्धि कहते और अनुसन्धान कहे किसी वस्तुके जानने केलिये तद्रूप रूप हो रहना अनुसन्धानात्मक अन्तःकरण वृत्ति को चित्त कहते हैं और अभिमान युक्त अन्तःकरण अहंकार कहा जाता है १९॥

दोहा

ज्यों दीपक निर्वातस्थित कंप न उपमा सोय योगी की जित
चित्तकी योगहि बुद्धि धरें जोय १९॥

यत्रोपरमते चित्तं निरुद्धं योगसेवया । यत्र चैवा-
त्मनात्मानं पश्यन्नात्मनि तुष्यति ॥ २० ॥

शाङ्करभाष्यं

एवं योगाभ्यासबलादेकाग्रीभूतं निवातप्रदीपकल्पं सत् यत्रेति यत्र य-
स्मिन् काले उपरमते चित्तं उपरतिं गच्छति निरुद्धं सर्वतो निवारितप्रचा-
रं योगसेवया योगानुष्ठानेन यत्र चैव यस्मिंश्च काले आत्मना समाधिप-
रिशुद्धेनान्तःकरणेन आत्मानं परं चैतन्यं सर्वतो ज्योतिःस्वरूपं पश्यन्नुपल-
भमानः स्व एवात्मनि तुष्यति तुष्टिं भजते ॥ २० ॥

आनन्दगिरिकृतटीका

द्विविधः समाधिः संप्रज्ञातोऽसंप्रज्ञातश्च ध्येयैकाकारमनोवृत्तिभेदेन क-
थञ्चित् ज्ञायमानः संप्रज्ञातः समाधिः तदपि ह्यग्रज्ञायमाना सैव म-
नोवृत्तिरसंप्रज्ञातः समाधिस्तत्र सामान्येन समाधिलक्षणमभिधायासंप्र-
ज्ञातस्य समाधेरधुना लक्षणं विवक्षन्नाह यत्रेति काले समाध्युपल-
क्षिते यत्कारस्तच्छब्दमनेन सम्बध्यते चकारस्य सम्बन्धमाह यस्मिन्निति
कालस्य पूर्ववत् कर्मकारकत्वेन निर्दिष्टमात्मानं तत्पदार्थत्वेन व्याच-
ष्टे परमिति आत्मनीत्यस्य त्वंपदार्थविषयत्वमाह स्व एवेति परमात्मा-
नं प्रतीच्येव तत्त्वेनापरोक्षीकुर्वन्नतुष्टिहेतुभावात्तुष्यत्येवमयं यः तस्मि-
न् काले योगसिद्धिर्भवतीति शेषः ॥ २० ॥

स्वामिकृतटीका

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव इत्यादौ कर्मैव योगशब्देनोक्तं ।
नानाशास्त्रेषु योगो ... समाधिर्योगशब्देनोक्तः तत्र मुख्यो योगः ।
कस्तत्परतायाः समाधिमेव स्वरूपतः फलतश्च लक्षयन् स एव मुख्यो यो-
ग इत्याह यत्रोपरमते इति सार्धैस्त्रिभिः यत्र यस्मिन्नवस्थाविशेषे योगाभ्या-
सेन निरुद्धं चित्तं उपरतं भवतीति योगस्य स्वरूपलक्षणमुक्तं तथा च पा-
तञ्जलसूत्रं योगश्चित्तवृत्तिनिरोध इति इष्टप्राप्तिलक्षणेन फलेन तमेव
लक्षयति यत्र यस्मिन्नवस्थाविशेषे आत्मना विशुद्धेन मनसा आत्मानमे-
व पश्यति न तु देहादि पश्यन् आत्मन्येव तुष्यति न तु विषयेषु यत्रेत्यादीनां यच्छब्दानां
तं योगसंज्ञितमिति चतुर्थेनान्वयः ॥ २० ॥

पिशाचभाष्यटी·

गी. टी. ष.

एवंयोगाभ्यासबलादेकाग्रीभूतंचित्तंनिवातप्रदीपसदृशंयस्मिन्कालेउपरतेचित्त मुपरतिंगच्छतिनिरुद्धंसर्वतोनिवारितप्रचारंयोगसेवयायोगानुष्ठाने न यत्रचैवयस्मिंश्चकाले आत्मनात्मानंपरंचैतन्यंज्योतिःस्वरूपंपश्यंस्तुष्य न्लभमानःस्वयमात्मनितुष्यतितद्विभजेत २०॥

रामानुजभाष्य

योगसेवयाहेतुनासन्निरुद्धंचित्तंयत्रयोगेउपरमते अतिशयितंसुखमि दमेवेतिरमते यत्रचयोगेआत्मनामनसाआत्मानंपश्यन्ननिरपेक्षमात्म न्येवतुष्यति २०॥

अभिनवगुप्तकृतटीका

यत्रदीपोनवलतिएवंयोगीतत्त्वसमस्तविषयादीनामर्जनात्यःअथा नः इदानींतस्यस्वस्वभावस्यब्रह्मणोबहुतरविशेषणद्वारेणस्वरूपंनि रूप्यते तीर्थान्तरकल्पितेभ्योरूपेभ्योव्यतिरेकः २०॥ यत्रमनोनिरुद्धमुपरमतेस्वयमेवेति

परमार्थप्रपाटीका

अथनिष्पन्नयोगस्वरूपमाह यत्रेत्यादिचतुर्भिः यत्रयस्यामवस्थायां। योगसेवयानिरन्तराभ्यासेननिरुद्धंविक्षेपरहितंसत्उपरमतेउपरमंविष येभ्योव्याहतिंप्राप्नोति यत्रचआत्मनैवशुद्धेनान्तःकरणेनआत्मानंपश्यन् तानन्दस्वानुभवन् आत्मन्येवस्वस्वरूपेतुष्यतिसन्तोषंप्राप्नोतीति ॥ [illegible] नेवि। याद्वितिचतुर्थेनान्वयः २०॥

वनमालीटीका

एवंसामान्येनयोगमुक्त्वाविस्तरेणनिरोधसमाधिंविवरीतुमारभते यत्रेति यत्रयोगसेवयायोगाभ्यासपाटवेनयोगपरिपाकेजातेसति। चित्तंनिरुद्धं एकविषयकवृत्तिप्रवाहरूपामेकाग्रतांत्यक्त्वानिरिंधनाग्नि वदुपशाम्यद्वृत्तिकंसत्उपरमतेएवंचविज्ञेयपरमावस्थायां आत्मना भगवत्प्रसादादाविर्भूतस्वरूपज्ञानेनात्मानंस्वभूतंचैतन्यंपश्यन्नात्मन्या विर्भूतस्वरूपानंदेस्वस्मिन्भगवतिवातुष्यति तंसर्ववृत्तिनिरोधरू पंयोगंविद्यादितिपरेणान्वयः यत्रयोगसेवयाचित्तंनिरुद्धंसर्ववृत्तिनि रोधरूपेणपरिणतंभवति यत्रचयस्मिंश्चपरिणामेसति आत्मनान्तःक रणेनात्मानंप्रत्यक्चैतन्यंपरमात्माभिन्नंसच्चिदानंदमनंतमद्वितीयंप।

तितथाचित्तं योग

यपत्वेदांतप्रमाणजन्ययाहृत्यात्मसाक्षात्कुर्वन् नात्मस्येव नश्यतीति
तदसत् प्रमाणेविनाचित्तवृत्तेरसंभवात् वृत्तिरूपंविनापरिणाम
चित्तावस्थानेमानाभावात् किंचिद्विषयक वृत्तिरूपएव हि चित्तस्यप
रिणामः असंप्रज्ञातसमाधौवृत्त्यात्मकत्वे ज्ञानरूपक्रियाभावेनांतः
करणेमानाभावाच्च जीवपरेशयोरभेदस्यस्वरूपभिन्नस्यसमाधौभाने
संप्रज्ञातत्वहानिरभेदस्यस्वरूपात्मकत्वेस्वरूपस्यत्वन्मते ज्ञानाद्यपि
ध्यानतयासत्त्वादिसाक्षितयासदाभानात्माधवेवपर्यात् एकस्मिन्वि
विशेषसद्वितीयेदमद्वितीयमित्यादिपदानांवैयर्थ्यात् सत्त्वादीनां
ब्रह्मभिन्नानांभानेनद्वैतहानेः वेदांतजन्यवृत्तेरसंप्रज्ञातसमाधावभा
वेनवेदांतेनमुक्तेस्त्वकत्वाच्च अहमितिज्ञानेचैतन्यमात्रस्यभानात् तदपि
कस्यवेदांतजन्यवृत्त्यावश्यभानाहेदांतश्रवणादेरपिवैयर्थ्याच्च तथा
विशिष्टमेवचैतन्यंप्रमास्तेभासते नशुद्धमितिवाच्यं विशिष्टभानेविशे
षभानस्यावश्यकत्वात् नहिदंडिनिभाने पुरुषोनभासते योगश्चित्तवृ
त्तिनिरोधः सचद्विविधः संप्रज्ञातोऽसंप्रज्ञातश्चेति संप्रज्ञाते ध्येयाका
राचित्तवृत्तिरस्यसंप्रज्ञाते वृत्त्यभावः सचचित्तस्यावस्थाविशेषएव अ
भावस्याधिकरणात्मकत्वात् ननु यत्किंचिद्वृत्तिनिरोधः सदैवास्तिवृ
त्तिसामान्याभावश्चासंप्रज्ञातसमाधौनास्तीति योगश्चित्तवृत्तिनिरोधः
इतिलक्षणमसंभवीतिचेन्न यदाद्रष्टुःस्वरूपेवस्थानमित्यग्रिमसूत्रसा
हित्येनैतत्सूत्रस्यलक्षणबोधकत्वात् द्रष्टुःस्वरूपावस्थितिहेतुश्चित्तवृ
त्तिनिरोधोहिलक्षणं व्युत्थानकालिकोनिरोधश्चनतद्धेतुः संप्रज्ञात
निरोधश्चासंप्रज्ञातद्वारास्वस्वरूपावस्थानेहेतुः तदुक्तं सनिरोधेन
संप्रज्ञातःसमाधिःनस्यलक्षणविधित्सयेदंसूत्रं योगश्चित्तवृत्तिनिरो
धः सर्वशब्दाग्रहणात्संप्रज्ञातोपियोगइत्याख्यायते इतियोगितस्ते
षामस्तुकृपयावार्त्तेनाप्ययंसत्त्वमेवद्विपुरुषार्थेनतदुःखाभावलक्षणा
त्मनाशेपिसंभवेनवोदाभिमतात्मनाशोपिमोक्षःस्यात् इमीवेरमे
हिलव्यानंदीभवति आनंदंब्रह्मणोविद्वान्नबिभेतिकुतश्चनसोश्नुतेस
र्वान्कामान्सहब्रह्मणाविपश्चितेत्यादिश्रुत्या सब्रह्मयोगयुक्तात्मासु
खमक्षयमश्नुते सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियमित्यादिभग

गी.
टी.
ष.

तदुक्तयाचस्वविषयकमुक्तार्थत्वसिद्धेः नन्वदुःखादिविषयकस्मृतिज
पत्तावस्मृतिसत्वेननाशासंभवेनानुभवनाशं विनासंस्कारानुत्पत्त्या।
कालांतरेतीतदुःखादिस्मरणानुपपत्तिरितिचेन्नज्ञानज्ञेययोःसंबंधना
शस्यैवसंस्कारजनकत्वात् संबंधनाशश्चान्यतरसंबंधिनाशाद्वित्
संबंधिनोःसतोरपिसंबंधविघटकसंनिधानात् दुःखादीनांसाक्षिवि
षयाणांनाशात्संस्कारोत्पत्तिःस्मरणोपपत्तिश्च यत्रसंस्कारस्मरणोत्पत्ति
स्तत्रस्वाश्रयात्मपरसंबंधेनज्ञानज्ञेयसंबंधस्यनाशः स्वज्ञानज्ञेयसं
बंधनाशस्तुसाक्षिणोज्ञानेनज्ञेयत्वेनतदाश्रयांतःकरणेतदेवसंस्कारस्म
रणोरधिकरणे सुषुप्तौस्वरूपज्ञानमेवरदयनेनतद्रूपयद्यपिनिसंज्ञानम
पिस्वरूपभूतंनित्यं तथापिविषयताख्यसंबंधप्रयोजकस्यनाडीविशे
षस्यभगवन्मूर्तिविशेषसंबंधस्यजाग्रदाद्यभावात्संभवतिविषयता
ख्यसंबंधनाशः ततश्चसंस्कारःनचांतःकरणाभिन्नसाक्षिणाकथंत
त्रसंस्कारोत्पत्तिरनुभवसंस्कारयोःसमानाधिकरणत्वनियमादितिवा
च्यं अणुपरिमाणस्यसाक्षिणोंतःकरणातिष्ठत्वसंभवात्साक्षिणों।
तःकरणेस्वामित्वादिकमेववाविलक्षणः फलबलकल्प्यसंबंधः न
चरहीनेवत्तरहीनंमनरसादिकूमात्सुषुप्तावंतःकरणलयउक्तः
संकल्पविकल्पादिरूपांतःकरणवृत्तीनांलयोक्तेः नचसुषुप्तावंतःकरण
स्यवेजस्यतानापत्तिः तत्स्वज्ञानमात्रप्रयोजकत्वगात्मसंबंधाभावात् त
च्चेबिहागाणाणात्मनोनाडीस्थभगवन्मूर्तिप्रवेशात् प्रासेनात्मनासंपरि
ष्वक्तोनवाह्यंवेदनांतरमितिश्रुतेः बाह्यंरूपादिवत्तरादिनाअंतरंदुःखा
दिकंमनसावनवेदेत्यर्थः सक्तोपलपादीनांहशाविषयतानियामकसंबं
धाभावान्नस्वप्रकाशःस्वमेतदुक्तसंस्कारसहकृतेनमनसाकेषांचि
दर्थानांकेषांचित्साक्षिणाप्रकाशःजागरेचसाक्षिणाकेषांचित्
केषांचित्प्रमाणैर्ज्ञानैःप्रकाशःसमाधौसंप्रज्ञातेमानसमेवज्ञानं असं
प्रज्ञातेवशस्यपावरकाविद्यानाशेशेषत्वेनासमाधिभेनस्वरूपभूत
ज्ञानेनस्वस्वरूपानंदस्यपरमेश्वरस्यचविषयीकरणं ततज्ञानस्यवस्तुग
मात्मस्वरूपस्वस्वरूपविषयकत्वात् सुषुप्ताविवभगवन्मूर्तिविशे
षसंबंधोविषयतानियामकः मुक्तोवेदांतजन्यभगवदपरोक्षज्ञानप्राग

८९

भावबंधमोविषयतानियामकः २० ॥

स्तमवैजयन्ती

ननुनात्मदर्शनस्यादौयोगाभवनाशोकस्तस्यकिमात्मस्वरूपंकिंवाफ
लेस्यादित्यपेक्षायामाह साईत्यनेनसर्वोपरमतश्चतिः योगस्येवया
योगाभ्यासरूपेणहेतुनानिरुद्धंनिहतवहिर्गमनेचित्तेमनोयत्रयस्मिन्या
ग उपरमतेयाकृतविषयेभ्योनिरतिशयस्तस्याप्ययत्रैवसत्त्वेनरमथः
यत्रैवचयत्रः यत्रैवयस्मिन्येवात्मनाविषयवाशनाशून्येनमनसा आत्मा
नंस्वस्वरूपंपश्यन्नवलोकयन्नात्मनमेवानुद्देष्टव्यः इत्यनेनया
यानुद्धेसादिष्टुतेः आत्मन्येवस्वस्वरूपएवतुष्यति अस्मादन्यत्रशरीरादौ
परमेतुःखमेवभवति अस्मिंस्तुनिरवधिकानंदजलधौममसुखमेवस्था
दित्येवंसंतुष्टोभवतीत्यर्थः २० ॥

एवंसामान्येनसमाधिमुक्त्वा मधुसूदनीटीका निरोधसमाधिंविस्तरेणविवरीतुमा
रभते — यत्रयस्मिन्परिणामविशेषे[illegible]योगाभ्यासपाटवेनजातेसति
चित्तेनिरुद्धेएकविषयकवृत्तिप्रवाहरूपामेकाग्रतामत्यक्रान्तेनिरिंधना।
ग्निवदुपशान्तेसर्ववृत्तिकतयासर्ववृत्तिनिरोधरूपेणपरिणतेभवति य
[illegible]स्मिंश्चपरिणामेसति आत्मनारजस्तमोनभिभूतशुद्धसत्वमात्रे
णांतःकरणेनात्मानंप्रत्यक्चैतन्यंपरमात्माभिन्नंसच्चिदानंदघनमनं
तमद्वितीयं[illegible]वेदांतप्रमाणजयाहमस्मीत्यात्मानंपश्यन् आत्मन्येव
परमानंदघनेतुष्यति नदेहेंद्रियसंघातेनवातद्भोग्ये यत्रपरमात्मद
र्शनेसत्यपितद्धिहेत्वभावान्नपश्येदितिज्ञानमंतःकरणपरिणामसर्व
चित्तवृत्तिनिरोधरूपयोगविघातिनिपरेणान्वयः [illegible]कालइतितया
ख्यानमसाधुनक्लेश्यान न्वयात् [illegible] २० ॥

सदानंदीटीका

एवंसामान्यतोयोगंश्रोक्तेदानींविशेषतः समाधिंविस्तरेणाहभगवा
न्योगिनोगतिः १ परिणामविशेषेहियस्मिन्नभ्यासपाटवात् जातेचित्ते
निरुद्धंसत्क्रान्तेनिस्नेहदीपवत् २ यस्मिंश्चपरिणामेसत्यात्मानंचिद्
द्वयं वेदांतमानसंजातवृत्त्यापश्यंस्थिरात्मनि ३ तुष्यत्यात्मसुखादन्यतो
पहेतोरभावतः आनंदःपरएवात्माभेदसंसर्गवर्जितः ४ सएवसु
स्वरूपेणाभिज्ञाप्यतेश्रुतिकर्मभिः यावद्यावत्समोपैतिवृत्तौपश्यंसमाहते

गी.
टी.
ब.

तावत्तावद्धियः स्वास्थ्यं तावत्तावत्स्वतोन्नतिः ६ २० ॥

नीलकंठटीका

यत्रेति एवं चित्तमेकाग्रीभूतं सत् योगसेवया निरुद्धं यत्र यस्यामवस्थायां उपरमते विलीनं भवति यत्र चात्मना चित्तेन आत्मानं निर्विकल्पं पश्यन् आत्मनि तुष्यति न बाह्यार्थेषु तुष्टिं भजते २० ॥

67

आनंदटीका

योगसेवया निरुद्धं चेतो यत्रोपरमते आत्मसाम्यं विश्रांतं सत् ततः परं जेतव्याभावात् प्रयत्नमुत्सृजति यत्र च परस्य कारणस्याभावादात्मनैव करणेन परस्य क्रियया मितं तमस्य कर्मणोऽप्यभावादात्मानं पश्यन् दर्शनक्रियया साम्यं कुर्वन् एवं परस्या भूमिकाया अभावादात्मन्येव विश्रामभूमौ तुष्यति विश्राम्यति तं योगसंज्ञितं विद्यादिति परेणान्वयः एतेन कर्तृकरणकर्माधिकरणानामैकात्म्यं दर्शितम् २० ॥

अथास्य परस्य योगस्य लक्षणमाह

रामकंठटीका

ह — तं योगसंज्ञितं समाध्याख्यमर्थं विद्याज्जानीयात् कं तं यत्र यस्मिन्निरुद्धं इति वृत्तवहिश्चारतया नियमितं चित्तं योगसेवया योगस्य समाधेः आप्यस्यास्य सेवनादाश्रयणादुपलब्धेपरमोपेयत्वान्नैव विश्रांतं स योगांतरविषयं प्रयत्नमुत्सृजति तस्यैव योगस्य निरुत्तरत्वात् अत एव तस्यामवस्थायां योगी यत्रात्मनैवात्मानं पश्यन् स्वसंवेदनेन स्वरूपमनुभवन् आत्मनि स्वभाव एवाधिकरणभूते तुष्यति परां प्रीतिं प्रतिपद्यते तं योगं विद्यादिति संबंधः तदानीं हि निवृत्तसकलबाह्योपरागं चित्तमात्मसमापन्नं समकुह्यसंवेदनलक्षणानंदमेतत्तेनावतिष्ठते २० ॥

अथ समाधिरूपस्य मुख्य योगस्य लक्षणमाह

लासिकी टीका

यत्र यस्मिन्नवस्थाविशेषे योगस्य प्रत्यवमर्शस्य समाधानस्य सेवया अभ्यासेन निरुद्धं निवृत्तवहिश्चारतया सर्वतो नियमितं सच्चित्तं तप्तशिलागलितजलबिंदुवत्स्वयमेवोपरमते निवृत्तव्यापारं भवति विकल्पात्मकं स्वस्वरूपं जहातीत्यर्थः तदानीं हि चित्तं विकल्परूपतां विहाय आत्मरूपं संपद्यते अत एव यत्र चात्मनैव स्वसंवेदनेनैव स्वस्वभावं पश्यन् साक्षात्कुर्वन् आत्मन्येव स्वस्वरूप एव तुष्यति प्रीतिं भजते तं योगसंज्ञितं विद्यादिति चतुर्थेनान्वयः [आत्मन्येव तोष...] २० ॥

पंचोलीटीका

एवं योगाभ्यासबलादेकाग्रीभूतनिवातप्रदीपकल्पचित्तादिरूपं नि
रूपयन् आत्मनोवस्थाविशेषमेव योगस्वरूपं निरूपयति यत्रोपरम
ते सार्द्धैस्त्रिभिः यत्र यदा चित्तं योगसेवया योगानुष्ठानेन निरुद्धं सर्वतो
निवारितव्यापारं उपरमते उपरतिं गच्छति यत्र च आत्मना समाधि
परिशुद्धेनांतःकरणेन आत्मानं परं चैतन्यं ज्योतिःस्वरूपं पश्यन्नात्मन्
आत्मनि तुष्टिं भजते २०॥

रत्नावीरसमिद्धोधिनी

अथ योगलक्षणमाह सार्धैस्त्रिभिः तं प्राणादिसंस्थानावस्था
विशेषं योगसंज्ञितं विद्याज्जानीयादिति वृत्तार्थेन सहान्वयः
तं कमित्यपेक्षायामाह यत्र यस्मिन्प्राणादिसंस्थानावस्थाविशे
ष योगसेवया योगस्य विपाविनयेत्यादौ प्रतिपादितस्वरू
पस्य समतामस्य सेवया निरंतराभ्यासेन निरुद्धं सक
त्यांतरेभ्यः प्रत्यावर्तमानमभ्यमारणो चित्तं कर्मण्येवस्थापितं
उपरमते अनुचितकर्मांतरप्रयत्नमुत्सृजते यत्र च आत्म
नैव निश्चयात्मिकया बुद्ध्यैवात्मनि यत्नेविषये आत्मानंपू
तिमेव साधनं परमप्रपञ्चविचारयन् अयं कर्मयोगी तुष्यति
संतोषमेति २०॥

मधुभाष्य

२०॥

भाषा अनुवाद

यत्सन्यासमिति शब्द योगं तद्विद्धि पाण्डव इसी अध्यायके इस दू सरे श्लोक से योगही को कर्म्म कहा हैं और नासन्यस्तसंकल्पो योगी भवति इस सोलहें श्लोकसे योग शब्दसे समाधि कहा तो इनमे मुख्य योग किसको कहैं इस अपेक्षामे फल औ स्वरूप तथा लक्षण क्रम से समाधि ही मुख्य हैं यह साढे तीनि श्लोक से कहते हैं कि। जिस अवस्था मे योगाभ्यास से निरुद्ध कहे एकाग्रचित्त होता है औ र जिस अवस्था मे आप अपने स्वरूप को देखते हुये सन्तुष्ट हो ता है ऐसी जो समाधि कहे चित्तवृत्ति की एकाग्रता सोई योग है सोई पातञ्जलसूत्र मे कहा कि योगश्चित्तवृत्तिनिरोधः २० ॥

दोहा

जब दिढ थाटें चित्त जो योगभ्यास तिंह रोक जहां आत्मसें आत्म लषें आत्मतुष्ट कहें लोक ॥ २० ॥

सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियं वेत्ति यत्र न चैवायं स्थितश्चलति तत्त्वतः २१॥

शांकरभाष्यं

किंच सुखमिति सुखमात्यन्तिकमत्यन्तमेव भवतीत्यात्यन्तिकं अनन्तमित्यर्थः यत्तद्बुद्धिग्राह्यं बुद्ध्यैवेन्द्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यमतीन्द्रियं गोचरातीतमविषयजनितमित्यर्थः वेत्ति तदीदृशं सुखमनुभवति यत्र यस्मिन्काले नचैवायं विद्वानात्मस्वरूपे स्थितस्तस्मान्नैव चलति तत्त्वतः तत्स्वरूपान्न प्रच्यवत इत्यर्थः २१॥

मिन्द्रिय

आनन्दगिरिकृतटीका

योगसिद्धिकाले प्रकारान्तरेण प्रकटयति किंचेति बुद्धिग्राह्यः स्वात्मभवविषयः इन्द्रियनिरपेक्षस्वात्मभवगम्यत्वेऽतीन्द्रियमिति पुनरुक्तमिमाशंक्याह अविषयेति पदच्छेदः न चेत्यादि स्वरूपेस्थितस्मरणं आत्मस्वरूपं पश्यति तस्मान्नैव चलतीति सम्बन्धः नैवेत्येवकारस्यैवान्वयोक्तिः चकारः समस्या सम्बन्धनीयः यत्रेति पूर्ववत् सम्बन्धः २१॥

श्रीधरकृतटीका

आत्मसुख एव तोषहेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे यत्तदात्यन्तिकं सुखं वेत्ति ननु तदा विषयेन्द्रियसंबंधाभावात्कुतः सुखं स्यात्तत्राह अतीन्द्रियं विषयेन्द्रियसंबंधातीतं केवलं बुद्ध्यैवात्माकारतया ग्राह्यमतएव यत्र स्थितः सन् तत्त्वतः आत्मस्वरूपान्नैव चलति २१

नित्यं

पैशाचभाष्यं

किंच सुखमात्यन्तिकमत्यन्तमेव भवतीत्यात्यन्तिकं अनन्तमित्यर्थः यत्तद् बुद्ध्यैवेन्द्रियनिरपेक्षया गृह्यत इति बुद्धिग्राह्यमतीन्द्रियं इन्द्रियगोचरातीतमविषयजनितमित्यर्थः वेत्ति तादृशं सुखमनुभवति यस्मिन्काले न चैवायं विद्वानात्मस्वरूपे स्थितस्तस्माच्चलति तत्त्वतः तत्स्वरूपान्न प्रच्यवत इत्यर्थः २१॥

त्र

रामानुजभाष्यं

सुखमिति यत्तदतीन्द्रियमात्मबुद्ध्येकग्राह्यमात्यन्तिकं सुखं यत्र योगे वेत्ति अनुभवति यत्र च योगे स्थितः सुखातिरेकेण तत्त्वतो न चलति २१

गी॰ अभिनवगुप्तकृतटी॰ आत्यन्तिकं विषयकृतकालुष्याभावात्सुखं यत्र वेत्ति २१

टी॰ अपरो लाभो यतस्तस्मात् ज्ञानिनां च सत्त्रियोगलब्धप्रयोगः अयं सुखपी

ष॰ निवर्तते चेति वक्ष्यमाणो योगसिद्धार्थः २२ ॥

परमार्थप्रपाटीका

अथात्मसुखस्य विषयसुखातिरिक्तत्वमुत्कृष्टत्वं च दर्शयति सुखमि
ति अथ योगीपरात्मंतिकं सर्वोत्कृष्टं सुखं वेत्ति अनुभवति तदु इन्द्रियाग्रा
केवलं बुद्ध्येवात्माकारतया ग्राह्यमनुभवनीयं न तु विषयेन्द्रियजसुखवदि
त्याह अतीन्द्रियमिति विषयेन्द्रियसंबंधातीतं यथा सुषुप्तौ तथा चातीन्द्रि
यपदेन विषयसुखाद्भेदः प्रदर्शितः आत्यंतिकमिति पदेनोत्कृष्टत्वं दर्शि
तमित्यर्थः अथ पुनरुत्कर्षमेव व्यनक्ति यत्रेति यत्र यस्मिन् सुखे न तत्त्वा
निश्चयेन स्थितः स्थिरीभूतः सन्नैव चलति सुखान्तरेणापि तत्ते परमानं
देस्वानंदानामंतर्भूतत्वात् न तु कर्मध्यात्ममीमांसायां जाग्रन्मनस
न्ता विषयसुखवत्कृतेः न कयता वियाय न आत्मत्वैन्द्रियेभ्योऽपिगतम
पि सुखं विस्मरत्याविलिङ्गा विश्रामायात्मस्वरूपे वर्तितं न सलभं तेनवानी
न्द्रियं हि सोख्यं सर्वानमं स्यापरिणतिविरमात् इन्द्रियेभ्यः स्यात्स्वत्वाचेति २१

वनमालीटीका

आत्मानमेव तोषहेतुमाह सुखमिति यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकं
परिपूर्णं सुखं यत् तत् इन्द्रियाग्राह्यं भगवत्साक्षात्कारविर्भूतस्वरूपत्वानैव
ग्राह्यं सुखं योगी वेत्ति अतीन्द्रियमिन्द्रियजन्यतानाविषयं आत्मस्वरूपस्य
मनसा सहाग्रहेऽपि पूर्णानंदस्याविर्भूतस्वरूपत्वानैव ग्राह्यत्वात् अयं
ताहृशसुखानुभविता यत्रावस्थायां स्थितस्तत्त्वत आत्मस्वरूपात् पूर्णानं
दरूपान्न चलति न योगसंततिं विघातयति परेणाव्ययः यद्यपि तत्सुखं
सुषुप्तावपि भासते तथापि सुषुप्तावावरणस्य नाशो विशेषस्य भगवन्
मूर्तिसान्निध्येन किंचिद्विशेषस्य साक्षात्किंचिदेव सुखं स्फुरति न तु स्वरू
पभूतत्वानस्याविर्भावे [illegible] नाशो ऽस्य सुखे भासते २१ ॥

तत्त्वमैवेजयन्ती

किंच सुखमिति यत्र हितिपुसिद्धे यत्र यस्मिन्समाधियोगे आत्यंतिके नि
त्ये बुद्धिग्राह्ये बुद्ध्यात्माकारया ग्राह्यं ग्रहणयोग्यमतीन्द्रियं वा इन्द्रियवि
षयरहितं सुखं मयं योगी वेत्ति अनुभवति यत्रैव वपुनरयं स्थितः सन् तत्त्वतः

स्वस्वरूपान्नैव चलति बाह्यविषयं नैव गच्छति २१॥
आत्मैक्यवतो हेतुमाह॥ मधुसूदनीटीका
यत्र यस्मिन्नवस्थाविशेषे आत्यंतिकमनंतं निरतिशयं ब्रह्मस्वरूपं अ
तीन्द्रियं विषयेन्द्रियसंयोगानभिव्यंग्यं बुद्धिग्राह्यं बुद्ध्यैव रजस्तमोमल
रहितया सत्त्वमात्रवाहिन्या ग्राह्यं सुखं यो वेत्ति अनुभवति यत्र च स्थि
तोऽयं विद्वांस्तत्त्वतः आत्मस्वरूपान्नैव चलति तं योगसंज्ञितं विद्यादिति प
रेणान्वयः समानः आत्यंतिकमिति ब्रह्मसुखस्वरूपकथनं अती
न्द्रियमिति विषयसुखव्यावृत्तिः तस्य विषयेन्द्रियसंयोगसापेक्षत्वा
त् बुद्धिग्राह्यमिति सुषुप्तसुखव्यावृत्तिः सुषुप्तौ बुद्धेर्लीनत्वात् समाधौ
निरुद्धसर्वकार्यायास्तस्याः सत्त्वात् तदुक्तं गौडपादैः लीयते तु सुषुप्तौ तन्नि
गृहीतं न लीयत इति तथा च श्रूयते समाधिनिर्धूतमलस्य चेतसो निवे
शितस्यात्मनि यत्सुखं भवेत् न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतः
करणेन गृह्यत इति अंतःकरणेन निरुद्धसर्ववृत्तिकेनेत्यर्थः सुखमात्र
सुखास्वादनं गौडाचार्यैः तत्र प्रतिषिद्धं नास्वादयेत्सुखं तत्र निःसंगः
प्रज्ञया भवेदिति महदिदं समाधौ सुखमनुभवामीति सविकल्पकवृ
त्तिरूपा यत्ता सुखास्वादः तेनु व्युत्थानरूपत्वेन समाधिविरोधित्वाद्योगी
न कुर्यात् अनयैव ताद्रूप्या यत्तया सह संगं परित्यजेत् निरुध्यादित्य
र्थः निर्वृत्तिकेन तु चित्तेन सुखरूपसुखानुभवस्तैः प्रतिपादितः स्वस्थं
शांतं सनिर्वाणमकथ्यं सुखमुत्तमम् इति स्पष्टं चैतदुपरिष्टात् करिष्य
ते [illegible] २१

सदानंदीटीका
यत्रावस्थाविशेषे चित्तं नानंतानंदं सुखं विषयेन्द्रियसंयोगानभि
व्यंग्यं धियाग्राह्यं १ सत्त्वमात्रप्रवाहिन्या ग्राह्यं वानुभवत्ययं यत्रायं च
स्थितो विद्वानात्मतत्त्वस्वरूपतः २ नैव प्रच्यवते तं च विद्यादिति प्रयोग
ता ३ २१ ॥

नीलकंठीटीका
किंच सुखमिति आत्यंतिके अनंतं यत्सुखं तत्केवलं बुद्धिग्राह्यं मोक्ष
स सुखवदतो अतीन्द्रियं इंद्रियागोचरं यत्र सुखे स्थितोऽयं न वेत्ति वेद्याभा
वात् किंचिदनुभवति नापि तत्त्वतश्चलति बुद्धितादात्म्याध्यासकालेऽव

गी॰
टी॰
६

91

लतीवेत्तिभातिपरंततत्वतोनचलति तथाचश्रुतिर्ध्यायतीवलेला।
यतीवेतीवशब्दश्चयंजानाध्यानादेरतात्विकत्वंदर्शयति बुद्धेर्ध्यायत्या
ध्यायतीवेतिलेलायमानेलेलायतीवेतिश्रुत्यर्थः यद्वातत्सुखंयत्रायंन
वैववेत्तिकिमपिनैवश्रुतंभवति यत्रस्वादिभिर्वेवाको २१॥

आनंदटीका

यत्रायंयोगीआत्यंतिकंसुखंदुःखासंभिन्नम् अतींद्रियमिंद्रियसुखा
दतिरिक्तंबुद्धिग्राह्यंवेत्तिअयंयोगीयत्रयोगेस्थितः नैवचलति
नाधःपततितंयोगसंज्ञितंविद्यात् २१॥

रामकंठटीका

तथायत्रात्यंतिकमनंतंनिरुपमंस्वरूपानुभवचमत्कारमयंसुखंसह
जआनंदोभिव्यज्यते कीदृशंसुखमतींद्रियंश्रोत्रादीनिबाह्यानींद्रिया
ण्यतीतमतिक्रांतम् अतएवबुद्धिग्राह्यंव्यावर्तितकालिकयाबुद्धिलता
यात्मनःस्वशक्त्यैवग्राह्यंसंवेद्यम् अयंयोगीवेत्तिजानातितंयोगंविद्या
त् तथायत्रस्थितोयस्मिंल्लब्धविश्रांतिरयंयोगीतत्त्वतःपरमात्मरूपात्
परमार्थान्नच्यवतेनविभुज्यते २१॥

आत्मन्येवतोषमाह॥ लासिकी[illegible]टीका

यत्रावस्थाविशेषेयंयोगीअतींद्रियमिंद्रियैरग्राह्यंबुद्धिग्राह्यं तात्कालि
कयावापरूपयात्मशक्त्यासंवेद्यमात्यंतिकमनंतंयत्तत्किमप्यनिर्वाच्यं त्व
सुखमानंदंवेत्ति आत्मतयोपलभते तथाचश्रुतिः समाधिनिर्धूतमल
स्यचेतसोनिवेशितस्यात्मनियत्सुखंभवेत् नशक्यतेवर्णयितुंगिरात
दास्वयंतदंतःकरणेनगृह्यते तदुक्तं विंदुमात्रंवशयातस्यतीर्णमस्तोः
सचेतसः योभवेत्परमानंदःकेनासावुपमीयतेइति तथायत्रस्थितःक
दाचिल्लब्धविश्रांतिःसन्नयंयोगीतत्त्वतः परमार्थतत्वान्नैवचलतिनच्य
वते अत्यानेपिविपरीतभावंनानभजतेइत्यर्थः अतींद्रियमितिविष
यसुखव्यावृत्तिः तस्येंद्रियसंयोगजन्यत्वात् [illegible] २१ ॥ ॥

पंचोलेटीका

आत्मसंवेदनतोषहेतुमाह सुखमिति यत्सुखमात्यंतिकं निरवधि अती
न्द्रियमिन्द्रियव्यापारातीतं बुद्धिग्राह्यं केवलया इन्द्रियनिरपेक्षया बु
द्ध्यैव ग्राह्यं तदीदृशं सुखं यस्मिन्काले वेत्ति तदात्मस्वरूपे स्थितः अयं।
तत्त्वतः परमार्थस्वरूपान्न चलति २१॥

श्रीधरस्वामिसुबोधिनी॥

संतोषहेतुमाह सुखमिति यत्र यस्यामवस्थायां विशे
षे यदात्यंतिकं सुखं निरतिशयं भूमाख्यः तत्तु बुद्धिग्राह्यं बुद्ध्यै
व तत्कालग्राह्यमिन्द्रियाणामविषयं वेदीति संवेत्ति यदेवाकारं अतीन्द्रि
यमप्रत्यक्षमित्ति येन तु भवति तमपाक्यामितियावत् अयं क
र्मयोगी वेत्ति जानाति यत्र चायं स्थितः कृतार्थाभ्यासोऽयं यो
गी स्थितः तन्निश्चयान्न चलति न प्रच्यवते अथवा तत्त्व
तो [illegible] स्वरूपात्स्वात्मन चलति अत्युत्तमाधिको न भवतीति
२१॥

मधुभाष्य

२१॥

92

भाषा अनुवाद

आत्मसन्तोष का हेतु कहते हैं कि जिस अवस्था विशेष मे यो गी जन कोई निरतिशय कहे अनन्त नित्य सुख रूप का अनुभव करते हैं जो कहो कि उस अवस्था मे तो विषय सम्बन्धका अभाव है तो सुख का सम्भव कैसे होय तिसपर कहते हैं कि विषय इ न्द्रिय सम्बन्ध से रहित जो केवल आत्माकाररूपबुद्धि से ग्रहण के योग्य है इसी से उसमे स्थित होय योगी आत्मस्वरूप से विचलि त नहीं होत हैं २१॥

दोहा

अतिसुखजामे बुद्धिसें ग्राह्य सो इंद्री नाहि जानत योगीतत्वसें चलें स्थित जा माहि २१॥

93

यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः यस्मि
न्स्थितोनदुःखेनगुरुणापिविचाल्यते २२॥

शाङ्करभाष्यं

किञ्च यं लब्ध्वेति यं लब्ध्वा यमात्मलाभं लब्ध्वा प्राप्य च अपरमन्यल्ला
भान्तरं ततोऽधिकमस्तीति न मन्यते न चिन्तयति किञ्च यस्मिन्नात्म
तत्त्वे स्थितो दुःखेन शस्त्रनिपातादिलक्षणेन गुरुणा महतापि न वि
चाल्यते २२॥

आनन्दगिरिकृतटीका

प्रकारान्तरेण प्रकृतं योगं विशिनष्टि किञ्चेति आत्मलाभात्परं
विद्यते इति शङ्कां व्यावर्त्य यमात्मलाभमिति लाभान्तरं पुरुषार्थभू
तं ततस्तस्मादात्मलाभादधिकमिति यावत् तं विद्यादित्युत्तरत्र सम्बन्धः य
स्मिन् इत्याद्यवतारयति किञ्चेति उपरिपक्वयोगो यथा दर्शितस्तथा।
दुःखेन महतापि नचैवं विचाल्यते यस्मिं स्थितो योगी तं योगं विद्या
दिति पूर्ववत् २२॥

स्वामिकृतटीका

अचलत्वमेवोपपादयति यमिति यमात्मसुखरूपं लाभं लब्ध्वा ततो
ऽधिकमपरं लाभं न मन्यते तस्यैव निरतिशयसुखत्वात् यस्मिंश्च स्थितो
महता (पि) शीतोष्णादिदुःखेन न विचाल्यते नाभिभूयते येनानिष्टनिवृ
त्तिफलेन अपि योगस्य लक्षणमुक्तं द्रष्टव्यमिति भावः २२॥

पैशाचभाष्यं

किंच यमिति यमात्मानं लब्ध्वा प्राप्यापरं लाभं न मन्यते लाभान्तरं न म
न्यते न चिन्तयति किंच यस्मिन्नात्मके स्थितो दुःखेन शस्त्रपातादिलक्षणे
न गुरुणापि गरीयसापि न विचाल्यते २२॥

रामानुजभाष्यं

यमिति यं योगं लब्ध्वा तं लाभमेव काङ्क्षमाणो नापरं लाभं मन्यते य
स्मिंश्च योगे स्थितो विरक्तोऽपि गुणवत्पुत्रवियोगादिना गुरुणापि दुःखेन
न विचाल्यते २२॥

अभिनवगुप्तकृतटी॰

अपरो लाभो धनदारपुत्रादीनां वस्तुयोगलक्षणयोगः अपरत्वं च त
त्प्रीतिं विना तेन चेति बलवत्स्वभावोऽयमित्यर्थः २२॥ विचाल्यते विशेषेण न चाल्यते
अपितु संस्कारमात्रेणैवास्य प्रथमदशामात्रमेव चलनम् २२

अथैतदेव प्रकटयति यदिति यत्नस्सुखं लब्ध्वा ततः सकाशादपरं लाभ
मधिकं न मन्यते तस्यैव निरतिशयत्वात् यथा सुषुप्तिसुखं प्राप्तः क
श्चिज्जनो वायव्यं प्रबोधितोऽपि कुप्यति तादृशस्य प्रबोधनेऽपि श्रमवायश्र
वणात् श्रुतिरपि तस्मादायतं न बोधयेत् दुर्भिषज्यं हास्य भवतीति।
भाष्यं यस्मात्सुषुप्तो निरतिशयं सुखं भवति तस्मात्कारणादायतं
विस्तृतहस्तपादं तिष्ठितं पुरुषं न बोधयेत् जागरं न प्रापयेत् इयतः
प्रसुप्तं जागरं प्रापितस्य दुर्भिषज्यम् अप्रतीकारं दुःखं भवति किं च यस्मि
न्सुखे स्थितः स्थिरीभूतः सन् गुरुणा महतापि रोगशोकादिदुःखेन
न विचाल्यते स्वावस्थानं प्राप्यते २२॥

वनमालीटी.

उक्तमेवोपपादयति यमिति यं चित्तस्थितिहेतुकं तयालब्ध्वा
वस्थाविशेषं पूर्णानन्दविषयकजीवस्वरूपं तत्तानाविर्भावकस्य परम
मात्मस्य जीवेशैक्यसंपादकेलब्ध्वा प्राप्य निरन्तराभ्यासेन संपाद्य अपरं
लाभं ततोऽधिकं न मन्यते कृतकृत्यं प्राप्तं प्रापणीयमात्मलाभाद्यपरं वि
द्यते इति स्मृतेः एवं विषयभोगवासनया समाधेर्विचालनं नास्तीत्युक्त
काशीतवातमशकाद्युपद्रवनिवारणार्थमपि न ग्राह्यमित्याह यस्मि
न् हरिप्रसादाविर्भूतस्वरूपानन्दमये चित्तावस्थाविशेषे स्थितो योगी गु
रुणा महता शस्त्रपातादिनिमित्तेन महता दुःखेन न विचाल्यते २२॥

कुलमणिजयन्तीटी.

किं च यमिति यं योगं लब्ध्वा प्राप्य ततोऽधिकमतिशयमपरमन्यं लाभं
प्राप्यविषयं न मन्यते न जानाति यस्मिन्योगे स्थितस्तत्र योगी गुरुणा
पि महता पुत्रदारादिमरणरूपेणादिदुःखेन कष्टेन न विचाल्यते शो
कमोहादिना विचलितः सन् योगी योगं न त्यजतीत्यर्थः २२॥

यत्र नचैवायं स्थितश्चलति तत्त्वत मधुसूदनीटी. इत्युक्तमुपपादयति॥

यं च निरतिशयात्मसुखव्यंजकं निर्वृत्तिकं चित्तावस्थाविशेषं ल
ब्ध्वा सततमभ्यासपरिपाके न संपाद्य अपरं लाभं ततोऽधिकं न मन्यते।
कृतं कृत्यं प्राप्तं प्रापणीयमात्मलाभान्न परं विद्यत इति स्मृतेः एवं वि
षयभोगवासनया समाधेर्विचलनं नास्तीत्युक्त्वा शीतवातमशका
द्युपद्रवनिवारणार्थमपि तन्नास्तीत्याह यस्मिन्परमात्मसुखमये नि

हेन्द्रिकविनावस्थाविशेषेस्थितोयोगीगुरुणामहताशस्त्रनिपातादि
निमित्तेनमहतादुःखेननविचाल्यतेकिमुततदल्पेनेत्यर्थः २२ ॥

मदानन्दीटी·

यमभ्यासातिशयाल्लब्ध्वालाभंचिरहृदये ततोनैवापरंलाभमधि
कंमन्यतेबुधः कृतकृत्यतयाश्रमसाफल्यापनयानया परमात्मस्व
रूपेयस्मिन्स्थितोदुःखेननोमुनिः २ महतानाशस्त्रपातादिहेतुकेना
पिचाल्यते ३ २२ ॥

नीलकंठीटीका

दुःखेनशस्त्रपातादिलक्षणेन गुरुणामहता २२

आनंदीटीका

गुरुणापिप्रबलेनापिआध्यात्मिकादिदुःखेननविचाल्यते तदुक्तं कल्पा
न्तवातवोवात्वयांत्वैकतमार्णवाः नपंतद्वादशादित्यानास्तिनिर्मनसां
क्षतिः २२

रामकंठीटीका

तथायंयोगमासाद्यततोधिकंतस्मादुत्कृष्टमपरमन्यंलाभमिष्टप्रा
प्तिंयोगीनमन्यतेनबुध्यते अतएवप्रागुक्तंयत्रस्थितस्तत्त्वतोनच्यवेत
इति अतएवयस्मिंस्थितःसंवृद्धोनिहृतेतरव्यापृतिःसन्योगीगुरुणापि
प्रबलेनापिकेनचिन्मानसेनशारीरेणवादुःखेननविचाल्यते २२ ॥

लासिकी ~~[illegible]~~टीका

किंच-यंयोगंलब्ध्वासाद्य ततोधिकमुत्कृष्टमन्यंलाभमिष्टप्राप्तिंनमन्यते अ
मत्रसुखपोर्निवर्ततेइतिवस्तुस्वभावोयं यस्मिंस्तयोगेस्थितोविश्रांतो
महतापिशीतोष्णादिदुःखेनायंयोगीनविचाल्यतेनव्युत्थाप्यतेकिमुत
त्वल्पेन २२ ॥ ~~[illegible]~~ २२ ॥

पंचोलीटीका

अचलत्वमेवोपपादयति यमिति यत्र यंचात्मलाभंलब्ध्वापरं
लाभांतरंततोधिकमलीनंनमन्यतेयस्मिन् आत्मतत्वेस्थितःगु
रुणामहतापिदुःखेनशस्त्रपातादिलक्षणेननविचाल्यते २२

ग्णावीरसमिद्धोधिनी॥

यमिति यंलब्ध्वा गुर्वादेः सकाशात्प्राप्य ततोधिकमपरंला
भंनमन्यते प्रपंचकर्मयोगीतिशेषः यस्मिंश्चस्थितः गुरु
णापिदुःखेन नविचाल्यते २२॥

मधुभाष्य

२२॥

भाषाअनुवाद

इसीका प्रबलत्व प्रतिपादन करते हैं कि आत्म आनंद सुख जो आत्मस्वरूप लाभ लक्षित करके पायकरि और लाभ फेरि उस से अधिक नहीं गनते और जिस मे स्थित होय बड़ेबड़े पीन उस आदि दुख से भी दुखी नहीं होते अर्थात् बड़ेदुख भी उसका कुछ नहीं कर सकते हैं २२

दोहा

पाय जाहिको लाभको अधिक और नहिमान जामेस्थित होय दुखमें गुरुसें चलै न ज्ञान २२॥

96

तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं सनि
श्चयेनयोक्तव्योयोगोऽनिर्विण्णचेतसः २३॥

शांकरभाष्यं

यत्रोपरमते इत्याद्यारभ्य यावद्भिर्विशेषणैर्विशिष्ट आत्मावस्थाविशे
षो योग उक्तः तमिति तंविद्यात् विजानीयात् दुःखसंयोगवियोगंदुः
खैः संयोगो दुःखसंयोगस्तेनवियोगो दुःखसंयोगवियोगस्तं दुःख
संयोगवियोगं योगइत्येव संज्ञितं विपरीतलक्षणेनविद्यात् विजानी
यादित्यर्थः योगफलमुपसंहृत्य पुनरन्वारम्भेण योगस्य कर्तव्य
तोच्यते निश्चयानिर्वेदयोर्योगस्य साधनविधानार्थं स यथोक्तफलो
योगो निश्चयेनाध्यवसायेन योक्तव्योऽनिर्विण्णचेतसा न निर्विण्णं अ
निर्विण्णं तच्चेतस्तेन निर्वेदरहितेनचेतसा चित्तेनेत्यर्थः २३॥

आनन्दगिरिकृतटीका

तंविद्यादित्याद्युपक्षिते प्रत्यक्षवतारयति यत्रेति तमित्यात्मावस्था
विशेषं परामृशति दुःखसंयोगस्य वियोगो वियोगसंज्ञितो युक्त
ते स कथं योगसंज्ञितः स्यादित्याशंक्याह विपरीतेति इयं हि यो
गावस्था समस्तदोषनिखिलदुःखभेदेति दुःखसंयोगाभावो यो
गसंज्ञामर्हतीत्यर्थः उपसंहृतयोगफले किमिति पुनर्योगस्य क
र्तव्यमुच्यते तत्राह योगफलमिति प्रकारान्तरेण योगस्य कर्तव्यतो
पदेशारम्भोऽन्वारम्भः योगे प्रवृत्तानन्तरं तत्क्षणादुक्तां संसिद्धिमलभ
मानः संशयानो विवर्तेतेति तन्निवृत्त्यर्थं पुनः कर्तव्योपदेशोऽयं वा नि
ति मत्वाह निश्चयेति तयोः साधनत्वविधानमेवान्तरयोजनया साधय
ति स यथेति इह जन्मनि जन्मान्तरे वा सेत्स्यतीत्यध्यवसायेन।
योक्तव्यः कर्तव्यः २३॥

स्वामिकृतटीका

यत एवंभूतोऽवस्थाविशेषस्तमाह तमित्यर्थेन दुःखशब्देन दुःखमिश्रं वा
वैषयिकं सुखमपि गृह्यते तेन दुःखसंयोगेन संस्पर्शमात्रेणापि वियोगो य
स्मिन् तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमा।
त्मनो क्षेत्रज्ञस्य योजनं योगः यद्वा दुःखसंयोगेन वियोग एव [illegible]

गी.
टी.
ष.

शाद्ववदिह फलत्यागाद्योगः उच्यते कर्मणि तु योगशब्दः तदुपायत्वादौपचारिक एवेति भावः यस्मादेवं महाफलो योगः तस्मात्सर्वयत्नेनाभ्यसनीय इत्याह स निश्चयेनेति सार्धेन स योगो निश्चयेन शास्त्राचार्योपदेशजनितेन योक्तव्योऽभ्यसनीयः यद्यपि शीघ्रं न सिध्यति तथाप्यनिर्विण्णचेतसा निर्वेदरहितेन चेतसा योक्तव्यः दुःखबुद्ध्या प्रयत्नशैथिल्यं निर्वेदः ॥ २३ ॥

97

पैशाचभाष्यं

यतोपरमते इत्यारभ्य यावद्भिर्विशेषणैः विशिष्ट आत्मा [illegible] तथावस्थाविशेषो योगशब्दकः तं विद्यात् दुःखसंयोगवियोगं दुःखेन संयोगो दुःखसंयोगस्तेन वियोगो दुःखसंयोगवियोगः इत्येवं संज्ञितं विपरीतं विद्यादित्यर्थः योगफलमुपसंहृत्य पुनरन्वारम्भेण कर्तव्यतास्य निश्चयानिर्वेदयोः साधनत्वविधानार्थं स यथोक्तफलो योगः निश्चयेनाध्यवसायेन योक्तव्यः अनिर्विण्णचेतसा न निर्विण्णं तच्चेतस्तेन निर्वेदरहितेन चित्तेनेत्यर्थः ॥ २३ ॥

योगस्य या

मनेर्विण्णं

रामानुजभाष्यं

तमिति तं दुःखसंयोगवियोगं सममतीकाकारं योगशब्दाभिधेयं ज्ञानं विद्यात् स एवंभूतो योगः इत्यारंभदशायां निश्चयेनानिर्विण्णचेतसा। सा हृष्टचेतसा योक्तव्यः ॥ २३ ॥

अभिनवगुप्तकृतिः

विचारालम्बने विशेषेण न कालस्वेच्छापि न संस्कारमात्रेणैवास्य प्रयत्नमलम् मात्रमेव चलनं करणादिवशात्तत्स्फुरणया ॥ २३ ॥

विनष्टो वतादं किंमयाप्रतिपत्तव्यमित्यादे दुःखसंयोगस्य वियोगे यत्नः स च निश्चयेन आस्तिक्यजनितया श्रद्धया सर्वथा योक्तव्योऽभ्यसनीयः २३

परमार्थप्रपाटी

एवंभूतो यः अवस्थाविशेषः स एव योगशब्दव्यपदेश्य इत्याह तं विद्यादिति तं योगसंज्ञितं विद्यात् योगो हि परमात्मना संयोजनं यथा सुप्तौ परमात्मना संयतेन नाभिविष्टोऽपि श्रुतिरपि एवमेवायं शारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नान्तरमिति भाष्यं एवमेव सुषुप्तिवत् शारीरः शारीरो व्यवहितं परमात्मना संयतेन जीवेन परिष्वक्तो आलिंगितेन एकीभावे सति बाह्यमान्तरं वा किंचिद्वेदनं नास्तीति अथ किंभूतं योगं दुःखसंयोगवियोगं दुःखेन सह संयोगो येषां ते दुःखसंयोगा विषयास्तेषां वियोगो यस्मिन् अनेन विषयसुखमपि दुःखमेव

नर्थं तमिति तं विद्यं अथ योगविनिर्वाहार्थमाह स इति एवं स यो। गः निश्चयेन नियमेन योक्तव्यः अभ्यसनीयः अथ एवमभ्यासेन शी घ्रसिद्धिर्भवति तथापि दुःखेन मत्वा नेमाह अनिर्विण्णचेतसेति न निर्वेदं प्राप्तं चेतो यस्य तेन अन्तर्हितः करणेनेत्यर्थः २३ ॥

वनमालीटीका

यत्रोपरमत इत्यारभ्य चतुर्भिर्विशेषैरविद्यावरणनिवर्तकस्वरूपं। तेदृनीवस्वरूपाविर्भावहेतुं भगवत्प्रसादसंपादकचित्तावस्थाविशेष युक्तं चित्तवृत्तिनिरोधं दुःखसंयोगस्य जीवे दुःखसंबंधस्य वियोगं। सर्वदुःखविरोधित्वेन दुःखवियोगमेव योगसंज्ञितं योगसंज्ञितं वियो गशब्दार्हमपि विरोधिलक्षणया योगशब्दवाच्यं विद्यात् जानीयात् एतादृशो योगो निश्चयानिर्वेदयोः साधनत्वं विनीयाह स इति निश्चयोक्त फलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयार्थः समयेव मध्यवसायेन योक्तव्योऽभ्यसनीयः अनिर्विण्णचेतसा एतावतापि का ले न योगो न सिद्धः किमतः परं कष्टमनुतापो निर्वेदस्तद्रहितेन चे तसा इह जन्मनि जन्मान्तरे वा सेत्स्यति किं त्वरयेत्येवं धैर्ययुक्तेन मन सेत्यर्थः २३ ॥

हनमवैजयन्ती

किंच तं विद्यादिति दुःखसंयोगवियोगं दुःखशब्देन वैषयिकं सुख मपि गृह्यते तस्य दुःखपरिणामत्वात् दुःखसंयोगस्य वियोगः ध्वंसा भावो यस्मिंस्तं योगसंज्ञितं योगशब्दवाच्यं तान्योगं तं विद्यात् जानी यात् एवंभूतो योगः आरम्भदशायां निर्विण्णचेतसा निर्विण्णाः कृतवि षयेष्वागात्मके वैराग्ययुक्ते चेतो यस्य स तथा तेन यद्वा अनिर्विण्णचे तसा योगाभ्यासदशायां अस्मादिवान्तःखादयिन निर्विण्णवैराग्ययुक्तचे। तो यस्य तेन योगिना निश्चयेनायं योगो मम अनुष्ठानेन सेत्स्यत्येवेति व्यव सायेन योक्तव्योऽनुष्ठेयः २३ ॥

आरंभदशायां

मधुसूदनीटीका

यत्रोपरमते इत्यारभ्य चतुर्भिर्विशेषणैर्योऽनिर्वृत्तिकः परमानंदाभि व्यंजकः चित्तावस्थाविशेषउक्तः तं चित्तवृत्तिनिरोधं चित्तवृत्तिमयस र्वदुःखविरोधित्वेन दुःखवियोगमेव संतं योगसंज्ञितं वियोगशब्दार्हं

मपि विरोधिलक्षणया योगशब्दवाच्यं विद्यात् जानीयात् तं योगश
ब्दानुरोधात् केचिन्मंदं प्रतिपद्येरन्नित्यर्थः तथा च भगवान्पतंजलिरसू
त्रयत् योगश्चित्तवृत्तिनिरोध इति योगो भवति दुःखहेति यत् प्राक्
तदेतदुपसंहृतं एवंभूते योगे निश्चयानिर्वेदयोः साधनत्वविधानाय
स यथोक्तफलो योगो निश्चयेन शास्त्राचार्यवचनतात्पर्यविषयो यथार्थः
स तथैवेत्यध्यवसायेन योक्तव्योऽभ्यसनीयः अनिर्विण्णचेतसा यत्नाव
तापि कालेन योगो न सिद्धः किमतः परं कष्टमित्यनुतापो निर्वेदः तद्रहि
तेन चेतसा इहजन्मनि जन्मांतरे वा सेत्स्यति किं त्वरयेति धैर्ययुक्तेन
मनसेत्यर्थः तदेतद्गौडपादैरुदाहृतं उत्सेक उदधेर्यद्वत् कुशाग्रेणै
कबिंदुना मनसो निग्रहस्तद्वद्भवेदपरिखेदत इति उत्सेक उत्सेचनं
शोषणाध्यवसायेन जलोद्धरणमिति यावत् अत्र संप्रदायविद आ
ख्यायिकामाचक्षते कस्यचित् किल पक्षिणोंडानि तीरस्थानि तरंगवे
गेन समुद्रोपजहार स च समुद्रं शोषयिष्याम्येवेति प्रयत्नः स्वमुखाग्रेणै
कैकं जलबिंदुमुपरि प्रचिक्षेप तदा च बहुभिः पक्षिभिर्बंधुवर्गैर्वार्यमा
णोपि नैवोपरराम यदृच्छया च तत्रागतेन नारदेन निवारितोप्यस्मिन्ज
न्मनि जन्मांतरे वा येन केनाप्युपायेन समुद्रं शोषयिष्याम्येवेति प्रति
जज्ञे ततश्च दैवानुकूल्यात् कृपालुर्नारदो गरुडं तत्साहाय्याय प्रे
षयामास समुद्रस्तु ज्ञातिद्रोहेण त्वामवमन्यत इति वचनेन ततो गरु
डपक्षवातेन शुष्यन् समुद्रो भीतः तान्यंडानि तस्मै पक्षिणे प्रददाविति
एवमखेदेन मनोनिरोधे परमधर्मे प्रवर्तमानं योगिनमीश्वरोऽनुगृह्णा
ति ततश्च पक्षिण इव तस्याभिमतं सिध्यतीति भावः [निं[illegible]]
[illegible]: २३ ॥

मरानंदीटीका

यो योऽपरमते चित्तमित्यारभ्य विशेषणैः चित्तावस्थाविशेषो य उक्तः।
त्वचित्तसंयमे १ सर्वदुःखविरोधित्वात् दुःखयोगस्य वा तं जानीयात्
दुःखसंयोगवियोगसंतमयाद् २ विपरीतलक्षणेनैव योगशब्दाभिधेय
के शास्त्राचार्यगिरां भावविषयोऽर्थः स निश्चयः धियेति दृढनिश्चयेन योगं
कार्यं तयोदितः सत्यमेवेति निश्चित्य भवेस्मिन्नाभवांतरे सकाशानिर्वेदम
सेत धैर्ययुक्तेन चेतसा ४ योगोऽभ्यसनीयोऽयं यथोक्तसांप्रदायिकैः ३

त्सेकउदधेर्यद्वत्कुशाग्रेणैकबिंदुना ६ मनसो निग्रहस्तद्वद्भवेदपरि
खेदतः १२३ ॥

नीलकंठीटीका

तमिति यत्रोपरमते चित्तमित्यादिनोक्तलक्षणं तं दुःखसंयोगस्या।
न्तःकरणसंबंधस्य वियोगमेव संतं विरुद्धलक्षणया योगसंज्ञितं।
विद्यात् योगफलमुपसंहृत्य पुनर्निश्चयानिर्वेदयोः साधनत्वविधा।
नपूर्वकं तमेव शास्तिस्तोपि पथ्यं वेदितव्यमिति यावेन विपत्ते सम्या
हिता स योगः निश्चयेन अध्यवसायेन श्रुतिविहितं निर्वेदरहितेन चेतो
यस्य तेन योक्तव्यः अभ्यसनीयः यदा शांतो दांत उपरतस्तितिक्षुः समा
हितो भूत्वात्मन्येवात्मानं पश्येदिति श्रुतिविहितं श्रमेतरदृष्टश्रवावि।
त्रयदेपेन शमादिषट्कमत्र कमनो विधीयते तत्र निश्चयेनेति गुरु
वेदवाक्योरो फलावश्यंभावनिश्चयलक्षणा श्रद्धा उक्ता निश्चयपदेन गृह्य
ते तथा निर्विण्णचेतसेति वैराग्येणेदं समहिम्न बललक्षणानि तितावि
धीयते इति त्रयं २३ ॥

आनंदीटीका

दुःखेति दुःखहेतुभूतं सौसंयोगः प्रकृतस्य महाभूतादिप्रकृत्यंतैः प्रकृति
विकारैस्तैः संबंधः तस्य वियोगे विश्लेषणांतं सर्वशोकदुःखयोक्तविशेषण
विशिष्टं योगसंज्ञितमष्टांगयोगसंज्ञं जानीयात् अनिर्विण्णचेतसा उद्वि
ग्नमनसा सदभ्यासपरेण सोऽयं योगः परमनिःश्रेयसप्राप्तिहेतुरवश्यं नि
श्चयेन योक्तव्यः अध्याहार्यवाक्यार्थः परिणामतापसंस्कारदुःखैर्गुण
वृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः सर्वस्यापि प्राणानिवृत्तिः चेतना
चेतनसाधनाधीनः स्वजनपातादिसुखानुभवस्तस्मिन् रागजः कर्माश
यः द्वेष्टि दुःखसाधनानि मुह्यति चेति द्वेषमोहकृतोपि कर्माशयः ना
पहत्य भूतान्युपभोगः संभवतीति हिंसाकृतोप्यस्ति शारीरः कर्माशयः
विषयसुखं चाविद्येत्युक्तम् या भोगेष्विंद्रियाणां तृप्तेरुपशांतिस्तत्सु
खम् या लौल्यादनुपशांतिस्तद्दुःखम् न चेंद्रियाणां भोगाभ्यासेन तृ
प्तिः कर्तुं शक्या यतो योगाभ्यासमनुविवर्धंते रागाः कौशलानि चेंद्रिया
णामित्युपायः सुखस्य भोगाभ्यास इत्येवापरिणामदुःखता सुखाव

५

स्यायामपि योगिनं क्लिश्नाति सर्वस्य हेयत्वानुविद्धस्य तेन नाचेतनस्याधनायो
नस्तापानुभव इति द्वेषजः कर्माशयः सुखसाधनानि प्रार्थयमानः कायेन
न वाचा मनसा च परिस्पन्दते ततः परमनुगृह्णात्युपहंति चेति परानुग्र-
हपीडाभ्यां धर्माधर्मावुपचिनोति स कर्माशयो लोभान्मोहाच्चेति ता-
पदुःखता सर्वेषु भावात्स्वसंस्काराशयः दुःखानुभवादपि दुःखसं-
स्काराशय इत्येवं कर्मभ्यो विपाकेनानुभूयमाने सुखे दुःखे वा पुनः कर्माश-
यप्रचय इति संस्कारदुःखता तथा प्रकाशप्रवृत्तिस्थितिरूपा बुद्धिगुणाः
परस्परानुग्रहतंत्राः भूत्वा शांतं घोरं मूढं वा प्रत्ययं त्रिगुणमेवारभंते
रूपातिशया वृत्त्यतिशयाश्च परस्परेण विरुध्यंते सामान्यानि त्वतिश-
यैः सह प्रवर्तंते एवमेते गुणा इतरेतराश्रयेणोपार्जितसुखदुःखमोह-
प्रत्यया इति सर्वे सर्वरूपा भवंतीति गुणवृत्तिविरोधदुःखता इत्येतद्दुः-
खमेव सर्वं विवेकिन इति तदस्य महतो दुःखसमुदायस्य प्रभवबीज-
मविद्या तस्याश्च सम्यग्दर्शनमभावहेतुरिति तद्दुःखबहुलः संसारो
हेयः प्रधानपुरुषयोः संयोगो हेयहेतुः संसारस्यात्यंतिकी निवृत्तिर्हा-
नम् हानोपायः सम्यग्दर्शनम् इत्यादि योगानुशासनोपदेशात् पुरुषस्य प्र-
धानादिभिः संयोगः संसारहेतुः तस्य वियोगं संयमेन तत्तद्भूमिजयक्र-
मात् विशेषणं सर्वेभ्यः प्रकृतिविकारेभ्यः प्रधानपर्यंतेभ्यः पृथग्भाव-
योगं संपादिता मा दुःखसिद्धांतितं चात्र बुद्धिपुरुषसंयोगाभावे आत्यंतिको
दुःखोपरम इति २२ ॥

रामकंठीटीका

ततो मुमुक्षुणाप्यते तं योगसंज्ञितमर्थं विद्यात् कीदृशं दुःखसंयोगवि-
योगं दुःखं विषयेंद्रियप्रवृत्तिजनितो रजसः क्लेशस्तेन संयोगः सा-
दृश्यासंबंधस्तस्माद्वियोगो विरहस्तं हेयवस्तुप्रार्थनाजन्मना दुः-
खेन संबंधाभाव एवं वियोगारंभार्थः स एव तत्त्वतो योगः परः समाधि-
निरुद्धत्वान्नेरलाभलक्षणा महाफलहेतुः निश्चयेन तिःसंदेहत्वेनानि-
र्विण्णचेतसानुद्विग्नमनसा योक्तव्यः समाधातव्यः अल्पभूमिकस्य
हियोगिनः प्रथमं संदेहः श्रमदुःखतत्त्वाभ्यासदशायां क्लेशः संभाव्य-
ते इति निश्चयेन निर्विण्णचेतसा मनसा योक्तव्यस्तज्जन्म [illegible]

[illegible] २१ ॥

यएवंभूतोवस्थाविशेष लासिकी [illegible]टीका स्तमाहार्धेन ॥

तमुक्तविशेषणमर्थयोगसंज्ञितं योगशब्दवाच्यं विद्याज्जानीयात् कीदृशं दुःखेन त्रिविधेन राजसेन क्लेशेन संयोगः संसारदशायां संबंधस्तस्य वियोगो विरहो यस्मात्तम् वियोगएव योग इति विरोधलक्षणया परमात्मनात्मन्नस्य योजने योग इति योगशब्दस्याभिधाव्यापारः यत एवं वियोगमहाफलोयं योगः ततः स योगः परः समाधिर्निश्चयेन शास्त्राचार्योपदेशजनितेन योक्तव्योभ्यसनीयः केनानिर्विण्णचेतसा पुरुषेण यद्यपि शीघ्रं न सिद्ध्यति तथाप्यनिर्विण्णमनुद्विग्नमपि यथामोदवतरं अथवा दुःखबहुलं संसारं प्रति निर्विण्णं विरक्तं चेतो यस्य तेन [illegible] २३ ॥

पंचोलीटीका

एवं योगस्वरूपमुक्त्वा तस्य महाफलदर्शनेनावश्यक[illegible]यत्नमभ्यसनीयत्वमाह तं विद्यादिति तं योगसंज्ञितं दुःखसंयोगवियोगं सकलदुःखाभावरूपं विद्यात् स यथोक्तफलो योगः निश्चयेन निश्चयवता निर्विण्णचेतसा ग्लानिरहितेन चेतसा सोयमनयोक्तव्यः दुःखशब्देन दुःखमिश्रितत्वाद्वैषयिकं सुखमपि गृह्यते दुःखस्य संयोगेन स्पर्शमात्रेणापि वियोगो यस्मिंस्तमवस्थाविशेषं योगसंज्ञितं योगशब्दवाच्यं जानीयात् परमात्मनात्मनः संयोजने संयोगः यद्वा दुःखसंयोगेन वियोग एव भूयोकानर्थशब्दवदितद्वलत एव योग उच्यते कर्मणि तु योगशब्दस्तदुपायत्वादौपचारिकः चेति भावः २२

रणवीरसमिद्धोधिनी ॥

तं योगसंज्ञितं विद्यादित्यन्वयः कीदृशं तं दुःखसंयोगो विरहो येन तं सर्वदुःखेभ्यो विमोचकमित्यर्थः प्राणादिसंधानादिना दृ तेषु प्राप्तेषु तज्जनितदुःखस्य हानिरुपमेयभाविनीति भावार्थः अ तस्य समाधिफलत्वात् योगो निश्चयेन योक्तव्यो ऽपेक्षः स्वाचित्तकर्मः

प्रहृतेनक्षत्रियप्रवरेणेतिशेषः कथंभूतेननिर्विलवेजसा नि
र्विलसंसंकल्पांतरेणेत्यर्थः २३॥

मधुभाष्य

२३॥

भाषा अनुवाद

ऐसी दुखसंयोग के अभाव अवस्था विशेष को योग संज्ञा जानो
दुखशब्द से विषय सुख जो हैं उनको ग्रहण करतेहैं अर्थात् जि
स अवस्था मे दुख का लेशमात्र भीनहीं है सोई अवस्था योग है
इससे निर्विन्न होय कर निश्चय से योग अभ्यास करना अवश्य।
ही कर्तव्य है निर्वेद शब्दका अर्थतो यत्न करने मे शैथिल्य है सो
ई कहा कि अनिर्विन्नचित्त होय अर्थात् शैथिल्य छोडि यत्नपूर्वक
अभ्यास करै २२

दोहा

तिह दुखनाशक जानिए योगनाम जिह कोय निश्चयजुत
में होत सो योग अकाम चित सोय २३॥

संकल्पप्रभवान्कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः २४ ॥

शाङ्करभाष्यं

किञ्च संकल्पेति संकल्पप्रभवान् संकल्पः प्रभवो येषां कामानां । ते संकल्पप्रभवाः कामास्तान् कामांस्त्यक्त्वा परित्यज्य सर्वानशेषतो निर्लेपेन किञ्च मनसैव विवेकयुक्तेन इन्द्रियग्राममिन्द्रियसमुदायं । विनियम्य नियमनं कृत्वा समन्ततः समन्तात् २४ ॥

आनन्दगिरिकृतटी·

इतश्च योगस्य कर्तव्यत्वमिति प्रतिजानीते किञ्चेति केन क्रमेण । कर्तव्यत्वमित्यपेक्षायामाह संकल्पेति संकल्पः शोभनाध्यासः सर्वा । न्त्यक्त्वा पुनरशेषत इति पुनरुक्तिरित्याशंक्याह निर्लेपेनेति यथा शेषो न भवति तथा सर्वेषां कामानां शोभनाध्यासाधीनानां त्याग स्य योगानुष्ठाने शेषत्ववद्विवेकयुक्तेन मनसा करणसमुदायस्य स र्वतो नियमनमपि तत्र शेषत्वेन कर्तव्यमित्याह किंचेति २४

स्वामिकृतटीका

किंच संकल्पेति संकल्पात्प्रभवो येषां तान्योगप्रतिकूलान् सर्वान्का मानशेषतः सवासनांस्त्यक्त्वा मनसा विषयदोषदर्शिना सर्वतः प्रस रन्तमिंद्रियसमूहं विशेषेण नियम्य योगो योक्तव्यः इति पूर्वेणा न्वयः २४ ॥

पैशाचभाष्यं

किंच संकल्पः प्रभवो येषां कामानां ते संकल्पप्रभवाः कामास्तांस्त्य क्त्वा परित्यज्य सर्वानशेषतो निःशेषं निर्लेपं किंच मनसैव विवेकयु क्तेन इंद्रियग्राममिंद्रियसमुदायं नियम्य नियमनं कृत्वा समंततः समं तात् २४

रामानुजभाष्यं

स्पर्शजाः संकल्पजाश्चेति द्विविधाः कामाः स्पर्शजाः शीतोष्णादयः । संकल्पजाः पुत्रपौत्रक्षेत्रादयः तत्र संकल्पप्रभवान्स्वरूपेणैव त्यक्तुं शक्यान्कामान्सर्वान्मनसैव तदनन्वयानुसंधानेन त्यक्त्वा स्पर्शजेष्ववर्ज नीयेषु तन्निमित्तहर्षद्वेषौ त्यक्त्वा समन्ततः २४ ॥

श्रुनिर्विलम्बुपेयप्राप्त्योद्धृढतरं संसारंदुःखबहुलं प्रतिनिर्विण्णं चेतो यस्य कामानामुपायत्याग उपायः संकल्पत्याग इत्याह +

गी. टी. ६

10

अभिनवगुप्तकृतटीका

+ मनसैव न व्यापारोपरमेण धृतिगृहीतया क्रमात्क्रमम् अभिलाषं स्वात्मनि कृत्वा किंचिदपि न चिन्तयेदिति विषयाणां त्यागग्रहणादिकं यथा त्वन्यथा ध्याने न किंचिदपि चिन्तयेदिति तत्रासम्भवन्न हि चिन्तं शून्यवादप्रसंगात् २४ ॥ २५ ॥

परमार्थप्रपाटीका

एवमभ्यासयोगमुक्त्वाधुना राजयोगं वक्तुमारभते संकल्पेत्यादिना संकल्पात्प्रभव उत्पत्तिर्येषां तेन तथाभूतान्ये कामास्तान्सर्वानशेषतः त्यक्त्वा मनसाभिः सहत्यक्त्वा तत्रापि कारणमाह मनसेति समन्ततः सर्वतोऽनेकमिन्द्रियग्राममेव समूहं मनसैव नियम्य नतु धारणादियोगैः तत्के नमाहिचेतस्स्वमित्र नस्तनोऽपि देहेन्द्रियाद्येनेकरूपमुकमेव यत्कृतापुपविशतीति संविचारयस्वस्वनिदानमेतरिति २४ ॥

वनमालीटीका

किमभ्यसनीयं तत्राह संकल्पेति संकल्पो दुष्टेष्वपि विषयेषु शोभनत्वदर्शनेन शोभनत्वं प्रीतिस्तस्मात्प्रभवो येषां ते संकल्पादिस्तस्मादित्यादिति कामाभवन्ति तान्शोभनत्वं प्रीतिजनितान् विचारजन्याशोभनत्वनिश्चयेन शोभनत्वं प्रीतिनिवृत्त्या दृष्टेषु स्वकुवेदनवनितादिष्वदृष्टेषु पारिजातादिषु प्रवृत्तिषु वांतपायसवन्नत्यक्तबाह्यपर्यन्तानशेषतः सवासनांस्त्यक्त्वा अत एव कामपूर्वकत्वादिन्द्रियप्रवृत्तेस्तत्राशमति विवेकयुक्तेन मनसैवेन्द्रियग्रामं चक्षुरादिसमूहं समन्ततः सर्वेभ्यो विषयेभ्यो विनियम्य शनैः शनैरुपरमेदित्यन्वयः २४ ॥

हनुमद्वैजलीटीका

नन्वीदृशं योगमारभमाणो योगी प्रथमं किं कार्यं करोतीत्यपेक्षायामाह संकल्पप्रभवान्निति यद्यपि कामाः द्विविधाः संकल्पप्रभवाः स्पर्शप्रभवाश्च तथापि स्पर्शप्रभवानां कामानां मनोऽधीनत्वात्तेऽपि संकल्पप्रभवा एवम्; संकल्पप्रभवान्संकल्पान्मनोवृत्तिविशेषात्प्रभवः उत्पत्तिर्येषां तेन तथाभूतान्संकल्पजातान्देहेन्द्रदारापुत्रपौत्रादीन्स्पर्शांश्च शीतोष्णादीन्सर्वान्नैहिकामुष्मिकभोगविषयानशेषतो वासनासहितान्कामान्विषयाभिलाषरूपान्सम्यक्परित्यज्य मन

मेव विषयदोषदर्शिनेंद्रियग्राममकरणसमूहं समंततः सर्वस्मा
द्विषयात् विनियम्य संकोच्य कृत्वा शनैः शनैरुपरमेदित्यनेना
न्वयः २४

किं कृत्वा योगोऽभ्यसनीयः॥

मधुसूदनीटीका

संकल्पो दृष्टेष्वपि विषयेषु शोभनत्वादर्शनेन शोभनाध्यासः त
स्माच्च संकल्पादिदं मे स्यादिदं मे स्यादित्येवंरूपः कामः प्रभवंति तान् शोभनाध्या
सप्रभवान् विषयाभिलाषान् विचारजन्याशोभनत्वनिश्चयेन शोभ
नाध्यासबाधात् दृष्टेषु स्रक्चंदनवनितादिष्वदृष्टेषु चेंद्रलोकपारि
जाताप्सरः प्रभृतिषु सर्वानपायसमवत् स्वतएव सर्वान् ब्रह्मलो
कपर्यंतानशेषतः निरवशेषान् सवासनांस्त्यक्त्वा एतच्च कामप्र
भवत्वादिंद्रियप्रवृत्तेस्तदपाये मतिविवेकयुक्तेन मनसैवेंद्रियग्रा
मं चक्षुरादिकरणसमूहं विनियम्य समंततः सर्वेभ्यः विषयेभ्यः प्र
त्याहृत्य शनैः शनैरुपरमेदित्यन्वयः २४॥

(margin: इदं मे स्या)

सदानंदीटीका

दृष्ट्वा संसारमागारमापदां धीनिजन्मनां विरज्यात्यक्तसर्वस्वभो
गेभ्यो मतिमान्नरः १ कृतपादरतो भूत्वा सद्गुरुं प्राप्य शांतिदं लब्ध्वा
ततः परब्रह्मोपदेशं योगमभ्यसेत् २ यावद्ब्रह्माद्वयानंदे प्रतिष्ठा
निश्चला परा धियो न विंदते तावद्योगो योगकृत्प्रारभात् ३ प्रतिष्ठा
यां च सिद्धायां कृतकृत्यो भवेन्नृतिः एतद्धृदि निधायाह भगवान्भूत
भावनः ४ इदं मे स्यादिदं मे स्यादिति संकल्पजातिमान् शोभनाध्यास
जान्कामान्दृष्टेष्वपि विषयेष्वपि ५ स्रक्कामभोगाभिलाषाख्यान्दोषदृष्ट्या
त्यशेषतः सर्वान्हित्वा लोकांस्त्यक्त्वा मनसा सहितान्नृतिः प्रमाद्येंद्रि
यग्रामं विषयेभ्यः समंततः कामापाये विवेकेन प्रकाशीयं तया
तथा ॥२४॥

नीलकंठीटीका

अथ शमदमोपरमसमाधानिक्रमेण श्लोकद्वयेन विधत्ते संकल्पेति
संकल्प इदं मे भूयादिति चेतोवृत्तिः ततः उद्भवो येषां तान् कामान् का
म्यमानान् विषयान् अशेषतो वासनोच्छेदपूर्वकं संकल्पनिरोधेन

त्यक्त्वा एतेनान्तरिन्द्रियनिग्रहलक्षणः शम उक्तः बाह्येन्द्रियनिग्र
हलक्षणमिममाह मनसैवेति विषयदोषदर्शिना मनसैव सर्वतः
सर्वप्रकारेण श्रोत्रादिकमिन्द्रियग्रामं समन्ततः सर्वेभ्यो विषयेभ्यो वि
नियम्य उपरमेदित्युत्तरेणान्वयः २४ ॥

आनन्दीटीका

एवंलक्षणस्य ज्ञानयोगसिद्ध्युपायमाह ॥ २४ स्पष्टार्थम्

रामकण्ठीटीका

क्रमेणैतद्व्याख्यायते २४ ॥ अग्रिमश्लोके उक्तार्थम् ॥ एवं बाह्यविषयपरिहारक्रमे समाधिसिद्धिमभिधाय पुनरपि प्रकृतं कर्मयोगक्रममेव समाश्रयन्तीं सिद्धिं प्रदर्शयितुमा(ह) णाचित्तवृत्तिनिरोधलक्षणं

लासिकी [illegible]टीका

+ एवं ज्ञानयोगलक्षणमुक्त्वा सर्वशास्त्रसारभूतमुपदेशं सर्वं ज्ञानयोगप्राप्त्युपायं सार्धश्लोकद्वयेनाह ॥ +

+ बाह्याविषयादिन्द्रियनिरोधे त्यक्त्वा एव संकल्पश्चित्तवृत्तिः प्रभवो ये
षां तान् सर्वान् कामान् विषयानशेषतः संस्कारस्याप्यभावेन सवा
सनांस्त्यक्त्वा तथेन्द्रियग्रामं करणवर्गं समन्ततः सर्वेभ्यो विषयेभ्यो म
नसैवात्ममननात्मकेन विनियम्य निगृह्य आत्ममननमेवेन्द्रियाणां
निग्रहस्येतदर्थमवधारणं अन्यथेन्द्रियनिग्रहः शतशः प्रयत्नैरपि दुः
शकः २४ ॥

पंचोलीटीका

किंच संकल्पेति संकल्पप्रभवान् चेतसि कामना ध्याने संकल्पः
प्रभवो येषां तान् सर्वानशेषतः सवासनान् कामानभिलाषान् त्य
क्त्वा विवेकयुक्तमनसैवेन्द्रियग्राममिन्द्रियसमुदायं समन्तात् विनि
यम्य उपरमेत् २४

रणवीरसमिद्धोधिनी ॥

एतदेव विवृणोति संकल्पप्रभवानिति सर्वान् कामान् का
म्यन्त इति कामाः पुत्रमित्रादयो विषयास्तान् अशेषतः साक
ल्येन त्यक्त्वा मनसः सकाशाद् दूरीकृत्य चेतो विषयान् संपाद्य कु
र्णभूतान् संकल्पप्रभवान् संकल्पाः पापाशंकायाः प्रभव
न्ति येभ्यस्तान् स्वकार्यप्रच्यावककर्मभीममहमित्यादिरूप

दुःखसंकल्पोत्पत्तिनिमित्तभूतानित्यर्थः तथा मनसा सर्वेंद्रिय
ग्रामं समंततो विषयजाताद्धि नियम्य प्रत्यावर्त्य स्ववशे संस्था
प्येत्यर्थः धृतिगृहीतया धैर्यैर्लोकविषयीकृतया बुद्ध्या निश्च
येन शनैः शनैरुपरमेत् शास्त्रसमीपाद्विरमेत् लब्धं पात
येदिति शेषः मनश्चित्तमात्मसंस्थं प्रयत्नविषयं कृत्वा किंचि
दपि रूपरसादिकं न चिंतयेत् २४ २५॥

मधुभाष्य

भाषा अनुवाद

संकल्प से प्रभव कहे प्रगट जो योग के प्रतिकूल कहे विरोधी।
वाधकरूप सकल कामना उन को वासना समेत त्याग करिके वि
षयों के दोष देखता हुआ पुरुष मन के द्वारा सर्वत्र धावमान
इन्द्रियों को सब ओर से दमन करिके योगाभ्यास करै अथवा
सर्वत्र धावती हुई इन्द्रियों को मन हीं से रोक कर योग करै २४

दोहा

सभी कामना त्याग तिह संकल्प हि सें जो होय मनसहइं
द्रियग्राम को रोके सभसें सोय २४॥

105

शनैः शनैरुपरमेद्बुद्ध्या धृतिगृहीतया। आत्म-
संस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ॥ २५ ॥

शाङ्करभाष्यं

शनैरिति शनैः शनैर्न सहसा उपरमेत् उपरतिं कुर्यात् कया बु-
द्ध्या किंविशिष्टया धृतिगृहीतया धृत्या धैर्येण गृहीतया धैर्येण यु-
क्तयेत्यर्थः आत्मनि संस्थिते आत्मैव सर्वं न ततोऽन्यत् किञ्चिदस्ती-
त्येवमात्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेत् एष योगस्य पर-
मो विधिः तदेवमात्मसंस्थं मनः कर्तुं प्रवृत्तो योगी २५ ॥

आनन्दगिरिकृतटीका

काममप्याहारेणेन्द्रियाणि प्रत्याहृत्य किं कुर्यादिति शङ्कितारं प्र-
त्याह शनैः शनैरिति सहसा विषयेभ्यः सकाशादुपरमे मनसोऽनवा-
स्थ्यं समवतीमभिप्रेत्याह न सहसेति तत्र साधनं धैर्ययुक्ता बुद्धिरि-
त्याह कया इत्यादिना भूम्यादिरव्याकृतपर्यन्ताः प्रकृतीः पूर्वं पूर्व-
पूर्वत्र धारणं कृत्वोत्तरोत्तरक्रमेण प्रविलापयेदिति भावः अव्यक्तमा-
त्मनि प्रविलाप्य आत्ममात्रनिष्ठं मनो विधाय चिन्तयितव्याभावात्तू-
ष्णीं भवेदित्याह आत्मेति तत्रसंस्थितिमेव मनसो विवृणोति आ-
त्मैवेति योगविधिमुपक्रम्य किमिदमुक्तमित्याशङ्क्याह एष इति य-
न्मनसो नैश्चल्यमिति शेषः ननु मनसः शब्दादिनिमित्तानुरोधेन ।
रागद्वेषवशादत्यन्तचञ्चलस्यास्थिरस्य तत्र तत्र स्वभावेन प्रवृत्तस्य
कुतो नैश्चल्यं नैश्चल्यञ्चेति तत्रेति योगप्रारम्भः समस्यार्थः एवम्प्र-
वृत्त मनसो वेत्यादि उक्तप्रकारो गृह्यते २५ ॥

स्वामिकृतटीका

यदि प्राक्तनकर्मसंस्कारेण मनो विचलेत् तर्हि धारणया स्थिरीकु-
र्यादित्याह शनैरिति धृतिर्धारणा तया वशीकृतया बुद्ध्या आत्मसंस्थं आ-
त्मन्येव सम्यक् स्थितं निश्चलं मनः कृत्वा उपरमेत् तच्च शनैः शनैरभ्या-
सक्रमेण न तु सहसा उपरमस्वरूपमाह न किंचिदपि चिंतयेत् नि-
श्चलं मनसि स्वयमेव प्रकाशमानपरमानंदस्वरूपो भूत्वा आत्मध्याना-
दपि निवर्तेतेत्यर्थः २५ ॥

गृहीतया

गी·
टी·
ब·

106

पैशाभाष्यं

शनैःशनैःनसहसाउपरमेदुपरतिंकुर्यात् कयाबुद्ध्याधृतिगृहीतया धैर्ययुक्तयेत्यर्थः आत्मसंस्थमात्मनिस्थितमात्मैवसर्वंनततोन्य। किंचिदस्तीत्येवमात्मसंस्थंमनःकृत्वानकिंचिच्चिंतयेत् एषयोगस्य परमोविधिः तच्चैवात्मसंस्थंमनःकृत्वाप्रहृष्टोयोगी २५॥

रामानुजभाष्यं

सर्वस्माद्विषयात्सर्वमिंद्रियग्रामंविनियम्यशनैःशनैर्धृतिगृहीतया विवेकविषययाबुद्ध्या सर्वस्मादात्मव्यतिरिक्तादुपरम्यात्मसंस्थंमनः कृत्वानकिंचिदपिचिंतयेत् २५॥

य॰

अभिनवगुप्तकृतटी· पूर्वश्लोके उक्तोर्थः

मनसैवनव्यापारोपरमेण २५॥

परमार्थप्रपाटी·

अथास्यापिनिर्वाहमाह शनैःशनैरिति धृतिर्धीरतातयागृहीत यानियमितयानिश्चयात्मिकयाबुद्ध्याकृत्वाएकस्मात्मकेमनःबलादात्म संस्थंकृत्वाआत्मातिरिक्तंनकिंचिदपिचिंतयेत् एवंशनैःशनैरभ्यास क्रमेणनसहसाउपरमेत्वासप्तमेत्वाउपरमंप्राप्नुयात् तदुक्तंयोग तारावल्यां अनसमर्थोयदाभ्यासेराजयोगंनचाचरेत् येनस्यात् या वस्थासापक्वेवामनीभवेत् १ प्रसरत्संकल्पपरंपराणांसंकटनेसं ततसावधानः आलंबनाशाश्रयदीपमानेशनैःशनैःशांतिमुपैतिचे तः २ प्रकाशमानेपरमात्मभानौनश्यत्यविद्यातिमिरेसमस्ते अहो बुधानिर्मलदृष्टयोपिकिंचिन्नपश्यंतिजगत्स्वरूपमिति २५॥

स्त्रु४

वनमालीटीका

धृतिर्धैर्यमविचलतातयायुक्तयाबुद्ध्याकर्तव्यतानिश्चयरूपयाशनैःशनैर्गु रूपदिष्टमार्गेणउपरमेन्मनोनिरुध्यात्मनआत्मनिपरमात्मनिस स्थंकथितेननिश्चलंकृत्वातद्व्यतिरिक्तंकिंचिदपिनचिंतयेदितिसंप्र ज्ञातानसमाधिरसंप्रज्ञातस्तुसमाधौत्वहंमिकचित्तस्यलयएवस्वरूपता नेनसत्वरूपतात्मातुभवतीतिविवेकः शनैःशनैरित्यनेन यथाकंट कलतानुष्ठंकंवस्त्रंशनैःशनैर्निःसारयतिकृपालास्तथानिर्वेदादि

कं विहायाऽरिकाले विषयासक्तं चित्तमुपरमेनयेदिनकं भवति य
त्नपूर्वकं च ऽभ्यस्यमानो विषयेभ्यः पयोभ्यस्य नेजलादिवस्थानस्यैनेतिः
स्वार्थं नेच विधनाति: सा रचितेन शक्यते तथा चित्तमभ्यस्यमाने विस्
तेमेवो मथनेऽभ्यसित्वमृषानिषिक्तं तु ना स्ववन्त्वच्छुः स्वादिरूपमे
भोगहेतवयमीयमस्कर्त्तृसामग्रीवशाद्भवति तच्च दुःखोपना
त्माकारे विरागाभ्यासाभ्यामेव निवारिते पितिनिर्मितसौदाकारा वा
रयितेन शक्यते ततो निर्हेतिके न चित्ते न संस्कारमात्रशेषतयावतिष्ठ
मानेन निरुपाधिकचिदात्ममात्राभिमुखत्वान्निहृतिं विनैवात्मानुभ
यतेति तच्च संस्कारपणचित्तावस्थानस्य सूक्ष्मावपि सत्वेना
त्मस्थानमभ्यासवितत्वा पतेनाभवापन्नः सुलोपामपि नाट
पानेनानुभवापन्नेष्व चित्तस्यात्मनो भावेन तद्वत्क्रियस्यात्मनो
त्मभवेवा चित्तस्य याविद्विषयत्वानेगीकारेणासंप्रज्ञाते आत्मानुभ
वो नैरुक्त्वाच्च नसंतः करणं स्यैविषयकं निर्विषयकस्य नट
वक्तित्रस्य चतानत्वापनेः २५ ॥

हनुमदेवजयन्तीटी·

एवंभूतस्य योगिनो ऽन्तिमेकृत्यमाह शनैः शनैरिति धृतिगृही
तया धृत्या विषयात्मकवि(?)बाह्यत्वाद्चलात्मकधैर्येण गृहीतया व
शीकृतया तथा बुद्ध्या विवेकवत्या आत्मसंस्थं आत्मनि सम्यक् तिष्ठती
ति तं तथा ईदृशं मनः सकलात्मकं कृत्वा आत्मस्वरूपध्यानाशनैः
शनैर्म्नानाधिकाभ्यासक्रमात् मंदमंदं नतत्त्व वलेनोपरमेत्समा
धौ तिष्ठेत् न तु एव किंचिदपि वा सर्वस्वल्पमपि न चिंतयेत् न स्मरेत् २५

मधुसूदनटीका·

भूमिकाजयक्रमेण शनैः शनैरुपरमेत् धृतिर्धैर्यमविचलनं ता
या गृहीतया बुद्ध्या विरक्तः एकमेवमुनानिश्चयपूर्णतया परा[illegible]क
दाचिदपि स्वप्नभविष्यन्निर्वियोगः किन्तु स्यपेवं मेवं रूपयाशनैः शनैः शु
द्धस्थितिस्थमार्गेण मनो निरुंध्यात् एतेनाऽहैतनिश्चयो ऽशुभ्रकोटशतो
न चाचक्रतिः एवं हो मनसी माल्यैश्चक्रे ऽज्ञानत्रात्मनि तानमात्म
निमहति नियच्छे[illegible]च्छान्तआत्मनीति वातिनिवाहेलो किकी

गी॰
टी॰
३

वैदिकीं च मनसि व्यापारवत्तिनियतकेन नानुष्ठापयादहृतं शाह्वानवाचो
विलापने हित्वितिक्तेवोग्रहिनिरोधेन मनोवृत्तिमात्रशेषो भवेदि
त्यर्थः वागादिनिरोधोपायेन सोऽभ्यासो दृढव्यः मनसीति छांदसं दैर्घ्यं।
तन्मनः कर्मेंद्रियज्ञानेंद्रियसहकारि नानाविधविकल्पसाधनं करणं
ज्ञाने ज्ञानात्मनीत्यात्मनीति बुद्धसामानाधिकरण्यान्निशात्कलोपाधावहंकारे नि
यच्छेत् मनोव्यापारान्परित्यज्याहंकारमात्रं परिशेषयेत् तच्च ज्ञानं ज्ञातृ
लोपाधिमहंकारमात्मनि महति महत्तत्त्वे सर्वव्यापके नियच्छेत् द्विविधो
ह्यहंकारो विशेषरूपः सामान्यरूपश्चेति अयमहमेतस्य पुत्र इत्येवं व्यक्त
मभिमन्यमानो विशेषरूपो व्यष्ट्यहंकारः अस्मीत्येतावन्मात्रमभिमन्य
मानः सामान्यरूपः समष्ट्यहंकारः स च हिरण्यगर्भो महानात्मेति च सर्वा
नुस्यूतत्वादुच्यते ताभ्यामहंकाराभ्यां विविक्तो निरुपाधिकः शांतात्मा
सर्वांतरः तस्मिन्महांतमात्मानं समष्टिबुद्धिं नियच्छेदेवं तत्कार
णमव्यक्तमपि नियच्छेन्निरुपाधिकं तत्पदलक्ष्यः शुद्ध आत्मा सा
क्षात्कृतो भवति शुद्धे हि विवेकरसे प्रत्यगात्मनि जडशक्तिरूपमनि
र्वाच्यमव्यक्तं प्रकृतिरूपाधिः सा च प्रथमं सामान्याहंकाररूपं महत्तत्त्वं
नाम सूत्रात्मा व्यक्तीभवति ततो बहिर्विशेषाहंकाररूपेण ततो बहिर्मनो
रूपेण ततो बहिर्वागादीन्द्रियरूपेणेत्येतत् क्रमाभिहितं इंद्रियाणि
पराण्याहुरिंद्रियेभ्यः परं मनः मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्परः
महतः परमव्यक्तमव्यक्तात्पुरुषः परः पुरुषान्न परं किंचित्सा काष्ठा
सा परा गतिः तत्र गवादिष्विव वाग्निरोधः प्रथमा भूमिः बालमुग्धा
दिष्विव निर्मनस्कत्वं द्वितीया तंद्र्यामिवाहंकाराराहित्यं तृतीया सुषुप्ता
विव महत्तत्त्वराहित्यं चतुर्थी तदेतद्भूमिचतुष्टयमपेक्ष्य शनैः शनैरुपर
मेदित्युक्तं यद्यपि महत्तत्त्वशांतात्मनोर्मध्ये महत्तत्त्वोपादानमव्याकृ
ताख्यं तत्त्वं कथितं तथापि तत्र महत्तत्त्वस्य नियमनं नान्यथापि।
सुषुप्ताविव स्वरूपलयप्रसंगात् तस्य च कर्मत्वयमति पुरुषप्रयत्न
मंतरेण स्वत एव सिद्धत्वात् तद्दर्शनोपयोगित्वाच्च दृष्टपने न पृथगुक्तं।
व्याख्यातमस्माभिस्तत्त्वदर्शिभिरिति सर्वमभिधाय तत्त्वान्न सिद्ध्येति सोपम
मायेरभिधानात् सचलत्वादिस्तोदर्शनसाधनत्वेन तद्दृष्टतत्त्वस्यैव जीवन्

ति
10
त्व
त्रिदेकर
स्को
ना
व

मुक्तिप्रतिबंधकक्लेशलयापायाः प्रेतितः नन्वशेषानात्मप्रवृत्तिविर
महितिरहितं तेन तस्य न भवतु दृश्यतेहेतुत्वमिति चेन्न स्वतःसिद्ध
स्यदर्शनस्य निवारयितुमशक्यत्वात् तदुक्तं आत्मानात्माकारं स्वभा
वतोवस्थितं सदा चित्तं आत्मैकाकारतया तिरस्कृतानात्म दृष्टिं विद
धीत यथा घटउत्पन्न एव स्वतो वियता पूर्णोऽपवनोत्पद्यते जलतंडुलादि
पूरणं तु तस्मिन्घटे पश्चात् पूर्वकृत्यं भवति यत्र जलादीनि सारितं
पि वियत् निःसारयितुं न शक्यते मुखापिधानेऽप्यन्तर्वियदवतिष्ठतएव
तथा चित्तमुत्पद्यमानं घटवत् स्फुरणमेवोत्पद्यते उत्पन्ने तस्मिन् मू
षानिषिक्तद्रुततामवत्तद्घटदुःखादिरूपत्वं भोगहेतुधर्माधर्मसहकृ
तं स्यात् मग्रीव शाद्भवति तत्र घटदुःखाद्यनात्माकारे विरामप्रयत्नेना
सेव निवारितेऽपि निर्निमित्तः चिदाकारो वारयितुं न शक्यते ततो नि
रोधसमाधिना निवृत्तिके चित्ते न संस्कारशेषतया निरूपत्वेन वि
रूपाधिकचिन्मात्राभिमुखत्वात् [illegible] निविड़मात्मानुभूयते
तदेतदाह आत्मसंस्थं मनः कृत्वा न किंचिदपि चिन्तयेदिति आत्मनि रूपाधि
के प्रतीचि संस्था समाप्तिर्यस्य तदात्मसंस्थं सर्वप्रकारवृत्तिशून्यं स्वभा
वसिद्धात्माकारमात्रविशिष्टं मनः कृत्वा धृतिगृहीतया विवेकबुद्ध्या
संपाद्यासंप्रज्ञातसमाधिस्थः सन् किंचिदपि अनात्मानमात्मानं वा
न चिंतयेत् न वृत्या विषयीकुर्यात् अनात्माकारवृत्तौ हि व्युत्थानमेव
स्यात् आत्माकारवृत्तौ च संप्रज्ञातः समाधिरिति संप्रज्ञातसमाधिशे
षीयकामपि चित्तवृत्तिं नोत्पादयेदित्यर्थः [illegible]
[illegible] ॥

(margin notes: दा; स्वभावसिद्धात्मनिति; पिविं)

सदानंदीटीका

गुरूपदिष्टमार्गेणोपरमेच्छनैः शनैः अविच्छिन्नात्मधैर्येण शुक्ता
याधीस्तया मनः १ आत्मन्येव समाधिं हि प्रयतन्नाक्षगोचरे कृत्वा
विचिंतयेन्नान्यदृत्तिमन्योन्न वासुपयेत् २ आत्मैवास्मि चिलनात्मादिति
निश्चिमवान्मुनिः नान्यद्धि चिंतयेत् किंचिद्योगस्यायं परोवधिः २५

नीलकंठीटीका

शनैःशनैरिति भूमिकाजयक्रमेण दिव्यादिव्यविषयेभ्यः उपरमेत्
व्यावृत्तो भवेत् कथं धृतिगृहीतया बुद्ध्येति धृतिः धैर्यं तया धार

गी॰
टी॰
३॰

108

यते मनःप्राणेन्द्रियक्रियाः योगेनाव्यभिचारिण्या धृतिः सा पार्थ सा।
त्विकी तस्याः सात्त्विक्या धृत्या गृहीतया वशीकृतया बुद्ध्या उपरमेत् तथाप
त्विकी सकललक्षणात्तया गृहीतया वशीकृतया बुद्ध्या उपरमेत् तथाप
व मुपरतं मनः आत्मनि स्वरूपे संस्थाप्य स्थितिर्यस्य तत् दृश्यं द्रष्टरि वा तत्त
वमुपरतं मनः आत्मनि स्वरूपे संस्थाप्य स्थितिर्यस्य तत् दृश्योपरक्तं चित्तं सर्वार्थं सर्वार्थ
था आत्मैकाकारमेकाग्रमित्यर्थः दृक्दृश्योपरक्तं चित्तं सर्वार्थं सर्वार्थ
काग्रं तयोः तयोर्दृश्यो चित्तस्यैकाग्रतापरिणाम इति सूत्रितमेकाग्रं शाप
येत् सत्त्वार्थेस्तत्र ग्रहणं इदं दर्शनपामीम उभवे हि द्रष्टा दृश्यं दर्शनं च भासते।
नत्वदर्शनभानमप्रसाख्येयमतो दृक्दृश्योपरक्तं चित्तं सर्वार्थमिति
नत्वदर्शनोपरक्तं नापि सर्वार्थं नायोगिनां तदभावे वित्तस्य नाशापत्तेः
दृक्दृश्योपरागाभावे नयकार्यं तदुच्यते यथा स्वप्ने तत्र हि दृश्यं नास्ति
तिथामराणामपि प्रसिद्धं द्रष्टापि नास्ति तदा इन्द्रियाणामभावात् आ
त्मेन्द्रियमनोयुक्तं भोक्तेत्युक्तेरेव भोक्तृत्वस्य इन्द्रियसंयोगाविशिष्टत्वात्।
किंतु दृक्दृश्यवासनवासितं चित्रपटसदृशमेकमनुपवास्ति तत्स्वरूप
ज्योतिषा स्वरूपेणावभासमानं जाग्रदवस्थायामपि दृक्दृश्योपरागप्रकाशय
ति तद्वासनावासितत्वात् एवं सति यदा सर्वार्थतायाः क्षयः एकाग्रता
याउदयश्च तदा चित्तस्यैकाग्रतारूपः परिणामो भवतीति तदेवमात्म
संस्थं मनः कृत्वेति संप्रज्ञातसमाधिरुक्तः तत्रापि पूर्वाभ्यासवशा
च्चित्तस्य दृक्दृश्योपरागो वासनात्मना यो भातीति तन्निवारणेनासंप्र
ज्ञातसमाधिमाह न किंचिदपि चिंतयेदिति ध्यातृध्यानध्येयविभा।
गमपि न स्मरेत् किंतु प्रत्यगेकरसं संविदात्मना सप्रभवतिष्ठेदित्यर्थः

२५

आनंदटीका

धृतियोगधारणा २५ ॥

रामकंठीयेका

शनैः शनैः कतरोत्तरविशेषारोहणक्रमेणानन्तसहस्रैर्वोपरमेत् वा।
द्वेषु विषयेष्वासंगात् तथा देहादावात्माभिमानात् निवर्तेत केन सा
धनेन ब्रह्मात्मसम्यग्ज्ञानेन कीदृश्या धृतिगृहीतया धृतिः परमात्मत्वग्र

सा॰

हणाविषयं मलत्तणां धैर्येन या गृहीता स्वीकृतया बुद्ध्या तादृश्या वि
वीदृशिति यां बुद्धिं धारयति साजयोगसाधनमर्हतीयस्या धृते लक्षणं
वस्पति धृत्या यया धारयते मनःप्राणेन्द्रियक्रियाः योगेनाव्यभिचारि
ण्या धृतिः सा पार्थ सात्त्विकी एवं किं कृत्वा परमेश्वरनसेव प्रत्यात्मनि

षयेनैवचेतसाशाकस्यावरसंतर्यैको नसंकल्पप्रभवान् विषयग्रहणा।
ब्रह्मसंगमनःसमुत्थान् दृष्टानुश्रविकभेदेनसमस्तान् तथाप्रत्येकं।
मशेषान् अविद्यमानसंस्कारमात्रान् कामान्भोगांस्त्यक्त्वापरित्यज्यत
यातेनैवमनसानतुविषयविषयेन्द्रियग्रामंकरणवर्गंसमंततःसर्वेभ्यो
विहितेभ्योविशब्दादिभ्योविनियम्यरागादिदुष्परिहारात्मनाविशेषणानिगृ
ह्येत्यनेनप्रस्तुतसम्प्रज्ञातसाध्यकर्मयोगविषयं कर्मत्यागसंदि
यनियमस्यचपूर्वोक्तक्रममेवस्मारयति एवमनेनक्रमेणात्मसंस्थमवयु।
आत्मनिब्रह्मापरनाम्निसम्यकस्थितेलब्धविशांतिमनैनांतःकरणांकृत्वाम
पायतं आनिरिक्तंचस्वेतरंचकिंचिज्ञायेनतदानींहिसर्वंब्रह्मभूतयैवप्र
काशते २५ ॥

लाक्षिकी भाषाटीका

एवंमति धृतिधारणाध्येयविषयेदार्ढ्यं तयानिश्चहीतयोपलब्धयाबु
आत्मबोधेन मनोमननात्मकमंतःकरणमात्मसंस्थमात्मन्यहंताप्रत्य
येसम्यग्देहाद्यभिमानकालुष्यतानवतारतस्थितस्थितेविश्रांतेंकृत्वाशनैः
शनैर्मनसःसम्यग्विश्रांत्यवसरेण नतुसहसाविश्रांत्यारंभादुपरमेव
उपरमेत् उपरमस्वरूपमाह नकिंचिदपिचिंतयेत् इति आत्मानंद्राविभावा
र्थमात्मनिमनःसंस्थापनात्तुसंधानमपिनकुर्यादित्यर्थः तदुक्तंश्रीकु
लार्णवे नकिंचिच्चिंतनादेवस्वयंतत्वंप्रकाशयते स्वयंप्रकाशितेतत्वेनतत्
लनाज्ञानमयोभवेदिति एतदुक्तंभवति धारणायादेहात्मस्मरणविवेके
नात्मानंबुद्ध्वा तस्मिन्देहाहंभावविस्मरणपूर्वंमनःप्रतिष्ठाप्यततस्तत्प्र
तिष्ठापनानुसंधानमपिनविदधीतेत्येषसर्वयोगस्यपरमोविधिः सं
कल्पप्रभवानित्यादिश्लोकद्वयतात्पर्यं श्रीदेव्यापंचदश्यां भंग्यंतरेण
कथितं प्रलीनेशब्देचेतरत्त्वविरतेबिन्दुविभवे ततस्तत्त्वेचाष्टधतिवशु
दृष्टापिसुषुप्ते शिवेशांतेएवंएकलितचिन्मात्रगहनांस्वसंविद्विद्यो
गीरस्यतित्रिवाख्यांपरतनुमिति आभ्यांश्लोकाभ्यामात्मसंयमरूपस्य
ध्यानयोगस्यलक्षणमुपदिष्टंमंतव्यमिति अन्येस्यांगभूताइति [illegible]
[illegible] २५ ॥

गी.
टी.
८

109

पंचोलीटीका

परित्यागक्रुतसंस्कारेणमनोविचलेत् तर्हिधारणयास्थिरीकुर्या
दित्याह शनैःशनैरिति धृतिगृहीतयाधैर्ययुक्तयाबुद्ध्याशनैःशनैरु
परमेत् उपरतिंकुर्यात् नसहसामनः आत्मसंस्थमात्मनिसंस्थितं।
कृत्वाआत्मैवसर्वंनततोन्यत्किंचिदपिचिंतयेत् २५॥

रणवीरसमिद्धोधिनी॥

स्पष्टम् २५॥

मधुभाष्य

२५॥

भाषा अनुवाद

और जो मन पूर्व जन्म कृत कर्म के संस्कार से चलविचल हो
य तौभी धारणा जो धैर्यरूप बुद्धिशक्ति तिससे थिर करै यह
कहते हैं कि धारणा से वशीभूत जो बुद्धि तिससे मन को आ
त्मामे अच्छीतरह स्थापन करि के उपरम करै अर्थात् फेरि न
कुछ चिन्तन करै परन्तु यह भी सनैः सनैः कहे धीरे धीरे धै
र्यवती बुद्धि के द्वारा क्रमसे मन को आत्मा मे थिर करै सह
सा न करै २५

दोहा

शन शन लहै उपरामहै बुद्धिधीर होय आत्मा मे मनथापके
नहि कछु चिंतन जोय २५ ॥

110

यतो यतो निश्चरति मनश्चञ्चलमस्थिरं ततस्त-
तो नियम्यैतदात्मन्येव वशं नयेत् २६ ॥

शाङ्करभाष्यं

यत इति यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चलति निर्गच्छ-
ति स्वभावदोषान्मनश्चञ्चलमत्यर्थं चलमत एवास्थिरं ततस्तस्माच्छब्दादे-
र्निमित्तान्नियम्य तत्तन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभा-
वनया चैतन्मन आत्मन्येव वशं नयेत् आत्मवश्यतामापादयेत् २६ ॥

आनन्दगिरिकृतटीका

स्वाभाविको दोषो मिथ्याज्ञानाधीनो रागादिः शब्दादेर्मनसो नियमनं
कथमित्याशङ्क्याह तत्तन्निमित्तमिति याथात्म्यनिरूपणं तापत्रयदुः-
खमिश्रत्वाद्यालोचनं तेन तत्र तत्र वैराग्यभावनया तत्तदाभासीकृत्य
ततस्ततो नियम्यैतन्मन इति सम्बन्धः २६ ॥

स्वामिकृतटीका

एवमपि रजोगुणवशाद्यदि मनः प्रचलेत् तर्हि पुनः प्रत्याहारेण वशी-
कुर्यादित्याह यतो यत इति स्वभावतश्चञ्चलं धार्यमाणमप्यस्थिरं म-
नो येन येन विषयं प्रति निर्गच्छति ततः ततः प्रत्याहृत्यात्मन्येव वशं नयेत्
स्थिरं कुर्यात् २६ ॥

पैशाचभाष्यं

यतो यतो यस्माद्यस्मान्निमित्ताच्छब्दादेर्निश्चलति निर्गच्छति स्वभावदो-
षादेतन्मनश्चञ्चलमत एवास्थिरं ततस्ततस्तस्माच्छब्दादेर्निमित्तान्निय-
म्यैतन्निमित्तं याथात्म्यनिरूपणेनाभासीकृत्य वैराग्यभावनया चैतन्मन आ-
त्मन्येव वशमिति तथात्मन्येव वशमापादयेदिति २६ ॥

रामानुजभाष्यं

यत इति चलस्वभावतयास्थिरं मनः यतो यतो विषयप्रावण्यहेतो-
र्निश्चलति ततस्ततो मनो नियम्यात्मन्येवातिशयितसुखभावनया वशं
नयेत् २६ ॥

अभिनवगुप्तकृतटी·

इति इतरदीनाक्रमाक्रममभिलाषतः शनैः इति क्रमः किंचिदपि विष-
यानामागमरूपादिकं न चिन्तयेत् यतस्तैर्ध्यानेन न किंचिदपि चिन्तये

गी॰
टी॰
घ॰

दिति तदनन्तरं च ततस्ततो ... नवविषयभ्युपरमय्यात्मे
वशायमित्युच्यते २६ ॥ यतो यतो मनो निवर्तते तन्निवर्तनसमनन्तरमेवात्मनि शमयेत् अन्यथा
चित्तं पुनरपि विषयानेवालम्बते २६

परमार्थप्रपाटीका

अथैनावतापि रजोगुणप्राचुर्यं मनो यदि आत्मवशं न भवेत् हि प्रमादो
ऽनेन वशं नयेत् इत्याह यतो यत इति स्वभावतश्चपलं चञ्चलं अत एव
विकारवत्तया मानामस्थिरं मनो येन येन विषयं प्रति निर्गच्छति ततस्त
तो विषयान्नियम्य प्रत्याहृत्य आत्मन्येव वशं नयेत् तदुक्तं वाशिष्ठे हस्त
हस्तेन संपीड्य दन्तैर्दन्तान्विचूर्ण्य च अङ्गान्यङ्गैः समाक्रम्य जयेदादौ स्वकं
मनः चित्तमेकं न शक्नोति जेतुं स्वात्मप्रवर्तियत् ध्यानवातो वदन्ति
सकिं लोके तं जयतीति २ तथा चोक्तं विष्णुपुराणे विषयेभ्यः समाहृत्य
विज्ञानात्मा मनो मुनिः चिन्तयेन्मुक्तये तेन ब्रह्मभूतं परेश्वरं आत्मभावं
नयत्येनं तद्ब्रह्मध्यायिनं मुने विकार्यमात्मनः शक्त्या लोहमाकर्षको
यथेति २६ ॥

वनमालीटीका

शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताच्छ
ब्दादेर्विषयाद्रागद्वेषादेश्च चञ्चलं चित्तेनाभिमुखं सत् मनो निश्चरति वि।
त्तिमेतद्विषयाभिमुखी प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमा।
मपि समाधिविरोधिनीं वृत्तिमुत्पादयति तथालयहेतूनां निद्राशेषव
कृशानशमादीनां मध्ये यतो यतो निमित्तात् स्थिरं लयाभिमुखं सन्म
नो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति त
तस्ततो विक्षेपनिमित्तात् लयनिमित्ताच्च नियम्यैतन्मनो निर्वृत्तिकं कृ
त्वात्मन्येव परमानन्दघने सर्वेश्वरमध्यवतिरूपस्वस्य वशं नयेत् वशी
कुर्यात् यथाप्रवर्तनं विक्षिप्येत न वा लीयेतेति २६ ॥

शंकरभगवत्पूज्यपादटी॰

तत्त्वतिरेव वलस्वभावं संकल्पात्मकं मनो यदि वशीभूतं स्यात्तदैव संकल्प
प्रभवान्कामानपि त्यक्तुं शक्नुयात् यथा न तिवृत्तत्वाद् यतो यत इति चञ्च
लं चपलस्वभावमत एवास्थिरमेकत्र स्थितुमनर्हं मनः संकल्परूपकं यतो
यतः सर्वविभक्ते स्वविलक्षणाच्छब्दादेर्नानाविधविषयप्र
ति निश्चरति निर्गच्छति ततस्ततः तस्मात्तस्माद्विषयाद्धेतन्मनो नि

यम्यमस्मात्तस्मात्तस्मादात्मन्येव स्वस्वरूप एव वशं स्वाधीनं नयेत्सम्प्रयात् आ
त्मनो निरवधिकातिशयस्वरूपस्वाभाव्येन वशीकुर्यादित्यर्थः २६॥
एवं निरोधसमाधिं कुर्वन् योगी॥ मधुसूदनीटीका यस्मात्
शब्दादीनां चित्तविक्षेपहेतूनां मध्ये यतो यतो यस्माद्यस्मान्निमित्ताकहाद्
विषयाद्रागद्वेषादेश्चंचलं विक्षेपाभिमुखं सन्मनो निश्चरति विनि
र्गच्छति विषयाभिमुखीं प्रमाणविपर्ययविकल्पस्मृतीनामन्यतमाम
पि समाधिविरोधिनीं वृत्तिमुत्पादयति तथालयहेतूनां निद्राशेष
बहुभक्षणश्रमादीनां मध्ये यतो यतो निमित्तादस्थिरं लयाभिमुखं सत्
ध मनो निश्चरति लीनं सत् समाधिविरोधिनीं निद्राख्यां वृत्तिमुत्पादयति।
ततस्ततो विक्षेपनिमित्तालय निमित्ताच्च नियम्यैतन्म
नो निर्वृत्तिकं कृत्वात्मन्येव स्वप्रकाशपरमानन्दघने वशं नयेत् निरु
ध्यात् यथा न विक्षिप्येत न वा लीयेत तथैव कारयेन्नात्मगोचरत्वं समा तैं
धेवीरयति एतच्च विवृतं गौडपादाचार्यैः उपायेन निगृह्णीयाद्विक्षि
प्तं कामभोगयोः सुप्रसन्नं लये चैव यथा कामो लयस्तथा १ दुःखं स
र्वमनुस्मृत्य कामभोगान्निवर्तयेत् अजं सर्वमनुस्मृत्य जातं नैव तु पश्य
ति २ लये संबोधयेच्चित्तं विक्षिप्तं शमयेत्पुनः सकषायं विजानीयात्स
मप्राप्तं न चालयेत् ३ नास्वादयेत्सुखं तत्र निःसंगः प्रज्ञया भवेत् निश्चलं नि
श्चरच्चित्तमेकीकुर्यात्प्रयत्नतः ४ यदा न लीयते चित्तं न च विक्षिप्यते पुनः
अनिंगनमनाभासं निष्पन्नं ब्रह्म तत्तदेति पञ्चभिः श्लोकैः ५ उपायेन व
क्ष्यमाणेन वैराग्याभ्यासेन कामभोगयोर्विक्षिप्तं प्रमाणविपर्ययविक
ल्पस्मृतीनामन्यतमयापि वृत्त्या परिणतं मनो निगृह्णीयात् निरुन्ध्या
दात्मन्येवेत्यर्थः कामभोगयोरिति विषमानावस्थाभुज्यमानावस्थाभे
देन द्विवचनं न चालीयतेऽस्मिन्निति लयः सुषुप्तं तस्मिन् सुप्रसन्नमाया
सवर्जितमपि मनो निगृह्णीयादेव सुप्रसन्नं चेत्कुतो निगृह्यते तत्राह
यथा कामो विषयगोचरप्रमाणादिवृत्त्युत्पादनेन समाधिविरोधी त
थालयोऽपि निद्राख्यवृत्त्युत्पादनेन समाधिविरोधी सर्ववृत्तिनिरोधो हि स
माधिः अतः कामादिकृतविक्षेपादिव श्रमादिकृतलयादपि मनो निरो
द्धव्यमित्यर्थः १ उपायेन निगृह्णीयादित्युक्तं तं सर्वं द्वैतमविद्यावि

गी.
टी.
ब.

जं स्मितमल्पं दुःखमेवेत्यनुस्मरन्यो वै भूमा तत् सुखं नाल्पे सुखमस्ति
अथ यदल्पं तन्मर्त्यं तत् दुःखमिति श्रुत्यर्थं गुरूपदेशादनुपश्चात्पर्यालोच्य
कामान् चिंत्यमानावस्थान् विषयान् भोगान् भुज्यमानावस्थांश्च विषयान्निव
र्तयेत् मनसः सकाशादिति शेषः कामश्च भोगश्च कामभोगं तस्मात् मनो।
निवर्तयेदितिवा एवं द्वैतस्मरणकाले वैराग्यभावनोपाय इत्यर्थः द्वैतवि
स्मरणं तु परमोपायमाह अजं ब्रह्म सर्वं न ततोऽतिरिक्तं किंचिदस्तीति शा
स्त्राचार्योपदेशादनंतरमनुस्मृत्य तद्विपरीतं द्वैतजातं न पश्यत्येव अधिष्ठा
भा नेत्तानेकल्पितस्याभावात् पूर्वोपायापेक्षया वैलक्षण्यसूचनार्थस्तुशब्दः १
एवं वैराग्यभावनातत्त्वदर्शनाभ्यां विषयेभ्यो निवर्त्यमानं चित्तं यदि दैनं
दिनलयाभ्यासवशात् लयाभिमुखं भवेत् तदा निद्राशेषाजीर्णबह्वशन
श्रमाणां लयकारणानां निरोधेन चित्तं सम्यक् प्रबोधयेदुत्थानप्रयत्ने।
न यदि पुनरेवं प्रबोध्यमानं दैनंदिनप्रबोधाभ्यासवशात् कामभोगयो
र्विक्षिप्तं स्यात् तदा वैराग्यभावनया तत्त्वालोकारेण च पुनः शमयेत्
एवं पुनः पुनरभ्यस्यमानो लयात्संबोधितं विषयेभ्यश्च व्यावर्तितं नापि सम।
प्राप्तं अन्तरालावस्थं चित्तं स्तब्धीभूतं सकषायं रागद्वेषादिप्रबलवासना
वशेन स्तब्धीभावाख्येन कषायेन दोषेणाक्रान्तं विजानीयात् समाहिता
च्चित्ताद्विवेकेन जानीयात् ततश्चेदं समाहितमित्यवगम्य लयविक्षेपा
भ्यामिव कषायादपि चित्तं निरुन्ध्यात् ततश्च लयविक्षेपकषायेषु परिहृ
तेषु परिशेषाच्चित्तेन समं ब्रह्म प्राप्यते तच्च समप्राप्तं चित्तं कषायलयभ्रा
न मानचालयेत् विषयाभिमुखं न कुर्यात् किं तु प्रतिगृहीतया बुद्ध्या लयक।
षायश्रमेभ्यो विविच्य तस्मिन्नेव समप्राप्ते भावे नियत्नेन स्थापयेत् १ तत्र समा
धौ परमसुखं व्यंजकेऽपि सुखं नास्वादयेत् एतावंतं कालमहं सुखीति।
सुखास्वादरूपां वृत्तिं न कुर्यात् समाधिभंगप्रसंगादिति प्रागेव कृतव्या।
ख्यातं यत्सुखमुपलभ्यते तत्सुखं तदविद्यापरिकल्पितं मृषैवेत्येवं भावन
यानिःसंगो निःस्पृहः सर्वसुखेषु भवेत् अथवा प्रज्ञया सविकल्पसुखा
कारवृत्तिरूपया मदसंगं परित्यजेत् ततः सुखरूपस्तत्त्वमपि निर्वृत्तिकेन चि।
त्तेन नानुभवेत् स्वभावप्राप्तस्यतस्य वारयितुमशक्यत्वात् एवं सर्वतो निव
र्त्यनिश्चलं प्रयत्नवशेन कृतं चित्तं स्वभावचाचल्याद्विषयाभिमुखतया निश्च

रहितं निर्गीकृत एकीकुर्यात्प्रयत्नतः निरोधप्रयत्नेन समे ब्रह्मण्येकतां
नयेत् ४ समप्राप्ते चित्ते कीदृशमित्यपेक्ष्याह यदा न लीयते नापि स्तब्धीभव
ति तदा समं तत्साम्येन लयशाठ्येनेव स्तब्धीभावस्योपलक्षणात् न च विक्षि
प्यते पुनः न शब्दाद्याकारं वृत्तिमनुभवति नापि सुखमास्वादयति राजस
त्वसाम्येन सुखास्वादस्यापि विक्षेपशब्देनोपलक्षणात् पूर्वं भेदनिर्देश
स्तु प्रथक् प्रयत्नकरणाय एवं लयकषायाभ्यां विक्षेपसुखास्वादाभ्यां
च रहितं प्रतिगतमिंगनं चलनं यस्य तत् प्रदीपवत् लयाभिमुखं रूपं त
द्रहितं निर्वातप्रदीपकल्पं अनाभासेन केनचिद्विषयाकारेणाभासत
इत्येतत्कषायसुखास्वादयोरुभयोरन्तर्भावउक्तएव यदैतैर्दोषैश्चतुर्भि
र्रहितं चित्तं भवति तदा तच्चित्तं ब्रह्म निष्पन्नं समं ब्रह्म प्राप्तं भवतीत्यर्थः
एतादृशश्च योगः कृष्णप्रतिपादितः यदा पंचावतिष्ठंते ज्ञानानि मनसा
सह बुद्धिश्च न विचेष्टेत तामाहुः परमां गतिं तां योगमिति मन्यंते स्थिरा
मिंद्रियधारणं अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययाविति एतत्
मूलकमेव च योगश्चित्तवृत्तिनिरोध इति सूत्रं तस्मायुक्तं ततस्ततो निय
म्येतदात्मन्येव वशं नयेदिति २६ ॥

सदानंदटीटी

एवं कृतवत्समाधिं नेयोगी चित्तनिरोधने चित्तविक्षेपहेतूनां शब्दादीनां
चमप्यतः यस्माद्यस्मान्निमित्तात् शब्दादेश्चंचलं मनः अनात्मविषयप
ध्यासादिति मेस्य हि दुरेनत २ ततस्ततो विक्षेपनिमित्तात्मनो मु
तिः कृत्वा निहेतिकं प्रत्यगात्मन्येवाहवेत् सुधी ३ स्वप्रकाशपरानंद
य एतन्मे वशं नयेत् समस्तदुःखसीमेयं यन्मनोदृश्यगोचरं ४ समस्त
सुखसीमेयं यन्मनोब्रह्मगोचरं विचार्यैवं धिया विद्वान्वेदांतवाक्य
वाक्यतः ५ भोगानुत्सृज्य नहेतून्कामोस्मकाश्रयेद्दुरिं यत्र यत्र मनोग
छेद्बाह्ये भोगगोचरे ततो विचार्य विषयेभ्यो वैराग्याद्विवेकतः आभा
सीकृत्य दोषाणामाकरत्वादसत्वतः ७ ततश्चाकृष्य परमानंदरूपे चिदा
त्मस्थापयेदिति तात्पर्यं श्रीमद्भगवतोहरेः ८ २६

नीलकंठटीका

गी॰
टी॰
ष॰

शनैःशनैरिमंश्लोकंव्याचष्टे यतोयतइतिद्विभिः यतोयतोहेतोर्यस्यां
विषयेग्रहीतेमनोनिश्चरतिबहिर्गच्छतिततस्ततस्तत्रतत्रदोषदर्शने
नततस्ततोविषयानेतन्मनोनियम्यप्रत्याहृत्यआत्मनिस्वरूपेएवव
शंनयेत्एवंस्थापयेत् एतेनप्रत्याहारोव्याख्यातः २६ ॥

आनंदीटीका

चंचलंवाचवंडर्थहम् अस्थिरंप्रार्थितेपिवस्तुनिनचिरंतिष्टतीति २६

113

रामकंठीटीका

एवंविधेनाभ्यासक्रमेणयतोयतोयस्माद्यस्मात्कृतश्चिद्धन्यनभूता
ईष्यंतराद्धालायाश्चमनश्चेतोनिश्चरतिनिर्गच्छति तस्मात्तस्मान्नियम्यप्र
तिविध्यात्मनिपरमकारणएववशंनयेत्तंवनिवध्नीयाद्यतःस्वभावत
एवचंचलंचपलंतथापार्थितेपिविषयेनचिरमवतिष्टतेइत्यस्थिरम् २६

त्रै॰

नतुमनसश्चांचल्यादात्मविश्रांति
दुर्लभेत्याह

लासिकी [illegible]टीका

मनोविमर्शात्मकंयतोयतःशब्दादिष्वथवानिद्रयामार्गभिमुख्येन
निश्चरतिसंकल्पानुरूपांस्वोवृत्तिंभजतेयतश्चंचलविषयप्रवणमस्थि
रंलघु[illegible]परवशंच एतन्मनः ततस्ततःशब्दादेर्विषयान्निद्रायाश्चनिय
म्यप्रत्यावर्त्य आत्मन्येवप्रतीच्येववशंनयेत् प्रतिष्ठापयेत् तथाचश्रु
तिः तावदेवनिरोद्धव्यंयावद्धृदिगतंक्षयम् एतज्ज्ञानंचध्यानंचशेषोन्यो
ग्रंथविस्तरइति [illegible]
[illegible] २६।

पंचोलीटीका

एवमपिरजोगुणवशात्यदिमनःप्रचलेत्तर्हिपुनःप्रत्याहारेणवशी
कुर्यादित्याह यतइति चंचलंस्वभावतश्चंचलंधार्यमाणमप्यस्थिरंएत
न्मनःयतःयस्मात्शब्दादेर्निमित्तान्निस्सरतिनिर्गच्छतिततस्ततोनिय
मनेकृत्वाआत्मन्येववशंनयेत् २६ ॥

कथंमनोनिरोधः स्यादिति तदुपायमाह यतोयत इति यतोय
तो येनयेन यया मनो निश्चरति निर्गच्छति यतश्चंचलंचप
लस्वभावं यतश्चास्थिरं स्वोचितकर्मैकविषयतामनापादितं
ततस्ततो मार्गादेतन्मनो नियम्य प्रत्यावर्त्य आत्मन्येव यत्न
एव विषये वशं स्वायत्ततां नयेत् प्रापयेत् २६ ॥

मधुभाष्य

२६ ॥

114

भाषा अनुवाद

फिर भी जो रजोगुण वशाते मन विचलित होय तो फेरि फे
रि उसको अपने वश करना यह कहते हैं कि स्वभावसे से
चञ्चल मन धारणा को इच्छा करते भी जो चञ्चल होय तो जि
स विषय मे गमन करै उसी उसी विषय से रोकिकरि आत्मा
ही मे थिर करै २९

दोहा

जह जह मनसो जात है अस्थिर चंचल जोय   तह तह ताकों
रोक के अपने वश करें सोय २६॥

115

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमं उपैति
शान्तरजसं ब्रह्मभूतमकल्मषं २७ ॥

शाङ्करभाष्यं

एवं योगाभ्यासबलाद्योगिन आत्मन्येव प्रशाम्यति मनः प्रशान्तेति
प्रशान्तमनसं प्रकर्षेण शान्तं मनो यस्य स प्रशान्तमनास्तं प्रशान्त
मनसं ह्येनं योगिनं सुखमुत्तमं निरतिशयमुपैत्युपगच्छति शान्तरज
सं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव स
र्वमित्येवं निश्चयवन्तं ब्रह्मभूतमकल्मषं धर्माधर्मादिवर्जितं २७॥

आनन्दगिरिकृतटी॰

मनसो वशीकरणेनोपशमे किं स्यादित्याह एवमिति योगाभ्यासो वि
षयविवेकद्वारा मनोनिग्रहहेतुः प्रशान्तमात्मन्येव प्रलीनमिति
यावत् मनसस्तद्धेत्वोरभावे स्वरूपभूतसुखाविर्भावस्य न्याय्यत्वात्प्रसिद्धिं
द्योतयितुं हिशब्दः मोहादिक्लेशप्रतिबन्धो योगिनि यथोक्तसुखाप्रा
प्तिमाशंक्य मनो विलयरूपेण परिहरति प्रशान्तेति तस्यासत्यादि
विलक्षणत्वमाह ब्रह्मभूतमिति अस्मदादेरपि सतो ब्रह्मभूतत्वेन
तत्त्वे जीवन्मुक्तत्वमित्याशंक्याह ब्रह्मैवेति धर्माधर्मप्रतिबन्धस्य
को यथोक्तसुखप्राप्तिरित्याशंक्योक्तं अकल्मषमिति २७॥

स्वामिकृतटीका

एवं प्रत्याहारादिभिः पुनः पुनर्मनो वशीकुर्वतो रजोगुणक्षये सति यो
गसुखं प्राप्नोतीत्याह प्रशांतमनसमिति एवमुक्तेन प्रकारेण शांतं
रजो यस्य तं अत एव प्रशांतं मनो यस्य तमेवं निष्कल्मषं ब्रह्मत्वं प्राप्तं यो
गिनमुत्तमं समाधिसुखं स्वयमेवोपैति प्राप्नोति २७॥

एवं योगाभ्यासबलान्योगिन आत्म पैशाचभाष्यं न्येव प्रशाम्यति

प्रशांतं मनो यस्य सः प्रशांतमनास्तं प्रशांतमनसं ह्येनं योगिनं सुख
[illegible] मुत्तमं निरति
शयमुपैत्युपगच्छति शांतरजसं प्रक्षीणमोहादिक्लेशरजसमित्यर्थः
ब्रह्मभूतं जीवन्मुक्तं ब्रह्मैव सर्वमित्येवं सर्वं निश्च[वन्तं] ब्रह्मभूतमकल्मषं
धर्माधर्मवर्जितं २७ ॥

रामानुजभाष्यं

गी॰ प्रशांतमनसं ह्यात्मा नि निश्चलमनसं तत एव हेतोर्दग्धाशेषकल्मषं तत
टी॰ एव शांतरजसं ब्रह्मभूतं स्वस्वरूपेणावस्थितमेनं योगिनमात्मानुभवस्व
घ॰ रूपमुत्तमं सुखमुपैतीति हेतोरुत्तमसुखस्वरूपमात्मस्वरूपमुपैतीत्यर्थः २७

न्निःसृतमुपैति २७ अभिनवगुप्तकृतटीका नत्वात्मनि शांतचित्तं योगिनं कर्मभूतं सु

एनोपेतामतोति निर्वाणं तमनिर्वाणं नमसनंतरमेवात्मनि शमरोपेन २७॥

परमार्थप्रपाटीका

एवं रजोगुणात्यये सति स्वत एवात्मसुखप्राप्तिरित्याह प्रशांतमिति ए
वं विधमेनं योगिनं प्रति उत्तमं सुखं सर्वोत्कृष्टमात्मसुखं स्वत एवोपैति
प्राप्नोतीति किंभूतं योगिनं प्रशांतमनसं अत एव शांतरजसं अत एव
ब्रह्मभूतं अकल्मषं निरस्तमोहजाले २७ ॥

वनमालीटीका

कृष्णमैवेनपत्नीटीका

ननु वशीकृतमनसं योगिनं किंरूपं तीमपेक्षायामाह प्रशांतम
नसमिति प्रशांतमनसं प्रकर्षेण शांतं विषयविक्षेपरहितं मनोय
स्य स तथा विषयव्याकुलतयात्मन्येवस्थितमित्यर्थः अतएव शा
न्तरजसं शांतमुपरतं रजोयस्मात्स तथा तं आलेतरवृत्तमउपरत
मनसमित्यर्थः अतएव कल्मषेनास्तिकल्मषंमेविनविषयवासना
रूपदोषोयस्यस तथा तं प्राकृतवासनाशून्यमित्यर्थः अतएव ब्रह्मभू
तमेतं शाम्भात्मस्वरूपं योगिनं समाधिमंतं यतिहि निश्चयेनोत्तमंस्व
स्वरूपानुभवात्मकंश्रेष्ठंसुखंकर्तृस्वयमेवोपैतिप्राप्नोति २७ ॥

मधुसूदनीटीका

एवं योगाभ्यासबलादात्मन्येव योगिनः प्रशाम्यतिमनः ततश्च ॥

प्रकर्षेण शांतं निर्वृतिकं तया निरुद्धसंस्कारमात्रशेषंमनोयस्य तं
प्रशांतमनसं हि निश्चयमतयानिर्मलकं निर्मलकवेहेतुगर्भंविशेष
णद्वयं शांतरजसं अकल्मषमिति शांतंविक्षेपकं रजोयस्य तं विक्षे
पशून्यं तथा न विद्यते कल्मषं लयहेतुस्तमो यस्य तमकल्मषं लयशू
न्यं शांतरजस्त्वमित्यनेनैव तमोगुणोपलक्षणं अकल्मषं संसारहे
तुधर्माधर्मादिवर्जितमिति वा ब्रह्मभूतं ब्रह्मैव सर्वमिति निश्चयेन सम
मेव ब्रह्मप्राप्तं जीवन्मुक्तं एतं योगिनमेव मुक्तेन प्रकारेणेति श्रीधरः
उत्तमं निरतिशयं सुखमुपैत्युपगच्छति मनःसूक्ष्मोरभावेसत्तमो
स्वरूपसुखाविर्भावप्रसिद्धये यो तयति हि शब्दः तथा च प्राग्व्याख्या।
ते सुखमात्यंतिकं यत्तदित्यत्र [illegible] २७॥

मराठीटीका

योगाभ्यासबलाने योगिनश्चित्तमात्मनि प्रशाम्यति तेनो मनशांत
निर्वृतिकेस्थिर १ मनोपस्य तथाशांतं रजो विक्षेपकं मल कल्मषलय
हेतुर्जेतमोपस्य न विद्यते २ धर्माधर्मादिरूपं वा कल्मषं नो भवपूर्ण य
स्य ते ब्रह्मवत्सर्वमवेमसीति वेदितें ३ सम्यग्ज्ञाते परतत्वे तीणमोह
मये मले ब्रह्मभूतं मुनिं शांत सुपैति सुखमुत्तमं ४ रूपं ब्रह्मास्मि परं
ब्रह्मैवास्मि सर्वं तिरेतरं इति निश्चयपवृत्तं तं सुखं समुपगच्छति ५
प्रभावे चित्तनन्हसोः सदशमो चित्सुखं परं स्वप्रमाविर्भवमेव हि शब्दो

योनपद्मये ९ २७ ॥

नीलकंठीटीका

एवमात्मवशेनवसितिकिंस्यादित्याशंक्याह प्रशांतेति हियस्मादए
नंप्रशांतमनसंप्रकर्षेणउपरतचेतसंयोगिनंएकायतनाभूमौउत्तमं
सुखंसंप्रज्ञातसमाधिफलमुपैति भौतिकानांबाह्यानांमानोर
थिकानामांतराणांचविषयाणांत्यागात्शांतरजसंप्रक्षीणमोहा
दिक्लेशंब्रह्मभूतंसद्रूपं अकल्मषंधर्माधर्मवर्जितं यथोक्तयोग
भ्यास एतत्कार्येचेतसिसंस्कारमर्थंप्रयोजयतिकर्मबंधनानिःस्वच्छ
यतिनिरोधमभिमुखीकरोतिक्षिणोतिचक्लेशान्संप्रज्ञातो
योगइत्याख्यायतइति एतेनात्मसंस्थंमनःकृत्वेतिव्याख्यातं २७॥

आनंदटीका

प्रशांतेविषयस्पृहालोभहीनंमनोयस्यतम् अत्रहेतुःशांतं
विगतरजःविषयप्रवृत्तिहेतुःगुणोयस्यतम् २७॥

रामकंठीटीका

यस्मात्तस्मिन्नात्मवशंनीतेमनस्येनंयोगिनंप्रशांतमनसंविषयसु
खेभ्यःप्रत्यावृत्तंविरक्तंतिष्ठेत्चेतसंसंतंस्वयमेवोत्तममनित्यनिरव
द्यस्वभाववत्वादुत्कृष्टंसुखंसहजानंदमुपैत्युपगच्छतिकीदृशंयो
गिनंशांतरजसंशांतंविलीनंरजोविषयप्रवृत्तिहेतुर्गुणोयस्या
तएवब्रह्मभूतंपरमात्मसमापन्नंयस्मादकल्मषमविद्यमानाज्ञा
नलक्षणकिल्बिषकलंकम् २७॥ लौसिकी

एवमात्मनिलब्धस्थैर्यमनसि तदत्रसंथा ~~टीका~~ नकृत्युस्त ततः किंस्यादित्यत
आह – द्विविधपारगोप्रकर्षेणनिवृत्तिसंस्कारस्याप्यभावेनशांतवृत्तिपक्व
मूलंमनोयस्यतं प्रशांतमनसमेवंसंतमेनंयथोक्तसमाध्यनुशी
लनपरंयोगिनंकर्मभूतंउत्तमंसुखमलौकिकआनंदःस्वयमेवोपै
ति आत्मत्वेनव्याप्नोति एषएवमुख्योयोगः अत्रचोत्तमसुखस्यो
पायेनस्यात्तेत्रगविवक्षयायोगिनस्तुक्रियाव्याप्यत्वविवक्षयाच वै
कल्पिकानंतरूपस्य समास्वादस्यनिरासः एषैवावस्थाजीवन्मु
क्तिशब्देननिरुक्ता नाहमस्मिनचान्योस्तिध्येयंध्यानंनविद्यते।

आनंदपदसंलीनेमनः समरसीगतेति एवंसमाधिसिद्ध्यनन्तरमेवप्रति
णायासेनब्रह्मभावस्यभावितयाभूतमिवमन्यमानोभगवान्विशेष-
णान्याह सुखमित्यनुशीलनेनशांतंनिवृत्तंरजोबहिर्मुखताप्रवृत्तिहेतु
र्गुणोयस्यतम् अतएवब्रह्मत्वंप्राप्तम् अतएवाकल्मषंप्रक्षीणधर्माध
र्मादिरूपकर्मणाम् एतदेव...प्राप्नोति २७॥

पंगोलीटीका

एवंप्रत्याहारादिभिःपुनःपुनःवशीकुर्वन् रजोगुणलयेसुखंप्राप्नोति
इत्याह प्रशान्तेति हियस्मात्एनंयोगिनंप्रशान्तमनसंसक्षीणमोहादि
क्लेशरजसंब्रह्मभूतंजीवन्मुक्तमकल्मषंपापरहितं उत्तमंनिरतिशयं
सुखंउपैतिउपगच्छति २७॥

रणवीरसमिद्बोधिनी ॥

एतादृशस्य प्राणादिमोक्षणस्वरूपस्ययोगस्यफलमाह प्रशान्ते
तिद्वाभ्यां एवंकर्मयोगिनंप्रशान्तमनसं अनुध्यितुइष्टसंकल्पवे
नैकविषयतांप्रापितचेतस्कंकर्मभूतं उत्तमंसुखंकर्तृउपैति
स्वयमेवोपतिष्ठते कथंभूतंशान्तरजसं शान्तंरजोरजोवत्त्रिमयाव
रकःकामोयस्यतं अतएवब्रह्मणियत्नुवेदंभूतं समंसाम्येनप्रव
र्तमानं अतएवचाकल्मषं गुरुवधादिपातकैरस्पृष्टं २७॥

मधुभाष्य

२७ ॥

भाषा अनुवाद

इस प्रकार मन औ इन्द्री वशकारी पुरुष को रजोगुण की लय होने से परे योग सुख प्राप्त होता है सोई कहते हैं कि पूर्वोक्त रीति से जिसका रजोगुण नाश भया औ अच्छीतरह मन भी शान्त भया है सोई पापरहित अक्षीण मोह तथा ब्रह्मभाव को प्राप्त योगी उत्तम समाधि सुख को अनायाश पावता है २७

दोहा

उत्तम सुख या योगिको मन प्रशांतको होय शांतरजब्रह्म
रूपकों पाप रहित को सोय २७॥

119

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ २८ ॥

शांकरभाष्यं

युञ्जन्निति युञ्जन्नेवं यथोक्तेन क्रमेण योगी योगान्तरायवर्जितः सदा सर्वदात्मानं युञ्जन् विगतकल्मषो विगतपापः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा परेण संस्पर्शो यस्य तद्ब्रह्मसंस्पर्शं सुखम् अत्यन्तमुत्कृष्टं सुखं निरतिशयं सुखमश्नुते व्याप्नोति २८ ॥

आनन्दगिरिकृतटीका

उक्तमेव सुखं योगिनो भवतीत्युक्तं तदेव स्फुटयति युञ्जन्निति क्रमो यथोक्तो मनसेन्द्रियग्राममभिमादि योगान्तरायो रागद्वेषादि सदात्मानं युञ्जन्निति सम्बन्धः २८ ॥

स्वामिकृतटीका

ततश्च सर्वं कृतार्थो भवतीत्याह युञ्जन्निति एवमनेन प्रकारेण सर्वदात्मानं मनो युञ्जन् वशीकुर्वन् विशेषेण सर्वात्मना गतं कल्मषं यस्य स योगी सुखेनानायासेन ब्रह्मणः संस्पर्शो ब्रह्मविद्या निर्वृतकः साक्षात्कारः तदेवात्यन्तं सर्वोत्तमं सुखमश्नुते जीवन्मुक्तो भवतीत्यर्थः २८ ॥

पैशाचभाष्यं

युञ्जन्नेवं यथोक्तेन प्रक्रमेण योगी सदात्मानं विगतकल्मषः विगतपापः सुखेनानायासेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते २८ ॥

रामानुजभाष्यं

युञ्जन्निति एवमुक्तप्रकारेणात्मानं युञ्जन् तेन विगतप्राचीनसमस्तकल्मषो ब्रह्मसंस्पर्शं ब्रह्मानुभवरूपं सुखमत्यन्तमपरिमितं सुखेनानायासेन सदाश्नुते २८ ॥

अभिनवगुप्तकृतटी०

[illegible] ... भूतं सुखं [illegible] उपैति २८ ॥

अनेनैव क्रमेण योगिनां सुखेन ब्रह्मावाप्तिः न तु कष्टगादिना इति तात्पर्यम् २८

परमार्थप्रपा टी०

गी॰
टी॰
घ॰

ततस्सुकृतार्थो भवतीत्याह एवमिति एवमनुक्तप्रकारेणात्मानं मनः युंजन्वशीकुर्वन्योगी विगतकल्मषः ज्ञानसूर्यो भवति तथाविधः सुखेन सुखोपायेन ब्रह्मणः संस्पर्शः अविद्यानिवर्तकः परोक्षसाक्षात्कारः तदेवात्यंतमात्मेति केवलात्मा शान्तं सुखं परमानंदमश्नुते जीवन्मुक्तो भवतीत्यर्थः २८ ॥

वनमालीटीका

उक्तं सुखं योगिनः स्फुटीकरोति युंजन्निति एवं मनसैवेंद्रियग्राममित्याद्युक्तक्रमेणात्मानं मनः सदा युंजन्समाधयन् योगी योगेन निमसंबंधी विगतकल्मषः संसारहेत्वविद्याख्यमलरहितः सुखेनानायासेनेश्वरप्रणिधानात्सर्वांतरायनिहत्या ब्रह्मणः सम्यक्स्पर्शो विषयताख्यसंबंधो यस्यासौ ब्रह्मसंस्पर्शी सा चासौ मतिश्च साश्रेतः वरमकारणं यस्मिन्नतदृह्यसंस्पर्शामत्यंतसुखमश्नुते सामतिस्ताविषे तस्वरूपात्मिकेव यदा ब्रह्मणः सम्यक्स्पर्शः प्रसादाख्यः संबंधो यस्मिन्नेतदभेनेदुःखलेशवर्जिते निखिलसाधनसंपन्नाज्ञानपरेशापरोक्षे जीवब्रह्मणः प्रसादाख्यः संबंधस्तेनाविद्यानिहत्याविर्भूतपूर्णानंदस्वस्वरूपसुखमश्नुते इत्यर्थः २८

कृष्णमैवेजयन्तीटी॰

नन्वयं योगी स्वस्वरूपानुभवरूपमेव सुखं लभते यद्वा परमपुमर्थं किं चिन्न्याप्नोतीत्याशंक्याऽपरमपि ब्रह्मानुभूतिरूपसुखं लभते इत्याह युंजन्नेवमिति एवं पूर्वोक्तप्रकारेण सदाहरहः आत्मानं स्वस्वरूपं युंजन्स्वरूपरिपाकयोगाभ्यासेनानुभवन्सन् विगतकल्मषः तेनैवात्मानुभवरूपेण योगेनानलरूपेण निर्दग्धाशेषानादिसंचितकिंपमाणात्मकर्मरूपदोषो योगी आत्मानुभवी सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणः परमात्मनः सम्यक्स्पर्शोऽनुभवो यस्मिंस्तत्तथा परमात्मस्वरूपानुभवरूपं निरवधिकातिशयकं सुखं परमानंदरूपमश्नुते प्राप्नोति २८ ॥

उक्तं सुखं योगिनः स्फुटीकरोति॥ मधुसूदनीटीका

एवमनसैवेंद्रियग्राममित्याद्युक्तक्रमेणात्मानं मनः सदा युंजन् समाधयन् योगी योगेन निमसंबंधी विगतकल्मषः विगतमलः

सेश्वरहेतुः धर्माधर्मरहितः स्वेनानायासेनेश्वरप्रणिधाना[illegible]
त्सर्वान्तरायनिवृत्त्या ब्रह्मसंस्पर्शसम्यक्त्वेन विषयास्पर्शेन सहब्रह्म
णः स्पर्शेन तादात्म्यप्रतिपत्तिन्न हि विषयासंस्पर्शि ब्रह्मस्वरूपमिमेतत् प्र
त्यनेन सर्वान्तरायपरिच्छेदात् अतिक्रान्तेतिरतिशयसत्त्वमानन्दमय्युतेया
प्राप्ति सर्वेतानिवृत्तिकेन विघ्नेन लयविक्षेपविलक्षणमनुभवति वि
क्षेपहृतिसत्त्वात् तथैवमनसोपि स्वरूपेणासत्त्वात् सर्वेहृतिशून्येन स
त्त्वेण मनसा स्वत्वानुभवः समाधावेवेत्यर्थः अत्र चान्तरायाणामेतेनान्तराय
निवृत्तिरुक्ता नेवान्तराया दर्शिता योगमतत्रेण व्याधिस्त्यानसंशयप्र
मादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्त
विक्षेपास्तेन्तरायाः चित्तं विक्षिपन्ति योगादपनयन्तीति चित्तविक्षेपा।
योगप्रतिपक्षाः संशयभ्रान्तिदर्शने तावद्वृत्तिरूपतया वृत्तिनिरोधस्य समाधेः
साक्षात्प्रतिपक्षौ व्याध्यादयस्तु वृत्तिसहचरितत्वादन्तरायानिति पा। न
तार्थ्यः व्याधिर्धातुवैषम्यनिमित्तो विकारो ज्वरादिः १ स्त्यानमकर्म
ण्यता गुरुत्वाच्चित्तस्य समाधानस्याप्यासनादिकर्मानर्हतेति यावत् २ योगः
साधनीयो न वेत्युभयकोटिस्पृक् विज्ञानं संशयः तद्रूपप्रतिष्ठितत्वे
न विपर्ययो न तु गतोपि स तु उभयकोटिस्पर्शी [illegible] ककोटिस्पर्शितद्रूपावा
न्तरविशेषविवक्षयात्र विपर्ययाद्भेदेनोक्तः ३ प्रमादः समाधिसाध
नानामननुष्ठानसामर्थ्येप्यननुष्ठानशीलता विषयान्तरव्यासक्ततया।
योगसाधनेष्वौदासीन्यमिति यावत् ४ आलस्यं सत्यामप्यौदासीन्य
प्रवृत्तौ कफादिना तमसा वा कायचित्तयोर्गुरुत्वं कायचित्तेनाः प्रसिद्धम
पि योगविषये प्रवृत्तिविरोधि ५ अविरतिः चित्तस्य विषयविशेष
पकोतिकोतिकाभिलाषः ६ भ्रान्तिदर्शनं योगासाधनेपि तत्साध
नत्वबुद्धिस्तथा तत्साधनेप्यसाधनत्वबुद्धिः ७ अलब्धभूमिकत्वं स
माधिभूमिरेकाग्रतायास्तलाभः किमपि बद्धवित्तिमनुपलब्धिरिति यावत् ८
अनवस्थितत्वं लब्धायामपि समाधिभूमौ प्रयत्नशैथिल्याच्चित्तस्य तत्रा
प्रतिष्ठितत्वं ९ त एते चित्तविक्षेपा नव योगमला योगप्रतिपक्षा यो
गान्तराया इति चाभिधीयन्ते १० दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्र
श्वासा विक्षेपसहभुवः दुःखं चित्तस्य राजसः परिणामो बाधनाल

गी. टी. ष.

लणः तच्चाध्यात्मिकं शारीरं मानसं च व्याधिवशात्कामं वशाच्च भव
ति आधिभौतिकं व्याघ्रादिजनितं आधिदैविकं ग्रहपीडादिजनितं देषा।
त्मविपर्ययपरेत नात् समाधिविरोधि दौर्मनस्यमिच्छाविघातादिबलव
तदुःखानुभवजनितः चित्तस्य तामसः परिणामविशेषः क्षोभापरप
र्यायः स्त्रीभवः मनकषायप्रत्यालयवसमाधिविरोधी २ अंगमेजयत्वम
गकंपनमानसस्थैर्यविरोधि ३ प्राणेन बाह्यस्य वायोरन्तः प्रवेशनं श्वासः
समाध्यंगरेचकविरोधी ४ प्राणेन कोष्ठस्य वायोर्बहिर्निःसरणं प्रश्वासः
समाध्यंगपूरकविरोधी ५ समाहितचित्तस्यैते न भवन्ति विक्षिप्तचित्त।
स्य भवन्तीं विक्षेपसहभुवोंतरायाः एव एतेऽभ्यासवैराग्याभ्यां निरोद्धव्याः
ईश्वरप्रणिधानेन च तीव्रसंवेगानामासन्नः समाधिलाभः प्र[illegible]तेश्वर
प्रणिधानाद्वेति पतंजलिनोक्तम् प्रणिधेयमीश्वरं क्लेशकर्मविपाका।
शयैरपरामृष्टः पुरुषविशेषईश्वरः तत्र निरतिशयं सर्वज्ञबीजं स पूर्वे
षामपि गुरुः कालेनानवच्छेदादिति त्रिभिः सूत्रैः प्रतिपाद्य तत्प्रणिधा।
नेद्वाभ्यामसूत्रयत् तस्य वाचकः प्रणवः तज्जपस्तदर्थभावनमिति।
ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ततः प्रणवजपरूपात्तदर्थ
ध्यानरूपाच्चेश्वरप्रणिधानात् प्रत्यक्चेतनस्य पुरुषस्य प्रकृतिविवेके।
नाधिगमः साक्षात्कारो भवति उक्तानामन्तरायाणामभावोऽपि भवती
त्यर्थः अभ्यासवैराग्याभ्यामन्तरायनिवृत्तौ कर्तव्यायामभ्यासदार्ढ्यार्थ
माह तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः तेषामन्तरायाणां प्रतिषेधार्थमे
कस्मिन्ंश्चित् अभिमते तत्त्वेऽभ्यासः चेतसः पुनः पुनर्निवेशनं कार्यं तथा
मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनात
श्चित्तप्रसादनं मैत्री सौहार्दं १ करुणा कृपा २ मुदिता हर्षः ३ उपेक्षौ
दासीन्यं ४ सुखादिशब्दैस्तद्वन्तः प्रतिपाद्यन्ते सर्वप्राणिषु सुखसंभोगा
पन्नेषु एषां ममैते मित्राणां सुखिन इति मैत्रीं भावयेत् न तु ईर्ष्यां दुःखि
तेषु कथं नु नामैषां दुःखनिवृत्तिः स्यादिति कृपामेव भावयेत् नोपेक्षां
न वा हर्षं २ पुण्यवत्सु पुण्यानुमोदनेन हर्षं कुर्यात् न तु विद्वेषं न चोपेक्षां
अपुण्यवत्सु औदासीन्यमेव भावयेन्नानुमोदनं न वा द्वेषं ४ एवमस्य भाव्य
तः शुक्लो धर्म उपजायते तेन तस्य विगतरागद्वेषादिमलं चित्तं प्रसन्नं सदैका

ग्रनायोग्यं भवति मेघादिवत्स्वरूपेणोपलक्षणं ग्रभयं सत्वसंशुद्धि
रित्यादीनाम् ग्रमानित्वमदंभित्वमित्यादीनां च धर्माणां सर्वेषामेतेषां स्व
भावासत्वाद्रूपत्वेन मलिनवासनानिवर्तकत्वात् रागद्वेषौ महाशत्रू स
र्वेषु रूपायां प्रतिबंधकौ महत्ता प्रयत्नेन परिहर्तव्याविभेतत्सर्वार्थः
एवमभ्येषि प्राणायामादयस्तु गुणाः चित्तप्रसादनापदर्शिनाः तदेत
च्चित्तप्रसादनं भगवदनुग्रहेण प्रयत्नजातेन धर्मेण दृढवैराग्येनेति
ग्रभ्यासेन प्रशमानुपपत्तेः॥ [illegible]
[illegible]
[illegible]
[illegible]
[illegible] ॥

सदानंदीटीका

स्फुटीकरोति भगवान्योगिनः सुखमीरितं मनसैवेंद्रियग्राममभिता
युक्तक्रमेणायः १ योगेन नित्यसंबंधी मनो नित्यसमाद्धत संसार
हेतुधर्मादिमलशून्यो निर्मलः २ प्राणायामेन मद्भक्तायोगमप्याह
वर्जितः सर्वं ब्रह्मस्वरूपं यत्परिक्षिप्यमानं ३ लयविक्षेपशून्यता
नाम भाग्यतो निरंतरं स्वयंब्रह्मसुखं योगी भूत्वाति हृति निश्चलः ४ २८

नीलकंठीटीका

ग्रस्य फलमाह युंजन्निति एवमनेन प्रकारेण योगी ग्रात्मानं मनो
युंजन् समादधानः विगतकल्मषो निरस्ताविद्यादिक्लेशः सुखेन ग्र
नायासेन ब्रह्मसंस्पर्शं निर्विशेषब्रह्मणा ऐक्यं त्रिविधोपाधिप्रविलया
त् ग्रश्नुते प्राप्नोति कीदृशं ब्रह्मसंस्पर्शं ग्रत्यंतं ग्रंतो नाशः तद्रूपत्वभावेन
परिच्छेदस्तमतिक्रांतं निर्विशेषं सुखं परमानंदैकरूपं एतेन न किं
चिदपि चिंतयेदिति चरमोपायो व्याख्यातः २८॥

ग्रानंदीटीका

एवम्[२८] [illegible] ॥

रामकंठीटीका

एवमनेन यथोक्तेन क्रमेण ग्रवेधप्रतिमादिनं नियतमानसः सं

गी
टी ध

१२

यतोंतःकारणो योगी सर्वदा सर्वास्ववस्थासु एवं श्रुणु इत्यादिना
प्रतिपादितः स्वात्मानं युंजन् समादधानः सुखेनानायासेन प्राणायाम
प्रत्याहारध्यानधारणादिक्लेशाभावात् अनायासेन ब्रह्मणा परमा
त्मना संयोगम् अभेदम् अत्यंतं नित्यमेवाधिगच्छति प्राप्नोति [illegible]
[illegible]
[illegible] २८ ॥

एतदेव स्फुटं प्रतिपादयति ॥

लासिकी [illegible]टीका

एवमकल्मषभवात् कामादिनाफलकर्मणामदार्पणत्वहेतियनेष्वप
रागादिसमयेषु अथवा सर्वास्ववस्थासु एवं श्रुणु इत्यादि आत्मानं
युंजन् समादधानो योगी अतएव विगतकल्मषः संसारहेतुधर्माधर्म
रहितः सुखेनानायासेन प्रत्याहारणादिक्लेशाभावादनायासेन ब्रह्मसंस्प
र्शं कस्यचिदवयवस्यपरिहारेण कस्यचिद्ग्रहणेनावयवसंघट म
स्पृते व्याप्नोति किमत्यंतं सर्वपरिच्छेदाक्रांतमानंदरूपं यदुक्तं श्रीम
द्भक्ते याशावलोकनं नरूपालोकनं हि यत् आत्मव्याप्तिभव
तेषां शिवव्याप्तिस्ततोन्यथा चैतन्येहेतु रूपिणीति श्रुशांतेमनसि
आविर्भूतस्येति मसुखस्य समाधिकाले देहएव सत्वाद्देशतः काल
तश्च परिच्छिन्नत्वमित्यतो अत्यंतमित्युक्तं आत्मसुखवादेतश्चाविच्छिन्नम् ब
लसेनाश्चाकाशस्यैव निरंशस्यापि मायाकल्पितमवयवद्वयं चेतनव
र्गोजडवर्गश्चेति तत्र चेतनवर्गव्याप्त्या परमयोगित्वं जडवर्गस्या
पि व्याप्त्या सालाद्वयलतया जीवन्मुक्तत्वमेव तदुक्तं देहादिषु चेत्य
मानेषु अपि विवेकात्मप्रतिपत्तिरात्मजीवन्मुक्तिरिति [illegible]
[illegible]
[illegible] २८ ॥

सर्वत्रादिगुणत्रयैर्व्यापका आवयेद्यदा शिवव्याप्तिर्भ वेदेषा [illegible]

उक्तपूर्वस्य

पंचोलीटीका

ततस्मात् कर्तार्थोभवति इत्याह युंजन्निति एवं यथोक्तप्रकारेण सर्व
दा आत्मानं अंतःकरणं युंजन् समाधिप्रयुक्तं कुर्वन् विगतपापो योगी।
योगांतरायवर्जितः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मस्वरूपस्य अत्यं
तं निरतिशयं सुखं प्रत्यक्षेन प्राप्नोति २८ ॥

युञ्जन्नेवमिति एवं पूर्वोक्तप्रकारेण सदा सर्वास्ववस्थासु आ
त्मनो मनो युंजन् आरभ्यमाणस्वजात्युचितकर्मैकविषयं कुर्व
न् अयं योगी योगः समतालक्षणो ऽतिशयेन विद्यते यस्य सः अ
तिशयस्य परिपक्वत्वलक्षणः परिपक्वसाम्ययोगविशिष्ट इत्य
र्थः अत एव विगतकल्मषः रागद्वेषादिराहित्येन केवलं धर्म
बुद्ध्या प्रवृत्तिमत्त्वाद् युद्धवधादिजन्यपापास्पृष्टः सुखेनाना
यासेनैव अत्यंतं निरवधि सुखमश्नुते प्राप्नोति कथंभूतं सुखं
ब्रह्मपरमेश्वराख्यं तत्त्वं तेन संस्पर्शः संबंधो यस्य परमेश्वर
सुखवत्त्वमित्यर्थः अत्यंतता च सुखस्य बहुप्रकारकता ऐ
हिकं राज्यादिलक्षणं पारत्रिकं च स्वर्गभोगादिलक्षणमाप
वर्गिकं च मोक्षलक्षणमिति त्रिविधं क्रमेण प्राप्नोति योगीति
पर्यवसितोऽयमर्थः २८॥

मधुभाष्य

२८। एवं युंजन्निति ध्येयमाह २८॥

123

भाषा अनुवाद

अब योगीजन की कृतार्थता कहते हैं कि इसी प्रकार सर्वदा मन वशीभूतकारी पुरुष जिसका सम्पूर्ण पाप दूर भया है सोई योगी अनायास ब्रह्मसंस्पर्शी अर्थात् अविद्या निवृत्तिकारी जो प्रयत्न ब्रह्मज्ञान सर्वोत्तम सुख सो पावते अर्थात् जीवन्मुक्त होते हैं २८ ॥

दोहा

जोऽजन ऐसें चित नित योगी सो निरपाप विनाखेद अति
सुख लहैं ब्रह्मसंगको आप २८ ॥

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ईक्षते
योगयुक्तात्मा सर्वत्र समदर्शनः २९

शांकरभाष्यं

इदानीं योगस्य यत्फलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तत्प्रदर्श्यते सर्वेति सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वमात्मानं सर्वभूतानि चात्मनि ब्रह्मादीनि स्तम्बपर्यन्तानि च सर्वभूतान्यात्मन्येकतां गतानि ईक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः सर्वेषु ब्रह्मादिस्थावरान्तेषु विषमेषु सर्वभूतेषु समं निर्विशेषं विक्रियारहितं ब्रह्मात्मैकत्वविषयं दर्शनं ज्ञानं यस्य स सर्वत्र समदर्शनः २९ ॥

आनन्दगिरिकृतटीका

पापपदस्योपलक्षणं पुण्यस्यापि संस्पर्शाभावादात्यन्तिकमेकरसं उत्कर्षावि षयं संस्पर्शो योगमनुतिष्ठतो ब्रह्मभूतस्य सर्वानर्थनिवृत्तिनिरतिशयसुखावाप्तिलक्षणो द्विविधो मोक्षो हेतुना केन स्यादिति शङ्कायां तमुपायमाह इदानीमिति स्वमात्मानमीक्षत इति सम्बन्धः सर्वभूतान्यपि तद्विशेषणत्वेन पश्यति चेन्न भेदवत्त्वानमिति नाविद्यानिवृत्तिरित्याशङ्क्याह सर्वभूतानीति उक्ते दर्शने चित्तसमाधानमुपायं दर्शयति योगेति विषमेष्वपि भूतेषु ब्रह्मादिषु सममेव दर्शनं उपदर्शितदर्शनप्रतिबन्धकं प्रसङ्गं दर्शयति सर्वत्रेति २९ ॥

स्वामिकृतटीका

ब्रह्मसाक्षात्कारमेव दर्शयति सर्वभूतस्थमिति योगेनाभ्यस्यमानेन युक्तात्मा समाहितचित्तः सर्वत्र समं ब्रह्मैव पश्यतीति समदर्शनः तथा स्वमात्मानमविद्याकृतदेहादिपरिच्छेदशून्यं सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु स्थितं पश्यति तानि च स्वात्मन्यभेदेन पश्यति २९ ॥

पिशाचभाष्यं

इदानीं योगस्य फलं ब्रह्मैकत्वदर्शनं प्रदर्श्यते सर्वभूतस्थं सर्वेषु भूतेषु स्थितं स्वात्मानं सर्वभूतानि च ब्रह्मादीन्यात्मन्येकतां गतानीक्षते पश्यति योगयुक्तात्मा समाहितान्तःकरणः सर्वत्र समदर्शनः २९ ॥

गी॰ टी॰ षं॰

रामानुजभाष्यं

अथ योगविपाकदशा चतुः प्रकारा उच्यते सर्वभूतस्थमिति स्वात्मनः परेषां च भूतानां प्रकृतिवियुक्तस्वरूपाणां ज्ञानैकाकारतया साम्यादेव मस्य प्रकृतिगताद्योगयुक्तात्मा प्रकृतिवियुक्ते आत्मस्वरूपे सर्वत्र ज्ञानैकाकारतया समदर्शनः सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनीक्षते सर्वभूतसमानाकारस्वात्मानं स्वात्मसमानाकाराणि च सर्वभूतानि पश्यति एकस्मिन्नात्मनि दृष्टे सर्वस्यात्मवस्तुनः साम्यादितरस्मिन्नपि दृष्टमेव भवतीत्यर्थः सर्वत्र समदर्शनः इति वचनात् योऽयं योगस्त्वया प्रोक्तः साम्येन मधुसूदन इति वक्ष्यमाणत्वाच्च निर्दोषं हि समं ब्रह्मेति वचनाच्च २९ ॥

अभिनवगुप्तकृतटीका

एतेनैव क्रमेण योगिनां समतैव प्राप्यते इत्याह सर्वभूतस्थमिति अत एव योग इत्युक्तं तात्पर्यम् २९ ॥ सर्वेषु भूतेष्वात्मानं ग्राहकतयानुप्रविष्टं भावयेदात्मनि च ग्राह्याणां[^]

[^]: ज्ञानद्वारेण सर्वाणि भूतान्येकीकृत्य यो दृष्टः समदर्शनात्वं जायते योगस्त्विति संक्षेपार्थः विस्तारस्तु भेदवादविदारणादिप्रकरणे देवीस्तोत्रविवरणे च मयैव निर्णीत इति तत एवावधार्यः ॥ २९

परमार्थप्रपाटीका

एवं निरन्तरमेतद्ध्यानाभ्यासस्य देहान्ते तेनात्मानुभवसुखानुभवो यदा कदापि वा यदृष्टेः सर्वात्मकत्वेनात्मप्रतीतिमीशावास्योपनिषदुक्तां दर्शयति सर्वभूतस्थमिति योगेनाभ्यासेन युक्तः समाहित आत्मा मनो यस्यैवंविध आत्मानं स्थूलसमष्टिरूपं सर्वभूतेषु स्थूलव्यष्टिरूपेषु अवस्थितमिवेक्षते च न तु देहेन्द्रियादिष्वेव पश्यति तथा सर्वभूतानि आत्मनि स्थूलसमष्टिरूपे जलतरङ्गवत् तादात्म्येन पश्यति अत एव सर्वत्र समदर्शनः सर्वभूतेषु समं तारतम्यविवर्जितं दर्शनं प्रतीतिर्यस्य स तथा श्रुतिश्च यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु चात्मानं ततो न विचिकित्सतीति भाष्यं यः पुरुषः सर्वाणि भूतानि आत्मन्येव पश्यति जले तरङ्गानिव तथा सर्वभूतेषु आत्मानमेव पश्यति तरङ्गेषु जलमिव एवं भूतस्ततस्तदानीं विचिकित्सतीति तारतम्यविचारं न करोतीत्यर्थः २९

वनमालीटीका

इदानीं सिद्धयोगस्य जीवन्मुक्तस्याविशेषनिरूपणादिविषयत्वं हरिप्रसादाभिन्नत्वमेव पञ्चभिराह सर्वभूतस्थमात्मानं पश्यति सर्वत्र निरूप्य सर्वकर्माणि विषये पुनर्वस्ताभाविकं सर्वत्र समदर्शनमद्वैतं भगवद्दर्शनमाह सर्वेति योगयुक्तात्मा योगेन निर्विकारत्वेनात्मरूपेण युक्तः प्रसादं निमे

तेनात्मानमात्मा विनेयस्य स आत्मानं सर्वेश्वरं नियामकत्वेन व्याप
कत्वेन च सर्वभूतस्थं ब्रह्मादिस्तम्भपर्यन्तेषु प्रभुत्वेश्वर्येऽप्ययत्नेन पर्वरेत्त
नेऽपरोक्षतः पश्यति अथ च सर्वभूतान्यात्मनि सदाधारकाणि श्रुति
यस्मानि वृत्तेऽप्यनेन पदापरोक्षतः पश्यति कीदृशः सर्वत्रैव
हितात्मवहितप्रकृष्टाविप्रकृष्टवस्तुषु समं परोक्षरूपं दर्शनं यस्य स
र्वेषु जीवेषु ज्ञानानन्देश्वरनियम्यत्वादिना समानं दर्शनं यस्य सः २९

ऊस्तमवैजयन्तीटीका

एवं निष्पन्नयोगस्य योगिन आत्मस्वरूपं परमात्मस्वरूपं च भवतीत्युक्ता
येदानीमेकेन प्रकारेण स्वपरस्वरूपमनुभवति तस्य च कीदृशी दशेत्या
शंक्य तस्य योगविपाकदशायामभिप्रायोक्तेऽर्थतः प्रकारान्तरेण
रेण श्रेष्ठत्वेन दर्शयन्नाद्वात्मानुभवप्रकाशमाह सर्वभूतस्थमिति
योगयुक्तात्मा स्वात्मपरमात्मस्वरूपयोः संयोगो योगशब्देनोच्यते स्वात्म
परमात्मसंयोगे युक्तः समाधौ ध्यानेन संयुक्तः आत्मा मनो यस्य स तथा
आत्मा जीवभावविषये ध्यानरहितमना अपि सर्वत्र निखिलात्मपरमा
त्मवस्तुषु समदर्शनः समं ज्ञानैकाकारस्वरूपत्वेन तत्समं दर्शनं ज्ञानं
यस्य स तथा स्वस्वरूपस्यातिरिक्तानां प्रकृतिसंबन्धरहितानां जी
वस्वरूपाणां च परमात्मस्वरूपस्य च ज्ञानैकाकारस्वरूपत्वात्तत्समेव
स्वरूपमिति ज्ञानवानित्यर्थः सर्वभूतस्थं सर्वेषु ब्रह्मादिस्थावरान्ते
षु भूतेषु जीवेषु ज्ञानाकारसाम्यस्वरूपेणावतिष्ठतीति तथा सन्तं आ
त्मानं स्वस्वरूपमीक्षते पश्यति च पुनरात्मनि स्वस्वरूपे सर्वभूतानि
ब्रह्मादिस्थावरान्तानि जीवस्वरूपाणि ज्ञानस्वरूपसाम्यानि पश्यति।
यथाहं ज्ञानस्वरूपो ज्ञानादिधर्माश्रयस्तथैवान्यान्यपि भूतानि भवन्तीत्येवं
सर्वभूतसमानं स्वस्वरूपं पश्यति यथैतानि ज्ञानस्वरूपाणि ज्ञानादि
धर्माश्रयाणि तथाहमपि ज्ञानस्वरूपश्चैवं स्वस्वरूपसमानानि सर्व
भूतानि च पश्यतीत्यर्थः यथैवैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृन्मयं
विज्ञातं स्यात् यथैवैकेन लोहमणिना विज्ञातेन सर्वं लोहमयं विज्ञातं स्या
त् यथैवैकात्मविज्ञानेन सर्वमात्मवस्तु विज्ञातं स्यादिति श्रुतेः २९

मधुसूदनीटीका

तदेवं निरोधसमाधिना त्वंपदलक्ष्यं तत्पदलक्ष्यं च शुद्धं साक्षात्कृत्य तदैक्यगोचरात्तत्त्वमसीति
वेदान्तवाक्यजन्यान्निर्विकल्पकसाक्षात्काररूपादहमिति ब्रह्मविद्याभिधानाज्जायते ततः कृत्स्ना
विद्यातत्कार्यनिवृत्त्या ब्रह्मस्वरूपसम्पन्नतया मुक्त इत्युपपादयति त्रिभिः श्लोकैः तत्र प्रथमं त्वंपद

गी. टी. अ.

लब्धोपस्थितिमाह ॥
सर्वेषु भूतेषु स्थावरजंगमेषु शरीरेषु भोक्तृतया स्थितमेकमेव नित्यं वि
भुमात्मानं प्रत्यक्चैतन्यं साक्षिणं परमार्थसत्यमानंदघनं साक्षिभोक्तृज
डपरिच्छिन्नदुःखरूपेभ्यो विवेकेन तत्त्वेन साक्षात्करोति तस्मिंश्चात्मनि
साक्षिणि सर्वाणि भूतानि साक्ष्याध्यासात्मकेन संबंधेन भोग्यतया
कल्पितानि साक्षिसाक्ष्ययोः संबंधांतरानुपपत्तेः मिथ्याभूतानि परि
च्छिन्नानि जडानि दुःखात्मकानि साक्षिणो विवेकेन तत्त्वेन कः योगयुक्ता
त्मा योगेन निर्विचारवैशारद्यरूपेण युक्तः समाहितः आत्मांतःक
रणं यस्य स तथा तथा च प्रागेवोक्तं निर्विचारवैशारद्येऽध्यात्मप्रसादः
ऋतंभरा तत्र प्रज्ञा श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वादिति
तथा च शब्दानुमानागोचरयथार्थविशेषवस्तुगोचरयोगजप्रत्यक्षेण।
ऋतंभरसंज्ञेन युगपत्सर्वं व्यवहितविप्रकृष्टं च सर्वं वस्तु सममेव पश्य
तीति सर्वत्र समं दर्शनं यस्येति सर्वत्र समदर्शनः स चात्मानमात्मा
नेव योगयुक्तात्मा यथावस्थितमीक्षत इति प्र[illegible]यो योगयुक्ता
त्मा यो वा सर्वत्र समदर्शनः स आत्मानमीक्षत इति योगिसमदर्शिनौ।
वात्मेतराधिकारिणावुक्तौ यथा हि चित्तवृत्तिनिरोधः साक्षिसाक्षात्
कारहेतुः तथात्मविवेकेन सर्वानुस्यूतचैतन्यपृथक्करणमपि नाव
श्यं योगपर्यवसितः अत एवाह वसिष्ठः द्वौ क्रमौ चित्तनाशस्य योगो
ज्ञानं च राघव योगस्तु चित्तवृत्तिनिरोधो हि ज्ञानं सम्यगवेक्षणं असाध्यः कस्य
चिद्योगः कस्यचित्तत्त्वनिश्चयः प्रकारौ द्वौ ततो देवो जगाद परमः शिव इ
ति चित्तनाशस्य साक्षिणः सकाशात्तु पार्थिवभूतचित्तस्य पृथक्करण
तद्दर्शनस्य तत्त्वस्य चोपायद्वयं पक्षौ संप्रज्ञातसमाधिः संप्रज्ञातसमा
धौ हि आत्माकाराकारवृत्तिप्रवाहयुक्तमंतःकरणमात्मसाक्षिणानुभूयते
निरुद्धसर्ववृत्तिकं तूपशांततत्त्वात्रानुभूयत इति विशेषः द्वितीयस्तु सा
क्षिणि कल्पितं सातमनन्ततत्त्वाद्वा स्वेव साक्षेवत्वपरमार्थसत्यः केवलो
विद्यत इति विचारः तत्र प्रथममुपायं प्रपंचपरमार्थतावादिनो हैरण्य
गर्भादयः प्रपेदिरे तेषां परमार्थस्य चित्तस्यादर्शने न साक्षिदर्शनं निरोधा
दिति द्वितीयोपायासंभवात् श्रीमच्छंकरभगवत्पूज्यपादमतोपजीविनः।
वैतोपनिषदाः प्रपंचानृतत्ववादिनो द्वितीयमेवोपायमुपेयुः तेषां हि

योगे

विज्ञस्पनत

ध्यानत्तानदादेहे सति तत्र कल्पितस्य बाधितस्य दृशस्य बादर्शनम।
नाधासेनैवोपपद्यते अतएव भगवत्पूज्यपादैः क्वापि ब्रह्मविदां
योगापेक्षानवगमाद्योवभ्रतः अतएव वोपनिषदाः परमहंसाः श्रो
नेवेदांतवाक्यविचारएवगुरूमुपसृत्यप्रवर्तंते ब्रह्मसाक्षात्काराय
नतुयोगविचारे योगो विनैव चित्तदोषनिराकरणे नतत्साध्यासिद्धवा।
दितिकृतमधिकेन ॥ [illegible] २९

सदानंदीटीका

इदानीं योगसंसिद्धफलं ब्रह्मैकात्म्यदर्शनं सर्वसंसारविच्छेदकारणं
तत्प्रदर्शयति १ आब्रह्मस्थावरांतेषु सर्वभूतेषु विच्छिन्नं स्वात्मानमेकम
द्वैतमनुस्यूतं प्रपश्यति २ तथा सर्वाणि भूतानि ब्रह्मादीन्यात्मवस्तु।
नि एकां गतानि शुक्त्यात्मापश्यत्यात्मैकदृष्टिः ३ सारेभ्यः स्वतंत्रः
एवंभो विवेकेन विविच्य यः साक्षिणं सगात्मानमसंगं परिपश्यति ४
साक्षिण्येव सर्वभूतानि कल्पितान्यात्ममायया आध्यासिकोऽहिरिव योषा
यथा साक्षिसाक्ष्ययोः ५ तेनिरस्य विवेकेन मिथ्याभूतानि पश्यति योगो
नैकाग्र्यरूपेण चित्तेयस्य समाहितं ६ सर्वत्राप्तिसमे यस्य दर्शनं ब्रह्म
गोचरं सयोगी ब्रह्मविद्ब्रह्मपश्यत्यत्र प्रपश्यति १२९ ॥

नीलकंठीटीका

द्विविधस्यापि योगस्य फलमाह सर्वेति सोपाधिनिरुपाधिश्चद्वेधा
ब्रह्मविद्वच्यते सोपाधिकः स्यात्सर्वात्मा निरुपाधिश्चोपाधिकर्तृनिवा
र्तिकोऽकर्तीया संप्रज्ञाते आत्मनः सार्वात्म्यमनुभवन्योगी सर्वेषु भूतेषु
उपादानतया स्थितं आत्मानं ईक्षते पश्यति तथा असंप्रज्ञाते सर्वाणि
भूतानि ब्रह्मादीनि वपर्यंतानि आत्मन्येकतां गतानि रज्जाविवाध्यस्त
सर्पदंडधारादीनि तद्वत्पश्यति योगयुक्तात्मा योगेन समाहितचित्तः
मा अत्रैवश्रुत्यनावमाह सर्वेति सर्वेषु ब्रह्मादिस्थावरांतेषु विषमेषु
भूतेषु समं निर्विशेषं ब्रह्मात्मैकत्वविषयं दर्शनं यस्य स सर्वत्रसमद
र्शनः तथा च श्रुतयः यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्व
भूतेषु चात्मानं ततो न विजुगुप्सते सर्वस्यात्मा भवति ब्रह्मदाशा ब्र
ह्मदाशा ब्रह्मेमे कितवा उत इदं सर्वं यदयमात्मेत्यादयश्च प्रतिपा

दयेति यत्तयोर्योगयुक्तात्मा योवा सर्वत्र समदर्शनः स्वात्मानमीक्ष
त इति योगी समदर्शिनावात्मैक्यत्वाधिकारिणौ युक्तौ यथाहि विलक्ष
णविरोधः सात्विसात्कारहेतुः न तथा जडविवेकेन सर्वानुस्यूतचेत
न्यपृथक्करणमपि नावश्यं योगसाध्यमपेक्षितमिति न तत्र समाहितो भू
त्वात्मन्येवात्मानं पश्यति ततस्तु तं पश्यति निष्कलं ध्यायमान इत्यादि
श्रुतिभिः समाधिध्यानापरपर्यायस्य योगस्यैवात्मदर्शनहेतुत्वप्रति
पादनात् तत्कारणं सांख्ययोगाभिपन्नं विद्यामेतां योगविधिं च कृ
त्स्नमिति लिंगात् ज्ञानयोगयोः समुच्चयावगमात् न च श्रौतेन यौ
क्तिकविवेकमात्राज्जडाजडयोर्देहात्मनोः पृथक्करणं संभवति सो
पाधिकस्य भ्रमस्य उपाधिनिवृत्तिमंतरेण निवृत्त्यसंभवात् आदर्शा
द्यनिवृत्तावपि प्रतिबिंबादिभ्रमनिवृत्त्यापत्तेः अतएवाधिष्ठानसाक्षा
त्कारे सति तत्र कल्पितस्य चित्तस्य नहि दृश्यस्यादर्शनमनायासेनैवा
पद्यत इति निरस्तं योगं विनाधिष्ठानज्ञानस्यैवासंभवात् यदाहुः स्मृ
तः स्वसंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा अयोगी नैव जानाति
जात्यंधो हि यथा घटमिति यत्तु भगवत्पूज्यपादैः ब्रह्मविदः कृता
पि योगापेक्षा न मुख्यादर्शा बभूवुरिति तदथातो ब्रह्मजिज्ञासेत्यत्रा
थशब्दसूचितसमस्तविशेषणीभूतसाधनचतुष्टयांतर्गतशमा
द्युपेतसमाधिमदृहोक्तमिति न दोषः हेकमातिविवक्षितस्वाका
तात्पर्येन परस्परनिरपेक्षमार्गद्वयोपगमेनान्यः पंथा इति श्रुतिबा
धापत्तेः प्रतिपत्तिक्रमभेदमात्रपरतया प्रागेव वर्णितमिति दिक् किं
च योगप्रकारेण योगानपेक्षमार्गांतरप्रतिपादनमसंगतं नचत
स्य च कोत्र कश्चिद्विरोधो वर्तते संभवति वा उक्तप्रकारेण योगी वा समदर्शी
न इति वापरो व्याख्यातारोप्यसंगता इति दिक् २९ ॥

इयं सिद्धनिरंतरसंयमस्य योगि ज्ञानेश्वरीटीका नः स्वरूपमाह ॥

योगेन प्रधानजयांतेन परमसंयमेन युक्तः परमात्मनि योजित आत्
मा येनेदृशः सर्वत्र समं ब्रह्म योपादेयोपेक्षाबुद्धिहीने निर्विकारे दर्शनं
ज्ञानं यस्य सः आत्मानं स्वकर्मयोगार्थं संक्रमयुक्ता सर्वेषु भूतेषु च
तदेहाभिमानसर्गप्राणिषु स्थितं वर्तमानमीक्षते च पुनरात्मन्यात्मन्येव

जीवशरीरे सर्वभूतानि पृथिव्यादिप्रथानां तानि योगयुक्तात्मनोकेनतं
यमप्रकारेणात्मत्वाकरोति [illegible] २९ ॥
[illegible]

इत्थं सिद्धनिरन्तरसमाधेः कर्मयोगिनो **रामकंठीटीका** लोकोत्तरं व्यवहारं प्रतिपादयितु
माह- यथोक्तेस्मिन्कर्मयोगे युक्तः समाहितः सर्वत्र सर्वदा सर्वथा वर्तमानवि
ज्ञो योगी आत्मानमद्वयचिन्मात्रैकलक्षणं तथोक्तस्वरूपं सर्वभूतेषु परस्प
रंभिन्नत्वेनावस्थितेषु चराचरेषु प्राणिषु स्थितं पश्यति यदात्मनः समान
चिन्मात्ररूपमेकं तदात्मकान्येव भूतानि प्रेक्षत इत्यर्थः २९ ॥

एवं सर्वदा सिद्धसमाधेः कर्म लासिकी [illegible] **टीका** योगिनश्चेतनवर्गव्यापित्वलक्षणं ब्रह्मसंस्पर्शमाह
चतुर्भिः- योगेन यत्रोपरमते चित्तमित्यादिलक्षणेन सम्येन युक्तात्मा वर्तितस
भावः अत एव सर्वत्र भूतमात्रे समं निर्विशेषं ब्रह्मैव पश्यतीति समदर्शनः
सन् आत्मानमद्वैतचिन्मात्रैकलक्षणं सर्वेषु भूतेषु परस्परं भिन्नेषु ब्रह्मा
दिस्थावरान्तेषु तथोक्तस्वरूपस्वात्मनि सर्वाणि भूतानीत्तते अभेदेन सा
त्वाकरोति सर्वत्र चेतनवर्गस्वात्मभेदमेव पश्यतीत्यर्थः सर्वेषु भूतेष्वात्मा
नं ग्राहकतया नु प्रविशन्तं भावयेत् आत्मनि च ग्राह्यतया तदाकारेण सर्वा
णि भूतानि सकोऽजयति अतश्च समदर्शनत्वं जायते इति [illegible] २९
[illegible] ॥

पंचोलीटीका

इदानीं योगाभ्यासफलं ब्रह्मैकत्वदर्शनं सर्वसंसारविच्छेदकारणं तद्दर्शयति
सर्वेति योगयुक्तान्तःकरणः सर्वभूतस्थं सर्वेषु भूतेषु ब्रह्मादिस्थावरान्तेषु
विषयेषु समं निर्विशेषं ब्रह्मात्मैकत्वेनात्मानं पश्यति च पुनः सर्वभूतानि
आत्मनि पश्यति यः सर्वत्र समदर्शनः २९ ।

रामवीरसमिद्धार्थिनी ॥

सर्वभूतस्थमिति योगे कर्मकौशललक्षणे युक्तः सावधान आत्मा
विततं यस्य सत्ताद्यपाः तथा सर्वत्र सुहृन्मित्रादौ समं तुल्यं दर्शनं यस्य
स सुहृत्त्व मित्रत्वादिकं विशेषोपाधिं विहाय ततायित्वं तेषां सर्वेषां वपा

ईनायांसामान्यंनिमित्तमाश्रयस्वयमीक्षितिं प्रयोजिकां पक्षप्राप्ति
तियावत् एतद्विशेषणद्वयेनच कर्मकौशलसमत्वोभयलक्षण
योगद्वयारूढःस्यस्थौवसीयते सचात्मानंपरमेश्वरं सर्वभूतेषुस्थि
तमीक्षते साक्षात्करोति सर्वभूतानिचात्मनिपरमेश्वरेस्थितानी।
क्षते साक्षात्करोति मोक्षोपितस्यकरस्थएवेतितात्पर्यं २९॥

मधुभाष्य

सर्वभूतस्थमिति सर्वभूतस्थमात्मानंपरमेश्वरं सर्वभूतानिचा
त्मनिपरमेश्वरे तंचपरमेश्वरं ब्रह्मन्त्वागाद्यावेषयादिनासाम्ये
नपश्यति तदुक्तं आत्मानंसर्वभूतेषुभगवन्तमुपस्थितं अपश्य
त्सर्वभूतानिभगवत्यपिचात्मनीति समंसर्वेषुभूतेषुतिष्ठन्तंपर
मेश्वरमिति फलमाह २९॥

भाषा अनुवाद

ब्रह्म साक्षात्कार रूप अपरोक्ष ज्ञानकैसा होता सो देखावते हैं कि योग युक्तात्मा पुरुष ब्रह्म से ले स्थावर पर्यन्त मे समदर्शी सर्वभूत कहे प्राणी मात्रमे अपनेको देखता और यावत् जीवों को भी अपने मे देखताहै अर्थात् अविद्याकृत देहादि भेद दूर होय ब्रह्ममय ज्ञानवान सर्वत्र समदर्शित होता है २९

दोहा

सभीभूत महं आत्मको आत्म मह सम भूत देखें योगयुत वित सो सबमे समदर्शाभूत २९॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति तस्या-
हं न प्रणश्यामि स च मे न प्रणश्यति ३० ॥

शाङ्करभाष्यं

एतस्यात्मैकत्वदर्शनस्य फलमुच्यते यो मामिति यो मां पश्यति वा-
सुदेवं सर्वस्यात्मानं सर्वत्र सर्वेषु भूतेषु पश्यति सर्वं च ब्रह्मादिभूतजातं
मयि सर्वात्मनि पश्यति तस्यैवमात्मैकत्वदर्शिनः अहमीश्वरो न प्रण-
श्यामि न परोक्षतां गमिष्यामि स च मे न प्रणश्यति स च विद्वान्मम
वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वा-
त् स्वात्मा हि नामात्मनः प्रिय एव भवति ३० ॥

आनन्दगिरिकृतटीका

उक्तस्यैकत्वज्ञानस्य फलविकल्पनशङ्कां शिथिलयति एतस्येति त-
देकत्वदर्शनमनुवदति यो मामिति तत्फलमिदानीमुपन्यस्यति त-
स्येति ज्ञानानुवादभागं विभजते यो मामिति तत्फलोक्तिभागं व्याच-
ष्टे तस्यैवमिति अनेकत्वदर्शिनोपीश्वरो नित्यत्वान्न प्रणश्यतीत्याशङ्क्या-
ह नेति अहं परमात्मा तं नेति परोक्षो भवामीत्यर्थः स चेत्यादि व्याच-
ष्टे विद्वानिति विद्वानिवाविद्वानपीश्वरस्य न नश्यतीत्याशंक्याह नेत्या-
दिना अविदुषस्य स्वरूपेण सतोपि व्यवहितत्वादविषयता नष्टप्रायत्वेन
दृष्टेः ईश्वरस्य विदुषश्च परस्परमपरोक्षत्वे हेतुमाह तस्य चेति आत्मैकत्वेपि
कथं मिथोऽपरोक्षत्वं तत्राह स्वात्मेति ३० ॥

स्वामिकृतटीका

अनेन विविक्तस्त्वंपदार्थ इति दर्शिता तत्पदार्थं दर्शयन् एवंभूता-
त्मज्ञानस्य सर्वभूतात्मना भगवदुपासनं मुख्यं कारणमित्याह यइति
मां परमेश्वरं सर्वभूतमात्रेषु पश्यति सर्वं च प्राणिमात्रं मयि यः पश्य-
ति तस्याहं न प्रणश्यामि अदर्शनो न भवामि स च ममादर्शनो न भवति प्र-
त्यक्षो भवामि कृपादृष्ट्या तं विलोकयामि रक्षामीत्यर्थः ३० ॥ ते

पैशाचभाष्य

एतस्यैकात्म्यकत्वदर्शनस्य फलमुच्यते यो मां वासुदेवं सर्वत्र सर्वभूते-
^पश्यति षु यः सर्वं च ब्रह्मादिभूतजातं मयि सर्वात्मनि पश्यति तस्यैवमात्मै-
कत्वदर्शिनः अहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स

गी° टी° व

130

व मे न प्रणश्यति न परोक्षो भवति तस्य चाहं मात्मैकत्वात् स्वात्मा हि
नाम आत्मनः प्रकाश एव भवति ३०॥

रामानुजभाष्यं

यो मामिति ततो विपाकदशामापन्नो मम साधर्म्यमागतः निरस्त
पुण्यपापः परमे साम्ये स्थितः मत्स्वरूपे वर्तमानः सर्वस्यात्मवस्तुनो विधूतपुण्यपापस्य स्व
रूपेणावस्थितस्य मत्साम्यं पश्यन् यः सर्वत्रात्मवस्तुनि मां पश्यति सर्वं च मा
त्मवस्तु च मयि पश्यति अन्योन्यसाम्यादेकतरदर्शनेनान्यतरमपीदृशमि
ति पश्यति तस्यात्मस्वरूपं पश्यतोऽहं तत्साम्यान्न प्रणश्यामि नादर्शन
मुपयामि स मामपि मां पश्यन् मत्साम्यात्मात्मानं मत्सममवलोकयन्मा
नादर्शनमुपयाति ३०॥

अभिनवगुप्तकृतटीका

[illegible] मद्भेदेन [illegible]
[illegible] एकीकुर्वाण [illegible] दर्शनं लभते
[illegible] भेदवादविहरणादिप्रकरणे [illegible]
[illegible] ३०॥

परमार्थप्रपाटीका

अथ तस्य समष्टिरूपेण सर्वात्मकत्वेना[illegible]त्मप्रतीतिमाह यो
मामिति यः पुरुषः मां तत्समष्टिरूपं हिरण्यगर्भं सर्वत्र तत्तद्व्यष्टि
पिण्डात्मशरीरेषु पश्यति तथा सर्वं व्यष्टिरूपं मयि समष्टिरूपे पश्यति
तस्य पुरुषस्याहं न प्रणश्यामि सदैवाविर्भवामि फलितं ददामि स च पुरुषो
मे न प्रणश्यति मत्कृपाकटाक्षशरणापन्नो भवतीत्यर्थः ३०॥

वनमालीटीका

एवं दर्शनफलमाह मम सायुज्यं तत्प्रियोऽहं मम पि तस्य सायुज्यं तु प्रियतमत्वमाह य इति। यो
योगी मां सर्वेश्वरं सर्वान्तर्यामित्वेन सर्वव्यापकत्वेन च सर्वत्र सर्वभूतेषु
पश्यति सर्वं च चिज्जडरूपं मयि पश्यतीति एवंभूतस्याकोलकस्यानुवादश्रा
त्मपदस्य सम्बन्धिनः परमात्मनि निरासात् तस्याहं न प्रणश्यामि मत्तो व्यवहितो
विप्रकृष्टो वा न भवामि तस्य दर्शनपरोक्षतां न व्रजामि स च मे न प्रणश्य
ति मत्तो व्यवहितो विप्रकृष्टो वा भवतीत्यर्थः मम परोक्षतां नापि न व्रजति अ
यं भावः मत्सौहार्दादिवशेन तस्य योग्यस्योपासकस्य रूपस्य मध्ये न याप

महत्वाप्रतिबद्धाविक्षिप्तप्रेमप्रवाहस्य भक्तस्य योगिनोऽहं स्वतिविषयो
नभवामि किंतु तद्दर्शीभूतः करामलकवत्सर्वं तत्तत्परोक्षतया तिष्ठामि
ममानेन ब्रह्माण्डोदयादिकरणे नानाविधमदाराधकानां फलदाने च
नियमेन भक्तहृदानामनन्यथासक्तस्या ... काशवद्दासीनस्वप्रेमरस
नयासद्यथैवद्वन्द्वैरनिः सोऽप्यदर्शनमुपेतुमणीऽतोनव्रजन्ति किंतु तस्यैकी
वन्भक्तस्य मदेकवद्धानुरागस्य योगतेमवहामीति ३० ॥

हनुमद्वेजयन्तीटी॰

एवमात्मसत्तान्तरूपेणयोगविपाकदेशामुक्तेदानीन्तनोपाधिकदशामा
ह यो मामिति यएवंभूतो योगी सर्वेश्वरमादिरूपावरोतेषु वेतनावेतन
रूपेषु वेतनमात्रेष्वात्मानमहमर्थरूपं सर्ववेतनावेतनात्तर्यामिनं सर्व
नियन्तारं सर्वेश्वरं पश्यति च पुनर्मयि सर्वव्यापकरूपे सर्वाधारे सर्वकारणे
पुरुषोत्तमे सर्ववेतनावेतनपरत्वमात्रं पश्यति तस्यैवं भूतस्य स्वरूपं पश्य
तो मदधीनस्थितिप्रवृत्तिकस्य मदनन्यभक्तस्य मदेकजीवनस्य योगिनोऽ
हं महमर्थाभिन्नरूपो विश्वोद्भवस्थितिलयलीलः सर्वनियन्तासर्वान्तर्यामी
सदेव नेदनो न प्रणश्यामि ग्रहणेन भवामि सर्वेशो भवन्स्वरूपं पश्य
न्मदनन्यभक्तो मेममैश्वरस्य न प्रणश्यति ग्रहणेन भवति ३० ॥

एवं शुद्धत्वंपदार्थं निरूप्य शुद्धं मधुसूदनीटीका तत्पदार्थं निरूपयति ॥

यो योगी मामीश्वरं तत्पदार्थं सर्वप्रपञ्चकारणं मायोपाधिकमुपा
धिविवेके न सर्वत्र प्रपञ्चे सद्रूपेण स्फुरणरूपेण वानुस्यूतं सर्वोपाधिवि
निर्मुक्तं परमार्थसत्यमानन्दघनमनन्तं पश्यति योगजेन प्रत्यक्षेणापरो
क्षीकरोति तथा सर्वं प्रपञ्चजातं मायया मय्यारोपितं मद्भिन्नतया मत्पादान्ते

षष्ठ्युद्वविते

नैव पश्यति तस्यैवं विवेकदर्शिनो ऽहं तत्पदार्थो भगवान्प्रणश्यामि
ईश्वरः कश्चिन्मद्भिन्नोऽस्तीति परोक्षज्ञानविषयो न भवामि किंतु योगजा
परोक्षज्ञानविषयो भवामि यद्यपि वाक्यजापरोक्षज्ञानविषयत्वं च प
दार्थाभेदे नैव तथापि केवलस्यापि तत्पदार्थस्य योगजापरोक्षज्ञानवि
षयत्वमुपपद्यत एव एवं योगजेन प्रत्यक्षेण मामपरोक्षीकुर्वन्स च मत्
प्रणश्यति परोक्षो न भवति स्वात्मत्वाद्धि ममसविदा नतिप्रियत्वान्न स
र्वदा मदपरोक्षज्ञानगोचरो भवति येयथा मां प्रपद्यन्ते तांस्तथैव भजा

गी॰
टी॰
६
१ भगवतो

म्यहमित्युक्तेः तथैव शरणागतस्याभीष्टदानस्य श्रुतिविहितत्वं इति भगवतो
क्तेः अविद्वांस्तु स्वात्मानमपि मां तं भगवन्तं न पश्यति अतो भगवान् न पश्य
त्यपि तं न पश्यति स पश्यन्नविदितो न भवतीत्युक्तेः विद्वांस्तु सदेव स
विदितोऽनुग्रहभाजनमित्यर्थः ॥

मदानंदीटीका

तं पदार्थं निरूप्यैवं शुद्धं तत्त्वैकमीश्वरं विशुद्धस्तत्पदार्थोऽपि ह्युदिशाऽत्र नि
रूप्यते १ योगी तत्पदार्थं मां जगज्जन्मादिकारणं मायोपाधिविवेकेन
समस्ते जगतीश्वरं २ सतां स्वरूपेणानुस्यूतं निरुपाधिकं ध्रुवं यान्तं
दृष्ट्वात्मानमपरोक्षीकरोति वै तथा सर्वं जगन्मय्यारोपितं मायया तत
तस्यैव दर्शिनो नाहं तत्पदार्थो महेश्वरः ४ परोक्षत्वान्न विषयो भवामि
स्वात्मतां गतः ईश्वरं कश्चिदस्मीति मन्वते इति परोक्षधीः ५ पारोक्ष्यो
ऽत्यात्मनः पियो मां विप्रणश्यति विद्वान् स्वरूपत्वात् न परोक्षो ममा
पि सः ६ अविद्वांस्तत्त्वेन पश्यन्नीश्वरं मां तं अतो नतं परोक्षोऽपि पश्य
न्नपि प्रपश्यति ७ तानीनिम्नापरोक्षत्वाद्दीशानुग्रहभाजनं ८ ३० ॥

नीलकंठीटीका

अस्यैकत्वदर्शनस्यापि फलमाह यो मामिति सर्वज्ञः सर्वकृत्सः प
रमात्मपरः यो योगी आत्मानं सर्वत्र पश्यति सर्वं चात्मनि पश्यति तस्य
योगिनः तावदात्मानं प्रणश्यति अदर्शनं न गच्छति ज्ञात आत्मा नष्टे
नष्टो भवति सकृद्विभातत्वात् तस्य बीजाभावेन पुनरुदयासंभ
वादित्यर्थः ननु कार्यकारणसंघाताभिमानिनाशुक्तिरूप्यवद्ब्रह्मण्य
ध्यस्तेन तदभिमानस्यागस्वर्वकं तातेनाधिष्ठानभूतं ब्रह्म मा तिरोधापि
बुद्धेलनपतयाति तात् अस्मदृष्टान्तमेकजीवस्य तिरन्वयोच्छेदो भव
तीत्याशंक्याह स च मे न प्रणश्यतीति स च विद्वान्मम न प्रणश्यति
न तिरोभवति मदभिन्नत्वात् भवेदेतदेवं यदि जीवो मत्तोऽन्यः स्याद्वा
मम विकारो वा भवेत् न तावदनन्योऽच्छेद्यत्वात् अहमेव तत्त्वमसि त
त्त्वमस्याहं ब्रह्मास्मि अयमात्मा ब्रह्मेत्यादिप्रमाणात् तस्मात् युक्तमुक्तं
स च मे न प्रणश्यतीति ३० ॥

एवंसंप्राप्तपरसमाधेरात्मवि **आनंदीटीका** यथोक्तस्थितिं लक्षयित्वा परमात्मविषयां दृष्टिमीश्वरप्रणिधा हितकामस्त ह॥ सर्वत्र यः परमयोगी मेयमपुत्रा सर्वेषु भूतेषु वर्त्तमानः मां वासुदेवमनं तशोमितं परमेश्वरं सर्वानुग्राहकं सर्वत्र पश्यति सर्वेषु भूतेषु स्थितं साक्षात् करोति सर्वं भूतवर्गं च मयि पश्यति मदाधारत्वेनैव प्रवर्त्तमानं पश्यति जगतां स्वयं प्रदत्तासंभवात् तस्याहं न प्रणश्यामि इत्यादि ममस्तादृश्य मेवायं प्राप्त इत्यर्थः ३०॥

रामकंठीटीका

यथोक्तस्वरूपे स्वात्मनि सर्वभूतानि विगलितान्यन्यभेदानि पश्यतो न्यात्मनः सर्वभूतानां चाभेददर्शनप्रतिपादनपरमेतद्यथा चैतत्संभवति तथा प्रतिपादितमेव प्राक् तथापि स्पष्टत्वार्थं पुनरुच्यते आत्मा नामायं स्वावष्टंभः स्वग्राह्यग्राहकमूर्द्धन्यभूतः शून्यतादिसकलविकल्पविरहविशुद्ध संवित्प्रकाशैकलक्षणस्तस्य संवेदितत्वं नाम मायामिद्राकारोपरागस्तेन यद्यत्संवेदितं तत्संवेद्यमानमेव तेन तद्रूपतामात्मा लभते ३० ॥

अथ सिद्धसमाधेः सकाशाद्ध **लाभिकी वल्लभी टीका** प्रभूतस्य विशेषमाह॥ यो योगी सर्वत्र भूतमात्रे मामकलंकलक्षणमद्वैतस्वरूपमात्मानं पश्यति संवेदयति तथा सर्वं च प्राणिजातं मयि पश्यति तस्याहं न प्रणश्यामि मितयोगिनः सर्वदृश्यो न भवामि भृत्यतानाभावात् स च ममेश्वरस्यादृश्यो न भवति स्वरूपभूतत्वात् नैवंविधो विधिकिंकरो योगभ्रष्टो वा स्यादित्याह ३०

पंचोलीटीका

एतस्यात्मैकत्वदर्शनस्य फलं दर्शयति यः मां सर्वस्यात्मानं सर्वत्र सर्वेषु पश्यति सर्वं च ब्रह्मादिभूतजातं मयि विश्वात्मनि आरोपितं पश्यति तस्यैवमात्मैकत्वदर्शिनः अहमीश्वरो न प्रणश्यामि न परोक्षतां गमिष्यामि स च विद्वान्मम वासुदेवस्य न प्रणश्यति न परोक्षो भवति तस्य च मम चैकात्मकत्वात् सर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षविधानं तन्मुक्तिं च परोक्षमं दर्शयति ३०

रणवीरसमिद्धोयिनी ॥

योमामिति यःकर्मयोगी मां परमेश्वरं सर्वत्रस्थाने वर्तमानं पश्य
ति साक्षात्करोति मयि च सर्वं जगत्पश्यति तस्य कर्मयोगिनो ऽहं
न प्रणश्यामि न दृश्यो भवामि स च कर्मयोगी मम न प्रणश्यति
अदृश्यो न भवति प्रत्यक्षो भूत्वाहं कृपादृष्ट्या तं विलोकनं यथा गि
नं करोमीत्यर्थः ३०॥

मधुभाष्य

योमामिति तस्याहं न प्रणश्यामीति सर्वदा योगक्षेमं वहः स्या
मित्यर्थः स च मे न प्रणश्यति सर्वदा मद्भक्तो भवति स त्वपि
स्वामिन् स्वरक्षत्यन्यथः एवं भृत्ये प्रभजत्यभृत्य इति दिक् शि
ष्टिः उक्तं च सर्वदा सर्वभूतेषु समं मां यः प्रपश्यति अचलात्तस्य
भक्तिः स्याद्योगक्षेमं वहाम्यहमिति गारुडे एतदेव स्पष्टय
ति ३०॥

भाषा अनुवाद

अब पूर्वोक्त ज्ञानीको जो फल होता सो कहते हैं कि साक्षा त् परमेश्वर जो मै तिसको यावद्वस्तु मात्र सब मे और सकल यो कुछहै सो मेरे से यो देखता है तो उसको हम अदृश्य न हीं औ हमको वह भी अदृश्य नही अर्थात् हम प्रसन्न होय कृपादृष्टि से उसपर अनुग्रह करते है १०

दोहा

जो मोहि देखें सर्व मह सर्व लखें मो माहि सो दूर नहि मोह
सें मे अदृश्य नहि ताहि १०॥

133

सर्वभूतस्थितं यो मां भजते कत्वमास्थितः सर्वथा वर्त्तमानोऽपि स योगी मयि वर्त्तते ३१ ॥

शांकरभाष्य

यस्माच्चाहमेव सर्वात्मैकत्वदर्शी इत्येतत् पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षोऽभिधीयते सर्वेति सर्वथा सर्वप्रकारैर्वर्त्तमानोऽपि सम्यग्दर्शी योगी मयि वैष्णवे परमे पदे वर्त्तते नित्यमुक्त एव सः न मोक्षं प्रति केनचित् प्रतिबध्य इत्यर्थः ३१ ॥

आनन्दगिरिकृतटीका

विद्वदीश्वरयोरेकत्वज्ञानवादेन विद्याफलं विवृणोति यस्माच्चेति तस्मादेकत्वदर्शनार्थं प्रयतितव्यमिति शेषः पूर्वार्द्धेनानूद्योत्तरार्द्धेन फलविधिरिति मत्वाह इत्येतदिति रागादिरहितस्य यमनियमादिसंस्कारवतः सर्वप्रकारसम्भवेऽपि नाशंकनीया ज्ञानेत्यादि सर्वथेति प्रतिभासतोऽपि यथेष्टचेष्टांगीकारे कुतो ज्ञानवतो नित्यमुक्तत्वं प्रातीतिक इत्याचार प्रतिबन्धादित्याशंक्याह न मोक्षमिति ३१ ॥

स्वामिकृतटीका

नचैवंभूतो विधिकिंकरः स्यादित्याह सर्वभूतस्थितमिति सर्वेषु भूतेषु स्थितं मामभेदमाश्रितो यो भजति स योगी ज्ञानी सन् सर्वथा कर्मपरित्यागेनापि यावत्वल्लभ्यादिवत् कर्तृत्वेऽपि जनकादिवत् निषिद्धेनापि दत्तात्रेयादिवत् वर्तमानो मदेकत्वेन मय्येव वर्तते मुच्यते न तु पततीत्यर्थः ३१

पैशाचभाष्य

यस्माच्चाहमेव सर्वैकात्मकत्वदर्शी इत्येतत्पूर्वश्लोकार्थं सम्यग्दर्शनमनूद्य तत्फलं मोक्षोऽभिधीयते सर्वभूतस्थितमित्यादिना सर्वथा सर्वप्रकारैर्वर्त्तमानोऽपि सम्यग्दर्शी योगी मयि विष्णोः परदैवते वर्त्तते नित्यमुक्त एव सः न मोक्षं प्रति केनचित् प्रतिबध्यत इत्यर्थः ३१ ॥

रामानुजभाष्य

ततोऽपि विपाकदशामाह सर्वभूतस्थितमिति योगदशायां सर्वभूतस्थितं मामसंकुचितज्ञानैकाकारतया एकत्वमवस्थितः प्राकृतभेदपरित्यागेन यः स्वात्मानं यो भजते स योगी व्युत्थानकालेऽपि यथा तथा वर्त्तमानः स्वात्मानं सर्वभूतानि च पश्यन् स्वात्मनि सर्वभूतेषु च सर्वदा मत्साम्यमेव पश्य

तीत्यर्थः ३१ ॥

प्रभिनवगुप्ताचार्यकृतटीका

ज्ञानयोगकार्यकारित्वात् तथाहि परमात्मनः सर्वगतस्य योगेन प्रतिपत्तस्य परमात्मावस्थितेः स्वरूपप्रकटीकरणभावात् यथैवंद्व सिकत्वे नदीसंततमतिपरमात्मनि निविविद्ध माति ३१ ॥ यस्मेवं ह्याना

परमार्थप्रपाटीका

अथैतद्दनेतरेस्सर्वदृष्यज्ञानमात्माकारेण पश्यतीत्याह सर्वभूतेति । यः सर्वभूताकारेण स्थितं एकत्वमास्थितः सन्भजति अनुवर्तते सर्वथा वर्तमानोपिनामरूपाकारेण स्थितोपि मयि वर्तते महाकारो भवति तदुक्तं पुराणमुख्यामङ्गमनुजमानं गतवगसर्वेगगव्याघ्रोग्रहिरसनवयोमा हिषमुखे महाभूतोद्भूतसरिदुदधिपैलादिसकलं नवैतस्माद्यत्रसन्ना तिपुरतोमेनयनयोरिति श्रुतिरपि यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्वि जानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति भाष्यं यस्य विज्ञानतो विज्ञानवतः पुरुषस्य सर्वाणि भूतानि सर्वभूतात्मकं विश्वमात्मैवाभू त् भूतभावनाराहित्येन आत्माकारमनुजानतः स्येकत्वमद्वैतं अनुपश्य तः को मोहः मायाविलासरूपमस्तानङ्गतः तथानमपद्भक्तः शोकश्च कुतइत्यर्थः ३१ ॥

वनमालीटीका

सर्वभूतेषु ब्रह्मादिस्तंभपर्यंतेषु नियामकत्वेन व्यापकत्वेन चस्थितं मे कत्वं केवलं संजीवनमुक्तिमास्थितो भजति तैलधारावदविच्छिन्ना सर्वोत्तमस्वधीः सर्वकालेहमित्यनन्तसपिकरोति सयोगी सलमद्दष्ट रोगत प्रक्रो यावच्छरीरादिकं वर्ततेतावद्याप्यकर्मप्रावल्यात्सर्वका

२४

मसागेनयावल्कादिवत् विहितेनवाकर्मणा जनकादिवत् प्रतिषि द्धेनवाकर्मणाऽदत्तादेयजडभरतादिवत् सर्वथायेनकेनापिरूपेण । वर्तमानोपि मत्प्रसादेनतिष्ठन्मरसरूपानंदमरस्वरूपाकारकाविष्य वेनापरीतीभूतेमध्येवजलेमत्स्यवद्वर्ततेविहरतिकृतकृतमस्यकार्यंकिं चिन्नास्तीत्यर्थः ३१ ॥

कुलमवेजयन्तीटीका

ततोप्यधिकदशामाह सर्वभूतस्थितमिति सर्वभूतस्थितम् सर्वेष्विति विलेषभूतेषु वेतनेषु अन्तर्यामिरूपेण तिष्ठतीति सत्यापनंनित्वचेतना

[1]चेतना

[1]विद्यासाधकप्रयासैवैकात्म्यभगवतः सर्वगतंतिद्वि रूपविवस्पागतिपिनस्पियते ३८

B4

वेनवान्तरात्मानं मामहमर्थाभिन्नं नेन गुणशक्तिस्वरूपकं सर्वेश्वरं
पुरुषोत्तमं यो योगी पकत्वे सकलब्रह्मादिस्थावरान्तेषु वेतनाचेतना
त्मकेषु विशेषेकरूपेणेश्वरत्वत्वं स्थितमभिन्नरूपेण निःशरीरमेवं भावनया प।
कत्वे यद्वापरमेश्वरावतारागणदेवमनुष्यपाद्याकारेगौरव्यामादिरूपे
षु भिन्नभिन्नेष्वपि तत्तत्रेश्वरस्वरूपकरूपेतिभावनयैकत्वेन पश्यतो मे
षां मनन्यस्वरूपाणां जीवात्मनां सर्वदा चिदानन्दरूपेण देहाद्यैः पृथक्त्वम
कृ [illegible]।
गुणशक्त्यादिविशिष्टे भिन्नाभिन्नरूपमानत्वेऽपि प्रकृतिमहदादि
तत्त्वमनिस्यान स्वरूपेण स्वाभाविकः समानरूपः स्वरूपरतिभावेन
कालमास्थितः सन् भजते सेवते ध्यायति वा स इह शोभयोगी सर्वथा
सर्वप्रकारेण वर्तमानोऽपि ध्यानकालेऽप्युत्थानकाले वेष्टमनिष्टं कर्म
कुर्वन्नपि मयि सर्वविमेषु सच्चिदानंदरूपे वर्तते तिष्ठति वर्तमानदेहे
स्थितोऽपि मन्नावृणालनलतारोमोदेनिःष्ठीमर्थः ३१॥

आसमन्तात् विचारेण आस्थितः

एवं त्वंपदार्थं तत्पदार्थं च शुद्धं मधुसूदनीटीका निरूप्य तत्त्वमसिवाक्यार्थं निरूपयति॥

सर्वभूतेष्वधिष्ठानतया स्थितं सर्वभूतस्थितं सन्मात्रं मामीश्वरं तत्
पदलक्ष्यं त्वंपदलक्ष्येण सहैकत्वमनन्यत्वमभेदमास्थितः घ
टाकाशो महाकाश इत्येवोपाधिभेदनिराकरणेन नित्यं यो भजति
ब्रह्मैवाहमस्मीति वेदान्तवाक्यजेन साक्षात्कारेणापरोक्षीकरोति स
विद्वांस्तत्कार्यनिवृत्त्या जीवन्मुक्तः कृतकृत्य एव भवति यावत्तस्य बाधि
तानुवृत्त्या शरीरादिदर्शनमनुवर्तते तावत् प्रारब्धकर्मप्राबल्यात् स
र्वकर्मत्यागेन वा याज्ञवल्क्यादिवत् विहितेन कर्मणा वा जनकादि
वत् सर्वथा येन केनापि रूपेण वर्तमानोऽपि व्यवहरन्नपि स योगी ब्रह्मा
हमस्मीति विद्वान् मयि परमात्मन्येवाभेदेन वर्तते सर्वथा तस्य मोक्षं
प्रति नास्ति प्रतिबन्धशङ्का तस्य ह न देवाश्च नाभूत्या ईशत आत्मा ह्ये
षां स भवतीति श्रुतेः देवा महाप्रभावा अपि तस्य मोक्षाभवनाय नेशा
न किमुतान्ये क्षुद्रा इत्यर्थः ब्रह्मविदो निषिद्धकर्मणि प्रवर्तकयोः।
रागद्वेषयोरसंभवेन निषिद्धकर्मासंभवेऽपि तद्गीकृतमतानलमर्थोमि

क्षि

हेन

वत् प्रतिषिद्धेन कर्मणा दत्तात्रेयादि

गी.
टी.
स.

135

मिदमुक्तं सर्वथा वर्तमानोऽपी निहत्वापि मद्भावो लोकान्नहंति न निबध्यत इति वत ।। [illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible] ।। १८

सदानंदीटीका

तत्त्वंपदार्थमुक्त्वैवमखंडार्थो निरूप्यते ब्रह्मादिस्थावरांतेषु भूतेषु भावेष्वयः १ निर्विशेषं चिदानंदमात्महं तं निरंजनं गुणरूपक्रियावांल्लविक्रियाद्यकदेहवक १ भेदं समुक्त्वाध्यस्तमुरुं समस्थितमात्रतयास्थिते न सदापि कलरूपस्यात्मनोऽलक्ष्यरूपिणः १ सहैकत्वेऽहमोऽस्मि इममयेनाभेदमास्थितः प्रहेत्वस्मि निवेदांतवाक्यजज्ञानवलक्षणा ४ सुपरोक्षीकरोमास्तुमुक्तः विद्यावनन्कृते कृतकृत्यमनयासोपजीवन्मुक्तउदारधीः ५ यावत्तस्य शरीरादिदर्शनं चानुवर्तते आभासमात्रं तद्रूपस्य यथास्वात्मस्य दर्शने ६ प्रारब्धकर्मशेषसंतावत्कर्माणि वा समजन् कुर्वन्वा विहितं कर्मनिषिद्धं वा समाचरन् ७ येन केनापि रूपेण योगीत्यवहरन्नपि ब्रह्मास्मीति धियाविद्वान्नैव परमात्मनि ८ एकत्ववर्तते नित्यमहं तेन वै सर्वपदे नित्यमुक्तस्वभावत्वात्कर्मभिर्नैव लिप्यते ९ धर्माधर्मोचनी नेदिपदे नित्यं विराजते १० यस्योदारकृपाकटाक्षविलसद्वैराग्यमुख्योदयात्सम्यक्तत्त्वमसीति नेगमगिरा ह्यनात्मबोधाग्निना दग्ध्वाज्ञानमशेषभेदजनकं धीरा परं विद्वते नित्यं मात्मपदं सदंनमनिशं तं कृष्णभजेहं सदा ।।३१

नीलकंठीटीका

यस्मात्सर्वात्मैकत्वदर्शी ब्रह्मैव संपन्नो नास्य मोक्षः प्रतिबध्यत इत्याह सर्वभूतेति सर्वोपादानतया सर्वेषु भूतेषु सत्तारूपेण स्फुरणरूपेण चास्थितं मां परमात्मानं एकत्वं जीवब्रह्मणोरैक्यमास्थितः सन् भजति नित्यविकल्पेन समाधिनासेवते स योगी सम्यग्दर्शी यथाप्रारब्धकर्मवशात्

वापि नानुवर्त्मादेहमात्रः सर्वथा सर्वप्रकारेण याज्ञवल्क्यादिवत्क
त्या र्मयोगेन वा वसिष्ठजनकादिवद्विहितकर्मणा वा दत्तात्रेयादिवन्निषिद्ध
कर्मणा वा वर्तमानोपि व्यवहरन्नपि मय्येव वर्तते न मत्तश्च्युतो भवति
यतो देवेभ्योपि नास्य भयमिति श्रूयते तस्य ह न देवाश्च नाभूत्या ईशत
आत्मा ह्येषां स भवतीति च नेमवयमप्यषे देवाश्चपि न स्वब्रह्मविदः
अभूतिस्त्रैलोक्यैश्वर्यापनयनेन समर्था भवंति यतो यमेषामात्मेति श्रु
त्यर्थः स तत्त्वतः संसारी सर्वेव इव तीत्यर्थः ३१ ॥

आनंदटीका

एकत्वमास्थितः कर्मभोगार्थं नानाशरीरस्थोप्यहमत्रैकएवेत्याय
भूषणोक्तप्रकारेण सर्वव्यापी भोक्तेति स योगी सर्वथा मनः संधारयन्यो
मां परमेश्वरं भजति स योगी सर्वथा सर्वेषां कर्मभोगार्थं संक्रान्तानां
तेषां तेषां शरीरिणां प्रकारैः कायिकैर्वाचिकैश्च वर्तमानोपि मयि वर्तते
मत्सायुज्यमाप्नोति भावः व्याख्यातं चैतत् संस्कारसाक्षात्कारात्पूर्वजातिसंवेदनमि
ज्ञानमिति सूत्रे परज्ञाप्यैवमेव संस्कारसाक्षात्कारात्पूर्वजातिसंवेदनमि
ति [illegible] ३१ ॥

रामकंठटीका

संवेद्यमनन्तात्र निर्विकल्पावस्थापूर्विका भवति तेन यद्यत्किंचिद्यदा
यदा यत्र यत्र येन येन प्रमाणेन संवेद्यते तत्तदृढयानेन चिन्मात्रस्वरूपमि
त्यात्मनः संवेदितुर्वेद्यानां च सर्वभूतानां नास्ति कश्चिद्भेदो वास्तवः केव
लमविंत्यपारमेश्वरमायोज्ञाविनोवेद्यवेदकविकल्पः सर्वमिदमन्यान्य
विभिन्नतयावभासयति स च परमेश्वरप्रसादादुन्मिषितया विद्याख्यया
दृष्टान्तत्वविघ्नित्वादृशो विभाव्यमानो यदा विगलति तदाभिन्नसेन सा
गरसलिलवत्सर्वमिदमात्मनैवैकेनावभासते ज्ञानकर्मसमुच्चयादुष्टा मु
नात्मतिवास्मिन्महायोगप्रस्तुदितविद्याशक्तिरेवाधिकृतत्वादितिकर्मयोगी
सर्वत्रस्थावरेणगमेव [illegible] भूतग्रामे समदर्शने हेतात्मकतत्त्वैकदर्शीत
[illegible] ॥
[illegible]

लास्मिकी [illegible] टीका

सर्वेषु भूतेषु मामभेदेन यो भजते स योगी सर्वथा कर्मत्यागेन वर्तमा

गी.
टी.
ब.

136

नोपि मय्येवर्त्तते नतुभ्रश्यतेइत्यर्थः ३१ ॥

पंचोलीटीका

सर्वभूतस्थितमिति यः सर्वभूतस्थितं मां एकत्वमास्थितः सर्वत्र अभेदबुद्ध्याभजतेसयोगीसम्यग्दर्शीसर्वथासर्वप्रकारैःकर्मत्यागे नवापिवैसवेपरेपदेवर्त्ततेनेनकेनचित्प्रतिबध्यतइत्यर्थः ३१ ॥

रमावीरसमिद्धोधिनी ॥

सर्वभूतस्थितमिति यःकर्मयोगी मांपरमेश्वरंसर्वभूतस्थितं सर्वप्राणिहृदयेषुस्थितत्वात्तोस्तुतत्क्रियासुप्रवर्तयंतंभजति सा ध्यसिद्धयेस्मरणंकरोति कथंभूतः एकत्वंसुहृदादिषुसमता समास्थितःसकर्मयोगीमयि परमेश्वरेवर्तमानः यथेश्वरेच्छा स्यात्तथाभवतुनाम परंत्वहंस्वधर्ममनुतिष्ठाम्येव येनाहंबाध्या नभवामीत्येवंनिश्चयवान् सर्वथावर्तते सर्वैःप्रकारैः प्रवर्तते यद्वा सर्वथासर्वैःप्रकारैर्वर्तमानः कर्मसुप्रवृत्तिमान् सकर्मयो गीमयिवर्तते अंतकालेमामेवप्राप्नोतीत्यर्थः ३१ ॥

मधुभाष्य

सर्वभूतस्थितमिति एकत्वमास्थितः सर्वत्रैकपरमेश्वरइतिस्थितः सर्वप्रकारेणवर्तमानोपिमय्येववर्तते एकमपरोक्षंपश्यतोज्ञा नफलंनियतमित्यर्थः तथापिप्रायेणाधर्मंकरोति कुर्वतस्तुमद वेदुःखंसूचकंभवतीत्युक्तंपुरस्तात् प्राक्तव कदाचिदपिनाध र्मेबुद्धिर्विस्तुदर्पणंभवेत् प्रमादात्तुकृतंपापंस्वल्पंभस्मीभविष्य ति प्रादितानैस्तथादेवैस्तर्षिभिःक्रियतेकिंपुनः बाद्धल्यात्कर्म णस्तेषांदुःखसूचकमेवतदिति सांख्यप्रकारांतरेणव्याचष्टे ३१

भाषा अनुवाद

एवम्भूत पुरुष विधि करे कर्म के अधीन नहीं है सो कहते हैं कि सर्व भूत मे वर्तमान जो मे तिस को एक बुद्धि करे एक मो हिं केर और बुद्धि नहीं है जिस के सो मेरे ही को आश्रय करि भजता है सो योगी तत्त्वज्ञानी सकल कर्म परित्याग करिके सर्वथा वर्तमान करे जीवित दशा मे भी मेरे मे वासे है अर्थात् सायुज्य गतिको प्राप्त है ३१

दोहा

सभी जीवमें स्थित मोहिको भजें जो एकता पाय सभ वि
धि वर्तत योगी जोसो मो मांहि समाय ३१॥

137

आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन सुखं
वा यदि वा दुःखं स योगी परमो मतः ॥ ३२ ॥

शांकरभाष्य

किंचान्यत् आत्मेति आत्मौपम्येन आत्मा स्वयमेव उपमीयतेऽनयेति उपमा तस्याः उपमायाः भावऔपम्यं तेनात्मौपम्येन सर्वत्र सर्वभूतेषु समं तुल्यं पश्यति योऽर्जुन सच किं समं पश्यतीत्युच्यते यथा मम सुखमिष्टं तथा सर्वप्राणिनां सुखमनुकूलं वाशब्दश्चार्थे यदि वा यच्च दुःखं मम प्रतिकूलमनिष्टं यथा तथा सर्वप्राणिनां दुःखमनिष्टं प्रतिकूलमित्येवमात्मौपम्येन सुखदुःखे अनुकूलप्रतिकूले तुल्यतया सर्वभूतेषु समं पश्यति न कस्यचित् प्रतिकूलमाचरत्यहिंसक इत्यर्थः यएवमहिंसकः सम्यग्दर्शननिष्ठः सयोगी परमउत्कृष्टो मतोऽभिप्रेतः सर्वयोगिनां मध्ये ॥ ३२ ॥

आनन्दगिरिकृतटीका

स्वैराचरणस्याप्रतिबन्धकत्वकथनात् परपीडनस्य योगिनः सम्यग्दर्शने प्रत्यप्रतिबन्धकत्वप्रसक्तावुक्तं किंचेति अयमपि किंचदुच्यते । परमयोगिनो निर्देशद्वारा योगमाहात्म्यमित्यर्थः उपमैवौपम्यमात्मा च तदौपम्यंच तेन सर्वभूतेषु यः समं पश्यतीत्युक्तं तदेव सम्यग्दर्शने प्रश्नपूर्वकं विवृणोति किमित्यादिना विकल्पार्थत्वं वारयति वाशब्द इति उपदर्शितसम्यग्दर्शनफलमभिलपति न कस्यचिदिति किमेवं तस्य परमत्वे तत्राह सर्वेति ॥ ३२ ॥

स्वामिकृतटीका

एवंभूतानां योगिनां मध्ये सर्वभूतानुकंपी श्रेष्ठ इत्याह आत्मौपम्येन सर्वत्रेति आत्मौपम्येन स्वसादृश्येन यथा मम सुखं प्रियं दुःखं वाप्रियं तथान्येषामपीति सर्वत्र समं पश्यन् सुखमेव सर्वेषां यो वाञ्छति न तु कस्यापि दुःखं स योगी श्रेष्ठो मम अभिमत इत्यर्थः ॥ ३२ ॥

पिशाचभाष्य

किंच आत्मा स्वयमेवउपमानं भावमात्मौपम्यं तेन तदौपम्येन सर्वत्र सर्वभूतेषु समं तत्त्वं पश्यति योऽर्जुन किं च पश्यतीत्यत्रोच्यते यथा मम

मसुखमिष्टंतथाप्राणिनांसुखमनुकूलंवाशब्दश्चार्थेयदिवायथा
चदुःखंममप्रतिकूलमनिष्टंतथासर्वप्राणिनामनिष्टंप्रतिकूलमिति
एवमात्मौपम्येनदुःखंसुखंवाअनुकूलंप्रतिकूलंतुल्यतयासर्वभूतेषुसमं
पश्यतिनकस्यचित्प्रतिकूलमाचरतिअहिंसकइत्यर्थः एवमहिं
सकःसम्यग्दर्शननिष्ठःसयोगीपरमःउत्कृष्टोमतोभिमतःविंतत
इत्यर्थः ३२ ॥

रामानुजभाष्यं

ततोपिकाष्ठामाह आत्मौपम्येनेति आत्मनश्चान्येषांचआत्मनामसं
कुचितज्ञानैकाकारतयौपम्येनसाम्येनस्वात्मनिचान्येषुसर्वत्रवर्तमानंपु
त्रजन्मादिरूपंसुखंमरणादिरूपंदुःखमसंबंधसाम्यात्समंयः
पश्यति परपुत्रजन्ममरणादिसमंस्वपुत्रजन्ममरणादियःपश्यती
त्यर्थः सयोगीपरमयोगकाष्ठांगतोमतः ३२ ॥

अभिनवगुप्तकृतटी०

तथाविधंयोनपश्यतिसपरमार्थंसुखरूपात्सुखाद्दुःखंनपश्यतिदेकमन
तिरिक्तात् एवंसर्वगतमेवपश्यतितस्याहंनसुखंदुःखंस्वरूपेणाभा
सनात् भावांश्चमपिपश्यति तेषांभासमनोयहेनैवदस्मात्तानंस्वरूपेणा
नात्मनःसुखदुःखःपरमात्मनः ३२ ॥ सर्वस्यचसुखदुःखेआत्मतुल्यतयापश्यतीतितद्रूप
मानन्दरूपत्वम् ३२ इत्यर्थोविधिः

परमार्थप्रपाटीका

अथैतादृशस्यापिगुरूपस्यलोकव्यवहारेवर्तमानस्यदशामाह ।
आत्मौपम्येनेति यःपुरुषःसर्वत्रसर्वभूतेषुसुखंदुःखंवाआत्मौप
म्येनपश्यति यथामे आत्मनःसुखमिष्टंममदुःखमनिष्टंतथैवसर्व
त्रप्राणिनामितिपश्यतिसपरमश्चरमदशाप्राप्तोयोगीमतः ३२ ॥

वनमालीटीका

भगवदर्पणोक्तत्वात्तेनोक्तिमतावियस्यप्रारब्धकर्मवशात्समाधे ।
र्व्युत्थानेपीत्थंवर्तनंतस्याह आत्मेति आत्मैवौपम्यमुपमातेनात्मदृष्टा
न्तेनसर्वत्रप्राणिजातेसुखंयदिवादुःखंसमंतुल्यंपश्यतिस्वस्यानिष्ट
यथानसंपादयतितथापरस्याप्यनिष्टंनसंपादयति अद्वेषतद्बीजावि
द्याशून्यत्वात् एवंस्वस्येष्टंयथासंपादयतितथापरस्यापीष्टंयःसंपा
दयतितथाप्यनिष्टंनसंपादयति अद्वेषतद्बीजाविद्याशून्यत्वात् एवं

स्वस्येष्टं यथा संपादयति तथा परस्यापीष्टं यः संपादयति रागद्वेष-
विधाशून्यत्वात् स निर्वासनत्वेनोपशान्तमनाः परमः श्रेष्ठः पूर्वस्मात्।
उक्तेष्वपि भगवदाशये केचिन्मनोनाशवासनाक्षययोर्निःशेषतया
भावात् जीवन्मुक्तिसुखं स्वयोगफलत्वेनानुभवति चित्तविक्षेपेण
च दुःखं समनुभवति सोऽपरो योगी देहपाते कैवल्यभागित्वात् देहस
द्भावपर्यन्तं च दुःखोत्पादानुभवात् अपरं ज्ञानस्वयोग्याशेषभगवद्विशे
षापरोक्षानुभवेन समाधेर्निवृत्तिः शेषविषयोजातमनोनाशवा
सनाक्षयः पुनः पूर्वाभ्यासाद्दुःखस्य तिरोहितत्वं सर्वं कं जीवन्मुक्तिसुख
मनुभवन् प्रारब्धकर्मवशात् समाधेर्व्युत्थानेऽपि स्वदृष्टान्तेन सर्वप्राणि
नां सुखं च समं पश्यन्नवतिष्ठति स परमो योगीति भावः ३२॥

ऊसमदेजयवनीटीका

ततोऽप्यधिको योगविपाकदशामाह आत्मौपम्येनेति हे अर्जुन शुद्धां
तःकरणायतनस्तेनाप्यधिकदशामापन्नो योगी सर्वत्र सर्वेषु द्विजस्व
दजोद्भिज्जजरायुजेषु चतुर्विधेषु भूतेषु आत्मौपम्येन स्वपरेषामात्मना
मौपम्येन तत्तानेकस्वरूपत्वेन साम्येन सादृश्येन वा सुखं वा मित्रमिल
नादिरूपं यदि वा दुःखं शत्रुमिलनादिरूपं समम् अभयात्मना पश्य
ति यथा सुखं आध्यात्मिकादितापत्रयरहितं दुःखं यद्युक्तं समं पश्यति
यथा स्वमित्रपुत्रकलत्रादिशरीरादीनां तापत्रयव्यवहाररूपसुखेन सुखी
न युक्तत्वेन दुःखी भवेत् यथा परमित्रपुत्रादिशरीरादीनामपि तापत्रयर
हितात्मकसुखेन सुखी न युक्तत्वेन दुःखी भवेदिति अभिप्रायः स सुखदुः
खे च समत्वं दुःखं समत्वेन पश्यन् योगी परमः श्रेष्ठो मतो ममाभिमतो
भवति स्वपरसुखसमदर्शित्वात् ततोऽपि श्रेष्ठो न भवतीति भावः ३२

मधुसूदनीटीका

+ आत्मौपम्येनात्मदृष्टान्तेन सर्वत्र प्राणिजातेषु सुखं वा य
दि वा दुःखं समं तत् यः पश्यति स्वस्यानिष्टं यथा न संपादयति एवं पर
स्याप्यनिष्टं यो न संपादयति द्वेषशून्यत्वात् एवं स्वस्येष्टं यथा संपाद
यति तथा परस्यापीष्टं यः संपादयति रागशून्यत्वात् स निर्वासनत्वेनो
पशान्तमना योगी ब्रह्मवित् परमः श्रेष्ठो मतः पूर्वस्मात् हे अर्जुन उक्त

+ एवमुक्तेष्वपि तत्त्वबोधे कश्चित् मनोनाशवासनाक्षययोरभावात् जीवन्मुक्तिसुखं नानुभवति चित्तवि
क्षेपेण च दुःखं समनुभवति सोऽपरो योगी देहपाते कैवल्यभागित्वात् देहसद्भावपर्यन्तं च दुःखसुखानु
भावात् तत्त्वज्ञानमनोनाशवासनाक्षयाणां युगपदभ्यासात् दुःखलेशेन निर्विकं जीवन्मुक्तिसु
खमनुभवन् प्रारब्धकर्मवशात् समाधेर्व्युत्थानकाले ॥
+

अतस्तत्त्वज्ञानमनोनाशवासनाक्षयाणामक्रमेणाभ्यासाय महान्प्रयत्न
आस्थेयस्तत्रार्थः तत्रेदं सर्वं द्वैतजातमद्वितीये चिदात्मनि मायया क
ल्पितत्वान्मृषैव आत्मैवैकः परमार्थसत्यः सच्चिदानंदाद्वयोहमस्मी
तिज्ञानं तत्त्वज्ञानं १ प्रदीपज्वालासंतानवद्वृत्तिसंतानरूपेण परिणाम
मानं अंतःकरणद्रव्यं मननात्मकत्वान्मनइत्युच्यते तस्य नाशो ना
म वृत्तिरूपपरिणामं परित्यज्य सर्ववृत्तिविरोधिना निरोधाकारेण परि
णामः २ पूर्वापरपरामर्शमंतरेण सहसोत्पद्यमानस्य क्रोधादिवृत्ति
विशेषस्य हेतुश्चित्तगतः संस्कारविशेषो वासना पूर्वपूर्वाभ्यासेन चित्ते
वासमानत्वात् तस्याः क्षयो नाम विवेकजन्यायां चित्तप्रशमवासनायां
दृढायां सत्यामपि बाह्ये निमित्ते क्रोधाद्यनुत्पत्तिः ३ तत्र तत्त्वज्ञाने सति मिथ्या
त्वेन जगति निरविषयाणां वृत्तीनामुदयासंभवान्मनसुषुप्तेन पुन
हेमवद्योगान्निरिंधनाग्निवन्मनो नश्यति नष्टे मनसि संस्काराहो यं क
स्यवासस्य निमित्तस्याप्रतीतेर्वासना क्षीयते एवं क्षीणायां वासनायां हे
त्वभावेन क्रोधादिवृत्त्युदयान्मनो नश्यति नष्टे च मनसि शमदमादि
संपन्नात्तत्त्वज्ञानमुदेति एवमुत्पन्नेतत्त्वज्ञाने रागद्वेषादिरूपा वासना।
क्षीयते क्षीणायां च वासनायां प्रतिबंधाभावात् तत्त्वज्ञानोदय इति पर
स्परकारणत्वं दर्शनीयं अतएव भगवान्वसिष्ठ आह तत्त्वज्ञानं मनोना
शो वासनाक्षय एव च मिथः कारणतां गत्वा दुःसाध्यानि स्थितानि हि।
तस्माद्राघव यत्नेन पौरुषेण विवेकिना भोगेच्छां दूरतस्त्यक्त्वा त्रयमेत
त्समाश्रयेत् इति पौरुषो यत्नः केनाप्युपायेनावश्यं संपादयिष्यामीत्येवंवि
धोत्साहरूपो निर्बंधः विवेको नाम विविच्य निश्चयः तत्त्वज्ञानस्य श्रव
णादिकं साधनं मनोनाशस्य योगः वासनाक्षयस्य प्रतिकूलवासनो
त्पादनमिति एतादृशविवेकयुक्तेन पौरुषेण प्रयत्नेन भोगेच्छायाः
स्वल्पाया अपि दृष्टविषाक्तस्यवन्नैवेति माये न वासनावृद्धिहेतुत्वाद्दूरत
स्त्यक्त्वे हि विविधो हि विद्याधिकारी कृतोपास्तिरकृतोपास्तिश्चेति तत्र य उ
पास्यसाक्षात्कारपर्यंतामुपास्तिं कृत्वा तत्त्वज्ञानाय प्रवृत्तस्तस्य वासना
क्षयमनोनाशयोर्दृढत्वेन तत्त्वज्ञानादेव जीवन्मुक्तिस्तनएव सिध्यति
इदानींतनस्तु प्रायेणाकृतोपास्तिरेव मुमुक्षुरोत सहसाज्ञानं हसा

विद्यायां प्रवर्त्तते योगं विना विज्ञः विवेकमात्रेणैव च मनोनाशवा
सनात्यागौ न तु कालिकौ संपाद्य शमदमादिसंपन्नाः श्रवणमननि
दिध्यासनानि संपादयति तेषां हृद्ग्रन्थयः सर्वे च विच्छेदितव्ता
नस्युरिति अविद्याग्रन्थिर्ब्रह्मात्मैक्यहृदयग्रन्थिः संशयः कर्माण्यपि सर्वे
कामनेऽस्य हृः श्रुतजे न च वेद्यनेकविधो वेद्यो ज्ञानान्निवर्त्तते तथा श्रुत
ते एतद्यो वेद निहितं गुहायां सोऽविद्याग्रन्थिं विकिरतीह सोम्य ब्रह्म
वित्सैव भवति भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य
कर्माणि तस्मिन्दृष्टे परावरे सत्यं ज्ञानमनन्तं ब्रह्म यो वेद निहितं गुहा
यां परमे व्योमन् सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चितेति तमे
व विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति यस्तु विज्ञानवा
न्भवत्यमनस्कः सदाशुचिः स तु तत्पदमाप्नोति यस्माद्भूयो न जा
यते य एवं वेदाहं ब्रह्मास्मीति स इदं सर्वं भवतीत्यसर्वेत्तानतिह्निफ
लमुदाहार्यं संयविदेहमुक्तिः समपि देहस्तानोत्पत्ति समकालीनास्ते
या ब्रह्मण्येवाध्यारोपितानां नामेतेषां वै यानामविद्यानाशे मतिविश
नो पुनरुत्पत्त्यसंभवात् अतः शैथिल्यहेत्वभावात्तत्त्वज्ञानेन स्यात्प्रव
र्त्तते मनोनाशवासनात्यागौ स्वरूपाभ्यासाभावाद्योगप्रदेतप्रारब्धेन
कर्मणा बाध्यमानत्वात्प्रबलवातप्रदेशप्रदीपवत् सहसा निवर्त्तेते प्रत
इदानीं तत्स्यात् तत्त्वज्ञानिनः प्राक्सिद्धेन तत्त्वज्ञानेन प्रयत्नोपेता किंच
मनोनाशवासनात्यागौ प्रयत्नसाध्याविति तत्र मनोनाशः संप्रज्ञा
तसमाधिनिरूपणेन निरूपितः प्राक् वासनात्याग इदानीं निरूप्यते
तत्र वासनास्वरूपं वसिष्ठ आह दृढभावनया त्यक्तपूर्वापरविचारणं
यदादानं पदार्थस्य वासना सा प्रकीर्तिता अत्र वसिष्ठ स्वदेशाचारकुलध
र्मस्वभावभेदतज्जनापशब्दसुशब्दादिषु प्राणिनामभिनिवेशः सा
मान्येनोदाहरणं सा च द्विविधा मलिना शुद्धा च शुद्धा दैवी संपत्प्राग्
संस्कारप्राबल्यात् तत्त्वज्ञानसाधनत्वेनैकरूपैव मलिना तु त्रिविधा
लोकवासना शास्त्रवासना देहवासना चेति सर्वे जना यथा न निंदंति
तथैवाचरिष्यामीत्याशकायोऽभिनिवेशो लोकवासना तस्याश्च को
लोकमाराधयितुं समर्थ इति न्यायेन संपादयितुमशक्यत्वात् प्रकृषा

गी॰
टी॰
ष॰

139

र्थानुपयोगित्वाच्च मलिनत्वं १ शास्त्रवासनाऽपि त्रिविधा पाठव्यसनं
बहुशास्त्रव्यसनं अनुष्ठानव्यसनं चेति क्रमेण भरद्वाजस्य दुर्वाससो।
निदाघस्य च प्रसिद्धं मलिनत्वं चास्याः क्लेशावहत्वात् पुरुषार्थानुपयो
गित्वाद् दर्पहेतुत्वाज्जन्महेतुत्वाच्च २ देहवासनाऽपि त्रिविधा अनात्मनि आ
त्मत्वभ्रान्तिः गुणाधानभ्रान्तिः दोषापनयभ्रान्तिश्चेति तत्रात्मत्वभ्रान्तिर्वि
रोचनादिषु प्रसिद्धा सार्वलौकिकी गुणाधानं द्विविधं लौकिकं शास्त्री
यं च सम्यक् शब्दादिविषयसंपादनं लौकिकं गंगास्नानसालिग्रामादि देवस्मा

पयन

तीर्थादिसंपादनं शास्त्रीयं दोषापनयमपि द्विविधं लौकिकं शास्त्रीयं।
चिकित्सकोक्तैरौषधैर्व्याध्यपनयनं लौकिकं वैदिकस्नानाचमना
दिभिरशौचापनयनं वैदिकं ३ एतस्याश्च सर्वप्रकारायाः मलिन
त्वमप्रामाणिकत्वात् अशक्यत्वात् पुरुषार्थानुपयोगित्वात् पुनर्ज
न्महेतुत्वाच्च शास्त्रे प्रसिद्धं तदेतल्लोकशास्त्रदेहवासनात्रयमविवेकि
नामुपादेयत्वेन प्रतिभासमानमपि विविदिषोत्पत्तिविरोधित्वा
दुत्पन्नज्ञाननिष्ठाविरोधित्वाच्च विवेकिभिर्हेयं तदेवं बाह्यविषयवास
ना त्रिविधा निरूपिता आभ्यन्तरवासना तु कामक्रोधदम्भदर्पाद्याः
सुरसंपद्रूपा सर्वानर्थमूलमानसी वासनेत्युच्यते तदेवं बाह्याभ्यन्तर
वासनाचतुष्टयस्य शुद्धवासनया त्यागः संपादनीयः तदुक्तं वसिष्ठेन
मानसीर्वासनाः पूर्वं त्यक्त्वा विषयवासनाः मैत्र्यादिभावनानाम ग्रहा
णामलवासना इति तत्र विषयवासनाशब्देन पूर्वोक्तास्तिस्रो लोक।
शास्त्रदेहवासना विवक्षिताः मानसवासनाशब्देन कामक्रोधदम्भदर्पा
द्यासुरसंपद्विवक्षिता यद्वा शब्दस्पर्शरूपरसगन्धा विषयाः तेषां भुज्यमा
नत्वदशाजन्यः संस्कारो विषयवासना २ काम्यमानत्वदशाजन्यः सं
स्कारो मानसवासना अस्मिन्पक्षे पूर्वोक्तानां चतसृणामनयोरेवान्त
र्भावः वासनान्तरव्यतिरेकेण वासनान्तरासंभवात् तासां वासनानामपि
त्यागो नाम तद्विरुद्धमैत्र्यादिवासनोत्पादनं तत्र मैत्र्यादिवासना।
भगवता पतञ्जलिना सूत्रिताः प्राक् संक्षेपेण व्याख्याता अपि पुनर्व्या।
ख्यायन्ते चित्तं हि रागद्वेषपुण्यपापैः कलुषीक्रियते तत्र सुखानुशयी रा
गः मोहादनुभूयमानं सुखमनुशेते कश्चिद्वृत्तिविशेषो राजसः स

वैमनस्यजननीयेमेमाभूयादिति तच्चदृष्टादृष्टसाम्यभावात्संपादयितु
मशक्यं अतः सरागः चित्तं कलुषीकरोति यदा तु सुखिषु प्राणिष्वयं
मैत्रीं भावयेत् सर्वेप्येते सुखिनो महीयाः इति तदा तत्सुखं स्वकीयमेव
संपन्नमिति भावयतस्तत्र रागो निवर्तते यथा स्वस्य राज्यनिवृत्तावपि
पुत्रादिराज्यमेव स्वकीयं राज्यं तद्वत् निवृत्ते च रागे वर्षाव्यपाये जलमिव
चित्तं प्रसीदति तथा दुःखेषु पापीयसः दुःखमनुशेते कश्चिदीदृशमिति विश
षः नैमोनुगतरजःपरिणामः ईदृशं सर्वं दुःखं सर्वदा मे मा भूदिति तत्र श
त्रुव्याघ्रादिषु सत्सु तन्निरावयितेशक्ये न च सर्वेणैव दुःखहंतवो हंतेशक्ये
ते अतः सद्वेषः सदा हृदयं दहति यदा तु स्वस्येव परेषामपि दुः
खं मा भूदिति करुणां दुःखिषु भावयेत् तदा वैरादिद्वेषनिवृत्तौ चित्तं
प्रसीदति तथा च स्मर्यते प्राणा यथात्मनोभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः इति एतद्वेदशुक्ले आत्मौपम्य
न सर्वत्रैमादि तथा प्राणिनः स्वभावत एव पुण्यं नानुतिष्ठंति पापं च
नुतिष्ठंति तदाहुः पुण्यस्य फलमिच्छंति पुण्यं नेच्छंति मानवाः न पापफ
लमिच्छंति पापं कुर्वंति यत्नतः इति तेषु पुण्यपुण्यप्रक्रियमाणक्रियमा
णपश्चात्तापजनयतः स च क्रमान्मुदिताः किमहं साधुनाकरवं किम
हं पापमकरवमिति यथ सौ पुण्यपुरुषेषु मुदितां भावयेत् तदा तद्वा
सनावानुरूपमेवाप्रमत्तो शुक्ले कर्मणि पुण्ये प्रवर्तते तदुक्तं कर्माशुक्ला
कृष्णं योगिनस्त्रिविधमितरेषां अयोगिनां त्रिविधं शुभं कृष्णमशुभं शु
क्लकृष्णं शुभाशुभमिति तथा पापपुरुषेषूपेक्षां भावयन्स्वयमपि तद्वा
सनावासनाया निवर्तते तन्न पुण्यकरणापापकरणाभिमित्तस्य पश्चा
त्तापस्याभावेपि चित्तं प्रसीदति एवं सुखिषु मैत्रीं भावयतो न केवलं रा
गो निवर्तते किं त्वसूयेर्ष्यादयोपि निवर्तंते परगुणेषु दोषाविष्करणं
मसूया परगुणानामसहनमीर्ष्या यदा मैत्रीवशान्परसुखं स्वकीयमेव सं
पन्नं तदा परगुणेषु कथमसूयादिकं संभवेत् तथा दुःखिषु करुणां भा
वयतः शत्रुवधादिकरो द्वेषो यदा निवर्तते तदा दुःखिष्वप्रतियोगिका
स्यसुखिनमुपक्रमदर्पोपि निवर्तते एवं दोषान्तरनिवृत्तिरप्यूहनीया सर्वासि
दूरामायणादिषु तदेवं तत्तन्मैत्र्यादीनां भावनात्तस्य तिरयमभ्य

ˇकर्माशुक्लाकृष्णं

गी॰ टी॰ ष॰

सनीयं तदुक्तं नापिहारेण पुनः पुनस्तत्तानुस्मरणं तत्त्वज्ञानाभ्यासः तदुक्तं तच्चिंतनं तत्कथनमन्योन्यं तत्प्रबोधनं एतदेकपरत्वं च ब्रह्माभ्यासं विदुर्बुधाः सर्गादावेव नोत्पन्नं दृश्यं नास्त्येव तत् सदा इदं जगदहं चेति बोधाभ्यासं विदुः परमिति दृश्यमा सविरोधियोगाभ्यासो मनोनिरोधाभ्यासः तदुक्तं अत्यंताभावसंपत्तौ ज्ञातृज्ञेयस्य वस्तुनः युक्त्या शास्त्रैर्यतंते ये तेऽप्यत्राभ्यासिनः स्थिता इति ज्ञातृज्ञेययोर्मिथ्यात्वधीरभावसंपत्तिः स्वरूपेणाप्यप्रतीतिरत्यंताभावसंपत्तिः तदर्थं फलकायोगे न दृश्यासंभवबोधेन रागद्वेषादितानवे रतिर्घनोदिता यासौ ब्रह्माभ्यासः स उच्यते इति रागद्वेषादिक्षीणतारूपवासनात्त्याभ्यास उक्तः तस्मादुपपन्नमेतत् तत्त्वज्ञानाभ्यासेन मनोनाशाभ्यासेन वासनात्त्याभ्यासेन च देहध्वनयातयः स्वपरसुखदुःखादिषु समदृष्टिः स परमो योगी मतोऽयस्तु विषमदृष्टिः स तत्त्वज्ञान्यपि परमो योगीति [illegible] ३२

सदानंदटीका

स्वदृष्टांतेन सर्वत्र प्राणिजाते तत्तुल्यं सुखं वा यदि वा दुःखं तत्तत्संयः पश्यति १ यथा मम सुखं नित्यमिष्टमेवं हि देहिनां सर्वेषामनुकूलं स्यादिति पश्यति सम्यगिति २ प्रतिकूलं यथा दुःखं ममैवं सर्वदेहिनां प्रतिकूलं तथा बाधं सर्वभूतहितेरतः ३ कस्यचित्मनसा वा वाचापि नाचरतीत्यर्थः कर्मणा वा स योगी तु सर्वोत्कृष्टतया मतः ४३२

नीलकंठटीका

यद्यपि निषिद्धकर्माणि आत्मविद्भ्यस्तेन पापिशीलवानेव योगी श्रेष्ठ इत्याह आत्मौपम्येनेति यथा स्वस्य सुखमिष्टं दुःखमनिष्टं तद्वत्परस्यापीति बुद्ध्या यो यस्सुखदुःखं न प्रयच्छति सोऽहिंसकः परमयोगी मत इत्यर्थः ३२ ॥

ज्ञानेदटीका उक्तमर्थं सिद्धांतयति ॥

स्पष्टम [illegible]
च

यच्चात्मा सोऽहमेवेत्यभेदं भगवान्

रामकंठटीका

प्रतिपादयितुमाह— यो योगी सर्वत्र भावजाते मायया ज्ञातात्मनस्तत्तेकरूपत्वं मन्यते ऽपि एतस्यापश्य

तिमयिसर्वंतथैवपश्यति तस्यतत्वदर्शिनोहंनप्रणश्यामिनादृश्योभवा
मि सोपिमत्स्वरूपभूतत्वान्नप्रणश्यति नादृश्यतामापद्यतइति कर्मयो
गासिद्धस्ययोगिनः स्वात्मनत्वाभेदप्रतिपादनपरमेतद्भगवद्वचनम् किं
च योयोगीसर्वत्रसर्वस्मिन्देहप्रभृति सुखंदुःखंवासुखंवाकं विस्मारणीय
मस्वकर्मयोपपद्यासंवेद्यमानस्यसंविदात्मकतापत्तिरूपतया समंसवि
त्मात्रैकस्वभावंपश्यतिउच्यते कथमात्मौपम्येनात्मानमुपमातीक
त्यस्वानुभववदित्यर्थः समस्तेषामवैराकेनविर्हेकसाधारणेनप्रका
शेनावर्तमानोपिसयिवर्तते मदभिन्नोहमेवासावित्यर्थः सएवंविधो
योगीसर्वास्ववस्थास्वविस्मृतनिरन्तरसमाधिफलाखंडेद्ववीरविज्ञह
न्नामृतंभुङ्क्तः साधोर्योगानुष्ठाननिष्ठोपलभ्यसमाधिफलस्यवौक्तयो
गफलत्यायपरमोनिरुत्तरातिशयप्रोक्तः ईश्वरवत्साम्यदृष्टापिरूढत्वात्
जीवन्मुक्तइत्यर्थः ॥

लासिकी टीका

किंच- योयोगीसर्वत्रप्राणिजातेसुखंदुःखंवासुखंवाकंचित्प्राणिपर्ममात्म
नौपम्येनात्मतत्त्वतयास्वानुभववदित्यर्थः समंनिर्विशेषंकिंचिन्मा
त्रमपि नविपर्यस्तंपश्यति साक्षात्करोति सयोगीममयोगिषुमध्ये
श्रेष्ठोमतः एवमस्यस्वरूपमेतदानुदितं नपुनरेषामेवोविधिः तदुक्तं
जलार्णवे जनःस्वदेहकंद्दृतिंविजानातियथातथा परंब्रह्मस्वरूपी
चवेत्तिविश्वविचेष्टितमिति योगितनिर्देशेनास्यहैतत्लक्षणात्तानिस
काष्ठाव्यतिरेकउक्तः ३२ ॥

पंचोलीटीका

ज्ञानिनामपिसर्वभूतानुकंपाश्रेष्ठमाह आत्मौपम्येनेति हेअर्जुनयःस
र्वत्रसर्वभूतेषुसुखंवायदिदुःखंवाआत्मौपम्येनआत्मासमयमेवोपमाया
भावंऔपम्यंतेनसमंपश्यतियदात्मनःसुखकारितदन्यस्यकरोति य
दात्मनःअसुखकारितदन्यस्यनकरोतिसयोगीपरमोमतः ३२ ॥

आत्मौपम्येनेति आत्मनः स्वस्यौपम्यं सदृशत्वं प्रतिकूलद्विभावइतियाव
त् प्रतिकूलं हि तत्तुल्यस्याधारोहणस्य सर्वप्राण्यादिवृत्तित्वं समानमेव
प्रतिमुंचतीति तथा चात्मौपम्येन स्वप्रतिकूलद्विभावेन देहेनेतिफलि
तोर्थः यद्वा आत्मनः शास्त्रप्रहरणादिरूपस्य यत्सौपम्यं तुल्यत्वेन दे
हेनेतिकोर्थः यथाहिपरः प्रतिरथीभूय शास्त्रप्रहरणादिकं करोतीति त
थैव चेन्मित्रादयोपिकुर्युः किमंतरं ते षामुभयेषां येन प्राग्भवपक्षवध
हीनत्वं मित्रादयः अतो वध्यताप्रयोजकं तुल्यमेवाततायित्वमुभ
येषामिति तथोक्तं आततायिनमायांतं हन्यादेवाविचारयन् तथा
नाततायिवधे दोषो हंतुर्भवति कश्चनेति तदुपेक्षणं च निषिद्धं परा
शरेण आहूतो न निवर्तेत द्यूतादपि रणादपि चेति मनुनापि समो
त्तमाधमैराजा चाहूतः पालयन् प्रजाः न निवर्तेत संग्रामात्क्षात्रं धर्म
मनुस्मरन्निति तथा चायमन्वितोर्थः आत्मौपम्येनैकरूपयत्नवत्वे
नाततायित्वेन वध्यताप्रयोजकेन देहेनायो योगी सम्यक्तालक्षण
योगारूढः सर्वत्रारिषु मित्रादिषु विषयेषु समं साधारणं पश्यति मि
त्रत्वादिविशेषं परित्यज्य प्रतिरथिभावमेव तदात्वे पश्यतीति यदि वा
शब्दः समुच्चये सुखं दुःखं च समं समानं पश्यति सुखं वा दुःखं वा भव
तु नाम नाथमौ मां स्पृशत्विति निश्चिनोतीति यद्वा यदि शब्दो वधारणे
वाशब्दः समुच्चये तथा च सुखं च दुःखं यदि वा दुःखमेव दुःखादभि
न्नमेव पश्यति कोर्थः स्वयं युद्धाभिवृत्तेः सुहृदादीनां सुखकारण
मपि मित्वादयोगत्यादि प्रापणेन दुःखदायकमेवेति सयोगी परि
पक्वसाम्ययोगारूढः परमः परान् शत्रून्मीनातिहिनस्तीति परमः
शत्रुहनने प्रवृत्तत्वेन कर्मकौशललक्षणयोगारूढश्च मतो मह
र्षेरिति शेषः यद्वा परमउत्कृष्टोमतइत्यर्थः ३२॥

मधुभाष्य

आत्मौपम्येनेति एतस्य योगस्य स्थिरां स्थितिं न पश्यामि मन
सश्चंचलत्वात् उक्तं च मनसश्चंचलत्वाद्धि स्थितिर्योगस्य वैस्थिरा

विनाभ्यासं न शक्यास्याद्देशगपाद्धानसंशय इति व्यास
योगे न कदाचित्स्वयमेव मनो निरुध्यते शुभेच्छादि
नानां तद्द्वेषिणां चरमापत्तौ नास्तिकानां च वैष्ठसाम
दामुक्तिर्न जायत इति निषेधात् ब्राह्मे प्रयतिरप्रयत्नः
योगस्य जिज्ञासुरपि ज्ञातव्यो मया योग इति यस्याती
वेच्छा सोऽपि शब्दब्रह्मातिवर्तते परंब्रह्म प्राप्नोतीत्यर्थः
नैकजन्मनीत्याह ४२॥

भाषा अनुवाद

और ऐसे योगी जनोंके बीच मे जीवों पर अनुग्रह करने वा
ला श्रेष्ठहै सो कहते हैं कि हे अर्जुन जो अपनी उपमा करके
और सब मे भी अपने समान सुख या दुख तथा प्रिय अ
प्रिय देखता है और सब को सुखकी इच्छा करता दुख न
ही देख सकता है सोई योगी श्रेष्ठ है ३२

दोहा

आपहि सदृश सर्वमें समदृष्टि देषैं नर जोय सुख अथवा दुः
खको परम योगी मानियें सोय ३२॥

143

अर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः साम्येन मधु
सूदन एतस्याहं न पश्यामि चंचलत्वात्स्थितिं स्थिरां ॥३३॥

शांकरभाष्यं

एतस्य यथोक्तस्य सम्यग्दर्शनलक्षणस्य योगस्य दुःसम्पाद्यतामा
लक्ष्य शुश्रूषुः ध्रुवं तत्प्राप्त्युपायमर्जुन उवाच योऽयमिति योऽयं योग
स्त्वया प्रोक्तः साम्येन समत्वेन हे मधुसूदन एतस्य योगस्याहं न पश्यामि
नोपलभे चंचलत्वान्मनसः किं स्थिरामचलां स्थितिं प्रसिद्धमेतत् ॥३३॥

आनन्दगिरिकृतटीका

मनसश्चंचलमस्थिरमित्यपश्यन् निर्विशेषे चित्तस्थैर्यं दुःशकमिति
मत्वा तत्स्थैर्योपायं बुभुत्सुः प्रष्टुमुपक्रमते एतस्येति
तत्साम्योपाये शुश्रूषुरिति मत्वा मनसश्चंचलत्वेऽपि न स्थिरत्वं योगस्य
गस्थैर्यं सम्पाद्यतामिमामाशंक्याह एतस्येति प्रसिद्धमिति सम्बन्धः ॥३३॥

स्वामिकृतटीका

उक्तलक्षणस्य योगस्यासंभवं मत्वार्जुन उवाच योऽयमिति साम्ये
न मनसो लयविक्षेपशून्यतया केवलात्माकारावस्थानेन योऽयं योग
स्त्वया प्रोक्तः एतस्य योगस्य स्थिरां दीर्घकालां स्थितिं न पश्यामि मनस
श्चंचलत्वात् ॥३३॥

पिशाचभाष्यं

सर्वयोगिनां मनस्यपूर्णोक्तस्य समदर्शनलक्षणस्य योगस्य दुःसम्पाद्य
तामालक्ष्य शुश्रूषुरुपायमर्जुन उवाच योऽयं योगस्त्वया प्रोक्तः सा
म्येन एतस्य योगस्याहं न पश्यामि नोपलभे चंचलत्वान्मनसः स्थितिं
स्थिरामचलां प्रसिद्धमेतत् ॥३३॥

रामानुजभाष्यं

योऽयं देवमनुष्यादिभेदेन जीवेश्वरभेदेन [illegible] भिन्नत्वेनावस्थानकालम
नुभूतेषु सर्वेषामात्मसु ज्ञानैकाकारतया परसाम्येनात्मकमेव पश्यन् तयावे
श्वरसाम्येन सर्वतः समदर्शनरूपो योगस्त्वया प्रोक्तः एतस्य योगस्य स्थि
रां स्थितिं न पश्यामि मनसश्चंचलत्वात् ॥३३॥

गी·
टी·
ष·

अभिनवगुप्तकृतटी·

योऽयमिति परोक्षप्रत्यक्षवाचकाभ्यामेवं सूच्यते भगवदभिहितान
न्तरोपायपरम्परया स्फुटमपि प्रत्यक्षनिर्दिष्टमपि ब्रह्ममनसश्चाञ्च
ल्यदोषादस्माकं दूरे वर्तत इति परोक्षायमाणम् ३३ ॥

परमार्थप्रपाटीका

अथैतस्य योगस्य दुःसाध्यत्वं मन्यमानोऽर्जुनः प्राह योऽयमिति मनसः
साम्येन विशेषेण योऽयं योगः केवलमात्माकारावस्थानरूपस्त्वया
प्रोक्तस्तस्य स्थिरां स्थितिं न पश्यामि कुतः मनसश्चञ्चलत्वात् अ
नेकविकल्पैरस्थिरत्वात् अत एवं मधुसूदनेति संबुद्धिः यतो मधा
दिदैत्यविदारणशक्तोऽसि परं त्वमस्मन्मनोनिग्रहे त्वं कुण्ठितशक्तिः।
अत्र किंचित्करास्तस्मान्नैवोपदिशसीत्यर्थः अत्र पार्थस्याशयं सत्यं
देववचोः वर्यायत्नाभ्यासेषु अहं तु परं चेतो विषयसन्नेन न तत्र विषया
स्वादयतीति विना पैशाच्यं किमु वाच्यमस्य मनसो यत्नं पेक्ष्य मत्वाह
तेऽकिंकुर्यान्तदधीनहृतिरहमप्याज्ञापयस्व प्रभो ३३

वनमालीटीका

उक्तमर्थमाक्षिपन्नुक्तं प्रस्तौति योऽयमिति योऽयं सर्वत्र सममसुखदुःखादिल
क्षणः परमो योगः साम्येन समत्वेन चित्तागतानां रागद्वेषादीनां वैरि
णां विषमदृष्टिहेतूनां निराकरणेन त्वया सर्वज्ञेनेश्वरेण प्रोक्तः हे मधु
सूदन सर्वान्तर्यामिन् सर्ववैदिकसंप्रदायप्रवर्तकपरमात्मन् तस्य त्वदुक्तस्य
सर्वमनोवृत्तिनिरोधलक्षणस्य योगस्य स्थितिं विद्यमानत्वात् स्थि
रां निरन्तरदीर्घकालानुवर्तिनीं न पश्यामि न संभावयामि कुतः चं
चलत्वान्मनस इति शेषः ३३ ॥

क्रमवैजयन्तीटी·

इत्येवं भगवदुक्तिं निशम्यार्जुनः संदिग्ध एव हे योऽभगवन्तं स्वसार
थिं पृच्छति स्म योऽयमिति हे मधुसूदन मधुदैत्यदलन साम्येन स
र्वनरादिविचित्रशरीरयोगेनात्मनो परस्परात्मत्वविजातीयस्वरूपप्र
तीयमानत्वेऽपि तत्तेनाकारतयाऽतोऽस्मादकर्मवशतयेश्वरतोऽस्याव

भि

स्यपरमसुखेदुःखेवैतोस्येनयोयंसर्वसमदर्शीनत्वपोयोगोत्तानयोगस्त्व
यासर्वसमदर्शनेनसर्वज्ञेनप्रोक्तः प्रकर्षेणसपरिकरेणोक्तःकथितः
एतस्ययोगस्यस्थिरामवेदैकत्वस्थांस्थितिंनिश्चामहंतात्त्वाभिज्ञा
हमर्थरूपकोनपश्यामिनेतिकुतोनपश्यतीत्यपेक्षायांहेतुमाहचंच
लत्वात् अतिचलिष्टस्यातिचपलस्यानादिविषयवितिमस्यमनस
श्चंचलत्वाच्चपलत्वात् ३३ ॥

॥ उक्तमर्थमाति

मधुसूदनीटीका

पत्र॥ ॥म

योयंसर्वत्रसमदृष्टिलक्षणः परमोयोगःसाम्येनसमत्वेनचितग
तानांरागद्वेषादीनांविषमदृष्टिहेतूनांनिराकरणेनत्वयासर्वज्ञेन
सर्वेणोक्तः हेमधुसूदनसर्ववैदिकसंप्रदायप्रवर्तक एतस्यत्वदुक्त
स्यसर्वमनोवृत्तिनिरोधलक्षणस्ययोगस्यस्थितिंविद्यमानतांस्थि
रांदीर्घकालानुवर्तिनीनपश्यामिनसंभावयामि अहमस्यदियोमा
वायोगाभ्यासानिपुनःकस्मान्नसंभवायस्तितत्राहचंचलत्वान्मन
सइतिशेषः॥सर्वलोकप्रसिद्धत्वेनतच्चैवचंचलत्वमुपपादयति ३३

सदानंदीटीका

दुःसेपाधत्वमालक्ष्ययोगस्योक्तस्यचार्जुनः तत्राप्युपायंपप्रच्छ
दृष्कृतिस्मरहरिंप्रति १ योयंसर्वत्रसाम्येनयोगःप्रोक्तःपरात्मना
सर्वज्ञेनमहेशेनत्वयानिगमयोनिना २ एतस्याहंत्वदुक्तस्ययोगस्या
विचलात्मनः नपश्यामिस्थितिंसत्तांदीर्घकालानुवर्तिनी ३ मन
सोप्यतचांचल्यान्नैवसंभावयाम्यहं ४३३ ॥

नीलकंठटीका

साम्ययोगमशक्यंमत्वातदुपायांतरंबुभुत्सयार्जुनउवाच योयमि
ति योयंयोगस्त्वयासाम्येनप्रोक्तः हिंसाप्राधान्येनसंन्यासपूर्व
कत्वयावर्णितः हेमधुसूदन तस्ययोगस्यसर्ववृत्तिनिरोधरूपस्य
स्थिरांस्थितिंनपश्यामि मनसश्चंचलत्वादितिशेषः ३३॥

आनंदीटीका

तदेवमस्यसंयमयोगस्य दुष्करतां प्रतिपादयितु मर्जुनउवाच ॥ ॥

गी॰ टी ६

परां स्थितिं प्रोक्तक्रमां साम्यरूपां मनसश्चंचलत्वात्ताप्यां न संभावयामीत्यर्थः ३३

अथ संप्रत्यननुभूतत्वादस्य सर्व **रामकंठीटीका** साम्यप्रतिपत्तिफलस्य समाधेरसंभाव्यतां मन्यमानोऽर्जुन आह हे कृष्ण यो यं समनन्तरकर्मयोगलक्षणो योगस्त्वया प्रोक्त एतस्याप्रां स्थितिं प्रकृष्टां प्रतिष्ठां न तर्कयामि न पश्यामि चंचलत्वादनवस्थितत्वात् [illegible]

[illegible]

एवं सर्वत्र समतया सुखादिसंवेदन **लासिकीवसल्लभटीका** रूपस्य योगस्याननुभूतत्वादसंभाव्यतां मन्यमानोऽर्जुन उवाच योयमिति परोक्षमप्यत्यवाचकाभ्यामेव सूच्यते भवदभिहितानंतरोपायपरंपरयास्फुटं प्रत्यक्षनिर्दिष्टो यन्ननुभूतत्वात्परोक्षतायमायोगो योयं योगः साम्येन सर्वत्रात्मतुल्यतया सुखाद्यनुभवरूपेणात्वया सर्वज्ञेन प्रोक्तः एतस्य योगस्य मनसश्चंचलतया स्थिरां दीर्घकालानुवर्तिनीं स्थितिं न पश्यामि न तर्कयामि [illegible] ३३

पंचोलीटीका

सर्वयोगिनामपि एतस्य पयोक्तस्य समदर्शनलक्षणस्य योगस्य दुःशपत्वमालस्य तत्प्राप्त्युपायविविदिषुः अर्जुन उवाच योयमिति हे मधुसूदन त्वया यो यं योगः साम्येन समत्वबुद्ध्या प्रोक्तः अहमेतस्य योगस्य मनसः चंचलत्वात् स्थिरां अचलां स्थितिं न पश्यामि ३३॥

रत्नवीरसमिद्धोधिनी॥

अथोक्तलक्षणस्य योगस्य दुष्करत्वेनासंभवं मन्वानोऽर्जुन उवाच योयमिति निगदव्याख्यातेतस्य च किंतु चंचलत्वादित्यत्र मनस इति शेषः परां स्थितिं चिरकालमवस्थानमिति मनसोतिचपलत्वेन क्षणमात्रस्थायी योगोऽयमिति भावः ३३॥

मधुभाष्य

३३॥

भाषा अनुवाद

ऐसे योग के लक्षण भगवान से स्तुति करि असम्भव जानि अर्जुन कहते हैं कि मनकी लय औ विक्षेप शक्ति हर करि केवल आत्मा मे जो अवस्थान करै सम भाव से मन का थिर हो रहना रूप योग जो आप ने कहा सो हे मधुसूदन मन की चंचलताई के हेतु हमको इस योग की दीर्घ काल अवस्थिति करै थिर रहना देख परता नहीं है ३३

दोहा

जो मधुसूदन तुम कह्यो समतासें यह योग चंचलतासें ना लखौं या स्थिति परम किम होग ३३॥

145

चञ्चलंहिमनःकृष्णप्रमाथिबलवद्दृढं तस्याहंनि
ग्रहंमन्येवायोरिवसुदुष्करं ३४ ॥

शाङ्करभाष्यं

चञ्चलमिति चञ्चलं हि मनःकृष्ण इति कृषतेर्विलेखनार्थस्य रूपं
भक्तजनपापादिदोषाकर्षणात् कृष्णहि यस्मान्मनः चञ्चलं न केव
लमत्यर्थं चञ्चलं प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरीरमिन्द्रि
याणिच विक्षिपति परवशीकरोति किञ्च बलवत् प्रबलं न केना
विनियन्तुं शक्यं दुर्निवारत्वात् किञ्चदृढं तन्तुनागवदच्छेद्यं तस्यैवं
भूतस्य मनसोहं निग्रहं रोधं मन्ये वायोरिव यथा वायोर्दुष्करो निग्रह
स्ततोपि मनसो दुष्करं मन्य इत्यभिप्रायः ३४ ॥

आनन्दगिरिकृतटीका

मनसश्चञ्चलत्वेपि कृष्णपदप्रवृत्तिनिमित्तप्रकर्षं सूचयति कृष्णइतीति
कथं कर्षकत्वमाप्तकामस्य भगवतः समवर्तीमाशङ्क्याह भक्तेति
ऐहिकामुष्मिकसर्वसम्पदामाकर्षणशीलत्वाच्चेति द्रष्टव्यं प्रमथ्नाति
क्षोभयति तदेव क्षोभकत्वं प्रकटयति विक्षिपतीति दुर्निवारत्वमभि
प्रेतादिविषयादाकष्टुमशक्यत्वं विशेषणान्तरमाह किञ्चेति अच्छेद्यत्वं
विशेषणान्तरमाह किञ्च दृढमिति तन्तुनागो वरुणपाशशब्दितो
जलचारी पदार्थोः सन्ततदृढतया केनमशक्यत्वेन प्रसिद्धो विवक्षितः
वायोरिवेत्युक्तं व्यनक्ति यथेति ३४ ॥

स्वामिकृतटीका

एतदेवस्फुटयति चंचलमिति चंचलंस्वभावेनैवचपलंकिंचप्रमाथि
प्रमथनशीलंदेहेंद्रियक्षोभकंकिंच बलवत्विचारेणाजेतुमशक्यंकिं
चदृढंविषयवासनानुबद्धतयादुर्भेदं अतोयथाकाशेदोधूयमानस्यवा
योः कुंभादिषुनिरोधनमशक्यंतथातस्यमनसोपिनिग्रहंनिरोधंदुष्करं
सर्वथाकर्तुमशक्यंमन्ये ३४ ॥

पिशाचभाष्यं

कृष्णइतिकृषतेर्विलेखनार्थस्ययोगीभक्तजनपापादिदोषकर्षणात्

कृष्ण न केवलमत्यर्थं चंचलं मनः प्रमाथि च प्रमथनशीलं प्रमथ्नाति शरी
रमिंद्रियाणि च विक्षिपति परवशीकरोति किंच बलवत्केनचिन्निय
तुमशक्यं किंच दृढं तंतुनागवदच्छेद्यं तस्य मनसः अहं निग्रहं निरोधं म
न्ये वायोरिव सुदुष्करं यथा वायोर्दुष्करो निग्रहस्तथा दुष्करं मन्ये इत्यभि
प्रायः ३४

रामानुजभाष्यं

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात्प्रमथ्य
यत्र कुत्रापि चरति तस्य स्वाभ्यस्तविषयेष्वपि चंचलस्वभावस्य मनस
स्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्महावातस्य
व्यजनादिनेव दुष्करमहं मन्ये मनोनिग्रहो वायोरपि दुःशकः तन्नि
ग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

श्री[illegible]·

[illegible] भगवदभिहितानंतरो
पाय[illegible] ३४ ॥ प्रमथ्नाति दृष्टाद्दृष्टेवल [illegible]

रामानुजभाष्यं

तथा हि नवरताभ्यस्तविषयेष्वपि स्वत एव चंचलं पुरुषं बलात्प्रमथ्या
यत्र कुत्रापि चरति तस्य स्वाभ्यस्तविषयेष्वपि चंचलस्वभावस्य मन
सस्तद्विपरीताकारात्मनि स्थापयितुं विनिग्रहं प्रतिकूलगतेर्महा
वातस्य व्यजनादिनेव दुष्करमहं मन्ये मनोनिग्रहो वायोरपि दुःशकः
तन्निग्रहोपायो वक्तव्य इत्यभिप्रायः ३४ ॥

परमार्थप्रपा टी·

अयमर्थः प्रश्नार्थमेव प्रकटयति चंचलमिति मोक्षस्य तस्य मनसो
निग्रहं निरोधं सुदुष्करं सुतरां दुःखेन कर्तुमशक्यं मन्ये कस्येव वा
योरिव यथाकाशे धावमानस्य वायोः कुंभादिषु निरोधः कर्तुं न शक्य
ते नहि वायोरेकत्रावस्थानं कदापि दृष्टं अयं तस्य दुर्निग्रहत्वे चतु
र्भिः प्रकारैरुपपत्तिं चंचलमिति चंचलमेकत्रानवस्थितं प्रमा
थि प्रमथनशीलं देहेंद्रियक्षोभकं बलवत् विचारेणापि जेतुमश
क्यं दृढं अनादिविषयवासनानुविद्धतया वैराग्यादिना दुर्भेद्यं ३४ ॥

तदेवोपपादयति चंचलं सदातिचलनस्वभावं मनो हि प्रसिद्धमेवैतत्
तु भक्तानां पापादिदोषान्सर्वान्वारयितुमशक्तानपि कृष्णति तेषामे
व सर्वं ध्यायामसमशक्तानपि पुरुषार्थानपकर्षति प्रापयतीति वा कृ
ष्ण तेन रूपेण संबोधयन् इति वारमपि द्विबोचञ्चलं निवार्यं दुःप्राप।
मपि समाधिस्थं तेनैव प्राणयितुं शक्नोषीति सूचयति न केवलं चंच
लं प्रमाथि शरीरमिन्द्रियाणि च प्रमथितुं शीलं यस्य तत् किंच ब
लवत् अभिप्रेताद्विषयात्केनाप्युपायेन निवारयितुं न शक्यं किंच दृ
ढं वासनासहस्रस्यूतत्वाद्भेत्तुमशक्यं तस्मात् दृढतया बलवतो बलवत्
या प्रमाथिनः प्रमाथित्वात् चंचलस्य महामत्तगजस्येव मनसो नि।
ग्रहं निरोधं निर्हेतुकं तया वर्त्तमानं सुदुःकरं सर्वथा कर्त्तुमशक्यं मन्ये
वायोरिव यथाकाशे दोधूयमानस्य वायोर्निश्चलत्वसंपादननिरोधन
मशक्यं तद्वत् ३४ ॥

ऊलमवैजयन्तीटी·

नन्वात्मानं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु सारथिं विद्धि मनः
प्रग्रहमेव च इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् आत्मेन्द्रिय।
मनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति श्रुतेर्मनसो बुद्धिनियम्यत्वश्रव
णात् विवेकवत्या बुद्ध्या मनो नियमनं कुर्विति चेत्तत्राह चंचलं हीति।
हे कृष्ण मदानन्दहृदय स्वात्मनश्चंचलस्वभावेनैवातिचपलं तथापि प्रमा
थि बुद्धिसहितं पुरुषं प्रकर्षेण मथितुं विलोडितुं शीलं यस्य तत्तथा।
विवेकिमात्रबुद्ध्या सह पुरुषं हठात् प्रमथ्य मत्तविषयेषु स्वेच्छाचारेण भ्र
मतीत्यर्थः कुत एवं यतो बलवत् यथा बलवान् सोऽदुर्बलमस्ववारेति
रस्कृत्येतस्ततो धावन्संलग्नो दोषानयति स्वयमपि तथा बलवन्मनो
पि बुद्धिं पुरुषं चानादृत्य विषयेषु नयति पतति चेत्यर्थः नन्वनितीत्या
ग्रास्तु विषयेभ्योऽनेकानि वस्तूनि प्रभेयस्यानुगतस्य स्वतंत्रस्याधीनानि क
रोति तथानिरतिशयवस्तुविचारात्मिका कुशाग्रबुद्धिर्मनो विचारेण
प्रभेयस्यानुगतस्यात्मनो वशीकरणं करोतीति चेत्तत्राह दृढमिति दृ
ढमतिकठिनं यथा स्थूललोहस्तूचीनभिन्नं ति तथा बुद्धिरपीत्यर्थः त

गी॰ टी॰ ६॰

स्यानादिकालसंभृतविषयव्याकुलस्वभावस्य मनसो निग्रहं निरोधं
वायोरिव महतो नभस्यस्य नभसो घटादिषु निरोधमिव सुदुःकरं बहु
नरपतेर्नापि कर्तुमशक्यमहं मन्ये जानेन तस्मात्त्वोपायं कथयेति भवा।
भिप्रायः ३४ ॥

मधुसूदनीटीका

केवलमत्यर्थं चलं सदा चलनस्वभावं मनः हि प्रसिद्धमेवैतत् भक्तानां
पापादिदोषान् सर्वान्निवारयितुमशक्यानपि कृषति निवारयति एव
मेव सर्वेषामशक्यमपि पुरुषार्थानाकर्षयति प्रापयतीति वा कृ
ष्णस्तेन रूपेण संबोधयन् दुर्निवारमपि चित्तचाञ्चल्यं निवार्य दुःखापम।
थि प्रमाथि स्वबलमेव प्रापयितेशक्तोषीति सूचयति न केवलमत्यर्थं
चलं प्रमाथि शरीरमिन्द्रियाणि च प्रमथ्नितं सोभयितुं शीलं यस्य तत्
तो भृत्कतया शरीरेन्द्रियसंघातस्य विवशताहेतुरित्यर्थः किं च बलवदभि
प्रेताद्विषयात्केनाप्युपायेन निरोद्धुमपि तमशक्यं किं च दृढं विषयवा
सनासहस्रानुस्यूततया भेत्तुमशक्यं तन्तुनागवदच्छेद्यमिति भाष्यं तन्त
नागो नागपाशः तांतणीति गूजेरदेप्रसिद्धो महाह्रदनिवासी जंतुः।
विशेषो वा तस्मादतिदृढतया बलवतो बलवत्तया प्रमाथिनः प्रमाथित
यानितु बलस्य महातरवनगजस्येव मनसो निग्रहं निरोधं निर्वृत्तिकतया
वस्थानं सुदुष्करं सर्वथा कर्तुमशक्यमहं मन्ये वायोरिव यथाकाशे दोध
यमानस्य वायोर्निश्चलत्वं संपाद्य निरोधनमशक्यं तद्वदित्यर्थः अयं भावः
जातेपि तत्त्वज्ञाने प्रारब्धकर्मभोगाय जीवतः पुरुषस्य कर्तृत्वभोक्तृत्वसु
खदुःखरागद्वेषादिलक्षणः चित्तधर्मः क्लेशहेतुत्वाद्बाधितानुवृत्त्यापि व
ध्यो भवति चित्तवृत्तिनिरोधरूपेण तु योगेन तस्य निवारणं जीवन्मुक्तिरि
त्युच्यते यस्याः संपादनेन तु योगी परमो मतः स्मृतके नेदमुच्यते बंधः किं
साक्षिणो निवार्यते किं वा चित्तात् नाद्यः तत्त्वज्ञानेनैव साक्षिणो बंधस्य।
निवारितत्वात् न द्वितीयः स्वभावविपर्ययायोगात् विरोधिसद्भावाच्च न
हि जलाद्द्रवत्वमग्नेरौष्ण्यं वा निवारयितुं शक्यते प्रतिक्षणपरिणामिनो हि
भावाः ऋते चितिशक्तेरिति न्यायेन प्रतिक्षणपरिणामस्वभावत्वाच्चित्तस्य प्रा
रब्धभोगेन च कर्मणाकृतत्वाद्वियातनकार्यनाशेन प्रवृत्तस्य तत्त्वज्ञान।

स्यापि शतिवर्षं कृत्वा स्वफलदानाय देहेंद्रियादिकमवस्थापितं
न च कर्मणा स्वफलस्य त्वद्दुःखादिभोगश्चित्तवृत्तिभिर्विना संपाद
यितुं शक्यते तस्माद्यद्यपि स्वाभाविकानामपि चित्तपरिणामानां क
र्मविपाकेनाभिभवः शक्यते कर्तुं तथापि तत्त्वज्ञानादिवद्योगादपि प्रा
रब्धफलस्य कर्मणः प्राबल्यात्स्वरूपभावि चित्तस्य चाञ्चल्ये योगेन तन्
निवारणमशक्यमहं स्वाभाविकादेव मन्ये तस्मादनुपपन्नमुक्तं यत्तौ
पम्येन सर्वत्र समदर्शी परमो योगी मत इत्यर्जुनस्याक्षेपः
३४ ॥

सदानंदीटीका

अन्यच्च चलशीलं हि यस्मिन्निदं मनः पवनवत् हे कृष्ण भक्तदोषाणां सर्वा
विनिवारक १ इंद्रियाणां शरीरस्य क्षोभकत्वात्प्रमाथितत् नैव
केनाप्युपायेन निग्रहीतुं शक्यते बलात् २ दृढं मतमशक्यं चापि कैश्चित्
तंतुनागवत् अनादिवासनाजालैः स्यूतत्वेन निरंकुशं ३ महामतंग
जस्येव वनस्थस्य तस्य निग्रहं निर्वृत्तिकं तथा समग्रावस्थानं मन्ये दुष्करं ४
यथा दोधूयमानस्य वायोराकाशगामिनः निरोधो वटवेष्टनादौ क
र्तुं कश्चिन्न शक्यते ५ अप्यब्धिपानान्महतो मेरोरुन्मूलनादपि अपि
वह्न्यशनात्साधो विषमश्चित्तनिग्रहः ६ इत्येवं मनसो दार्ढ्यं वाक्य
हे समयोगिनि ३४ ॥

नीलकंठीटीका

एतदेवोपपादयति चंचलं हीति प्रमाथि बलवद्दृढं स्वदेहस्य प्र
मथनशीलं ३४ ॥

आनंदीटीका

प्रमाथि प्रमथनशीलं कुत्सितमार्गप्रवर्त
नात् अजयमस्य आवर्तयितुं शक्यम् अतो बलवद्दृढं निरोधनात्
दृढमनेकप्रयत्नसाध्यमित्यर्थः विषयेषु सक्तम् ३४ ॥ ॥

रामकंठीटीका

यस्मात्तस्य मनः चंचलं प्रकृतिचपलम् अतः प्रमाथि प्रमथनशीलं यतः कुत्सितमपि भूमिकामुन्मार्गप्रवणत्वा
दाशु विनाशयति ॥ न च तस्य आवर्तयितुं शक्यते बलवत् अस्य विषयान्मनसोऽभिधावतः

गी॰
टी॰ ६

शैलेंद्रशिखरविशीर्यमाणसलिलौघवत् दुर्धरं बलं यतो जन्मसह
स्रेभ्यस्तेषु विषयपरमेषु दृढं प्रसक्तत्वाद् दृढं तस्यैवंविधस्यास्य मनः
सो निग्रहं मन्ये तथात्मतिषेधं मनसोऽदुष्करं दुःसाध्यं संभावयामि क
स्येव वायोरिव यथा वायुः स्वास्थ्यं न येन दिव्यप्रभावस्त्रियश्च ह्रीनुमशा
कमेवं तन्मनः

लासिकी टीका

हे कृष्ण यस्मात्तस्मात् इदं मनः प्रकृतिचपलं अत एव प्रमाथि प्र
मथनशीलं क्षुब्धापकं बलवद्दुर्धरं अत एव दृढं विषयवासना
नुविद्धतया दुर्भेदं अतो यथाकाशे दोधूयमानस्य वायोः कुंभा
दिषु निरोधनमशक्यं तथा तस्य मनसोऽपि निग्रहं निरोधं सुदुष्करं
सर्वथा कर्तुमशक्यं मन्ये ३४

पंचोलीटीका

एतदेव स्फुटयति चंचलमिति हे कृष्ण हि यस्मान्मनः चंचलं प्र
माथि शरीरेंद्रियाणि प्रमथ्नाति परवशानि करोति किंच बलव
त्केनचिद्विजेतुमशक्यं किंच दृढं तन्तुनागवत् अच्छेद्यं एवंभूतस्य
मनसो निग्रहं निरोधं वायोरिव दुष्करं मन्ये यथा वायोः दुःक
रो निग्रहः ततोऽपि दुःकरं मन्ये इत्यभिप्रायः ३४ ॥

रणवीरसमिद्धोधिनी ॥

मनसश्चापल्यमेव स्फुटयति चंचलं हीति हिः प्रसिद्धौ मनश्चंचलं
प्रकृतिचपलं भवतीति प्रसिद्धमेवैतदिति भावः यतश्चपलं त
तः प्रमाथि प्रमथितं मदायासमस्मां निश्चयभूमिकामत्यंतमव
धान्यति धावतोऽस्य शैलेंद्रशिखरविशीर्यमाणजलौघवद्दुर्धरं

बलमित्युक्तउक्तप्रमाथित्वमित्यस्तेदृढसूपाद्यावर्तयितुमशक्यं यत
श्चेदं दृढं रागादिदोषानुस्यूतत्वेन भेत्तुमशक्यं तस्यैवंविधस्य म
नसो निग्रहं दुष्टसंकल्पेभ्यो व्युत्थानवृत्तिजनकेभ्यः प्रतिषेधनं
सुदुष्करं सुतरां दुःसाध्यं मन्ये कस्येव वायोरिव यथा स्वाच्छन्द्येना
काशे दोधूयमानो वायुर्निश्चलीकर्तुं निग्रहीतुमशक्य एवमेत
न्मन इति भावः ३४॥

मधुभाष्य

३४॥

भाषा अनुवाद

ओर वही चंचलता को विस्तार करि कहते हैं कि हे कृष्ण यह म
न स्वभाव ही से चंचल औ प्रमाथी अर्थात् देह इन्द्रियों को विचि
त्रकारी और बलवान करके विचारसे इसका जीतना असाध्य है त
था दृढ़ करके विषयवासना से बड़ इस मन को विषयोंसे भिन्न
करना अति दुष्कर कठिन है इस से जैसे आकाश मे वायु को
निश्चल करना कठिन जैसे इस मन का भी निग्रह करके थिर क
रना इस को अति असाध्य बोध होता है ३४ ॥

दोहा

चंचल है मन कृष्ण दृढ़ मथ्यशील बलवान ताको निग्रहना
निप दुसकर पवन समान ३४

159

श्रीभगवानुवाच असंशयंमहाबाहोमनोदुर्निग्रहं
चलं अभ्यासेनतुकौन्तेयवैराग्येणचगृह्यते ३५

शाङ्करभाष्यं

श्रीभगवानुवाच एवमेतद्यथा ब्रवीषि असंशयं नास्ति संशयो म
नोदुर्निग्रहं चलमित्यत्र हे महाबाहो किन्तु अभ्यासेनतु अभ्यासो
नाम चित्तभूमौ कस्यांचित् समानप्रत्ययावृत्तिश्चित्तस्य वैराग्येनच ग
ह्यते वैराग्यं नामदृष्टादृष्टेषु भोगेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं विषये
षु विरक्तो वैराग्यं तेनच वैराग्येण गृह्यते विक्षेपरूपः प्रचारश्चित्तस्य
वं तन्मनोगृह्यते निगृह्यते निरुध्यत इत्यर्थः ३५ ॥

आनन्दगिरिकृतटीका

प्रश्नमंगीकृत्य प्रतिवचनमुत्थापयति श्रीभगवानिति कुत्रसंशयरा
हित्यं तत्राहमनइति कथंतर्हि मनोनिरोधो भवति तत्राह किन्त्विति ।
अभ्यासस्वरूपं सामान्येननिदर्शयति अभ्यासो नामेति कस्यांचिच्चित्त
भूमावित्यविशेषितो ध्येयो विषयो निर्दिश्यते समानप्रत्ययावृत्तिर्विजा
तीयप्रत्ययानन्तरितेति शेषः चित्तस्येति षष्ठी प्रत्ययस्य तद्विकारत्व
द्योतनार्थं वैराग्यस्वरूपं निरूपयति वैराग्यमिति तेषु वैर[illegible]वैराग्यं
नामेति सम्बन्धः तत्रहेतुं सूचयति दोषेति विषयेषु विरक्ता विषयेषु
दोषदर्शनमभ्यस्यते तेनवैरस्यं जायते तेन विगृह्यमाणं निर्दिशति वि
क्षेपेति तस्मिन्गृहीते निरुद्धे मनोनिरोधेस्य किंस्यादित्यपेक्षायामाह
एवमिति अभ्यासहेतुकवैराग्यद्वारा चित्तप्रचारनिरोधे निरुद्धवृत्तिकं म
नो विषयविमुखमन्तर्निष्ठं भवतीत्यर्थः ३५ ॥

स्वामिकृतटीका

तदुक्तं चंचलत्वादिकमंगीकृत्यैवमनोनिग्रहोपायंच श्रीभगवानुवाच
असंशयमिति चंचलत्वादिनामनो निरोद्धुमशक्यमिति यद्वदसि एतत्
निःसंशयमेव तथापितु अभ्यासेन विषयाचिंतनपूर्वकपरमात्माकार
प्रत्ययावृत्त्या विषयवैरस्येनचगृह्यते अभ्यासेनलयप्रतिबंधाद्वैराग्ये
णचविक्षेपप्रतिबंधादुपरतवृत्तिकंसत्परमात्माकारस्वरूपेणतत्परिणतं।
तिष्ठतीत्यर्थः तदुक्तंयोगशास्त्रे मनसोवृत्तिशून्यस्यब्रह्माकारतयास्थि

गी॰
टी॰
स॰

160

तिः यः संप्रज्ञातनामासौ समाधिरभिधीयते ३५ ॥

पिशाचभाष्यं

श्रीभगवानुवाच असंशयं नास्ति संशयं मनो दुर्निग्रहं चलमित्यत्र किं तु
अभ्यासेन तु अभ्यासो नाम चित्तभूमौ कस्यांचित्समानप्रत्ययावृत्तिः वैराग्यं
दृष्टादृष्टभोगेषु दोषदर्शनाभ्यासाद्वैतृष्ण्यं तेन वैराग्येण च गृह्यते विक्षेप
रूपः प्रचारश्चित्तस्य एवं तन्मनो गृह्यते निरुध्यत इत्यर्थः ३५ ॥

रामानुजभाष्यं

चलस्वभावतया मनो दुर्निग्रहमेवमत्र न संशयः अथाप्यात्मनो गुणाका
रताभ्यासजनिताभिमुख्येनात्मव्यतिरिक्तेषु विषयेषु दोषाकारद
र्शनजनितवैतृष्ण्येन च कथंचिद्गृह्यते ३५

अभिनवगुप्तकृतटी॰

बद्धमनसं चांचल्यं वैराग्याभ्यासाभ्यां दूरे वर्तनं भवति परोनायमाणे भवत्याति
दृश्यते चलचक्रेण रङ्गदृढव्यापारायामपि तद्शक्रम ३५ ॥

परमार्थप्रपाटीका

अयमेतावत्प्रकारं निग्रहोपायमुपदिशन् भगवानाह असंशयमिति ॥
चंचलत्वादिस्वभावं मनो निरोद्धुमशक्यमिति यद्वदसि तदसंशयं निःसं
दिग्धमेव तथापि अभ्यासेन वैराग्येण च गृह्यते वशीक्रियते तत्राभ्या
सो नाम निरंतरमात्मानुध्यानं वैराग्यं च विषयवैरस्यं ननु तत्परस्परा
श्रयमिति प्रतिभाति यतो मनसि निगृहीते अभ्यासो वैराग्यं वा सिध्यति
तथाभ्यासवैराग्याभ्यां मनो गृह्यत इति चेन्नैवं एतस्योभयस्य विचाराधी
नत्वात् तस्य प्रागेतद्भगवता प्रागेवदत्तं शनैः शनैरुपरमेदिति तदेव
अभ्यासेन तत्कौन्तेय वैराग्येण च गृह्यत इत्यनेन स्मारितं तथाहि तदुप
रमार्थमादौ तावदात्मविचार एव शरणमिति द्रष्टव्यः अनात्मा मनश्च
इति तथा देहोऽहमित्यादि श्रुत्या यावदेतत् आत्मा देहेंद्रियादिविलक्ष
णत्वात् तद्धि व देहद्रष्टा चटपटवत्संभवति अयं कीदृगस्ती
ति विचारेणाबद्धरूपरसादिविषयग्राहकत्वेन प्रतिक्षणमन्वेषणीयः संप
न्नस्तु स अभ्यासः तथा दुःखं तेन रमेत तावत् मम यं मया सुखदुःखं यामे
यो किमधिकमनुभूतमिति परामर्शेन अल्पयो गातुके यौवनवार्धकाद्य
वस्थासु दुःखमेव समर्थ्यते यथा विषयलोभार्थं भयलोभयोः ।

ग्या॰

(margin) श्रुतानां वैराग्येण विषयानुसंकल्पविनाप्रवृत्ति अभ्यासेन माद्य
दुःखमात्मविषयं चिन्तयन्ति सवितृष्णा तदनु वदनं उक्तं च भगवता
माचक्षते भ्यासाधीनः विचारः इति ॥

यी

प्राणपर्यवसा(यी)त्वात् दुःखरूपः भोगसमयेपि तु निमेषमात्रेणावेदव
सुखं तदपि मनस्याभिषध्यायेन परिणतिविरसत्वात् दुःखपर्यवसाय्येवे
ति विचारेणैव वैराग्यप्रकारः किंच केवले विषयलोलुपेपि मनसि अभ्या
सो विरागश्च संभवति तदुक्तं योगशास्त्रे यत्रैव यातिचपलं तन्नु चित्तमे
तत्तत्रैव भाति परमेश्वरपदं समाधानात् प्रागदुःखदाश्यविरमे विरसः पदा
र्थोल्लात्मा विरसस्वदस्यनिशेविविंमेश्वति अतएव कौंतेयमहाबाहो
इति संबुद्ध्याविवेकसागयोर्ग्रहणं वचंत्वान्नभावस्याः साहाय्यकरि
ण्यामपवेमर्थः ३५ ॥ वनमालीटीका

उत्तरमाह असंशयमिति सम्यग्विदितं तेचिन्तं वेष्टितं मनो निग्रहीतं
प्राकसीतिसंतोषेण संबोधयति हे महाबाहो प्रारब्धकर्मप्रावल्यादसं
यतात्मना दुर्निग्रहं दुःखेनापि निग्रहीतुमशक्यं चचलं केवलस्वभा
वे मनदस्य संशयेनास्त्येवात्र संशयः एवं सत्यपि संयतात्मनापि मात्रो
पायेन योगिनाभ्यासेन च गृह्यते मनो निग्रहेऽभ्यासवैराग्ययोः समुच्चय
बोधनाय चशब्दः ३५ ॥

ऊसमैवेजयनीटी·

एवमर्जुनप्रश्नेमनसश्चंचलत्वादिकमंगीकृत्य तस्य निग्रहोपायं पार्थ
सारथिर्भगवानाह द्वाभ्याम् असंशयमिति हेमहाबाहो इमेनेनयु।
ध्यातेशौर्येणशश्वन् नयमितयातिशयविवेकेन मनोपि जयेति सूचि
तम् यद्यपि मनो दुर्निग्रहं दुःखेनातिकष्टेन निःशेषेण ग्रहीतुमशक्यं
तस्मात् चलं वायोरप्यतिचपलं भवति असंशयमत्रसंशयः संदेहो नास्ति त
थापि हे कौंतेय यत्न निश्चयेनाभ्यासेनात्मस्वरूपानुभवानंदजनितसुखा।
सक्तत्वदतु भवेकेकामेन ग्रणानूपज्ञानेन च पुनः वैराग्येणात्मस्वरू
पेतरवस्तुनिरयवं दुःखरूपदोषदर्शनजनितत्यागेन गृह्यते मनोनि।
ग्रहीतुं शक्यते कौंतेयेति संबोधनेन यथा गुणदोषविवेकवती कुन्ती।
स्वपतिसत्त्वभयात्समासहसंगमकामरूपं दोषं विहाय तदात्तयादेवरा
जादेशाचनरूपेगुणाभूतं त्वामगृहणात् तथात्वमन्यदत्तमपिगुणदोषवि
चारेणैव मनो जयेति सूचितं ३५ ॥

मधुसूदनीटीका

तमिम माक्षेपं परि हरन् ॥

सम्यग्विदितेनेव चित्तवेदृग्विने ग्रतो मनो निग्रहीतुं शक्नोसीति संबोधनेन।
सूचयति हे महाबाहो महान्तौ साक्षान्महादेवेनापि सह कृतप्रहरणौ
बाहू यस्येति निरतिशयमुत्कर्षं सूचयति प्रारब्धकर्मवशादसंयता
त्मना तु निग्रहो दुःखेनापि निगृहीतुमशक्यं प्रमाथि बलवद्दृढमिति वि
शेषणत्रयं पिंडीकृत्योक्तं चलं वै चलस्वभावं मन इत्यसंशयं नास्त्येव
संशयोत्रममाप्येवमेवैतद् हृदीकोऽर्थः एवमत्यपि संयतात्मनासमाधिमाश्रो
पायेन योगिनाः अभ्यासेन वैराग्येण च गृह्यते सर्ववृत्तिशून्यं क्रियते न तु म
नस्मर्थः अनिगृहीतरसंयतात्मनः सकाशात्संयतात्मनो निगृही
तविशेषद्योतनाय तुशब्दः मनोनिग्रहे अभ्यासवैराग्ययोः समुच्चयबोध
नाय चशब्दः हे कौंतेयेति पितृष्वसृपुत्रत्वमनुस्मरन् मया सत्वीकर्तव्य इ
ति स्नेहसंबंधसूचनेनाश्वासयति अत्र प्रथमार्द्धेन चित्तस्य हठनिग्रहो।
न संभवतीति द्वितीयार्द्धेन तु क्रमनिग्रहः संभवतीत्युक्तं हि द्विविधो मन
सो निग्रहः हठेन क्रमेणैव तत्र हठः श्रोत्रादीनि ज्ञानेंद्रियाणि वाक्पा
ण्यादीनि कर्मेंद्रियाणि च तत्तद्गोलकमात्रोपरोधेन हठान्निगृह्यंते न तद्व
त्तेन मनोऽपि हठेन निग्रहीष्यामीति मूढस्य भ्रांतिर्भवति न च तथा।
निगृहीतुं शक्यते तद्गोलकस्य हृदयकमलस्य निरोद्धुमशक्यत्वात् अत
एव क्रमनिग्रह एव युक्तस्तदेतद्भगवान्वसिष्ठ आह उपविश्योपविश्यै
व चित्तज्ञेन मुहुर्मुहुः न शक्यते मनो जेतुं विना युक्तिमनिंदितां अंकुशे
न विना मत्तो यथा दुष्टमतंगजः अध्यात्मविद्याधिगमः साधुसंगम एव
च वासनासंपरित्यागः प्राणस्पंदनिरोधनं एतास्ता युक्तयः पुष्टाः संति
चित्तजये किल सतीषु युक्तिष्वेतासु हठान्नियमयंति ये चेतस्ते दीपमुत्।
सृज्य विनिघ्नंति तमोऽञ्जनैरिति क्रमनिग्रहे चाध्यात्मविद्याधिगम एक उ
पायः स हि दृश्यस्य मिथ्यात्वं दृग्वस्तुनश्च परमार्थसत्यपरमानंदस्वप्रका
शत्वं बोधयति तथा च सत्येतन्मनः स्वगोचरेषु दृश्येषु मिथ्यात्वेन प्रयो
जनाभावं प्रयोजनवति च परमार्थसत्यपरमानंदरूपे दृग्वस्तुनि स्वप्रका
शत्वेन स्वागोचरत्वं बुद्ध्वा निरिंधनाग्निवत्स्वयमेवोपशाम्यति यस्त्वबो
धितमपि तत्त्वं न सम्यग्बुध्यते पापाद्विस्मरति तयोः साधुसंगम एव।
पायः साधवो हि पुनः पुनर्बोधयंति स्मारयंति च यस्तु विद्यामदादिदुर्वा

सनयापीड्यमानो न साम्यतः प्रवर्तितुमुत्सहते तेन तस्य पूर्वोक्तविवेके
न वासनापरित्यागः प्रवीणाय: यस्तु वासनानामतिप्राबल्यात्तास्त्य
क्तुं न शक्नोति तस्य प्राणस्पन्दनिरोधोपायः प्राणस्पन्दवासनयोः वि
त्वेरक[illegible]वासनयोर्निरोधे चित्तशान्तिरुपपद्यते तदेतदाह सप्त द्वे
बीजे चित्तवृक्षस्य प्राणस्पन्दनवासने एकस्मिंस्तयोः क्षीणे क्षिप्रं द्वे
अपि नश्यतः प्राणायामदृढाभ्यासैर्युक्त्या च गुरुदत्तया आसनाशन
योगेन प्राणस्पन्दो निरुध्यते असङ्गव्यवहारित्वाद्भवभावनवर्जनात्
शरीरनाशदर्शित्वाद्वासना न प्रवर्तते वासनासम्परित्यागाच्चित्तं ग
च्छत्यचित्ततां प्राणस्पन्दनिरोधाच्च यथेच्छसि तथा कुरु एतावन्मा
त्रकं मन्ये रूपं चित्तस्य राघव यद्भावनं वस्तुनोऽन्तर्वस्तुत्वेन रसेन च य
दा न भावना किंचिद्धेयोपादेयरूपि यत् स्थीयते सकलं त्यक्त्वा तदा
चित्तं न जायते अवासनत्वात्सततं यदा न मनुते मनः अमनस्ता।
तदोदेति परमात्मपदप्रदेति अत्र द्वावेवोपायौ पर्यवसितौ प्राणस्पं
दनिरोधार्थमभ्यासः वासनापरित्यागार्थं वैराग्यमिति साधुसं।
गमाध्यात्मविद्याधिगमौ त्वभ्यासवैराग्योपपादकतयाऽन्यथासि
द्धेस्तयोरेवान्तर्भवतः अत एव भगवता अभ्यासेन वैराग्येण चेति द्व।
यमेवोक्तं अत एव भगवान्पतंजलिरसूत्रयत् अभ्यासवैराग्याभ्यां
तन्निरोध इति तासां प्रयुक्तानां प्रमाणविपर्ययविकल्पनिद्रास्मृतिरू
पाणां पंचविधानामानन्तानामाक्लिष्टत्वेन क्लिष्टानां दैवत्वेनाक्लिष्टानाम
पिहितानां सर्वासामपि निरोधोऽर्थिना त्रिवृदुपशमाख्यः परिणा।
मोऽभ्यासेन वैराग्येण च समुच्चितेन भवति तदुक्तं योगभाष्ये चित्त
नदी नामोभयतोवाहिनी वहति कल्याणाय पापाय च तत्र या कै
वल्यप्राग्भारा विवेकनिम्ना सा कल्याणवहा या त्वविवेकनिम्ना सं
सारप्राग्भारा सा पापवहा तत्र वैराग्येण विषयस्रोतः खिलीक्रियते
विवेकदर्शनाभ्यासेन च कल्याणस्रोत उद्घाट्यते इत्युभयाधीनश्चित्तवृ
त्तिनिरोध इति प्राग्भारनिम्नपदेन तदा विवेकनिम्नं कैवल्यप्राग्भारे
चित्तमित्युत्र व्याख्यातं यथा तीव्रवेगापातेन नदीप्रवाहः सेतुबन्धेन नि

गी॰ टी॰ ष॰

तिv

162

वार्यकुल्याप्रणयनेन क्षेत्राभिमुखं तिर्यक्प्रवाहान्तरमुत्पाद्यते त
था वैराग्येण चित्तनद्या विषयप्रवाहो निवार्यते समाध्यभ्यासेन प्रशांत
वाहिता संपाद्यत इति हारभेदात्समुच्चयएवनकाहारले व्रीहियव
वद्विकल्पः स्यादिमे च जपदेवताध्यानादीनां क्रियारूपाणामावृत्तिलक्ष
णोऽभ्यासः संभवति सर्वव्यापारोपरमरूपस्य समाधेः केनाभ्यास इ।
तिशंकां निवारयितुमभ्यासं सूत्रयति स्म तत्र स्थितौ यत्नोऽभ्यास इति त
त्र स्वरूपावस्थिते द्रष्टरि शुद्धे चिदात्मनि चित्तस्यावृत्तिकस्य प्रशान्तवाहि
तारूपा निश्चलता स्थितिः तदर्थं यत्नो मानस उत्साहः स्वभावचांच
ल्याद्बहिः प्रवाहशीलं चित्तं सर्वथा निरोत्स्यामीत्येवंविधः स चावर्त्य
मानोऽभ्यास उच्यते सततदीर्घकालनैरंतर्यसत्कारासेवितो दृढभू
मिः अनिर्वेदेन दीर्घकालसेवितो विच्छेदाभावेन निरंतरासेवितः सत
कारेण श्रद्धातिशयेन चासेवितः सोऽभ्यासो दृढभूमिर्विषयसुखवास
नया चालयितुमशक्यो भवति अदीर्घकालत्वे दीर्घकालत्वेऽपि विच्छि।
द्य विच्छिद्य सेवने श्रद्धातिशयाभावे च लयविक्षेपकषायसुखास्वा।
दानामपरिहारे व्युत्थानसंस्कारप्राबल्याद्दृढभूमिरभ्यासः फल
र्थं न स्यादिति त्रयमुपात्तं वैराग्यं च द्विविधं परमपरं च यतमानसंज्ञा
व्यतिरेकसंज्ञैकेन्द्रियसंज्ञावशीकारसंज्ञाभेदैरपरं चतुर्धा तत्र पूर्वभू
मिजयेनोत्तरभूमिसंपादनविवक्षया [illegible] दृष्टानुश्र
विकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति स्त्रियोन्नपानमै।
श्वर्याभिमादयो दृष्टा विषयाः स्वर्गो विदेहता प्रकृतिलयपरमाद्यो वै।
दिकत्वेनानुश्रविका विषयास्तेषूभयविधेष्वपि सत्स्वामेव रसायो विवे
कतारतम्येन यतमानानां द्वितीयं भवति अत्र जगति किं सारं किमसार
मिति गुरुशास्त्राभ्यां ज्ञास्यामीत्युद्योगो यतमानं स्वचित्ते पूर्वविमान
दोषाणां मध्येऽभ्यस्यमानविवेकेनैते पक्वा एतेऽवशिष्टा इति चिकित्स
कवद्विवेचनं व्यतिरेकः दृष्टानुश्रविषयप्रवृत्तेर्दुःखात्मत्वबोधेन बहि
रिन्द्रियप्रवृत्तिमजनयन्मात्रमपि रसौत्सुक्यतामात्रेण मनस्यवस्थानमेके
न्द्रियं मनस्यपि रसाभ्यसत्वेन सर्वथा वैतृष्ण्यं रसस्यापि विरोधिनी चित्तवृ

विको

सिच्यव

क्षिप्तानप्रसादरूपावशीकारसंज्ञंवैराग्यंसंप्रज्ञातसमाधेरंतरं।
गसाधनमसंप्रज्ञातस्यतुबहिरंगं तस्यत्वंतरंगसाधनंपरमेववै
राग्यंतद्वास्मरूपंततःपरंपुरुषख्यातेर्गुणवैतृष्ण्यमिति संप्रज्ञात
समाधिपाटवेनगुणत्रयात्मकात्प्रधानाद्विविक्तस्यपुरुषस्यख्या
तिः साक्षात्कारउत्पद्यते ततश्चाशेषगुणत्रयव्यवहारेषुवैतृष्ण्यंसंपद्य
वतिनतत्परंश्रेष्ठफलमनेनवैराग्येणसपरिपाकनिमित्तसमाधिविक्षेप।
शमपरिपाकाद्विवेकेनकैवल्यमिति ३५

३५ ॥

सदानंदीटीका

इत्येवमर्जुनप्रश्नेश्रुत्वावाचजगद्गुरुः सत्यमेवंयथाह्येवबलेम
नस्त्वाविदे १ महाबाहुनयात्वंनिग्रहीतुंवशस्यसि प्रारब्धकर्मणा
बल्यात्वरेणासत्यतात्मना २ दुःखेनापिमनोशक्तोनिग्रहीतुंबलेन
तु एवंसन्मतिधीरेणसमाधीनपरेणतत् ३ अभ्यासेनविशुद्धेन
वैराग्येणनिगृह्यते अभ्यासोनामकस्यांचित्तभूमौनिरंतर ४
समानप्रत्ययावृत्तिश्चित्तस्यापिविरोधिनः दृष्टादृष्टेषुभोगेषुदो
षदृष्टत्वदर्शनात् ५ विषयेषुपहेतृत्वंवैराग्येणतुदीरितं नाभ्या
निगृह्यतेतस्यासंनविक्षेपशीलता ६ ३५ ॥

नीलकंठीटीका

मनसोदुर्निग्रहत्वमभ्युपेत्यभगवानुवाच यद्यप्येवंतथापिअभ्या
सवैराग्याभ्यांसमुच्चिताभ्यांतुनिग्रहमपिमनोनिगृह्यते तत्राभ्या
सोनामकस्यांचिच्चित्तभूमौसमानप्रत्ययावृत्तिः वैराग्यंतुदृष्टा
दृष्टेष्टभोगेषुसमाधानेषुदोषदर्शनेनवैतृष्ण्यं तत्रयथाकेदारि
कःकेदारेषुकुल्याजलंसंचारयन्एकस्याद्वारंपिधायापरस्योद्घा
टयतितद्वत्वैराग्येणविषयस्रोतः खिलीक्रियतेअभ्यासेनकल्या
णस्रोतउद्घाटयतइतिद्वयोरपिआवश्यकत्वं तथाचसूत्रं अभ्यास
वैराग्याभ्यांतन्निरोधइति ३५ ॥

५४

गी॰
टी॰
६॰

163

आनंदीटीका

तथाच योगसूत्राणि चित्तवृत्तिनिरोधो योगः अभ्यासवैराग्याभ्यां तन्निरोधः तत्र स्थितौ यत्नोऽभ्यासः दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यमिति ३५

यद्येतदभ्युपगमसर्वं पुनः भगवा

रामकंठीटीका

नाहम — नास्त्यत्र संशयः इदं चलस्वभावचपलं मनो दुःखेन न निग्रहीतुं शक्यते किंतु अभ्यासेन वैराग्येण च उपायद्वयेन गृह्यते अभ्यासस्तावत्कर्मयोगपूर्वकं श्रवणमननादिना शास्त्रोक्तक्रमेण सर्वेन्द्रियवृत्तिष्वविहितविषयोन्मुखत्वेन प्रवर्तमानासु स्वर्गप्राप्त्यादिवृत्तिषु च शरीराद्यभिचारिणां नैव प्रवर्तमानासप्पुपदेशात् ब्रह्मशास्त्राणि क्रमेणायथोक्तस्वात्मनिनिवेशनात्मकस्थितिलाभविषयो यत्नः वैराग्यं चानिषिद्धविषयेष्वपि अनुभूयमानेष्वपि स्वस्वरूपानंदनिरूपमास्वादात् विस्मरणात्मनासंगः ताभ्यामेवंविधाभ्यां कर्मयोगाधिकृतपुरुषैकगोचराभ्यां

मु॰ अभ्यासवैराग्याभ्यामेतत्तु चंचलमपि चित्तं नियंतुं शक्यमेव [illegible]

अथैतदभ्युपगमष्टु लासिकी [illegible]टीका वेडुजरं श्री भगवानुवाच॥

हे महाबाहो मनश्चंचलं अतएव दुर्निग्रहं दुःखेन सर्ववृत्तिशून्यतया निरोद्धुं शक्यत इत्यत्र नास्ति संशयः किंत्वेतन्मनोऽभ्यासेन शनैः शनैरित्याक्रमया परमात्माकारवृत्त्या तदृढ्या वैराग्येणाविषयवैतृष्ण्येन च गृह्यते सर्ववृत्तिशून्यं क्रियते अभ्यासो लयप्रतिबंधात् वैराग्येणाविक्षेपप्रतिबंधात् परवृत्तिकं सत् परमात्माकारतया परिणतं भवतीत्यर्थः तदुक्तं अभ्यासवैराग्याभ्यां तन्निरोधा इति चः समस्तुये उक्तं चात्र भगवता भाष्यकृता उभयाधीनश्चित्तवृत्तिनिरोध इति [illegible] ॥

२१

पंक्षोतीटीका

ततो मनसश्चंचलत्वादिकमंगीकृत्य मनोनिग्रहोपायं दर्शयति भग
वान् असंशयमिति हे महाबाहो मनः असंशयं निश्चितं दुर्निग्रहं चल
मित्यत्र संशयो न त्वपुनः हे कौंतेय अभ्यासेन आत्मविषयं सततमनोवृ
त्तिः आत्मव्यतिरिक्तविषयप्रवृत्तिरहितअभ्यासस्तेन दृष्टादृष्टैहिका
मुष्मिकेषु दोषदर्शनाभ्यासात् वैतृष्ण्यं वैराग्यं तेन वैराग्येण च गृह्य
ते निगृह्यते इत्यर्थः ३५ ॥

रणवीरसमिद्धोधिनी ॥

अथैतदभ्युपगम्यार्जुनाक्षेपं परिहरन्भगवानुवाच असंशयमि
ति हे महाबाहो चंचलत्वादिना मनो दुःखेन निग्रहीतुं शक्यत इत्य
त्र नास्ति संशयः सत्यमेवेत्थं वदसीति किंत्वभ्यासेन वैराग्ये
ण चेत्युपायद्वयेन ग्रहीतुं शक्यते न तु नः सर्वथास्य निग्रहासंभ
व इति तत्राभ्यासः कर्मयोगविषयः पश्पष्टत्वन्नित्यायुक्तक्रमे
ण विषयाननुभवत्स्वपीन्द्रियेषु शास्त्राचार्योपदेशानुसारिणा
क्रमेण मनस आरब्धकार्यैकतानीभावरूपो यत्नः वैराग्यं च केमे
पुत्रादयो ये लोभाविष्टा गुरुमपि मां लज्जा तेहान्तरेण परित्यज्यमा
स्वपालनयः प्रवर्तमागच्छंतीति सर्वथा स्नेहत्यागः कोऽपि दीपकः

३५ ॥ मधुभाष्य

३५ ॥

164

भाषा अनुवाद

अर्जुन की कही मन की चञ्चलता अंगीकार करि भगवान उसके
निग्रह करनेकी उपाय कहते हैं कि हे महाबाहो हो मन की चञ्च
लता रोकना कठिन यह जो तुम कहते हो सो निःसन्देह ठीक।
है पर तो भी हे कौन्तेय अभ्यास के द्वारा मन परमात्माकार वृत्ति
में विषयों की वैराग्य वशते निग्रहीत हो सके है अभ्यास से लय
और वैराग्य से विक्षेप ये दोनो हर होय यह मन निवृत्ति होय पर
मात्माकारता पायकर थिर होता है क्यों कि योगशास्त्र में कहा है
कि वृत्तिशून्य मनकी ब्रह्माकारा करकारित रूप स्थिति होती है
उसी को निर्विकल्पकसमाधि कहते हैं ३५॥

दोहा

संशय नहि महाबाहो चंचल मन उर्याद कौंतिसुत अभ्यास
सें गहें विरागसें ताह ३५॥

165

असंयतात्मना योगो दुष्प्राप्य इति मे मतिः व
श्यात्मना तु यतता शक्योऽवाप्तुमुपायतः ३६

शांकरभाष्यं

यः पुनरसंयतात्मा तेन असंयतेति असंयतात्मना अभ्यासवैराग्या
भ्यां असंयत आत्मा अन्तःकरणं यस्य सोयमसंयतात्मा योगो दुःप्रा
पो दुःप्राप्य इति मे मतिः यस्तु पुनर्वश्यात्मा अभ्यासवैराग्याभ्यां व
श्यत्वमापादित आत्मा मनो यस्य सोयं वश्यात्मा तेन वश्यात्मना तु
यतता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतो यथोक्ता
दुपायात् ३६

"तेन असंयतात्मना

आनन्दगिरिकृतटीका

संयतात्मनो योगप्राप्तिः सुलभेत्युक्ता व्यतिरेकं दर्शयति यः पुन
रिति व्यतिरेको यस्मात्परं पूर्वार्धमनूद्य व्याकरोति असंयतेति प्र
वैक्तान्वयव्याख्यानपरमुत्तरार्धं व्याचष्टे यस्त्विमादिना अन्तःकरण
स्य स्ववशत्वे सिद्धेपि वैराग्यादावास्थावता भवितव्यमित्याह यततेति
उपायवैराग्यादिपूर्वको मनोनिरोधः ३६ ॥

स्वामिकृतटीका

एतावांस्त्विहहेतिरित्याह असंयतात्मनेति उक्तप्रकारेणाभ्या
सवैराग्याभ्यामसंयतः आत्मा चित्तं यस्य तेन पुरुषेण योगो दु
ष्प्रापः प्राप्तुमशक्यः अभ्यासवैराग्याभ्यां वश्यो वशवर्ती आत्मा चित्तं य
स्य तेन पुरुषेण पुनस्तानेनैवोपायेन प्रयत्नं कुर्वता योगः प्राप्तुं शक्यः ३६

पिशाचभाष्यं

यः पुनः असंयतात्मा तेन असंयतात्मनेति अभ्यासवैराग्याभ्याम
संयतोन्तःकरणोऽसंयत आत्मा तेनासंयतात्मना योगो दुष्प्रापः दुःख
प्राप्य इति मे मतिः यस्तु पुनः वश्यात्मा तेन वश्यात्मना अभ्यासवैरा
ग्याभ्यां वश्यत्वमुपपादित आत्मा मनो यस्य सोयं तेन वश्यात्मना तु य
तता भूयोपि प्रयत्नं कुर्वता शक्योवाप्तुं योग उपायतः यथोक्तादुपायात् ३६

रामानुजभाष्यं

गी॰ असंयतात्मना अजितमनस्कामहता अपि च बलेन योगो दुःप्राप एव
टी॰ उपायतस्तु वश्यात्मना पूर्वोक्तेन मदाराधनरूपेणांतर्गतेन ज्ञानकर्म
ध॰ णा जितमनसा यतमानेनायमेव सम्यग्दर्शनरूपो योगो वाप्तुं शक्यः ३६

अत्र यथाप्रत्यक्षा असंयतात्मनेनाविरक्तस्य न कुत्रचिद्योगावाप्तिः वश्यात्मनेति वैराग्यवता यतमानेनेति साभ्यासेनोपायानु अनेकसिद्धांतादिशास्त्रदिदिनानुसंश्रित्य ३६

अभिनवगुप्तकृतटी॰

वैराग्येण विषयोत्सुकताविलापने अभ्यासेन मोक्षोपायः क्रमाक्रमे विषयीक्रियते इति द्वयोरुपादाने उक्तं च तत्र भवता भाष्यकृता उभयाधीनश्चित्तवृत्तिनिरोध इति [illegible] ३६

परमार्थप्रपाटीका

अथोभयप्रकारं विधुरस्य योगो दुःसाध्यस्तथा उभयोपेतस्य सुसाध्य इत्याह असंयतेति अभ्यासवैराग्याभ्यामसंयत आत्मा चित्तं यस्य तेन योगो दुःप्रापः प्राप्तुमशक्यस्ताभ्यां वश्यः वशवर्ती आत्मा यस्य तेन यतता प्रयत्नं कुर्वता पुरुषेणोपायतोऽभ्यासवैराग्यरूपादवाप्तुं शक्य इति मे मतिः मदभिमतं ३६ ॥

वनमालीटीका

प्रारब्धकर्मणोऽनन्तानादिप्रबलेन स्वफलदानाय मनसो वृत्तिषु नानामानाभूकर्षतां सा निरोध इति यदुक्तं न च पुरतः पायेन निरोधः संभवतीत्याह असंयतात्मनेति भगवन्मात्राकारे उमत्तेपि वैराग्याभ्यासाभ्यां न संयतो निरुद्धो हि तिरस्कृतो नाशपितश्चात्मा चित्तं येन तेनासंयतात्मना योगो मनोनिरोधः दुःप्रापं दुःखेनापि प्राप्तुमशक्यं न शक्यते प्रारब्धकर्मकृतानां चित्तवृत्तीनां चाचल्यादिति वदतीत्थं मे मतिः संमतिस्तथैव सर्वेः वश्यात्मना तु वैराग्यपरिपाकेन वासनात्ययमति वश्यः स्वाधीनो विषयपारतंत्र्यशून्य आत्मा मनो यस्य तेन वैराग्येण विषयेभ्यो विमुखीकरणादभ्यासेन भगवदाकारताकरणाद्वैरुपायतो मनोनिरोधः अवाप्तुं शक्यः पुरुषप्रयत्नस्य च लौकिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात् अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादिप्रयत्नस्य च वैयर्थ्यापत्तेः प्रारब्धकर्मसत्त्वे ततः फलं संभवेत् किं पुरुषप्रयत्नेनेति वदतः सर्वथासंभवात् किं तेनेति विकल्पस्य सर्वत्र संभवात् अथ कर्मणः स्वयम

दृष्टद्वारस्य दृष्टसाधनं विना फलजननासमर्थत्वाद्यथेति नः
कृष्यादेः प्रकृष्टप्रयत्नरहितैस्तु योगाभ्यासेऽपि समं यदा प्रारब्धकर्म
फलेन तत्त्वज्ञानात्प्रबलमिति दृष्टत्वात् तथा तस्मादपि कर्मणो यो।
प५ गाभ्यासः प्रबलस्तच्छास्त्रीयप्रयत्नस्य सर्वतः प्राबल्यात् यदा जीवन्।
मुक्तिनः प्रागेव मनोनिरोधस्य शक्यत्वाच्छक्यत्वविचारो जीवन्मु।
क्तस्य ज्ञानभगवन्महाप्रसादस्य निष्कृतिः शेषाविषयस्य मनोनिग्रहा
दिके किमपि कर्तव्यं नास्तीत्यर्थः ३६ ॥

क्रमसवैजयन्तीटी·

किंच असंयतात्मनेति असंयतात्मना अभ्यासवैराग्याभ्याम् न
संयतः समग्रविषयान्तु परमितश्चात्मा मनो येन स तथा तेन विषय
व्याकुलचित्तेन तत्त्वज्ञानिनापि पुरुषेण योगः सर्वेन्द्रियवृत्तिनिरो
धलक्षणो ज्ञानयोगशिरस्कोऽष्टाङ्गयोगो दुःप्रापः दुःखेनापि प्राप्तुमश
क्यः तन्निश्चयेन वश्यात्मना वश्यत्वाभ्यां वशीकृतश्चात्मा मनो येन
स तथा तेन स्वाधीनमनसा तत्रापि यतता इह हो मनोनिरोधनायैव
प्रयत्नं कुर्वता उपायतः सर्वेश्वरस्य भगवतो समाराधनात्मकेना
गतज्ञानेन कर्मणा वाऽमेन्ना समर्थयोगप्रशक्यो नान्यथेत्यर्थः ३६

यत्तत्वमवोचः प्रारब्धभोगेन कर्मणा तत्त्वज्ञानादपि प्रबलेन स्वफलदानाय मनसो वृत्तिषूत्पद्य मानासु कथं नासां निरोधः कर्तुं शक्य इति तत्रोच्यते ॥

मधुसूदनीटीका

दुःप्रत्वेपि तत्त्वसाक्षात्कारे वेदान्तवाक्याख्यानादिवाऽसंगादालस्यादि।
दोषाद्वाऽभ्यासवैराग्याभ्यां न संयतो नितरां संयतमन्तःकरणं येन तेनास
यतात्मना तत्त्वसाक्षात्कारवतापि योगो मनोवृत्तिनिरोधः दुःप्रापः
दुःखेनापि प्राप्तुं न शक्यते प्रारब्धकर्मफलमात्रेण वंचस्यादिति वतेव
इति मे मतिः मम सम्मतिः तत्तथैवेत्यर्थः केन तर्हि प्राप्यते उच्य
ते वश्यात्मना तु वैराग्यपरिपाकेन वासनात्रये सति वश्यः स्वाधीनो।
विषयपारतंत्र्यशून्यः आत्मान्तःकरणं यस्य तेन तु प्राग्योगसंयतात्मना
वैलक्षण्येन तावयैः बधारणाध्यासवाहनादर्शनादि यततायतमाने
न वैराग्येन विषयस्रोतः खिलीकरणेन आत्मस्रोतउद्घाटनार्थमभ्यासप्रा
गुरुं कुर्वता योगः सर्वचित्तवृत्तिनिरोधः शक्यो वाप्नुमवितवाचस्पति

गी.
टी.
५.

167

मित्तानि प्रारब्धकर्माण्यभिभूय प्रामोशकाः कथमतिबलवता प्रा
रब्धभोगानां कर्मणामभिभवः उच्यते उपायतउपायात् उपायः पु
रुषकारस्य लौकिकस्य वैदिकस्य वा प्रारब्धकर्मापेक्षया प्राबल्यात्
अन्यथा लौकिकानां कृष्यादिप्रयत्नस्य वैदिकानां ज्योतिष्टोमादि
प्रयत्नस्य च वैयर्थ्यापत्तेः सर्वत्र प्रारब्धकर्मसद्भावविकल्पग्रासा
त् तथाहि प्रारब्धकर्मसत्त्वेन तत एव फलप्राप्तेः किं पौरुषेण प्रयत्नेन
तदसत्त्वेन सर्वथा फलासंभवात् किं तेनेति प्रयकर्मणः स्वयमदृ
ष्टरूपस्य दृष्टसाधनसंपत्तिव्यतिरेकेण फलजननासमर्थत्वादृष्ये।
तिनः कृष्यादौ पुरुषप्रयत्नश्चेतिचेत् योगाभ्यासेपि समं समाधानं न स४
त्साध्याया जीवन्मुक्तेरपि सुखातिशयरूपत्वेन प्रारब्धकर्मफलान्तर्भा
वात् प्रत्यवायस्य प्रारब्धकर्मफलेन त्वज्ञानात् प्रबलमिति कल्प्यते
दृष्टत्वात् तथा तस्मादपि कर्मणो योगाभ्यासः प्रबलोस्तु शास्त्रीय
प्रसर्वत्र ततः प्राबल्यदर्शनात् तथा चाह भगवान् वसिष्ठः सर्वमेवे
हि सदा संसारे रघुनंदन सम्यक्प्रयुक्तात् सर्वेण पौरुषात् सम।
वाप्यते १ उच्छास्त्रं शास्त्रितं चेति पौरुषं द्विविधं स्मृतं तत्रोच्छास्त्रमनर्था
य परमार्थाय शास्त्रितं उच्छास्त्रं शास्त्रप्रतिषिद्धमनर्थाय नरकाय १
शास्त्रितं शास्त्रविहितं श्रेतःकरणशुद्धिद्वारा परमार्थाय वक्ष्यंथेपु
पी४ परमार्थमोक्षाय २ शुभाशुभाभ्यां मार्गाभ्यां वहंती वासनासरित् पौ
रुषेण प्रयत्नेन योजनीया शुभे पथि १ अशुभेषु समाविष्टं शुभेष्वेवा
वतारय स्वमनः पुरुषार्थेन बलेन बलिनांवर २ द्रागभ्यासवशाद्या
ति यदा ते वासनोदयं तदाभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन ३ वा
सनाशुभेति शेषः संदिग्धायामपि भृशं शुभामेव समाहर शुभायां।
वासनावृद्धौ तात दोषो न कश्चन ४ अव्युत्पन्नमना यावद्भवानज्ञाततत्प
दः गुरुशास्त्रप्रमाणैस्त्वं निर्णीतं तावदाचर ततः पक्वकषायेण नूनं
विज्ञातवस्तुना शुभोप्यसौ त्वया त्याज्यो वासनौघो निरोधिनेति ५ तस्मा
त्सालिंगनस्य संसारस्याविवेकनिबंधनस्य विवेकमात्रात्केशादपन
यपि प्रारब्धकर्मपर्यवस्थापितस्य चित्तस्य स्वाभाविकीनामपि वृत्ती

नोयोगाभ्यासप्रयत्नेनापनयेत्सतिजीवन्मुक्तः परमोयोगीचित्त
वृत्तिनिरोधाभावेनतत्त्वज्ञानवानप्यपरमोयोगीतिसिद्धं प्रपंचि
तं जीवन्मुक्तिविवेकेसविस्तरमनुसंधेयं ४६ एवंप्राक्तनेनग्रं
थेनोत्पन्नतत्त्वज्ञानोऽसमप्रजीवन्मुक्तिरपरमोयोगीमतः अप्र।
नतत्त्वज्ञानउत्पन्नजीवन्मुक्तिश्चपरमोयोगीमतस्तस्य के नयोरुभयो
रपिज्ञानादज्ञाननाशेपियावत्प्रारब्धभोगंकर्मदेहेंद्रियसंघाता
वस्थानानुप्रारब्धभोगकर्मापायेववर्तमानदेहेंद्रियसंघातापाया
दुत्तरस्मात्कामावाहिदेहकैवसंप्रतिकापिनास्त्याशंका यस्तथा
कृतकृतकर्मभिर्लब्धविविदिषापर्यंतचित्तशुद्धिः कृतकार्यत्वात्स
र्वाणिकर्माणिपरित्यज्यप्राप्तपरमहंसपरिव्राजकभावः परमहं
सपरिव्राजकमात्मज्ञानात्कालेणजीवन्मुक्तेपरमबोधनदत्ते।
गुरुमुपसृत्यततोवेदांतमहावाक्योपदेशप्राप्यतत्त्वंसंभावनावि
परीतभावनाख्यप्रतिबंधनिरासायाध्यात्मशास्त्रजिज्ञासेमाघः ना
वृत्तिः शब्दादिसंततयाचतत्त्वलेतणमीमांसयाश्रवणमनननिदिध्या
सनानिगुरुप्रसादात्कर्तुमारभते मध्यइत्यानोपिसन्नामुमुक्षो
र्वेनाल्पप्रयत्नात्वलब्धज्ञानपरिपाकः श्रवणमनननिदिध्यास
नेषुक्रियमाणेष्वेवमध्येव्यपद्यतेसज्ञानपरिपाकशून्यत्वेनाः नचा
ज्ञानेनमुच्यतेनाप्युपासनासहितकर्मफलेदेवलोकमनुभवा
मर्चिरादिमार्गेणनापिकेवलकर्मफलेपितृलोकमनुभवति मा
मा^ र्गेदिमार्गेणकर्मणामुपासनानांचसमकत्वात् अतएवतादृशोयो
गभ्रष्टःकीटादिभावेनकष्टांगतिमियादत्रत्वेसतिदेवयानमार्गो पितृयान^
सेवयित्वात् वर्णाश्रमाचारभ्रष्टवद्वाकष्टांगतिंनेयात्शास्त्र
निंदितकर्मशून्यत्वात्तामदेववदितिसंशयपर्याकुलमना ३८॥

सदानंदीटीका

ताभ्यामसंपन्नंयस्यमनोविलेपशालिनः चित्तवृत्तिनिरोधाख्यो
योगस्तस्यातिदुर्लभः १ प्रारब्धकर्मप्राबल्याच्चचलत्वादिमनोमथ्य
तदुर्निग्रहत्वेचित्तस्यतत्रमेसंमतिर्हरेः वैराग्यपरिपाकेनवासना
नोत्तयेमति वपुःस्वाधीनशास्त्रोनःकरणायमयतेनतत् २ ईदृशेना

गी. टी. ६

विपूर्वोक्तमभ्यासं कुर्वतादरात् चित्तवांचल्यकारीणि कर्माण्येवा भिभूय च ४ अशेषशक्तः सयोगोहि चित्तवृत्तिनिरोधकः सशक्तो भिभवः कर्तव्यं प्रारब्धकर्मणा मेवेभ्यः सोप्युपायेन कर्तव्यो विवेकिना शास्त्रीयस्य प्रयत्नस्य शक्तस्यादयि कर्मणा ८ कर्तव्या भिभवः शक्तो वास्मिंश्चपि तथोदिते सर्वमेवेह हि सदा संसारे रघुनंदन सम्यक् प्रयुक्तात् सर्वेण पौरुषात् समवाप्यते उक्ता स्वशास्त्रिते वे तिपौरुषं द्विविधं स्मृतं ७ तयोश्चास्त्वमनर्थाय परमार्थीय शास्त्रितं शुभाशुभाभ्यां मार्गाभ्यां वहंती वासना सरित् ९ पौरुषेण प्रयत्नेन योजनीया शुभे पथि अशुभेषु समाविष्टं शुभेष्वेवावतारय १० स्वम नः पुरुषार्थेन बलेन बलिनां वर प्रागभ्यासवशाद्याति यदा तेवा सनोदयं तदभ्यासस्य साफल्यं विद्धि त्वमरिमर्दन संदिग्धायामपि भृशं शुद्धां धृत्वा समानतं यावद्दृढं तावन्नतांतमदः ११ गुरुशास्त्रप्रमाणैस्त्वं निर्णीतेनावदाचरः ततः पक्वकषायेण नूनं विज्ञातवस्तुना शुभोप्यसौ त्वया मार्गो वास नौघो निरोधिना तस्मात् पौरुषमाश्रित्य शक्तः प्रारब्धकर्मणा ४ कर्तव्या भिभवो पीति सिद्धमित्याशयो हरेः १५ योगाभ्यासपरैर्मनो नवरतं संस्थाप्यते यत्र तद्ब्रह्मात्मैकदर्शनीयप्ररोहयत्यतिश्रमात्तत्र योगी यते वैराग्यादिगुणाः सतां वसतभोपद्रक्लेशाद्गुणा सोस्मात्के ह हिमवैराग्येन सत्त्वो भूयान्मुकुंदो हरिः २९३९ ॥

नीलकंठटीका ।

असंयतात्मनाऽजितचित्तेन वश्यात्मना जितचित्तेन उपायतः अभ्यासवैराग्यरूपात् ३६ ॥

आनंदटीका

असंयतो निरुद्ध आत्मा मनो येन तेन दुष्प्रापो योग इति मे मतिः तुपुनः वश्यात्मना निरुद्धचेतसा यततापयत्नपूर्व मभ्यस्यता उपायतः वैराग्यादियोगसेवनात् वाप्तुं शक्यः [illegible]

[illegible]

रामकंठीटीका

अत एव — यतो व्याख्याताभ्यासवैराग्यलक्षणसाधनाभावादसंयतात्मना अ-
नियमितान्तःकरणेन पुरुषेण एष योगो दुष्प्रापो दुर्लभः वश्यात्मना
विधेयान्तःकरणेन पुनः पुरुषेण यतता निःसमविक्षेपोत्साहहतया प्रय-
त्नं कुर्वता उपायतो यथोक्तसाधनलक्षणादुपायादवाप्तुं शक्य एवं

३६

लासिकीटीका

किंच — अभ्यासवैराग्याभ्यां न संयतः समग्रवृत्तिशून्यतया निरुद्ध आत्मान्तः-
करणं येन तेन पुरुषेणायं योगो दुष्प्रापो दुर्लभः तत्र च पाशो वश्या-
त्मना विधेयान्तःकरणेन वैराग्यवतेत्यर्थः यतता साभ्यासेनैवानेनो-
पायेन स्वीकर्तुं शक्यः ३६

पंचोलीटीका

पुनावोऽस्त इह विशेषः इत्याह असंयतात्मनेति योगः असंयतात्मना
अभ्यासवैराग्याभ्यामसंयतचित्तेन दुःप्राप इति मे मतिः तत्पुनः वश्यात्म-
ना अभ्यासवैराग्याभ्यां वशीकृतमनसा यतता यत्नं कुर्वता उपायतः य-
थोक्तेन उपायेन योगो न प्राप्तुं शक्यः ३६

धनावीरसमिद्धोधिनी॥

अत एव असंयतात्मनेति न संयतो निगृहीतोऽशुभसंकल्पेभ्यः प्रत्या-
वर्तित आत्मा मनो येन तेनावशीकृतमनसा योगः समतालक्षणः
कर्मकौशललक्षणश्च कर्मयोगो दुःखेनापि प्राप्तुं न शक्यः इत्यने-
न प्रकारेण मम मतिर्निश्चयः वश्यात्मना स्वायत्तीकृतचित्तेन य

ततायत्नंकुर्वतांयोगः कर्मयोगउपायतः प्रोक्तलक्षणनिश्चय
रूपात् अवाप्तुं प्राप्तुंशक्यः अतोमनोजयेसत्येवनिश्चयस्यैवा
त्सर्वंसिध्यतीतिभावः ३६॥

मधुभाष्य

३६॥

169

भाषा अनुवाद

और संयतआत्मा को योगप्राप्ति सुलभ है यह कहते हैं कि
उक्त रीति से अभ्यास औ वैराग्य के द्वारा जिस का चित्त व
श नहीं है उस को यह योग दुःप्राप है और जिस का चि
त्त वशीभूत है और जो पूर्व कथित उपाय से यत्न करता है
वह मेरे मतसे योग प्राप्त हो सकता है ३६

दोहा

नमन जाके वश तिहयोग अलभ्य मोमत मन वश जाके ता
हि को यतन लभ्य है सत ३६॥

170

अर्जुन उवाच अयतिः श्रद्धयोपेतो योगाच्चलितमा
नसः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ३७

शांकरभाष्यं

तत्र योगाभ्यासांगीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्मा
णि संन्यस्तानि योगसिद्धिफलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्त
मिति योगी योगमार्गान्मरणकाले चलितचित्त इति तस्य नाशमा
शंक्यार्जुन उवाच अयतिरिति अयतिरप्रयत्नवान् योगमार्गे श्रद्ध
यास्तिक्यबुद्ध्या योगतो योगादन्तकालेपि चलितं मानसं मनो यस्य
स चलितमानसो भ्रष्टस्मृतिः सोऽप्राप्य योगसंसिद्धिं योगफलं स
म्यग्दर्शनं कां गतिं हे कृष्ण गच्छति ३७ ॥

आनन्दगिरिकृतटीका

प्रशान्तमनस्त्वापयति तथेत्यादिना मनोनिरोधस्य दुःखसाध्यत्वमाशं
क्य परिहृते सति प्रश्नपुनरवकाशं प्रतिलभ्योवाचेति सम्बन्धः ।
लोकद्वयप्रापककर्मसंन्यासे कृतो योगिनो नाशाशंकेमाशंक्याह
योगाभ्यासेति तथापि योगानुष्ठानपरिपाकपरिप्राप्तिसम्यग्दर्शन
सामग्र्यभावान्नोपपन्नो कृतस्तस्य नाशाशंकेति चेन्नैवमनेकान्त
रायवशाद्योगस्येहजन्मनि प्रायेण संसिद्धेरसिद्धिरित्यभिसन्धाया
ह योगसिद्धीति अभ्युदयतिः श्रेयसबहिर्भावनाशो योगमार्गेत
त्फलस्य सम्यग्दर्शनादिति शेषः तर्हि ततो बहिर्मुखत्वमेवासक्ति
कं संचलितमित्याशंक्याह श्रद्धयेति नहि योगमार्गमाश्रयते तेनेत्याह
योगादिति मरणकाले व्याकुलेन्द्रियस्य ज्ञानसाधनानुष्ठानावकाश
भावादुक्तं ततश्चलितमानसत्वमित्याशंक्याह भ्रष्टेति गम्यत इति
गतिः पुरुषार्थः सामान्यप्रश्नमनभिप्रेत्य विशेषप्रश्नो द्रष्टव्यः ३७ ॥

स्वामिकृतटीका

अभ्यासवैराग्याभावेन कथंचित्प्राप्तसम्यग्ज्ञानः किंफलं प्राप्नोती
त्यर्जुन उवाच अयतिरिति प्रथमं श्रद्धयोपेत एव योगे प्रवृत्तः तत
मिथ्याचारतया ततः परं तु अयतिः न सम्यग्यतते शिथिलाभ्यासः
विषयप्रवणचित्ततया मन्दवैराग्य
यार्थः तथा योगाच्चलितमानसे

गी॰
टी॰
६॰

इत्यर्थः एवमभ्यासवैराग्यशैथिल्याद्योगस्य संसिद्धिं फलं ज्ञानमप्राप्य कां गतिं प्राप्नोति ३७

पैशाचभाष्यं

तत्र योगाभ्यासांगीकरणेन परलोकेहलोकप्राप्तिनिमित्तानि कर्माणि संन्यस्तानि योगस्य फलं च मोक्षसाधनं सम्यग्दर्शनं न प्राप्तमिति योगी योगमार्गात्मरणकाले चलितचित्त इति तस्य नाशमाशंक्याह । अर्जुनः अयतिरिति अप्रयत्नवान् योगमार्गे श्रद्धयास्तिकबुद्ध्यान्वितो योगादन्तकाले चलितं मानसं मनो यस्य स चलितमानसः नष्टस्मृतिः अप्राप्य योगसंसिद्धिं योगफलं सम्यग्दर्शनफलं कां गतिं कृष्ण गच्छति ३७ ॥

रामानुजभाष्यं

अथानेहाभिक्रमनाशोस्तीत्यादावेवोक्तं योगमाहात्म्यं यथावच्छ्रोतुम् अर्जुनः पृच्छति अंतर्गतात्मज्ञानतया योगशिरस्कतया च कर्मयोगमाहात्म्यं तेनोदितं न च योगमाहात्म्यमेव पृष्टेन उवाच अश्रद्धयायोगेप्रवृत्तोऽल्पतराभ्यासरूपयत्नवैकल्येन योगसंसिद्धिमप्राप्य योगाच्चलितमानसः कां गतिं गच्छति ३७ ॥

अभिनवगुप्तकृतटीका

आमायोगाद्यदि चलितेपि चित्ते श्रद्धा न हीयते विना श्रद्धां हि सिद्धयोगोपि सर्वं निष्फलं कुरुते उक्तं हि यदा प्राप्यापि विज्ञानं दूषितं चित्तविभ्रमात् तदैव ध्वंसते शीघ्रं तूलराशिमिवानल इति योगस्य सम्यक्सिद्ध्यभावजातायां किं लोकात्रिभ्रष्टः सम्यक् च ब्रह्मणि न लीन इति नश्येत् अथवा ब्रह्मणः प्रतिष्ठत्वाद्विनश्यति परलोकवार्तयेति प्रश्नः ॥ ३७ ॥ ३८ ॥

परमार्थप्रपाटीका

अयोगभयभ्रमत्वेन शिथिलाभ्यासवतः का गतिरित्यर्जुनः पृच्छति अयतिरिति प्रथमं श्रद्धयोपेतः ईश्वरार्पणतया कर्म कुर्वाणः सन् योगे प्रवृत्तः न तु मिथ्याचारतया परं तु अयतिः सम्यग्यत्नेन योगसामग्रीविकलः सन् योगाच्चलितं विषयासक्तं मानसं यस्य स तथाभूतो योगसंसिद्धिमप्राप्य कां गतिं गच्छति ३७ ॥

वनमालीटीका

एवं प्राक्तनग्रंथेनोक्तं भगवत्परोक्षानुभवनिःशेषाविद्यानिवृत्तिपूर्वकस्वस्वरूपाविर्भावरूपजीवन्मुक्तिरूपो योगी मतः ३

सत्रपरंब्रह्मापरोक्षतउमत्रजीवन्मुक्तिस्वपरमोयोगीमतः पूर्वं।
साभगवदाज्ञादिकाविद्यायानिवृत्तत्वेपिस्वस्वरूपानंदाज्ञादिका
याअप्रतिहतत्वात् अंतःस्थत्वविद्याद्वयस्यापिनिवृत्तिः विश्वरूपमु
ख्यान्दृश्यारेवंचद्वयनिवृत्तेक्षेत्रिमक्षे यत्नकर्मफललब्धविविदि
षापर्यंतचित्तशुद्धिःकृतकर्मत्वात् कर्माणिसंन्यस्यजीवन्मुक्ते
परवोपनदृगुरुमुपसृत्यततोवेदांतोपदेशश्रवणासंभावनविपरी
तभावनानिवृत्तिपूर्वकभगवंतमापरोक्षीकर्तुं अप्राप्तोब्रह्मवि
द्यामेसाधनावृत्तिः शमादिसंपन्नयावज्जीवंतयामीमांसयाश्रवण
मननानिदिध्यासनानिगुरुमुपासीनःकर्तुमारभेतेसमग्रदायानोप्याद्य
योस्यवेतालमयत्नात्स्वल्पपुण्यत्वात्त परिपाकः श्रवणादिभुक्तियमा
णेष्वममध्येवपयन् सोज्ञानसम्यग्भगवदपरोक्षत्वेनतनसमारान्
मुख्यतेनापिस्वर्गादिफलभोक्तातत्साधककर्मणांत्यागात् अतए
नादृशोयोगभ्रष्टः कीटादिभावेनकष्टांगतिमियादित्युक्तेसतिदेव
पितृयाणाद्यसंबंधित्वात् स्ववर्णाश्रमाचारभ्रष्टवत् अथवाकष्टां
गतिंनेयादृशात्मतिदितिकर्मभ्रष्टत्वात्सम्यग्देवावदतिसंदिहानः पृ
च्छति अयतिरिति अयतिरल्पयत्नवान् अश्रवणोपवागृहीतिव
त्वेनस्तार्थकश्रद्धयोपेतोगुरुवेदांतवाक्येषुविश्वासयुक्तः श्रद्धाव
शमाद्युपलक्षणं शांतोदांतउपरतस्तितिक्षुःश्रद्धावित्तोभूत्वात्मन्ये
वात्मानंपश्येदितिश्रुतेः नित्यानित्यवस्तुविवेकइहामुत्रभोगवि
रागः शमदमोपरतितितिक्षाश्रद्धादिसंपत् मुमुक्षुतावेतिसाधन
चतुष्टयसंपन्नोप्यायुषोल्पत्वेनमरणकालेवेंद्रियव्याकुलत्वेनसाध।
नात्संभवाद्योगाच्चलितमानसः योगाच्छ्रवणादिजन्मनस्तत्वज्ञा
नाच्चलितंतेनफलमप्राप्तमानसः योगसंसिद्धिंब्रह्मापरोक्षनि
मित्तांमुक्तिमप्राप्यानन्तरमेवमृतःकांगतिंदुर्गतिंसुगतिंवागच्छ
ति स्वोचितकर्मत्यागात् शास्त्रोक्तमोक्षसाधनानुष्ठायित्वाभावाद्रहित
कर्मभ्रष्टत्वाच्च ३७॥

गी· टी· ष·

१७८

फलानुसंधानरहितस्य ज्ञानगर्भकस्याष्टाङ्गयोगशिरस्कस्य कर्मयोग
स्येहाभिक्रमनाशोस्तीत्यादिना पूर्वं माहात्म्यं श्रुतमपि तत्तस्य।
विस्तरश्रवणेच्छयार्जुनो भगवंतं पृच्छति त्रिभिः अयतिरिति हे
कृष्ण यः कश्चित्पुरुषः प्रथमं तु शास्त्राचार्यवचनविश्वासेनोत्तमा
याश्रद्धयोपेतो युक्तो भवति ततः पश्चादयतिः स्वधर्माचरणेऽप्रय
त्नवान् अल्पार्थे नञ् अनुदरा कन्येतिवत् अतएव योगाद्दृष्टयोगायो
गात् चलितमानसः अभ्यासवैराग्ययोः शैथिल्यप्रयत्नत्वात्स्म मा।
येः स्वकाशाच्चलितं विषयोन्मुखं भूतं मानसं यस्य स तथा ईदृशो सम्य
ग्योगो योगी योगसंसिद्धिं सर्वाङ्गसम्पन्नस्य ज्ञानगर्भस्य कर्मशिर
स्कस्याष्टाङ्गस्य संसिद्धिमात्मावलोकनरूपं फलमप्राप्य स्वधर्मानुष्ठा
नाभ्यासवैराग्ययोः स्थित्यादात्मानमनधिगम्य कां गतिं किं शास्त्रोक्ता
नेकविधां शंकां सूचयति गतिशब्दस्त्र शास्त्रे ख्यातं द्योतयति तथा
हि देवयोनिं वा मनुष्ययोनिं वा पशुपतिसरीसृपादियोनिं वा निरय
योनिं वा स्थावरयोनिं वा गच्छति प्राप्नोति यद्यप्ययतिः योगाच्चलि
तमानसश्च भवति तथापि श्रद्धावांस्तत्र यत्किंचित्फलं प्राप्नोत्येव तद
दस्येत्यर्थः ३७ ॥ मधुसूदनीटीका

यतिः यत्नशीलः अल्पार्थे नञ् अलवणा यवागूरितिवत् अयतिः
अल्पयत्नः श्रद्धया गुरुवेदांतवाक्येषु विश्वासबुद्ध्योपेतो युक्तः
श्रद्धा च सत्सहचारिणां शमादीनामुपलक्षणं शांतो दांत उपरतस्ति
तिक्षुः श्रद्धावित्तो भूत्वात्मन्येवात्मानं पश्यतीति श्रुतेः तेन नित्यानि
त्यवस्तुविवेक इहामुत्रफलभोगविरागः शमदमोपरतितितिक्षा
श्रद्धादिसंपत्समुमुक्षुत्वं चेति साधनचतुष्टयसंपन्नः गुरुमुपसृत्य वे
दांतवाक्यश्रवणादि कुर्वन्नपि परमायुषोऽल्पत्वेन मरणकाले चेंद्रि
ना॰ याणां व्याकुलत्वेन साधनानुष्ठानासंभवात् योगाच्चलितमानसः योगा
च्छ्रवणादिपरिपाकलब्धजन्मनस्तत्त्वसाक्षात्काराच्चलितं नतत्फल
मप्राप्तमानसं यस्य सः योगो निष्ठा सैवाप्राप्य योगसंसिद्धिं तत्त्वज्ञान

तिमितामसत्वान्नतत्कार्यनिवृत्तिमश्नुत इति सहितामप्राप्यापि नत
त्पथभ्रष्टः सन् कां गतिं इहलोके गच्छतीति स्वर्गं गतिं वा कर्मणो
परिमाणात्तत्त्वज्ञानस्य चाशुद्धत्वेन शास्त्रोक्तमेतत्साधनानुष्ठानमपि नाको
लगाहितं कर्मश्रममात्र [illegible] ॥

सदानंदटीका

योगाभ्यासप्रवृत्तेन सम्यक्त्वेन वैकर्मेन इहामुत्रफलप्राप्तिहेतवः।
तेषु मध्ये न १ योगसिद्धिफलेऽर्थात्साधनेऽनुपदर्शने नष्टा मे योगमा
र्गात्प्रपाणेव चलितामतिः २ यस्य तस्याभितो नाशमालस्योवा वर्ण
दृवः गुरुवेदांतवाक्येषु विश्वासेन युतोऽपियः विरक्तः साधनोपेतः प्र
वृत्तो योगपद्धतौ शिथिलप्रयत्नो योऽसदेवान्त्यमरणोयदि योगसि
द्धिमसंप्राप्य कां गतिं याति सोऽच्युत ५३७ ॥

नीलकंठटीका

मनसोदुर्निग्रहत्वाद्योगसिद्धौ विघ्नेप्रपत्य अर्जुन उवाच हे कृष्ण यो
गात्कर्मयोगाच्चलितमानसत्वात्कर्मणो मोक्षमार्गात्प्रभ्रष्टः अयुपवे
नो योगमार्गे प्रविष्टोऽपि अयतिः अप्रयत्नवान्‌ दैवेनाप्यदौर्बल्या
द्वा अलसप्रयतः अलवणाप्यक्षान्तिरितिवदल्पार्थे नञ् सकृत्स्वावि
त्‌ योगसंसिद्धिं योगफलं सम्यक्दर्शनमप्राप्य स्वतश्चैतां कां गतिं
गच्छति ३७ ॥

आनंदटीका

अत्र हेतुः अनेकचित्तः नैकत्र चित्ते यस्य विभ्रांतेनेन कापि लब्धस्थितिः।
मोहस्याज्ञानस्य वशं गतः हे कृष्ण योगसिद्धिमप्राप्य कां गतिं ग
च्छति ३७ ॥

रामकंठटीका

अभ्यासेनैवोपायान्तरेण संशयतया फलस्य च संभवत्वात्प्रश्नायातिकिलो
कान्तयोपेतः श्रद्धावान् अनुपप्लवस्तत्त्वमस्त्वसापाणमन्त्रमपफल्लादेयितं
दुःसाध्यध्यानं प्रभुस्तरपि यदि योगाद्विनलत्वात्तस्माधीचलितमानसः
विक्षिप्तचित्तवृत्तिः अतएवायतोयत्नशून्यः ततस्त्वचलनात् परस्परोप
यस्य तत्त्वस्य पथि प्राप्युपायरूपमार्गे प्रमूढः प्रकर्षेण मूढः सम्यगता
त्वारहितः ३७ ॥

+ अप्रयत्नः उद्योगाच्चलितमानसः लिप्समानः
सतां मार्गं प्रमूढो ब्रह्मणः पथि। अनेकचित्तविभ्रान्तो
मोहस्यैव वशं गतः अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण
गच्छति अभ्यासवैराग्ययोः दुःसाध्यत्वाद्योगस्य सिद्धिर्दुष्प्रा
पा मन्यमानोऽर्जुन उवाच अयुक्तेति नञ् अल्पभावे अयतः
यत्नशैथिल्यादभ्यासपरिपाकेन प्राप्तः अतएव योगाच्च
लितमानसः परमं योगमप्राप्तः किं नु कालात् योगाद्वर्ष्यं ब्रह्म
प्राप्तिः स्यादिति प्रच्युतोपेतः न तु स्यकृत्स्नं अतएव सतां योगीनां मार्गं ब्रह्म
स्थितिं लब्धुमिच्छुर्ब्रह्मणः पथि उपायरूपे मार्गे प्रकर्षेण मूढः ॥

+ अभ्यासोपायस्य ज्ञानस्वरूपस्य कृतिमात्रवगतत्वादभ्यासवैराग्ययोश्चात्यन्तदुःसाध्यत्वादल्पमनश्चसंसारिपर्यमीक्षुपरमा
त्मयोगस्य दुर्वापत्वं मन्यमानः अज्ञानमात्मसंशयः कस्य कारणस्य योगं प्रत्युपायत्वं स्यात्तत्रेतिसंशयोऽर्जुन उवाच ॥+

गी॰
टी॰
८॰

173

\+ ननु यथा न योगेन लब्धा नियतसमाधिरपि बुद्धियोगादारभ्यात्मनोऽनुभूततया श्रद्धालुस्तु शक्तिवशदमैर्हेतत्लब्धं
ज्ञानोत्कर्षमप्राप्तो जन्मप्रदसंसारसकेरभावाच्च कां गतिं प्राप्स्यतीति संदिहानोऽर्जुन उवाच ॥ +

लालकी[illegible]टीका

\+ अयतिरल्पयत्नः यथायथं समाधानरूपपरमात्माकारमनस्याहत्तिरु पाभ्यासरहितः तथा श्रद्धयोपेतः प्राप्तयोगाद्बुद्धियोगादेर्निर्विकल्पस माधिरूपात् सिद्धिमात्मा चलितं व्युत्थितं च मानसं यस्य सः योगसंसि द्धिम हेतं रूपं ज्ञानं प्राणसम्प्राप्तमप्राप्य कृष्ण हे कृष्ण देहमत्सरस्य कां गतिं सुगतिं दुर्गतिं वा प्राप्नोति [illegible] ॥

पंचोलीटीका

अभ्यासवैराग्यशैथिल्येन कथंचित् प्राप्तसम्यग्दर्शनः मरणकाले योगाच्चलितमानसः सर्वकर्मसंन्यासी किं फलं प्राप्नोतीति पृच्छति अर्जुन अयतिः इति हे कृष्ण अयतिः योगमार्गे अप्रयत्नवान् श्रद्धयास्तिक्यबुद्ध्या युक्तः योगात् अन्तकाले चलितमनाः योगसंसिद्धिं योगफलं सम्यग्ज्ञानम् अप्राप्य कां गतिं गच्छति ३७ ॥

रणवीरससिद्धेश्विनी ॥

अथ वैराग्याभ्यासाभ्यां प्रोक्तलक्षणो मनोनिग्रहसिद्धये परमोपायतया आश्वासितो भवतीति सिद्धान्तितं तत्र तावदयोगेनैव दुःसाध्यत्वात् सति मनोनिग्रहे प्रोक्तलक्षणस्य कर्मयोगस्य दुरवापत्वं तद्वत्स्यमेवमस्यमानः अहो मातस्यैकस्यैव लाभवाक्यारणत्वं योगं प्रति स्यान्नवेति संशयानोऽर्जुन उवाच अयतिरिति यास्त्राचार्योपदिष्टेऽर्थे एवमेवेतदिति निःसंशयता श्रद्धा तया उपेत एव योगे श्रद्धमः अनन्तरम् अनायत्तचित्तत्वेन पुत्रमित्रादिस्नेहादिना अतिबलवत्तरेण योगात् प्रोक्तलक्षणात् कर्मयोगात् समन्ताल्लक्षणाद्धावलितं मानं यस्य सो प्रतिपक्षप्रोक्तलक्षणवैराग्यरहितो यावत् अत एवायतिः अल्पार्थेनञ् मंदप्रयत्नः शिथिलाभ्यास इति यावत् स योगस्य कर्मयोगस्य संसिद्धिमैहिकामुष्मिकसर्वप्राप्तिलक्षणमप्राप्य लब्ध्वा हे कृष्ण कां गतिं गच्छति प्राप्नोति अयं भावः उपायो

तरसादित्येनप्रद्युम्नाद्यैकालम्बनस्यतस्याल्पप्रयत्नत्वेनसंग्रा
मान्निवृत्तेः संभवाच्छत्रुभिरित्यदत्तत्वेनाद्येलोकोविमुखीभू
यमरणेनवाद्येलोकाभावइत्युभयलोकाभावेकस्यांयोनौसं
क्रमणंनस्येतिप्रश्नाभिप्रायः ३०॥

मधुभाष्य

भाषा अनुवाद

अभ्यास वैराग्य के अभाव से या और कोई प्रकार उपाय से जिस को तत्वज्ञान न भया ऐसा मनुष्य कौन फल पायसकता है औ कि स गती को जाता है यह प्रश्न अर्जुन करते हैं कि हे कृष्ण जो प्र थम कपट रहित श्रद्धा युक्त होय योग मे प्रवृत्त भया परन्तु तिस पीछे यत्न न किया अर्थात् अभ्यास से शिथिल कहे ढीला रहा और जिसका मन विषय मे मग्न रहा कहे विषय से विराग न भया ऐसा मनुष्य योग संसिद्धि जो ज्ञानरूप फल तिसको न प्राप्त होके किस रूप गति को पाय सकता है अर्थात् कौन गति को जाता है ३७

दोहा

यत्नरहित श्रद्धायुक्त योग हि सें चलचित कृष्ण सिद्धि विन यो गकी का गति लहैं सचित ३० ॥

125

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति अप्र
तिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ३८ ॥

शाङ्करभाष्यं

कच्चिदिति कच्चित् किं नोभयविभ्रष्टः कर्ममार्गात् विभ्रष्टः सन् छि
न्नाभ्रमिव नश्यति किं वा न नश्यति अप्रतिष्ठो निराश्रयो हे महाबाहो
विमूढः सन् ब्रह्मणः प्राप्तिमार्गे ३८ ॥

आनन्दगिरिकृतटीका

प्रश्नमेव विवृणोति कच्चिदिति प्रश्नस्य प्रश्नार्थत्वं कच्चिदित्यस्याङ्गीकृ
त्य व्याचष्टे किमिति उभयविभ्रष्टत्वं स्पष्टयति कर्ममार्गादिना वाप्रवा
छिन्नं विशकलितमभ्रं यथा नश्यति तद्वदित्याह छिन्नेति नाशाशंका
निमित्तमाह निराश्रय इति कर्ममार्गरूपावष्टम्भाभावेऽपि ज्ञानमा
र्गावष्टम्भस्तस्य भविष्यतीत्याशंक्याह विमूढः सन्निति नहि कर्मिणो
प्रतीयमाशङ्का मुक्ताभिलाषं त्वकेश्वरे समर्पणं वा कर्मानुतिष्ठतो
निरुपचारेण तद्भ्रंशवचनासम्भवात् सर्वकर्मसन्न्यासिनस्तु विहि
ताद् मार्गात् ज्ञानोपायाच्च विभ्रंशेन नष्टप्राप्तिशङ्का युक्तेति भावः ३८

स्वामिकृतटीका

प्रश्नाभिप्रायं विवृणोति कच्चिदिति कर्मणामीश्वरेऽर्पितत्वादन
नुष्ठितत्वाच्च न तावत्कर्मफलं स्वर्गादिकं प्राप्नोति योगानिष्पत्तेश्च न
मोक्षं प्राप्नोति एवमुभयस्माद्भ्रष्टः अप्रतिष्ठो निराश्रयः अत एव ब्रह्म
णः प्राप्त्युपाये पथि मार्गे विमूढः सन् कच्चिन्न नश्यति किं वा न नश्यती
त्यर्थः नाशे दृष्टान्तः यथा छिन्नमभ्रं पूर्वस्मादभ्राद्विच्छिन्नमभ्रान्तरं चाप्रा
प्तं सत् मध्य एव विलीयते तद्वत् ३८ ॥

पैशाचभाष्यं

कच्चिदुभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव नश्य
ति किं वा अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढो ब्रह्मणः पथि ब्रह्म
प्राप्तिमार्गे ३८ ॥

रामानुजभाष्यं

गी. टी. ६

176

उभयविभ्रष्टोऽयं छिन्नाभ्रमिव कच्चिन्न नश्यति यथा मेघशकलः पूर्वस्मा
न्मेघात् मेघान्तराच्च छिन्नः परं मेघान्तरमप्राप्य विनष्टो भवति तथैव कच्चि
न्न नश्यति कथमुभयविभ्रष्टता अप्रतिष्ठः विमूढो ब्रह्मणः पथि
यथावस्थितस्वर्गादिसाधनभूतकर्मफलाभिसंधिरहितस्यास्य पुरु
षस्य फलसाधनत्वेन प्रतिष्ठा न भवतीति अप्रतिष्ठः प्रक्रान्ते ब्रह्म
णः पथि विमूढस्तत्साधनात् प्रच्युतः उभयभ्रष्टतया कि
मयं नश्यत्येव उत न नश्यति ३८ ॥

अभिनवगुप्तकृतटीका [illegible] ३८ पूर्वश्लोके उक्तार्थः

परमार्थप्रपा

एतन्मे संशयं [illegible] ३

प्रश्नाभिप्रायं विशदयन्निति पुनराह कच्चिदिति द्वाभ्यां पूर्वं श्रद्धया
कर्मणामीश्वरार्पणतया स्वर्गादिफलभ्रष्टः पुनर्योगाच्चलितमानसत्वा
द्विगतमोक्ष एवमुभयविभ्रष्टः सन् छिन्नाभ्रमिव अयनः पृष्टो वा
महापीभूताभ्रान्तराभावान्मध्ये स्थितमभ्रं यथा विलीयते तद्वद्ब्रह्म
णः पथि मोक्षमार्गे विमूढः अतएवाप्रतिष्ठो निराश्रयः कच्चिन्न
श्यति ३८ ॥

वनमालीटीका

कच्चिदिति साभिलाषप्रश्ने महाबाहो सर्वेषां भक्तानां सर्वोपद्रवनिवा
रणे समर्थाः पुरुषार्थचतुष्टयदाने समर्था वा चत्वारो बाहवो यस्य
सः ब्रह्मणः ब्रह्मप्राप्तिमार्गे विविक्तः अनुमज्ञानेन तद्गुणालयस्य ब्र
ह्मणः साक्षात्कारोपायस्य सः अप्रतिष्ठः देवयानादिप्रतिष्ठाभिला
त्साधकसाधने रहितः स उभयविभ्रष्टः कर्ममार्गात् ज्ञानमार्गाच्च वि
भ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं विशकलितं पूर्वस्मात् मेघाद्भ्रष्टमु
त्तरमेघं चाप्राप्तमभ्रं यथा मध्ये योगं संदेहगत एव नश्यति तथा यो
गभ्रष्टोऽपि पूर्वस्मात् कर्ममार्गादिच्छिन्न उत्तरं ज्ञानमार्गमप्राप्तोऽन्तरा
ल एव नश्यति कर्मफलं ज्ञानफलं च लब्धुं योग्यो न किमिति प्रश्नाशयः ३८

[illegible]वैजयन्तीटी·

किं च प्रश्नाभिप्रायं स्पष्टयति कच्चिदिति हे महाबाहो अप्रतिष्ठः भ

गवदर्पितत्वात्कर्मफले स्वर्गादौ स्थितिरहितः एवं च ब्रह्मणः प
रमेश्वरस्य पथि मार्गभूते साधने विमूढः विशेषेण विक्षिप्तः भग
वत्प्राप्तिसाधनात्प्रच्युत इत्यर्थः ईदृशः सन्पुरुषः उभयविभ्रष्टः स
न् उभयस्मात्कर्मफलात्स्वस्वरूपावलोकनाच्च विभ्रष्टः सच्छिन्नसं
छिन्नाभ्रमिव यथा पूर्वस्मान्महतो मेघात् छिन्नोऽभ्रमेघशकलः प
रं महान्तं मेघमप्राप्य नश्यति तथा कच्चित् किं न नश्यति वा न नश्यति ३८

एतदेव संशयबीजं विवृणोति ॥

मधुसूदनीटीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो महान्तः सर्वेषां भक्तानां स
र्वोपद्रवनिवारणसमर्थाः पुरुषार्थदानसमर्था वा बाहवो यस्येति प्रश्ननिमित्तकोपाभावस्तदुत्तरदानसामर्थ्यं च
सूचितं ब्रह्मणः पथि ब्रह्मप्राप्तिमार्गे ज्ञाने विमूढः विक्षिप्तः अ
नुत्पन्नब्रह्मात्मैक्यसाक्षात्कार इति यावत् अप्रतिष्ठः देवयानपितृ
यानमार्गगमनहेतुभ्यामुपासनाकर्मभ्यां प्रतिष्ठाभ्यां साधनाभ्यां र
हितः सोपासनानां सर्वेषां कर्मणां परित्यागात् एतादृश उभयभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च विभ्रष्टः छिन्नाभ्रमिव वायुना छिन्नं वि
शकलितं पूर्वस्मादभ्रादुत्तरमभ्रं चाप्राप्तमभ्रं यथा तयोर्म
ध्ये अन्तराल एव विनश्यति तथा योगभ्रष्टोऽपि पूर्वस्मात्कर्ममा
र्गाद्विच्छिन्नः उत्तरं ज्ञानमार्गमप्राप्तोऽन्तराल एव नश्यति कर्मफलं
ज्ञानफलं चालभमानो नश्यति किमिति प्रश्नार्थः एतेन ज्ञानकर्मस
मुच्चयो निराकृतः एकस्मिन्नपि पुंसि ज्ञानफलालाभेऽपि कर्मफलला
भसंभवेनोभयविभ्रष्टत्वासंभवात् न च तस्य कर्मसंभवेऽपि फल
कामनाभावान्नफलं इति वाच्यं निष्कामानामपि
कर्मणां फलसद्भावस्यापस्तम्बवचनाद्युदाहरणेन बहुशः प्रति
पादितत्वात् तस्मात्सर्वकर्मत्यागिनं प्रत्येवायं प्रश्नः अतिप्राप्ति
शंकायास्तत्रैव संभवात्
३८ ॥

सदानंदीटीका

कर्ममार्गात् ज्ञानयोगाद्विभ्रष्टः सन् कच्चिद्यदि छिन्नाभ्रमिव नश्ये

गी॰
टी॰
ष॰

हासौ नश्यते निराश्रयः १ विमूढो ब्रह्मविन्मार्गे मत्क कर्माश्रयो
यतः भक्तानां दोषसंदोहवारणाय स्ववाहवः समर्थाः सवेदाते
व महाबाहो न मिमहो ३८ ॥

नीलकंठीटीका

कच्चिदिति कच्चिन्नोभयविभ्रष्टः कर्ममार्गाद्योगमार्गाच्च विभ्रष्टः
छिन्नाभ्रमिव पूर्वमपरं वा मेघमेघं असंप्राप्य मध्ये एव नश्यति न हि तत्
अप्रतिष्ठो निराश्रयः हे महाबाहो विमूढो ब्रह्मणः पथि ब्रह्मप्रा
प्तिमार्गे ३८ ॥

आनंदीटीका

कच्चिदितीष्टप्रश्ने श्रद्धोपेतः पुरुषः उभयस्माद्भोगापवर्गाख्यस्माद्वि
भ्रंशादलाभात् छिन्नाभ्रमिव नश्यति वा ऊर्ध्वगतिं गमेच्चोपयान वि
नश्यति उन्नत्यानमाप्नोति तथापि किं प्राप्ताया योगभ्रंशः स्थानमे
वाप्नोति वा प्रश्न उताप्रतिष्ठः स्थानमलाभः विनाश मधुन स्थानमे
वाधिगच्छति ३८ ॥

रामकंठीटीका

अनेकोपायानिश्चयादनेकवित्तः विकल्पाकुलत्वात्प्रतिष्ठां चैवल
ब्धाहं ह्यविधमनोवृत्तिः अतएवाविश्रांतोऽनकचित्तः स्थितिः यतो ऽ
मोहस्यैवाज्ञानस्य वशंगतः विधेयतां प्राप्तः तदेतयादोषसामग्र्या यो
गसंसिद्धिसमाप्तिलाभमप्राप्तः सन् कां गतिं गच्छति [obscured]
[obscured]
[obscured] ३८ ॥

अत्र विकल्पांतरमाह ॥

लाक्षिकी टीका

कच्चिदिति साभिलाषप्रश्ने हे महाबाहो उभयसमस्तसारमार्गाद्विभ्रष्ट
स्मृतः अनासक्ततया वासनानाशनात् ज्ञानमार्गाच्च च्युतो धारणान
भिरोहात् कच्चिदपि नाममनश्यवति आत्यंतिकमभावं प्राप्नोति यतः सं
सारानासक्ततया प्रतिष्ठो निरालंबः तथा निरुपाधिकस्य ब्रह्मणः प
विज्ञानमार्गे विमूढो न सुष्ठु प्रबुद्धः तथा पूर्वस्मान्मेघाच्छिन्न ऊर्ध्वमे

सवतो

वंचाभ्यासो मे चरवेऽनेन पश्यति तद्वत् तमेवं भगवानिताहृशं संदेहनिवर्त्त
कोनान्यइत्याह ३८ ॥

पंचोलीटीका

अस्माभिप्राये विहतोति कश्चिदिति द्वाभ्यां कच्चिदिति को मत्लभते हे कृ
स ब्रह्मणः पथि प्राप्तिमार्गे विमूढः अप्रतिष्ठो निराश्रयः उभयविभ्रष्टः
कर्ममार्गात् ज्ञानमार्गाच्च उभयतो नष्टः छिन्नाभ्रमिव नश्यति ३८

रागवीरसमिद्धोधिनी ॥

तदेव पृच्छति कच्चिन्नेति कच्चिदित्यभीष्टप्रश्ने अप्रसावेव योगी उभ
यस्माल्लोकाद्विभ्रष्टः अप्रतिष्ठो निरवलंबनः वैराग्याभ्यासाव
लंबन हृदयहीनत्वात् अत एव ब्रह्मणः पथि यत्र वेदमार्गे विमूढो
मोहं प्राप्तः छिन्नाभ्रमिव पवनविशीर्णो मेघ इव कच्चिन्न नश्यति
कर्मफलं ज्ञानफलं च लब्धुमयोग्यो न किमिति प्रश्नभावः यथा
पवनविशीर्णो मेघः पूर्वस्मान्मेघाद्भ्रष्ट उत्तरमेघं चाप्राप्तोऽत एव
वृष्ट्ययोग्यः सन्नंतराल एव नश्यति तथा योगभ्रष्टोऽपि पूर्वस्मा
त्स्वकीयात् गुणादेर्विच्छिन्न उत्तरेण च परकीयेनालब्धसंयोगो म
ध्य एव च विवशीभूय पलायमानः सन् शत्रुभिरेत्य हन्यत इति
पापसंबंधान्न किं उग्रां योनिं गच्छतीति साधकस्य प्रश्नः ३८ ॥

मधुभाष्य

३८ ॥

भाषा अनुवाद

पूर्वोक्त प्रश्न की अभिप्राय विस्तार से अर्जुन कहते हैं कि नतो निष्काम कर्म करि ईश्वर को समर्पण किया और न काम्यकर्म ही का अनुष्ठान किया तो स्वर्गादि फलसे भी रहित रहा और योग की असम्भवता कहे अप्रवीणता से मोक्ष भी न मिली तो फेरि हे महाबाहो वह अप्रतिष्ठित कहे प्रतिष्ठा रहित मनुष्य दोनो ओर से भ्रष्ट होय छिन्न मेघ के समान क्या नष्ट तो नहीं । भा होता है जैसे मेघदल से भिन्न भया मेघ और मेघ को न प्राप्त होयके अन्तरिक्ष ही मे विलाय जाय है ३८

दोहा

कौन भ्रष्ट होउ लोक सें ज्यों मेघ छिन्न होय नाश ब्रह्मपथमें
आलंब बिन मूढ़ जो विश्वनिवास ३८ ॥

179

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः त्वदन्यः
संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

शांकरभाष्यं

एतदिति एतन्मे मम संशयं कृष्ण छेत्तुमपनेतुमर्हसि अशेषतः
त्वदन्यः त्वत्तोऽन्यः ऋषिर्देवो वा छेत्ता नाशयिता संशयस्यास्य न हि य
स्मादुपपद्यते न सम्भवति अतस्त्वमेव छेत्तुमर्हसीत्यर्थः ३९ ॥

आनन्दगिरिकृतटीका

यथोपदर्शितसंशयापाकरणार्थमर्जुनो भगवन्तं प्रेरयन्नाह एतदि
ति त्वत्तोऽन्यः कश्चिदृषिर्वा देवो वा त्वदीयं संशयं छेत्ता नास्तीत्याशंक्याह त्व
दन्य इति अन्यस्य संशयच्छेतृत्वाभावे फलितमाह अत इति ३९ ॥

स्वामिकृतटीका

त्वयैव सर्वज्ञेन अयं मम संदेहो निरसनीयः त्वत्तोऽन्यस्त्वसंदेहनिवर्त
को नास्तीत्याह एतन्म इति एतदेनं छेत्ता निवर्तकः सम्भवेत् ३९ ॥

पैशाचभाष्यं

एतन्मे संशयं कृष्ण छेत्तुमर्हसि अशेषतस्त्वदन्यस्त्वत्तोऽन्यः ऋषिर्दे
वो वा छेत्ता नाशयिता संशयस्यास्य न हि यस्मादुपपद्यते नास्तीत्यर्थः ३९

रामानुजभाष्यं

त्वमेनं संशयमशेषतश्छेत्तुमर्हसि स्वत एव युगपत्सर्वं सदा पश्यत
स्त्वत्तोऽन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ३९ ॥

अभिनवगुप्तकृतटीका ३९ स्पष्टार्थः

एतदेव मे संशयं छेत्तुं भो कृष्ण ॥ परमार्थप्रणाली-
त्वमेवार्हसीति प्रश्नः शेषं स्पष्टं ३९ ॥ ३९ ॥ ३९

वनमालीटीका

एतदुपपन्नं सर्वोक्तं मे मम संशयमशेषतः संशयमूलाधर्मात् छेदे
न त्वदन्यस्त्वत्तः सर्वज्ञात्सर्वशास्त्रकर्तुः परमात्मनोऽनिकारणिकाद
न्यो नेदृशो जीवः छेत्ता सम्यग्ज्ञानदानेन नाशयिता हि यतो नोपपद्यते
संभवति तस्मात्त्वमेव सर्वप्रत्यक्षदर्शी सर्वस्य परमगुरुरेतं संशयं

गी॰ छेत्तुमर्हसीत्यर्थः ३९ ॥

टी॰

ध॰

[illegible]टीका

एतदिति हे कृष्ण मे ममैतन्मयाद्य त्वमासाद्य एतं संशयं संदेहं अशेषतो निःशेषाच्छेत्तुं नाशितुं त्वमर्हसि योग्यो भवसि ननु मत्सदृशो वदवः संशयच्छेत्ता रोजगतिसत्ति अहमेवैकोऽस्य छेत्ता कथं भवामीति चेत्तत्राह त्वदन्य इति हि यतोऽन्यो योगभ्रष्टच्छेदार्थकोऽथवा रणायरः कृष्णपववामदेवो नामऋतिवत् अथैवमत्र कस्य संशयस्य छेत्ता नाशकः त्वदन्यस्त्वत्तः सर्वज्ञात्सर्वेश्वराद्योगिगोयदाभूजादन्योऽस्यतो नीश्वरो ब्रह्मादिरीश्वरोऽपि नैवोपपद्यते नैव योग्यो भवति तस्मात्त्वमेव मम संशयमपनेतुमर्हसीत्यर्थः ३९ ॥

१८०

न४

एतदेवं पूर्वोत्पदर्शितं मे मम संशयं **मधुसूदनीटीका** हे कृष्ण छेत्तुमपनेतुमर्हसि अ

शेषतः संशयमूलाधर्मोच्छेदेन त्वदन्यः कश्चित् ऋषिर्वा देवो वा त्वदीयमिमं संशयं छेत्ता नास्ति आशंकाह त्वदन्यः त्वत्परमेश्वरात्सर्वज्ञाच्छास्त्रकृतः परमगुरोः कारुणिकादन्यः अनीश्वरत्वेनासर्वज्ञः कश्चिदृषिर्वा देवो वास्य योगभ्रष्टपरलोकगतिविषयस्य संशयस्य छेत्ता सम्यगुत्तरदानेन नाशयिता हि यस्मान्नोपपद्यते न संभवति तस्मात्त्वमेव प्रत्यक्षदर्शी सर्वस्य परमगुरुः संशयमेतं मम छेत्तुमर्हसीत्यर्थः ३९

सदानंदीटीका

तदेतत्संशयं सर्वं छेत्तुं योग्यस्त्वमेवासि त्वत्तो हे ईश्वरादन्यः कश्चिद्देवो मुनिर्नवा १ सम्यगुत्तरदानेन संशयस्यास्य सर्वतः छेत्ता संभवतीत्यस्मात्सर्वतत्त्वज्ञ जगद्गुरुः प्रत्यक्षदर्शी सर्वस्य संशयं छेत्तुमर्हसि ३३९

नीलकंठीटीका

एतत् एते स्पष्टमन्यत् ३९ ॥

आनंदीटीका

ततस्संसारस्य सर्वापगतिवेदिनोऽन्यो द्वितीयः संशयस्यास्य छेत्ता न संभाव्यते इत्यर्थः ३९ ॥

रामकंठीटीका

नस्वेवं विधस्य श्रद्धामात्रैकालंबनस्य परिशिष्टापायरहितस्य देहान्ते कीदृशी योन्यत्र गमनं तदेवाह

ति- कश्चिदिति भो कृष्ण श्रेयोविनामेव श्रद्दधानः पुरुषः स्वर्गापवर्गगतिद्वयस्यापि भ्रंशाद् अभावादेकतरगतिप्रत्याशासंभवे छिन्नाभ्रमिव पवनविशीर्णो जलदो यथा नश्यति तद्वत् पुनः संधानमापद्यते उत गतिद्वयोपायतिष्ठयाभावादप्रतिष्ठो निरवलंबनः संनुआत्यंतिकमेव विनाशमाप्नोति अशुभनरकस्थानायैव संसारस्य प्रेयतनीयेन ममैवं विधं संदेहं मम विनाशयितुमर्हसि यतस्त्वत्तः सर्वसंसारिगतिवेदिनः सर्वज्ञादन्योऽयं योऽस्य संशयस्य परिहर्ता न संभाव्यते यत उक्तं बहूनि मे व्यतीतानीत्यत्र श्लोके सर्वज्ञत्वं नानागतिवेदित्वं [illegible]

लासिकी [illegible]टीका

ततः सर्वसंसारिगतिवेदिनः सर्वज्ञादन्योऽस्य संशयस्य छेत्ता निवर्तको नोपपद्यते न संभाव्यते तदुक्तं उत्पत्तिं च विनाशं च भूतानामागतिं गतिं वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति [illegible] ३९

पंचोलीटीका

एतदिति हे कृष्ण ममैतत् पूर्वोक्तं नाशकारणं संशयं योगभ्रष्टस्य नाशानाशलक्षणं संदेहमशेषतः सर्वप्रकारेण छेत्तुमर्हसि अस्य संशयस्य हि यस्मात् त्वदन्यः छेत्ता नोपपद्यते ३९ ॥

रणवीरसमिद्बोधिनी ॥

असंभाव्य विच्छित्तये सर्वज्ञं भगवंतमर्थयते एतदिति स्पष्टमेतत् ॥ ३९ ॥

मधुभाष्य

३५ ॥

भाषा अनुवाद

जिस से आप सर्वज्ञ हो इस से आप को छोड़ और कोई इस। हमारी संशय का हर करने वाला नहीं है अर्जुन परे करते। हैं कि हे कृष्ण मेरी इस सन्देह को आप ही छेदन करने योग्य हो और आपके विना हमरा इसंदेह का निवृत्ति कभी नहीं है सो इस सन्देह को कृपाकर मेरे मन से हर करो ३९

दोहा

मम सम संशय छेद इह तुमहि कृष्ण दे योग औरन संशय। छेद को तुमसें इय इह लोग ३९॥

श्रीभगवानुवाच पार्थनैवेहनामुत्रविनाशस्तस्य
विद्यते नहिकल्याणकृत्कश्चिद्दुर्गतिंतातगच्छति

शांकरभाष्यं

पार्थेति हे पार्थ नैवइह लोके नामुत्र परस्मिन् वा लोके विनाशस्त
स्य विद्यते नास्तिनाशो नामपूर्वस्माद्धीनजन्मप्राप्तिः स तस्ययोगभ्रष्ट
स्य नास्ति नहि यस्मात् कारणात् कल्याणकृत् शुभकृत् कश्चिद्दुर्गतिं
कुत्सितां गतिं हेतात तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते।
पितैवपुत्र इति पुत्रोपि तात उच्यते शिष्योपि पुत्र उच्यते यतो न ग
च्छति ४०॥

आनन्दगिरिकृतटीका

योगिनोनाशशङ्कां परिहरन्नुत्तरमाह भगवानिति परं कष्टमयभ्रष्टो
योगी नश्यतीति तत्राह पार्थेति तत्रहेतुमाह नहीति योगिनो मार्गद्व
दिभ्रष्टस्यैहिको नाशः शिष्टगर्हालक्षणो न भवतीति अत्रादेः सद्भावात्
पापि कृपणमामुष्मिकनाशमत्र यत्नमित्याशंक्य तदुपनिरूपणपूर्वकं तद
भावं प्रतिजानीते नाशोनामेति तत्र हेतुभागं विभजते नहीत्यादिना उ
भयभ्रष्टस्यापि श्रद्धेन्द्रियसंयमादेः सामिकृतश्रवणादेश्च भावाच्छुभ
त्वं शुभकृत्त्वं तातेति कथं पुत्रस्थानीयः शिष्यः सम्बोध्यते पितैरेव ता
तशब्दवाच्यमाशंक्याह तनोतीति तेन पुत्रस्थानीयस्य शिष्यस्य तातेति
सम्बोधनमविरुद्धमित्यर्थः नगच्छति कुत्सितांगतिं कल्याणकरत्वा
दिति नाशाभावः ४०॥

स्वामिकृतटीका

अत्रोत्तरं श्रीभगवानुवाच पार्थेतिसार्धैस्त्रिभिः इहलोके नाश उभय
भ्रंशात्पातित्यं अमुत्र परलोके नाशो नरकप्राप्तिः तदुभयं तस्य नास्त्येव
यतः कल्याणकृत् शुभकारी कश्चिदपि दुर्गतिं न गच्छति अयं च शुभ
कारी श्रद्धया योगे प्रवृत्तत्वात् तातेति लोकरीत्योपलालयन् संबोधयति

पैशाचभाष्यं

श्रीभगवानुवाच पार्थनैवेहलोके नामुत्र परस्मिंल्लोके वा विनाशस्तस्य
विद्यते नास्तिनाशो नाम पूर्वस्माद्धीनजन्मप्राप्तिः स योगभ्रष्टे नास्ति नहि

गी॰
टी॰
ष॰

यस्मात्कल्याणकृत् शुभकृत्कश्चिद्दुर्गतिं कुत्सितां गतिं हे तात तनोत्यात्मानं पुत्ररूपेणेति पिता तात उच्यते पितैव पुत्ररूपेणेति पुत्रोऽपि तात उच्यते गच्छति ४०॥ यतोन

रामानुजभाष्यं

अश्रद्धया योगं प्रक्रान्तस्य तस्मात् प्रच्युतस्येह चामुत्र च विनाशो न विद्यते प्राकृतस्वर्गादिभोगे ब्रह्मानुभवे चाभिलषितानवाप्तिरूपः प्रत्यवायाख्यो निष्टावाप्तिरूपः विनाशो न विद्यत इत्यर्थः न हि निरतिशयकल्याणरूपयोगारम्भी कश्चित्कालत्रयेऽपि दुर्गतिं गच्छति ४०॥

अभिनवगुप्तकृतटी॰

अत्र निर्णयं पार्थ नैवेत्यादिना न तस्य योगभ्रष्टस्येहलोके परत्र वा नाशोऽस्ति अनश्वरत्वादिति भावः किमिति तस्य लोकद्वयाविनाशिनः स हि कल्याणं भगवन्मार्गलक्षणं कृतवान् न चाग्निष्टोमादिवत्तयि ४०॥ ४०॥

परमार्थप्रपाटीका

अत्रोत्तरं भगवानाह पार्थेति तस्य पूर्वोक्तस्येहामुत्र वा नाशो नास्ति इहलोके उभयोर्निष्ठाभिर्नाशः अमुत्र च निरयप्राप्तिर्नाशः एवमुभयत्र नाशो नास्ति कुतः भो तात तनोत्यात्मानं पुत्ररूपेणेति तातः पुत्रः एवमत्र तस्य परमप्रेमास्पदत्वात्तातेति संबुद्धिः हि यस्मात्कारणात्कल्याणकृत् सर्वेश्वरार्पणतया कर्म कुर्वन् कश्चिदपि दुर्गतिं न गच्छति ४०॥

वनमालीटीका

उभयविभ्रष्टो योगी नश्यतीति कोऽर्थः किमिहलोके निन्दितो भवति स्वकर्मत्यागात् किं वा परत्र निकृष्टां गतिं प्राप्नोतीति तदुभयमपि नेत्याह हे पार्थ नस्योभयत्र विनाशो निन्दा निकृष्टप्राप्तिरूपो न विद्यते हि यतः कल्याणकृत् शास्त्रविहितकारी कश्चिदपि दुर्गतिमिहाकीर्तिं परत्र कीटादिरूपतां न गच्छति अयं तु जातजिज्ञासः श्रवणाद्यनुष्ठाता सर्वोत्कृष्ट एव दुर्गतिं न गच्छतीति किमु वक्तव्यं यतोऽयं योगभ्रष्टः कुत्र गतिं गच्छति देवयानाद्य संबन्धिनस्तत्ता कथमेव भ्रष्टवदिति तदपेक्षः देवयानाद्यसंबन्धिन्वे हेतो

रसिद्धेः यद्यस्य विद्युद्वैयावामोक्षरणे श्रद्धा समस्तु पासतेनेश्वरविरमि
संभवतीति पंचाग्निविद्यायां पंचाग्निविद्यामिवामकृतं नोऽश्रद्धा सा।
मवनो मनुष्यत्वं तथापि देवयानेन ब्रह्मलोकप्राप्तिकथनात् श्रवणा
दिपरायणस्य श्रद्धावतो मृतस्यैव श्रद्धायाः प्राप्तत्वात् शंनोदांतर
मादिनान्तमायणस्यापवादिः यमस्य समस्य प्राप्तत्वात् वहिरिन्द्रियोद्
म्रेखलयापारनिरोधरूपदमस्य योगांगत्वेन यमनियमादेस्त्राम
त्वात् अनन्तकृतत्वेपि ब्रह्मलोकप्राप्तिसंभवात् संन्यासाद्ध्यस्य ए:।
स्थानमिति स्मृतेः ४० ॥

कृष्णमैथिलयन्तीटीका

इत्येवमर्जुनस्याशंकां निशम्यास्य संशयमपनुदन्सर्वेश्वरःपार्थस
खेः श्रीभगवानुवाच पार्थनैवेहनेति हेपार्थ अश्रद्धापतेः श्रद्धाश्र
कस्य योगाच्चलितमानसस्यायोगिनः इहास्मिन्देवमनुष्यादिप्राक्
तकेलोकेविनाशः स्वर्गादिलोकसंबन्धिसुखभोगभ्रंशरूपोन
विद्यते न भवति किंतनन्तरवभोगाभवमेवश्रेष्ठावानुत्तरस्वपरस्वर्गा
पानुभवविनाशस्ततदनुभवजनितसुखबीभत्सरूपोनविद्यतेनभव
तिकिंतनतस्वरवेभवत्येवं मत्त्वैवमेवकुतोभवतीमपेक्षायामाह नहि
ति हेतात पुत्रश्रूपेणात्मानं ततनोतीति तातः पितातस्यापितापुत्रस्यैव
तसंबोधनं हेतातपुत्रशिष्ययोरनुकंपनकारणे तवात्मस्येनवनाते ति
संबोधनं वकं नासक्तं नमिपथ्यः हि यस्मात्कल्याणकृत्कल्याणमो
क्षसाधनभूतंयोगंकरोतीति तथासंसारखन्यमुक्तये स्वयमोच।
तस्याधनभूतयोगंकरोतीतिसनस्यासेमारखन्यमुक्तये स्वयमोच।
रणपूर्वककर्मयोगानुष्ठानेनार्थः ईदृशः कश्चिदपि ब्राह्मणादिस्थू
लशरीरोमात्रेऽपिकोऽपिदुर्गतिं तद्भयाशामहर्षिदरिद्रतोतद्भयम
चुतिजननदोषात्तिरश्चोवानैवगच्छतिनैवप्राप्नोति ४० ॥

एवमर्जुनस्ययोगिनंशतिनाशा   मधुसूदनीटीका   शंकापरिहृत्युत्तरं ॥

उभयविभ्रष्टोयोगीनश्यतीतिकोऽर्थः किमिहलोकेऽपि ह्यगर्हणी
यो भवति वेदविहितकर्ममार्गात् यथा कश्चिदुच्छृंखलः किंवाप
रत्रनिकृष्टांगतिंप्राप्नोति यथोक्तंश्रुत्यावृत्येनयोः पथोर्नकतरे
णचतेकीटाः पतंगा यदिदं दन्दशूकमिति तथाचोक्तमनुनावानाय

४८

२८

गी.
टी.
अ.

स्त्वानुत्वः प्रेतोविशेषमीतस्वकाद्युतस्मादि तदुभयमपिनेत्याह हे
पार्थनैवेहनामुत्रविनाशस्तस्य यथाप्राप्तं कृतसर्वकर्मसंन्यासस्य।
सर्वतोविरक्तस्य गुरुमुपसृत्य वेदांतश्रवणादि कुर्वतोन्तरा मृतस्य।
योगभ्रष्टस्य विद्यते उभयत्रापि तस्य विनाशो नास्तीत्यत्र हेतुमाह हि य
स्मात् कल्याणकृत् शास्त्रविहितकारी कश्चिदपि दुर्गतिं परत्र च कीटा
दिरूपतां न गच्छति अयं तु सर्वोत्कृष्ट एव सन् दुर्गतिं न गच्छतीति कि
मु वक्तव्यमित्यर्थः तनोत्यात्मानं पुत्ररूपेणेति पिता तन उच्यते स्वार्थे।
कः तात तनयवनात्: तत्समवायस्तादिवत् पितैव पुत्ररूपेण भवती
ति पुत्रस्थानीयस्य शिष्यस्य तातेति संबोधनेन कृपातिशयसूचनार्थं य
दुक्तं योगभ्रष्टः कां गतिं गच्छति अत्र ते न निर्देवयानपितृयानमा
र्गोभयतराभ्रंशे पिनात् स्वधर्मभ्रष्टत्वादिति तदयुक्तं यतस्तदेवयानस्य
मार्गसंबंधित्वेन हेतोरसिद्धत्वात् पंचाग्निविद्यायां ये चेमेऽरण्ये विदुर्ये चामी
अरण्ये श्रद्धां सत्यमुपासते तेऽर्चिरभिसंभवंतीत्यविशेषेणैवा
ग्निविदामिव तत्क्रतुन्यायश्रद्धासत्यवतां मुमुक्षूणामपि देवयानमार्गे
णा ब्रह्मलोकप्राप्तिकथनात् श्रवणादिपरायणस्य च योगभ्रष्टस्य श्र
द्धावितो भ्रष्टत्वसत्येन श्रद्धायाः प्राप्तत्वात् शांतो दांत इत्यनेन वाह्यतभा
षणादिव्यापारनिरोधरूपस्य सत्यस्य लब्धत्वात् बहिरिंद्रियाणा
मकृत्स्नव्यापारनिरोधो हि दमः योगशास्त्रे वाहिंसासत्यास्तेयब्रह्म
चर्यपरिग्रहा यमा इति योगांगत्वेनोक्तत्वात् यदि तप इत्युक्तं ब्रह्म
चर्यमेव न ह्यपि न तत्तितिः वेदांतश्रवणादेरपि समस्तत्वाविनत्त्वरूपत्वात्
श्रवणकत्वेनापि च पंचाग्निविदामिव ब्रह्मलोकप्राप्तिसंभवात् तथा च
स्मृतिः संन्यासाद्ब्रह्मणः स्थानमिति तथा श्रामहिकवेदांतवाक्यवि
चारस्यापि कोऽपि फलं तत्समर्थने एवं च संन्यासश्रद्धास
सत्यब्रह्मविचाराणाममपि तस्यापि ब्रह्मलोकप्राप्तिसाधनत्वात् सदिता
नोनेषां तत्साधनत्वे किं चित्रं अतएव सर्वमुक्तं तद्रूपत्वं योगिचरित
स्यैते तैत्तिरीया आमनंति तस्य ह वा एवं विदुषो यज्ञस्यात्मादिना सर्वोपते
व त्वानेतेन समस्तनीयं सलिले सर्वोपिदत्वावभिर्यन्त्वानेवकृतं सम
दक्षमतिवलादेवास्य संप्रजिताः संन्यासादसमदृह्नाः स्वपि नरस्ते लो

ध्यं

कश्चिज्जो प्यसौ यस्य बह्म विचारणे तृणमपि सौ मनः प्राप्यादि
ति ४० [illegible]
[illegible] ४० ॥

श्रीधरी टीका

अर्जुनस्यैवमाशंकां निराकुर्वन्नुवाच हे श्रीमन्नारायणः कस्मः
पुरणागतवत्सलः मुमुक्षोस्तवेदोत श्रवणादिप्रकुर्वतः वि
नश्यति निरोधे हि प्रवृत्तस्य विरागिणः २ अंतराले मृतस्यापि वि
नाशो नाभयत्रैव नेह शिष्टविनिंदास्य यथाशास्त्रमकुर्वतः ३
नाति ह्यंगतिमाप्नोति परत्र नात्र जेतवत् यस्मात् कल्याणकृत्
नानिष्टांगतिमाप्नोति ४ स्वर्गकीर्तिपरस्यापि कुत्सितोऽनैव
कश्चित् शुभकृद्दुर्गतिं गच्छति अयं तः सर्वतः श्रेष्ठः कथं गच्छेद्दुर्गतिं हि श्यस्य
व गच्छति अयं तः सर्वतः श्रेष्ठः कथं गच्छेद्दुर्गतिं स्वपरस्य
रूपेणाकृपणात्मस्तव ने नानेति परतः साक्षाद्धरिणाकृतम
ज्ञेते ६ ४० ॥

नीलकंठी टीका

अत्रोत्तरं भगवानुवाच पार्थेति हे तातेति वात्सल्यात् संबोधय
अत्रोत्तरं भगवानुवाच पार्थेति इह विनाशो नीचयोनिप्राप्तिः अमुत्र विनाशो नरकप्रा
प्ति तस्य इह विनाशो नीचयोनिप्राप्तिः अमुत्र विनाशो नरकप्रा
प्तिस्तदुभयमपि न जायते हि यतः कल्याणकृत् शुभकृत् दुर्ग
तिं नैव प्राप्नोति ४० ॥

आनंदी टीका

एतत्संशयं छेत्तुं भगवानुवाच ॥ तस्य भोगापवर्गबीजभूतश्रद्धा
युक्तस्य इहामुत्र विनाशो नास्ति हि यस्मात् कल्याणकृत् कल्याण
युक्तस्य इहामुत्र विनाशो नास्ति हि यस्मात् कल्याणकृत् कल्याण
मीश्वरार्पणबुद्ध्या कृतं कर्म तत्कारी कश्चन अशुभयोऽदुर्गतिं न गच्छति ३ ४०
[illegible] ॥

रामकंठी टीका

अथैवं विधसंशयच्छेदाय भगवानुवाच ॥ भोगापवर्गलताभिसिद्धिवीजभूतश्रद्धायाः संस्कृ
तस्यैवं विधस्य भोगापवर्गलताभिसिद्धिवीजभूतश्रद्धायाः संस्कृ
तस्यैवं विधस्य भोगापवर्गविषये विनाशः सर्वदुर्गतिहेतुत्वात् न भ्रंशल
तविद्यस्य पुंसः क्वचिदपि विषये विनाशः सर्वदुर्गतिहेतुत्वात् न भ्रंशल
तविद्यस्य पुंसः क्वचिदपि विषये तत्कालेऽपि इहामुत्र वा इहेति दृष्टान्त
तनास्ति शोभावो नाविपते ककाविपतेरिहामुत्र वा

विकभोगाधिकरणेसंसारे अमुत्रेत्येतस्मादन्यत्रस्वात्मप्रतिष्ठारे
तावपवर्गे यतःकल्याणवान् कुशलाभिनिवेशीकश्चिद्दुर्गतिमन्त्रा
नहृषितत्वादुष्टयोनिंप्राप्नोति अद्यावतस्यकल्याणकारित्वमवश्य
मेवस्थितम् अद्धाहिनामपरमेश्वरप्रसादकल्पद्रुमस्यबीजकणिका
तंभोगापवर्गलक्षणंसंपत्तिसमृद्धमफलंनानिवर्तते केवलमन्तु
मध्याधिमात्रत्वादिनातस्यास्फलविशेषोपत्तिर्णास्वकार्यंनिवर्त्त
यति [illegible] ॥

अत्रोत्तरंश्रीभगवानुवाच ॥ लासिकी [illegible] का

हेपार्थइहलोकेसंसारे परत्रलोकेस्वर्गादौवा ततस्यतस्ययोगभ्र
ष्टस्य संसारानासक्तत्वाविरक्तत्वात्समक्षयोविनाशश्चात्यंतिको
भावः प्रकृतिलयस्तियावत् तदुक्तं वैराग्यात्प्रकृतिलय इति
सनविद्यतेइत्यंतिमप्रश्नस्योत्तरमभावव्याहृत्यर्थंपूर्वमेवोक्तं नत्र
मास्त्वभावःस्वर्गादिदुर्गत्यास्तमागतिःस्यादेवेत्यतआह नही
तिहिरवधारणे तातेतिलोकरीत्यापत्यस्त्रेवोधयति कश्चिदपि
शुभकारी दुर्गतिंपूर्वस्माद्धीनजन्मप्राप्तिंदेहपातादूर्ध्वंनैवप्राप्नोति
अयंचशुभकारीअद्धयायोगप्रवृत्तत्वात् तदुक्तंकुलार्णवे ध्याय
तः क्षणमात्रंवाश्रद्धयापरमेश्वरः यद्भवेत्सुमहत्पुण्यंतस्यांतोनैव
गण्यते क्षणंब्रह्माहमस्मीतियःकुर्यादात्मचिंतनम् तत्सर्वंपात
कंहन्यात्तमःसूर्योदयेयथा अलक्ष्यतनयस्तीर्थदानादेवार्चनादि
जं यत्फलंकोटिगुणितंतत्स्वाप्नोतितत्त्ववित्ति तथाचस्मृतिः
स्नातंतेनसमस्ततीर्थसलिलेसर्वापिदत्तावनिर्यज्ञानांचकृतंसह
स्रमखिलादेवाश्चसंपूजिताः संसाराच्चसमुद्धृताःस्वपितरस्त्रैलोक
पूज्योप्यसौयस्यब्रह्मविचारणेक्षणमपिस्थैर्यंमनोगच्छतिइति ध॰
[illegible] ॥

पंचोलीटीका

प्रश्नोत्तरमाह भगवान्पार्थेति चतुर्भिः हे पार्थ तस्य योगभ्रष्टस्येह लोके परलोके वा विनाशः पूर्वस्मात् हीनजन्मप्राप्तिर्न विद्यते न संभव ति हि यस्मात् हे तात कश्चित्कल्याणकृत् दुर्गतिं कुत्सितां गतिं न ग च्छति ४०॥

गणवीरसमिद्धोधिनी॥

प्रष्ठैवंविधसंशयव्युदासाय भगवानुवाच पार्थेति तस्यश्रद्धाव त्वेनैवयोगेप्रवृत्तस्येहलोकेविनाशः सुखभोगप्रतियोगिका भावोनास्ति तथामुत्रपरलोकेपिनास्ति हियतः कल्याणकृत् कल्याणायकरोतीति कल्याणोद्देशेनकर्मसुप्रवृत्तः कश्चिद्दुर्ग तिं नरकादियोनिंनगच्छति तातेति संबोधनेनानुकंप्यत्वंद्योत्य ते ४०॥

मधुभाष्य

४०॥

भाषा अनुवाद

अर्जुन की इस प्रश्न का उत्तर श्रीभगवान साढ़े चारि स्रोक से। कहते हैं कि हे पार्थ उस अधूरे योगाभ्यासी को योगभ्रष्ट होने से यह लोक नाश कहे इस लोकमे पातक और परलोक मे नरक प्राप्ति ये दोनो नही होय हैं जिस हेतु किसी कल्याण कृत कहे शुभ आचरण करनेवाला पुरुष तात कहे हे भाई अर्जुन दुर्गतिको नही प्राप्त होता है तात शब्द से लोक रीति देखावते भये भगवान ने स्नेह पूर्वक अर्जुन को सम्बोधन करि कहा है तात का अर्थ पिता औ पुत्र है ४०

दोहा

नाति इनासें लोक अरु परलोकन पार्थ नशाय कोउ नहि सु
कृत करणासें तात दुर्गति जाय ६.॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः । शु
चीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ४१॥

शांकरभाष्यं

किन्तस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्
प्राप्य गत्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र चोषित्वा वासम
नुभूय शाश्वतीर्नित्याः समाः संवत्सरान् तद्भोगक्षये शुचीनां
यथोक्तकारिणां श्रीमतां विभूतिमतां गेहे गृहे योगभ्रष्टोऽभिजायते ४१

आनन्दगिरिकृतटीका

योगभ्रष्टस्य लोकद्वयेपि नाशाभावे किं भवतीति पृच्छति किन्विति
तत्र श्लोकेनोत्तरमाह प्राप्येति कथं संन्यासीति विशेष्यते तत्राह ।
योगमार्गप्रवृत्तस्योपप
सामर्थ्यादिति कर्मणि प्रवृत्तस्य कर्मिणो
निःसत्वप्रवृत्तावपि फलाभिलाषविकलस्येश्वरे समर्पितसर्वकर्मणः
लब्धप्रशस्तलोकानवकाशादित्यर्थः समानां नित्यत्वं मानुषसमानि
लक्षणं वैराग्याभावविवक्षया विभूतिमतां गृहे जन्मेति विशेष्यते ४१

स्वामिकृतटीका

तर्हि किमसौ प्राप्नोतीत्यपेक्षायामाह प्राप्येति पुण्यकारिणामश्व
मेधादियाजिनां लोकान्प्राप्य तत्र शाश्वतीः समाः बहून्संवत्सरानुषि
त्वा तत्र वासमनुभूय तद्भोगान्ते पुण्यत्वेन शुचीनां श्रीमतां सदाचाराणां धनि
नां गेहे स योगभ्रष्टोऽभिजायते जन्म प्राप्नोति ४१॥

पिशाचभाष्यं

किं तस्य भवति प्राप्येति योगमार्गे प्रवृत्तः संन्यासी सामर्थ्यात्प्राप्य ग
त्वा पुण्यकृतामश्वमेधादियाजिनां लोकांस्तत्र चोषित्वा वासमनुभू
य शाश्वतीर्नित्याः समाः संवत्सरांस्तद्भोगक्षये शुचीनां यथोक्तकारि
णां श्रीमतां गेहे विभूतिमतां गृहे योगभ्रष्टोऽभिजायते ४१॥

रामानुजभाष्यं

कथमयं भविष्यतीत्यत्राह यज्जातीयभोगकांक्ष
या योगात्प्रच्युतोऽयमतिपुण्यवतां लोकान् प्राप्य तज्जातीयानतिक।
ल्याणभोगान् तावत्पर्यन्तं भुंजानो यावत्तद्भोगतृष्णा
तत्र
वसन् शाश्वतीः समास्तत्रोषित्वा तस्मिन्भोगे वितृष्णः शुचीनां श्रीमतां

गी. योगोपक्रमयोग्यानांकुलेयोगोपक्रमेभ्रष्टोयोगमाहात्म्याज्जायते ४१

टी. शिवश्रीशिवर्षाणिशुचीनामितियेषां भगवदंशस्पर्शिचित्तम् ४१ अभिनवगुप्तकृतटीका सहार्थं ४१ यान्सनस्यविद्वाः समाः वैष्णवा

ष. परमार्थप्रपाटीका

किंतर्हि तत्रप्रथममल्पकालयोगभ्रष्टस्यगतिमाह प्राप्येति ॥ सयोगभ्रष्टः पुण्यकृतामश्वमेधयाजिनांलोकान्प्राप्यतत्रशाश्वतीः समाः बहून्संवत्सरानुषित्वाशुचीनांसदाचारपरायणानां श्रीमतांधनिनांगृहेजायतेउत्पद्यते ४१ ॥

वनमालीटीका

तदेवंयोगभ्रष्टस्यतिंदापगतीनिवार्यंप्राप्यमाह प्राप्येति योगभ्रष्टः कश्चित्पूर्वोपचितयोगवासनाप्राप्तभोगादिविषयेभ्यः स्पृहयति कश्चिद्वैराग्यभावनातारतम्यस्पृहयति तयोःप्रथमः पुण्यकृतामश्वमेधादिकृतामचिरमार्गेणब्रह्मलोकादीन्प्राप्यतत्रोषित्वाशाश्वतीः समाः ब्रह्मपरिमाणेनैतयाःसंवत्सरान्नूलदंतेशुचीनांश्रीमतां राज्ञांगेहेभोगवासनाशेषसद्भावात्जनकादिवयोगभ्रष्टोभिजायते योगवासनाप्रावल्याद्ब्रह्मलोकांतेसर्वैकर्मभिःसमासाद्यो योगा महाराज्यफलवतीभवतीत्यर्थः ४१ ॥

कुसुमवैजयन्ती

ननुयद्येवंभवतितर्हिसकिंफलंप्राप्नोतीत्यपेक्षायामैहिकंसर्वभोगात्मकंफलमाह प्राप्येति सयोगभ्रष्टोयादृशानांदेवमनुष्यादिसंवन्धिलोकानांविषयभोगवाञ्छयायोगाद्भ्रष्टस्तेषाम्नोपगीपुण्यकृतान् पुण्येनाश्वमेधादिमहायज्ञेनकृतां स्वम्यादितानानान्लोकान्स्वर्गादीन्नानाप्राप्यात्मदेवादिजन्मावाप्यतत्रानेकसुखरूपविषयभोगान्भुंजानः सन् तमद्योगेननिहतवासनःसन्प्राशाश्वतीःसमा अनेकसंवत्सरानुषित्वावासंकृत्वाशुचीनांमशास्त्रविचारकौशलानांतत्रापिश्रीमतांश्रेष्ठधनधामदारपुत्रगृहवलमुखादिसमृद्धानांनदरिद्राणांगेहेलक्ष्मीसरस्वतीक्रीडास्थलेगृहेभिजायते उत्पन्नोभवतीत्यस्यारब्धयोगाद्भ्रष्टस्ययोगिनोगतिरियंदर्शितासपक्वयोगाद्भ्रष्टस्यत्वनेनफलंभवतीत्याशयः ४१

तदेवं योगभ्रष्टस्य शुभकृत्त्वेन **मधुसूदनीटीका** लोकद्वयेपि नाशाभावे किं भवतीत्युच्यते ॥

योगमार्गप्रवृत्तः सर्वकर्मसंन्यासी वेदान्तश्रवणादि कुर्वन्नन्तराले म्रियमाणः कश्चित् पूर्वोपचितभोगवासनाप्रादुर्भावाद्विषयेभ्यः स्पृहयति कश्चित्तु वैराग्यभावनादार्ढ्यान्न स्पृहयति तयोः प्रथमः प्राप्य पुण्यकृतामश्वमेधयाजिनां लोकानर्चिरादिमार्गेण ब्रह्मलोकान् एकस्मिन्नपि ब्रह्मलोके भोगभूमिभेदापेक्षया बहुवचनं तत्रोषित्वा वासमनुभूय शाश्वतीः ब्रह्मपरिमाणेन तत्रत्याः समाः संवत्सरान् तदन्ते शुचीनां शुद्धानां श्रीमतां विभूतिमतां महाराजचक्रवर्तिनां गेहे कुले भोगवासनाशेषसद्भावाज्जनकादिवद्योगभ्रष्टोऽभिजायते भोगवासनाप्राबल्याद्ब्रह्मलोकान्ते सर्वकर्मसंन्यासायोग्यो महाराजो भवतीत्यर्थः [illegible] ४१ ॥

सदानंदीटीका

योगमार्गप्रवृत्तः सर्वान्तराले म्रियमाणः सगुणात्तावत्कोऽपि लोकान्तराश्वमेधादियाजिनां २ कोटीः संवत्सराणि तत्र वासं कृत्वा ततः त्वेषु योग्यकारिणां गेहे धनिनां जयतेमता २ वासनाशेषसद्भावाद्रसवैराग्यवान्यदि जनकादिवद्देवासोराज्ञां गेहेऽभिजायते ३ ४१ ॥

नीलकंठीटीका

इहामुत्रचतनस्यमहत्त्वमेवाल्पीमाह प्राप्येति उषित्वा वासं कृत्वा शाश्वतीः समाः नित्यानूवत्सरा योगभ्रष्टो रागी चेत् अल्पकालाभ्यस्तयोगश्चेत् श्रीमतां गेहे जायते तत्रापि श्रीमान्योगच्छतीत्याशंकाशुचीनामित्युक्तं शुचयो हि सत्कार्यं षट्विंशत्युपजाताः पूर्वाभ्यासमहन्तं स्यातमासादयेतीत्यर्थः ४१ ॥

ज्ञानंदीटीका [illegible] ४१ स्पष्टार्थम्

मदर्थं कृतस्य कर्मणोऽतयत्वात्केवलमत्र मध्याधिमात्रतादिताऽरतम्यात्कालविशेषापेक्षेति दर्शयति ॥ ४१ ॥

रामकंठीटीका

यतएव मनः ॥

योगभ्रष्टो योगाद्यथोक्तज्ञाननिष्ठतया शास्त्रविहितस्वकर्मानुष्ठानलक्षणा

त्समाधेर्भ्रष्टः परमेश्वरसमापत्तिलक्षणं फलमप्राप्यैव विच्छिन्नस्सन् प्र
हाणेजे सत्यपीश्वरेच्छावशादेवमप्रमितीव्रसंवेगाभावाद्यत्नादिसहकारि
सामग्रीवैकल्याद्धि कालान्तरापेक्षिफलः सन्पुण्यकृतोऽप्रकृष्टयज्ञदानत
पः प्रभृतिशुभकर्मकारिणां सर्वेषामेव लोकांस्तत्कर्मार्जितभोगाधिक
रणभूतानि भुवनानि प्राप्यास्वाद्य तत्रैव तत्कर्मानुरूपाः शाश्वतीः समाः
सहस्रसंख्यानि वर्षाण्युषित्वा निवासमनुभूय ततस्तादृशकर्मफलोप
भोगान्तकर्मभूमावस्मान् शुचीनां श्रीमतां शुद्धाभिजनकर्मणां लक्ष्मीवतां कु
लेऽन्वयेऽभिजायते येन भोगाभिवासनाक्लेशकलुषितचित्तत्वात् सम्यगनु
ष्ठिता कर्मयोगाद्भ्रष्टः प्राप्तसत्स्वेषा गतिर्निर्दिष्टा यस्मात्त्वपवर्गप्रवणात्वे
पि सतिकृतास्मिन्नतिवन्ध्या कर्मयोगः सम्यङ्निर्वृत्तसंस्कारसंगतिमाप्नोती
ति ४१ ॥

तर्हि क्व गच्छतीत्यपेक्षायामाह ॥ त्वासिकी टीका

पुण्यकृतां यज्ञदानतपआदिशुभकारिणां लोकांस्तत्तत्कर्मार्जितभोगा
धिकरणभुवनानि प्राप्य तत्र च शाश्वतीः समाः सहस्रसंख्याकान्वत्सरा
नुषित्वा तन्निवासनसुखमनुभूय ततः शुद्धाभिजनकर्मणां श्रीमतां ल
क्ष्मीवतां महाराजचक्रवर्तिनां गेहे अजातशत्रुजनकादिवद्योगभ्रष्टोऽभि
जायते जन्म लभते तदुक्तं योगवासिष्ठे योगभूमितयोत्क्रान्तजीवितस्य
शरीरिणः भूमिकांशानुसारेण क्षीयते पूर्वदुष्कृतम् ततः कतिपये काले
शेषं दुष्कृतकर्मणाम् भुक्त्वा सुकृतभोगौघं याति पुण्यवतां सदम् योगभू
मिगता ये ये म्रियन्ते कुरुषोत्तमाः तेऽतो गाढसुकृतामन्तारमन्ते स्वरसस्थिता इति ४१
४१ ॥

पंचोलीटीका

किं तत्परस्य भवति तदाह प्राप्येति योगभ्रष्टो योगमार्गान्मच्युतः सन्पु
ण्यकृतामश्वमेधयाजिनां लोकान्प्राप्य तत्र शाश्वतीः समाः दीर्घसंव
त्सरानुषित्वा तत् भोगक्षये शुचीनां पवित्रकारिणां श्रीमतां गेहे अभि
जायते ४१ ॥

रणवीरसमिद्धोधिनी ॥

तर्हि कागतिस्तस्येत्यर्जुनाभिप्रायमाशंक्य क्रमतउभयलो
कसिद्धिं प्रतिपादयति प्राप्येति योगाद्भ्रष्टात्तविहितस्वकर्मा
नुष्ठानलक्षणाद्विवितसमाधेर्भ्रष्टो विच्युतः सन् अग्रहावीजेमत्य
पीश्वरेच्छावशादेव संप्रतितीव्रतरसंवेगाभावायत्नादिसह
कारिसामग्रीवैकल्याद्विकालांतरापेक्षिफलः सन् पुण्यकृ
तामश्वमेधादियज्ञरूपपुण्यकारिणां प्राप्यांल्लोकान्स्वर्गादि
कान्प्राप्य तत्रच शाश्वतीः समाबहून्वत्सरानुषित्वाभोगानुप
भुज्य अनंतरं शुचीनांपवित्राचाराणां श्रीमतां महासंपत्तिशा
लिनां गेहे स पूर्वोक्तलक्षणोभिजायते जन्मलभते ४१ ॥

मधुभाष्य

४१

भाषा अनुवाद

तो फेरि वे योगभ्रष्ट लोग किस गति को जाते हैं इस अपेक्षा पर कहते हैं कि जिस स्वर्ग आदि लोक को अश्वमेध आदिक यज्ञ करि के मनुष्य जाते हैं पुण्यकर्मकारी योगभ्रष्ट पुरुष भी उसी उत्तम लोक मे जाय कर बहुत बरस तक तहां बसि सुख भोग करि के फेरि सत्‌कर्मकारी धनी लोगों के घर मे आय जन्मग्रहण करते हैं ४१

दोहा

होय प्राप्त पुण्यत्लोक को बहुत वर्ष स्थिति पाय लक्ष्मीवन्त
सुधीगेहमह योगभ्रष्टभीजाय ४१॥

अथवायोगिनामेवकुलेभवतिधीमतां एतद्धि
दुर्लभतरंलोकेजन्मयदीदृशं ४२॥

शांकरभाष्यं

अथेति अथवा श्रीमतां कुलादस्मिन् योगिनामेव दरिद्राणांकुले
भवति जायते धीमतां बुद्धिमतां एतद्धि जन्म यद्दरिद्राणां योगिनां कु
ले दुर्लभतरं दुःखेनलभ्यतरं पूर्वमपेक्ष्य लोके जन्म यदीदृशं यथोक्त
विशेषणे कुले यस्मात् ४२॥

आनन्दगिरिकृतटीका

अज्ञावैराग्यादिकस्याणाधिके पक्षान्तरमाह अथ वेति योगिनामि
ति कर्मिणां ग्रहणंमाभूदिति विशिनष्टि धीमतामिति ब्रह्मविद्या
वतां शुचीनां दरिद्राणां कुलेजन्मदुर्लभं प्रमादकारणाभावादित्याह
एतद्धीति किमपेक्षयास्य जन्मनो दुःखलभ्यादपि दुःखलभ्यतरत्वं तदा
ह पूर्वमिति यद्यपि श्रीमतां शुचीनां गृहे जन्मदुःखलभ्यं तथा
पि तदपेक्षया इदंजन्मदुःखलभ्यतरं यदीदृशं शुचीनां दरिद्राणां वि
द्यावतामिति विशेषणोपेते कुलेलोके जन्मलक्षणमित्यर्थः यद्दु
र्लभतरं जन्मलोके तस्योपनमने हेत्वन्तरमाह यस्मादिति ४२॥

स्वामिकृतटीका

अल्पकालाभ्यस्तयोगभ्रंशे गतिरुक्ता चिरकालाभ्यस्तयोगभ्रंशे
तु पक्षान्तरमाह अथवेति योगनिष्ठानां धीमतां ज्ञानिनामेवकुलेजा
यते न तु पूर्वोक्तानामनारूढयोगानांकुले एतज्जन्मास्तीति ईदृशं हि य
ज्जन्मतल्लोके दुर्लभतरं मोक्षहेतुत्वात् ४२॥

पैशाचभाष्यं

अथवाश्रीमतांकुलादस्मिन्योगिनामेवदरिद्राणांकुलेभवतिजा
यते धीमतामेतद्धिजन्मदरिद्राणांयोगिनांकुलेदुर्लभतरंपूर्वापेक्ष्य
लोकेजन्मयदीदृशंयथोक्तविशेषणेकुले ४२॥ यस्मात्

रामानुजभाष्यं

परिपक्वयोगवलितश्च योगिनांधीमतांयोगंकुर्वतांस्वयमेवयोगोप
देष्टॄणांकुलेभवतितदेतदुभयविधंयोगाद्योग्यानांयोगिनांचकुलेज

गी॰
टी॰
ष॰

म्प्राकृतानांदुर्लभतरमेतद्योगमहात्म्यकृते ४२ ॥

अभिनवगुप्तकृतटीका [illegible] ४२ यदितत्त्वज्ञानमप्येनासा

परमार्थप्रपाटीका

अथ चिराभ्यस्तयोगभ्रंशे पक्षांतरमाह अथवेति अथवा योगिनां
योगनिष्ठानां तथा धीमतां ज्ञानिनामेव कुले जायते न तु श्रीकाणां
मनाकृत्पयोगानां एतदीदृशं यज्जन्म तद्दुर्लभतरं मोक्षहेतुत्वात् ४२॥

वनमालीटीका

द्वितीयं प्रतिपक्षांतरमाह अथवेति श्रद्धावैराग्यादिकल्याणगुणा
धिकेन भोगवासनाविरहात् पुण्यकृतां लोकानप्राप्यैव किं वनानां
धीमतां ब्रह्मविदां कुले योगभ्रष्टो भवति यत्कुलीनां श्रीमतां राज्ञां
गेहे योगिनां जन्म तदपि दुर्लभं अनेकसुकृतसाध्यत्वात् मोक्षपर्यं
वसायिनां व्यपलब्धीनां किं वेत्तानामक्षीणब्रह्मविद्यावतां वा
शिष्टादीनां कुले जन्म एतद्धि प्रसिद्धमुक्ताहि वन्तदुर्लभतरं दुर्लभमा
पिदुर्लभं लोके यदीदृशं सर्वप्रमादस्वरूपेण जन्मेति द्वितीयः स्तूयते भो
गवासनाशून्यत्वेन समासाहेतुत्वात् ४२ ॥

कृष्णमवेजपत्नीटीका

एवमल्पकालाभ्यासाद्योगाद्भ्रष्टस्य गतिरुक्ता इदानीं चिरकालाभ्या
सयोगभ्रष्टस्य गतिमाह अथवेति अथशब्दः पक्षान्तरे वा शब्दो वि
कल्पे चिरकालाभ्यासेन यदि परिपक्वयोगो योगी भवेत् तर्हि धीमतामु
पदेशकर्तॄणां ज्ञानिनां योगिनां स्वयमपि योगानुष्ठानं कुर्वतां हि
विधयोगयोग्यानामेव कुले वंशे भवति उत्पद्यते हे विध्यसजन्मनोमा
हात्म्यमाह एतदिति योगयोग्यानां योगकर्तॄणां च कुले सर्वजन्मह
फलं रागस्ततमाचरनवलक्षणमीदृशं यज्जन्म हि निश्चयेन लोके प्राकृ
तलोके प्राकृतानां नानानां देहिनां जन्म दुर्लभतरमतिशयदुर्लभं दुःप्रा
प्यं भवतीत्यर्थः ४२ ॥

द्वितीयं प्रतिपक्षांतरमाह ॥

मधुसूदनीटीका

श्रद्धावैराग्यादिकल्याणगुणाधिकेन भोगवासनाविरहात् पुण्यकृतो
लोकानप्राप्यैव योगिनामेव दरिद्राणां ब्रह्मविदां न तु श्रीमतां राज्ञां कु

लेभवति धीमतां ब्रह्मविद्यावतां एतेन योगिनामित्यनेन कर्मिंयह
णं यत्कृत्वीनां श्रीमतां राज्ञां गृहे योगभ्रष्टस्य जन्मनदपि दुर्लभं अने
कसुकृतसाध्यत्वान्मोक्षपर्यवसायित्वाच्च यत्तु शुचीनां दरिद्राणां
ब्राह्मणानां ब्रह्मविद्यावतां कुले जन्म एतत्प्रसिद्धं शुकादिवद्दुर्ल
भतरं दुर्लभादपि दुर्लभं लोके यदीदृशं सर्वप्रमादकारणशून्यं जन्मे
ति द्वितीयः स्तूयते भोगवासनाशून्यत्वेन सर्वकर्मसमाप्तिहेतुत्वात् ४२

[illegible] ४२॥

सदानंदीटीका

वैराग्यादिगुणाधिक्ये वासनाविरहान्मुनिः योगभ्रष्टः सुकृतिनां
लोकानप्राप्य योगिनां ब्राह्मणानां दरिद्राणां ब्रह्मविद्यवतां कुले जा
यते नन्वकुले जन्म दुर्लभाद्दुर्लभं २ पुण्यसाध्यतया जन्म राज्ञां
गेहे दुर्लभं तस्मादपीदृशं जन्म योगिगेहे तिदुर्लभं ३ यथा याथा
दण्डवोऽपि सृगाकाले जिगीषवो चक्रवाकाः शारदीपेहसाः सरसि मा
नसे ४ तेपि जाताः कुरुक्षेत्रे ब्राह्मणा वेदपारगाः प्रस्थिता दीर्घमध्वानं
यूयं ते भोगवसीदथ तदुक्तं हरिवंशे च वंशस्थलावनस्थले ५ ४२॥

नीलकंठीटीका

यद्योगी विरक्तश्चिराभ्यस्तयोगो वा चेत्तस्य गतिमाह अथवेति ४२

आनंदीटीका [illegible] स्पष्टार्थं

[illegible]

रामकंठीटीका

एतावन्तरोपूर्व्यासेन उक्तं॥

अथवा योगभ्रष्टो योगिनां यथोक्तकर्मसमाधिनिष्ठानामतएव धीम
तां महत्पुण्यानपुण्यत्वात्प्रशस्तबुद्धिमतां कुले समुत्पद्यते ईदृशमेतदेवं
विधानां योगिनां कुले जन्म दुर्लभतरं कर्मयोगभ्रष्टमन्तरेण न केनचि
ल्लब्धुं शक्यं ४२॥

लासिकी [illegible] टीका

एवमल्पकालाभ्यस्तयोगभ्रंशे गतिमुक्त्वा चिरकालाभ्यस्तयोगभ्रंशे गतिमाह॥

योगिनां योगनिष्ठानां दरिद्राणां धीमतां विद्यावतां कुले गेहे भवति जाय
ते शुकादिवत् एतज्जन्म लोके हि यस्मात् ईदृशं यज्जन्म एतद्धि दुर्लभं लोके
नरः दुर्लभात् दुर्लभं श्रीमतां गेहे जन्म दुर्लभम् [illegible]
[illegible] ४२॥ ४२

गी॰
टी॰
ब॰

१९३

पैचोलीटीका

अल्पकालाभ्यस्तयोगभ्रंशे गतिमुक्त्वा चिरकालाभ्यस्तयोगभ्रंशे प
क्षांतरमाह अथवेति अथवा धीमतां ज्ञानिनां योगिनां अकिंचनानां
कुले जन्म भवति जायते हि [illegible] निश्चितं यतः ईदृशं यत्तत् योगिनां
कुले जन्म लोके दुर्लभतरं दुःखप्राप्यतरं श्रीमतां कुले जन्मापेक्षया यो
गिनां कुले अत्यन्तदुर्लभतरं ४२॥

रामवीरसमिद्धोधिनी॥

अथ स्वल्पकालाभ्यस्तयोगभ्रंशे गतिमुक्त्वा चिराभ्यस्तयोगभ्रंशे
तु पक्षांतरमाह अथवेति अथवा शब्दः पूर्वस्मात्पक्षाद्विशेष
द्योतनार्थः योगिनां कर्मयोगिनां दरिद्राणां ब्राह्मणानामेव कुले ए
वैकलक्षणो योगभ्रष्टो भवति जायते न तु श्रीमतामिति यावत् कीदृशा
नां धीमतां विद्यावतां कालप्राप्तिलब्धा बुद्धियुक्तानां निश्चयबुद्धी
दस्खलितानां करणानां यदीदृशं कर्मयोगिनां कुले भवं जन्म
हीति निश्चये एतस्य लोके स्यां कर्मभूमौ दुर्लभतरं अतस्तत्र
पि महदभ्युदये कुले उद्भूत [illegible] मन्दतरं महाफलो मासमराम्निव
र्तस्येत्यभिप्रायः ४२॥

मधुभाष्य

४२॥

भाषा अनुवाद

थोड़े दिन योगाभ्यास करि के योग से भ्रष्ट भये पुरुष की ग
ति कहि चुके अब बहुत काल अभ्यास कर के भ्रष्ट हुये योगी
की गति कहते हैं कि अथवा सतपात्र यतियों के घर जन्म
लेने से और जो दरिद्र बुद्धिमान योगाभ्यासियों के कुल मे जन्म
ग्रहण सो उत्तम है ऐसा जन्म लोक मे अति दुर्लभ है सो चिरका
ल योगाभ्यासी योगभ्रष्ट होय ऐसे ही घर मे उत्पन्न होते हैं ४२

दोहा

योगिनके बुद्धिवंतके कुलमें अथवा होय दुर्लभ है यह लो
कमें ऐसो जन्महि सोय ४२॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं यतते च।
ततो भूयः संसिद्धौ कुरुनन्दन ४३ ॥

शांकरभाष्यं

तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं बुद्ध्या संयोगं बुद्धिसंयोगं
लभते पौर्वदेहिकं पूर्वस्मिन् देहे भवं पौर्वदेहिकं यतते च प्रयत्नं क-
रोति ततस्तस्मात् पूर्वकृतात् संस्काराद्भूयो बहुतरं संसिद्धौ संसि-
द्धिनिमित्तं हे कुरुनन्दन ४३ ॥

आनन्दगिरिकृतटीका

बुद्ध्यात्मविषयेति शेषः पूर्वस्मिन् देहे भवं तत्रानुष्ठितसाधनवि-
शेषप्रकमित्यर्थः तर्हि यथोक्तजन्मनि साधनानुष्ठानमन्तरेणैव।
बुद्धिसम्बन्धः स्यादित्याशंक्याह यतते चेति प्रयत्नः श्रवणाद्यनुष्ठा-
नविषयः ४३ ॥

स्वामिकृतटीका

ततः किमत आह तत्रेति सार्धेन। तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहे भवं
पौर्वदेहिकं तमेव ब्रह्मविषयया बुद्ध्या संयोगं लभते ततश्च भूयो
धिकं संसिद्धौ मोक्षे निमित्तं प्रयत्नं करोति [illegible]
[illegible] विषयेभ्यः
[illegible] ४३ ॥

पैशाचभाष्यं

यस्माच्च तत्रेति तत्र योगिनां कुले तं बुद्धिसंयोगं लभते पौर्वदेहिकं
पूर्वदेहे भवं पौर्वदेहिकं [illegible] यतते च प्रयत्नं करोति च त-
तस्तस्मात्पूर्वकृतात्संस्काराद्भूयो बहुतरं संसिद्धौ संसिद्धिनिमित्तं हे कु-
रुनन्दन ४३ ॥

रामानुजभाष्यं

तत्र तमिति तत्र जन्मनि तमेव पूर्वदैहिकं योगविषयिकबुद्धिसं-
योगं लभते ततः सुप्तप्रतिबुद्धवद्भूयः संसिद्धौ यतते यथानान्तराय-
हतो भवति तथा यतते ४३

नि॰ अभिनवगुप्तकृतटीका [illegible] संसिद्धोमोदात्मिकायामु ४३

परमार्थप्रपाटीका

गी. तत्र किं भवतीत्याह सार्धेन तत्रेति तत्र योगिनां कुले तं पूर्वदैहिकं प्रा-
टी. क्संस्कारागतं बुद्धिसंयोगं लभते ततस्तेन बुद्धिसंयोगेन संसि-
ब. द्धौ मोक्षसाधने यतते बहुतरं प्रयत्नं करोति ४३ ॥

195

वनमालीटीका

तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहभवे पौर्वदैहिके सर्वकर्मसंन्यासपु-
रःसरं तत्त्वश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं
तावत्पर्यन्तमेव तं परब्रह्मविषयया बुद्ध्या संयोगं तत्साधनकलाप-
मिति यावत् लभते प्राप्नोति न केवलं लभत एव किं तु ततस्तल्लाभा- ४३
नन्तरं भूयोऽधिकं साधनसंपत्तिं प्राप्य संसिद्धौ मोक्षे यतते प्रयत्नं करोति

श्रीमद्वैजयन्तीटीका

आमुत्रिकं स्वर्गं वक्ष्ये पूर्वसंस्कारनिमित्तकं साधनमाह तत्रेति
बुद्ध्या तत्रोभयविधजन्मनि पौर्वलक्षण्यासंयोगेन यासह संबंधं लभते
समष्टितु उद्दमायेन पूर्वजन्मकृतमात्मपरमात्मत्वाने संयोगभ्रष्टो
योगी प्राप्नोतीत्यर्थः हे कुरुनन्दन ततस्तादृशबुद्धिसंयोगादुत्तरः संसि-
द्धौ स्वान्तःकरणशुद्धिपूर्विकायां स्वपरस्वरूपदर्शनरूपायां निमित्ते च
भूयो बहुतरं यतते यथा पूर्वं विघ्नविहतो योगी अभवत्तथेदानीं
माभूदित्येवं मनसि निश्चित्यातिदृढतरं यत्नं करोतीत्यर्थः ४३ ॥

एतादृशजन्मद्वयस्य दुर्लभत्वं कस्मा

मधुसूदनीटीका

यस्मात् ॥ तत्र द्विप्रकारेऽपि जन्मनि पूर्वदेहभवे पौर्वदैहिके सर्वकर्मसंन्यासपुर-
पुरःसरं तत्त्वश्रवणमनननिदिध्यासनानां मध्ये यावत्पर्यन्तमनुष्ठितं ताव-
त्पर्यन्तमेव तं ब्रह्मात्मैक्यविषयया बुद्ध्या संयोगं तत्साधनकलापमि-
ति यावत् लभते प्राप्नोति न केवलं लभत एव किं तु ततस्तल्लाभानन्त-
रं भूयोऽधिकं लब्धाया भूमेरग्रिमां भूमिं संपादयितुं संसिद्धौ संसिद्धिनि-
मित्तं तन्निमित्तं यतते च प्रयत्नं करोति च यावत्सप्त भूमिकाः संपा-
ति दयतीत्यर्थः हे कुरुनन्दन न वापि शुचीनां श्रीमतां कुले योगभ्रष्टज-
न्मजातमिश्रैवासनावशात् तत्रापि संवत्तानलाभो भविष्यतीति
स्तवपि तेमहाप्रभावमस्यरोः कीर्तनेन प्रथमपर्वभगवद्वसिष्ठेव
तेव्याकः यथाश्रीरामः पर्कमपहितीयां वाट्टनीयां भूमिका मुत ।

प्रारब्धक्षयमरणस्यापि कीदृशी भगवतामिति: पूर्वं हि सप्तभूमयो व्याख्या
ताः तत्र नित्यानित्यवस्तुविवेकपूर्वकादिहामुत्रार्थभोगवैराग्याच्छ
मदमसुखानितितिक्षासर्वकर्मसंन्यासादिपुरःसरा मुमुक्षा शुभेच्छा
ख्या प्रथमा भूमिका साधनचतुष्टयसंपदिति यावत् ततो गुरुमुप
सृत्य वेदान्तवाक्यविचारणात्मिका द्वितीया भूमिका श्रवणमनन
संपदिति यावत् २ ततः श्रवणमननपरिनिष्पन्नस्य तत्त्वज्ञानस्य ति
विचिकित्सनात्मनानुमननसाधनात्मतृतीया भूमिका निदिध्यासनसंप
दिति यावत् ३ चतुर्थी भूमिका तत्त्वसाक्षात्कार एव ४ पंचमषष्ठ
सप्तमभूमयस्तु जीवन्मुक्तेरवान्तरभेदा इति तृतीये प्राग्व्याख्याता
तत्र चतुर्थीं भूमिकां प्राप्तस्य मरणस्य जीवन्मुक्त्यभावेऽपि विदेहकैवल्य
प्राप्तिर्नास्त्येव संशयः तदुत्तरभूमित्रयप्राप्तस्तु जीवन्नपि मुक्तः कि
मु विदेह इति नास्त्येव भूमिकाचतुष्टये शंका साधनभूतभूमिकात्रये
तु कर्मत्यागात्तत्तल्लाभाच्च भवति शंकेति तत्रैव प्रश्नः श्रीवसिष्ठः
योगभूमिकयोत्क्रान्तजीवितस्य शरीरिणः भूमिकांशानुसारेण क्षी
यते पूर्वदुष्कृतं ततः सुरविमानेषु लोकपालपुरेषु च मेरूपवनकुंजे
षु रमते रमणीसखः ततः सुकृतसंभारे दुष्कृते च पुराकृते भोगतया
परिक्षीणे जायन्ते योगिनो भुवि शुचीनां श्रीमतां गेहे गुप्ते गुणवतां स
तां जनित्वा योगमेवैते सेवन्ते योगवासिताः तत्र प्रागभावनाभ्यस्तयो
गभूमिक्रमं बुधाः दृष्ट्वा परिपतन्त्युच्चैरुत्तरं भूमिकाक्रममिति अत्र
प्रागुपचितभोगवासनाप्राबल्यादल्पकालाभ्यस्तवैराग्यवासनादौर्ब
ल्येन प्राणोत्क्रान्तिसमये प्रादुर्भूतभोगस्पृहः सर्वकर्मसंन्यासी यः स एव
वोक्तः यस्तु वैराग्यवासनाप्राबल्यात्प्रकृष्टपुण्यप्रकटितपरमेश्वरप्र
सादवशेन प्राणोत्क्रान्तिसमये त्यक्तभोगस्पृहः संन्यासी भोगव्यवधा
नेन विनैव ब्राह्मणानामेव ब्रह्मविदां सर्वप्रमादकारणशून्ये कुले समु
त्पन्नः तस्य प्राक्तनसंस्काराभिव्यक्तेरनायासेनैव संभवाज्ज्ञानमिति पूर्वं स्थव
मोदत्प्रमाणशंकेति स च वसिष्ठेनोक्तो भगवतानपरमकारुणिकेना
प्यवेति पतीनां रहस्यतो कपवस्पष्टमस्मृतं

196

[illegible]

४३

सदानंदीटीका

यतस्तेषांकुलेबुद्ध्यासंयोगंलभतेऽन्यथा पूर्वदेहसमुद्भूतमवलोक्य यानया १ पूर्वस्मादेवसंस्कारात्यत्नंबहुनंतरं ततः करोतितत्ववित्तात्र संसिद्धौयोगतत्परः २ तथापिश्रीमतांगेहे जन्मास्तिकुरुनंदन अनायासात्तत्वसक्तानेभविष्यत्येवमाशयः ३ प्रथमद्वयोपिवासिष्ठेप्रत्यक्षः श्रीरामबोधनात् एकामथद्वितीयांवातृतीयांभूमिकाम्पुनः ४ आरुह्यमृतस्यास्यकीदृशीभगवन्गतिः श्रीवसिष्ठः योगभूमिकयोत्क्रांतजीवितस्यशरीरिणः ५ भूमिकांशानुसारेणक्षीयतेपूर्वदुःकृतं ततः सुरविमानेषुलोकपालपुरेषुच ६ मेरूपवनकुंजेषुरमतेसुरमणीसखः ततः सुकृतसंभारेदुःकृतेचपुराकृते ७ भोगक्षयात्परिक्षीणाजायंतेयोगिनोभुवि शुचीनांश्रीमतांगेहेकुलेगुणवतांसतां ८ जनित्वायोगमेवैतेसेवंतेयोगवासिताः तत्रप्राग्भावनाभ्यस्तंयोगभूमिक्रमंबुधाः ९ दृष्ट्वापरिपतंत्युच्चैरुत्तरंभूमिकाक्रमं १० ४३॥

नीलकंठीटीका

तत्रहिविधेपिजन्मनि पौर्वदेहिकं पूर्वदेहभवंबुद्धिसंयोगं यावतीयोगभूमिः पूर्वजन्मनिजितातत्रैवयावान्बुद्धिलाभोजातस्तावंतंबुद्धिसंयोगं पूर्वाभ्यासादल्पेनैवाभ्यासेनलभतेतस्मादपिभूयस्यांयोगसंसिद्धौ ऊर्ध्वभूमिलाभार्थंमित्यर्थः यततेयत्नंकरोति ४३॥

आनंदीटीका

यस्याभूमिकायाः पतितस्तस्याएवबुद्ध्याज्ञानेनसंयोगंकृत्वाततस्तस्याभूमेर्जयानंतरंभूयः पुनरप्युत्तरभूमिजयार्थं हि यतते ४३॥

रामकंठीटीका

[illegible]

तस्मिंश्च जन्मनि तं बुद्धिसंयोगं तादृशं बुद्ध्या ज्ञानसंस्कृतया संबंधं लभ-
ते कं तं पौर्वदैहिकं पूर्वस्मिन्देहे भवं यत्र ज्ञानक्रियासमुच्चयानुष्ठानद्वा-
रा योगस्तेनाश्रितस्तत्र निर्वाहितस्तत्र किल तथाविधयोगसमाश्रयणा-
हितभत ज्ञानसंस्कृतया बुद्ध्या संबंधो यो स्याभूदेव स च परमेश्वरानुग्रहं वि-
ना न भवति स चेश्वरानुग्रहो नादत्तफलो विरमति अतः कृतविहितचेल-
ष्टाकेचित्कालं विलंब्य तन्नरभिव्यज्यत एव ततस्तद्बुद्धियोगमाहात्म्या-
द्भूयः पुनरपि प्रयत्नमारभते संसिद्धिनिमित्तं योगफलवाप्त्यर्थं ४३

लासिकी[illegible]टीका

एताहृशजन्मन्द यस्तदुर्लभं त्वक्त

नौनघाह ॥ तत्र हि प्रकारे जन्मनि पूर्वदेहे भवं पौर्वदैहिकं तं तादृशमेव संस्का-
रात्मनास्थितं बुद्धिसंयोगं बुद्ध्यात्मबोधेन संयोगं संबंधं लभते ततो
बोधलाभानंतरं संसिद्धौ ज्ञाननोत्कर्षप्राप्त्यर्थं भूयोधिकं पुनरपि वा यत-
ते प्रयत्नं करोति परमात्माकारसमाधानमावर्तते इत्यर्थः तदुक्तं न
प्य च परमार्थमयीं धारामपतस्य मध्यविश्रांतेः तत्पदलाभात्स्व
कवेन सोपि मरणं कदाचित्स्यात् योगभ्रष्टः शास्त्रे कथितोसौ चित्र
भोगभुवनपतिः विश्रांतिस्थानवशाद्भूत्वा जन्मांतरे शिवी भवतीति ४३

[illegible] ४३ ॥

पंचोलेटीका

कुतो दुर्लभमित्यपेक्षायामाह तत्रेति हे कुरुनंदन तत्र योगिनां कुले तं पौर्व-
दैहिकं पूर्वस्मिन् देहे भवं बुद्धिसंयोगं बुद्ध्या योगं लभते च पुनः ततः पूर्व-
स्मात्संस्कारात् भूयः अधिकतरं संसिद्धौ मोक्षनिमित्तं यतते प्रयत्नं करोति ४३

रमवीरसमिद्धोयिनी ॥

विषयके जन्मनि तं पौर्वदैहि-
तत्रेति तत्र तस्मिन्कर्मयोगिकुल कं स्वकर्मानुष्ठाननिश्चयसंबंधं
दिकं प्राग्भवीयदेहे भवं बुद्धियोगं स्वकर्मानुष्ठाननिश्चय यतते यत्नं करोति ह
लभते ततश्च भूयः पुनरपि सम्यक्सिद्धये

दप्रयत्नस्त्वत्रभवतीतिभावः ४३॥

मधुभाष्य

४३॥

भाषा अनुवाद

कोई जन्मग्रहण के बादि क्या होताहै पर देष श्लोक से कहते हैं कि हे कुरुनंदन तेरे दोनो प्रकार के योग भ्रष्ट लोग जन्म धारण करिके भी पूर्व देह के अभ्याससे ब्रह्म विषयक बुद्धि से योग युक्त होते हैं और फेरि भीमोक्ष की सिद्धिके लिये अधिक यत्न करते हैं ४२

दोहा

ताको बुद्धिसंयोग तहां पूर्वजन्मको होय करत यतनता सिद्धि
" हे कुरुनंदनसोय ४३॥

198

पूर्वाभ्यासेनतेनैवह्रियतेह्यवशोऽपिसः जिज्ञा
सुरपियोगस्यशब्दब्रह्मातिवर्त्तते ४४ ॥

शांकरभाष्यं

कथं च तेन पूर्वदेहबुद्धि संयोग इति तदुच्यते पूर्वेति यः पूर्वजन्मनि।
कृतोऽभ्यासः स पूर्वाभ्यासस्तेनैव बलवताह्रियते संसिद्धौ हि यस्मादव।
शोऽपि सः योगभ्रष्टः न कृतं चेत् योगाभ्यासजात् संस्कारात् बलवत्त
रमधर्म्मादिलक्षणं कर्म्म तदा योगाभ्यासजनितेन संस्कारेण ह्रिय
तेऽधर्म्मश्चेद्बलवत्तरः कृतस्तेन योगजोऽपि संस्कारोऽभिभूयत एव त
त्क्षये तु योगजः संस्कारः स्वयमेव कार्य्यमारभते न दीर्घकालस्थस्या
पि विनाशस्तस्यास्तीत्यर्थो जिज्ञासुरपि योगस्य स्वरूपं ज्ञातुमिच्छन्
योगमार्गे प्रवृत्तः संन्यासी योगभ्रष्टः सामर्थ्यात् सोऽपि शब्दब्रह्मवेदो
क्तकर्म्मानुष्ठानफलमतिवर्त्तते कर्म्मानुष्ठानलक्षणमतिक्रामत्यपाक
रिष्यति किमुत बुद्ध्वा योयोगं तन्निष्ठोऽभ्यासं कुर्य्यात् ४४ ॥

आनन्दगिरिकृतटीका

यदि पूर्वसंस्कारो मोक्षानुगुणं प्रवर्त्तयति तथापि प्रवृत्तिरनिच्छया
स्यादित्याशंक्याह पूर्वेति यदि योगभ्रष्टः समनन्तरजन्मकृतसंस्कारव
शादुत्तरस्मिन् जन्मन्यनिच्छन्नपि योगे प्रवर्त्तते तदा कृशो भवतीत्यर्थः तच्च।
कैमुतिकन्यायेन स्तौति जिज्ञासुरिति पूर्वार्द्धं विभजते पूर्वेति तस्मा
देच्छया तस्य प्रवृत्तिरिति शेषः योगभ्रष्टस्याधर्म्मादिशक्तिवन्धोऽपि न
हि पूर्वाभ्यासवशाद्बुद्धिसम्बन्धः स्यादित्याशंक्याह नेत्यादिना यदि योग
भ्रष्टेन योगाभ्यासजनितसंस्कारप्राबल्यात् प्रबलतरं धर्म्मप्रभेदरूपं।
कर्म्म न कृतं स्यात्तदा तेन संस्कारेण वशीकृतः स इच्छादिरहितोऽपि बु
द्धिसम्बन्धभाग् भवतीत्यर्थः विपक्षे योगसंस्कारस्याभिभूतत्वान्न कार्य्या
रम्भकत्वमित्याह अधर्म्मश्चेदिति योगजसंस्कारस्याधर्म्माभिभूतस्य का
र्य्यमकृत्वैवाभिभावकप्राबल्ये प्रणाशः स्यादित्याशंक्याह ततःक्षय इति।
कालव्यवधानान्निवृत्तिं शंकित्वोक्तं नेति रणजलौकादृष्टान्तेन संस्का
रस्य दीर्घनाशाः समस्थितत्वादितिभावः कैमुतिकन्यायोक्तिपरमुत्तरा
र्द्धं विभजते जिज्ञासुरपीत्यादिना अत्रापि संन्यासीति विशेषणं पूर्वव
दवधेयमित्याह सामर्थ्यादिति वैदिककर्म्मीकर्म्ममार्गे प्रवृत्तस्ततोभ्रष्टः

शंकितं शक्यते अतः सन्न्यासी पूर्वोक्तैर्विशेषणैः विशिष्टो योगभ्रष्टो
भीष्टः सोपि वैदिकं कर्म तत्फलं वातिवर्त्तते किम्पुन योगे बुद्धा नष्टि
ष्टः सदाभ्यासं कुर्वन् कर्म तत्फलं वातिवर्त्तते किमिति वक्तव्यमिति
योजना योगनिष्ठस्य कर्म तत्फलातिवर्त्तने तत्तोधिकफलागमिति
वस्तते ४४

स्वामिकृतटीका

तदेवं पूर्वाभ्यासवशेन प्रयत्नं कुर्वन् शनैःशनैर्मुच्यते इतीममर्थं कैमु
त्यन्यायेन स्फुटयति सार्द्धेन जिज्ञासुरिति योगस्य स्वरूपं जिज्ञासुरेव के
वलं न तु प्राप्तयोगः एवंभूते योगे प्रविष्टमात्रोपि पापवशाद्योगभ्रष्टो
पि शब्दब्रह्म वेदमतिवर्त्तते वेदोक्तकर्मफलान्यतिक्रम्य निवर्त्तते तत्तिक्राम
तितेभ्योधिकं फलं प्राप्य मुच्यत इत्यर्थः ४४ ॥

* तत्र हेतुः तेनैव पूर्वदेहकृता
भ्यासेनावशोपि कृतस्थिर
नरायाद निरुद्धस्थिस्क्रि
यते विषयेभ्यः पराहृत्य ब्र
ह्मनिष्ठः क्रियते

पिशाचभाष्यं

पूर्वजन्मनिहितोभ्यासस्तेन पूर्वाभ्यासेनैव बलवतानेनैव ह्रियते ह्रियस्मा
प्यते बुद्धिमन्योगं प्रत्यवशोपि सः योगभ्रष्टः किंच जिज्ञासुर्योगस्यहा
नमिकृत्य योगमार्गे प्रवृत्तः सन्न्यासी सामर्थ्यात्सोपि शब्दब्रह्म वेदोक्तं के
वलं कर्मानुष्ठानमतिवर्त्तते योगजिज्ञासापि केवलात्कर्मणो गुरुतरे
त्यभिप्रायः किमुत बुद्ध्या योगनिष्ठाभ्यासं कुर्वन् ४४ ॥

रामानुजभाष्यं

तेन पूर्वाभ्यासेन पूर्वेण योगविषयेणाभ्यासेन सयोगभ्रष्टोप्यवशोपि
योगपर एव क्रियते यतिद्वेषेन योगमाहात्म्यमिमर्थः जिज्ञासुरपि ।
प्रवृत्तयोगो योगजिज्ञासुरपि नत्त्वस्खलितमानसः पुनरपि तामेव
जिज्ञासां प्राप्य कर्मयोगादिकं योगमनुष्ठाय शब्दब्रह्मातिवर्त्तते शब्द
ब्रह्म देवमनुष्यान्तरिक्षस्वर्गादिशब्दाभिलापयोग्यं ब्रह्म प्रकृतिः प्रकृ
तिबन्धाद्विमुक्तो देवमनुष्यादिशब्दाभिलापानर्हं ज्ञानैकाकारमा
त्मानं प्राप्नोतीत्यर्थः ४४ ॥

अवशः परतन्त्र एव किल तेन पू
र्वाभ्यासेन बलादेव योगाभ्यासं
प्रति नीयते न वैतत्सामान्यं यो
गजिज्ञासामात्रेणैव शब्दब्रह्मा
तिवृत्तिमत्रुस्ताध्यायत्रुयं शब्द
ब्रह्मातिवर्त्तते न स्वीकुरुते ४४

अभिनवगुप्तकृतटीका, स्पष्टार्थं ४४

परमार्थप्रपाटीका

तत्र हेतुमाह पूर्वेति तेनैव पूर्वाभ्याससंस्कारेणावशोपि कृतस्थि
तरायाद निरुद्धोपि क्रियते बलात्कारेण विषयेभ्यः परावर्त्य बलि
ष्ठः क्रियते तदुक्तं विष्णुपुराणे अनिच्छन्समाधिस्थपरब्रह्मापलक्षि

४ अथ योगस्य सामर्थ्यमाह जिज्ञासुरिति योगस्वरूपं जिज्ञासुरपि योगप्रविष्टमात्रोपि शब्दब्रह्मातिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते शब्दात्मकं ब्रह्म शब्दब्रह्म वेदस्तदुक्तफलानि स्वर्गादीनि अतिवर्तते अतिक्रामति तेभ्योधिकं फलं प्राप्य मुच्यते इत्यर्थः एवं मंदप्रयत्नोपि योगी परां गतिं याति

मात् यत्नेनरायदोषेणदूष्यतेसस्यमानसं जन्मांतरैरसस्ततोमु क्तिः पूर्वसंजायते विविधान्नसमाधिस्तमुक्तिमन्वेवजन्मनि शोभा नियोगीयोगाश्रिद्रपकमौचयोविराजत् ४४ ॥

वनमालीटीका

ननु योवैराग्यवासनाशवन्नान्त्रकृष्टपुण्यप्रकटितपरमेश्वरप्र सादवशेन प्राणोत्क्रांतिसमये न्हृतभोगस्पृहस्तस्य ब्रह्मविदांकुले जातस्य प्राचीनसंस्कारोद्बोधात्पुनरपि परब्रह्मनिष्ठामोक्षपर्यंतम स्तु यस्तु श्रीमतां राज्ञांकुले बहुविधविषयभोगव्यवधाने नोत्पन्नस्त स्य कायमनिव्यवहितज्ञानसंस्कारोद्बोधस्तत्राहपूर्वेति अतिव्यवहि तजन्मापि तेनापि तेनैव पूर्वाभ्यासेन योगाजितसंस्कारेणावशोपि मोक्षसाधनायाप्रयतमानोपि क्रियते स्ववशीक्रियते अकस्मादेव भोगवासनाभ्यो व्युत्थाप्य मोक्षायोन्मुखीक्रियते जिज्ञासुरज्ञात्वाभि क्कुरपि योगस्य मोक्षसाधनज्ञानस्य ज्ञानमप्राप्यस्तोपि बहुविषया भुक्ता महाराजकुले समुत्पन्नोपियोगभ्रष्टः प्राचीनसंस्कारवशा त्तस्मिन्जन्मनि शब्दब्रह्मवेदकर्मप्रतिपादकमतिवर्तते कर्माधि कारातिक्रमेण ज्ञानाधिकारी भवतीत्यर्थः ४४ ॥

कुसुमवैजयन्तीटी॰

स योगी केन यत्नेन स्वपदे योदेवमाह पूर्वाभ्यासेनेति स योग भ्रष्टो योगीति विषयेनावशोपि कस्माच्चिदपि विघ्नाद्योगमप्राप्नोति। स्थूलत्रपि तेनैव योगविषयकेन पूर्वाभ्यासेन पूर्वजन्मदेहकृतानुष्ठाना भ्यासेन क्रियते आकृष्यते विषयेभ्यः पराङ्मुखनिष्ठः क्रियत इत्यर्थः अस्य योगस्य केवलं तिकव्यायेन माहात्म्यमाह जिज्ञासुरिति अस्य यो गस्य ज्ञानगर्भकस्याष्टांगशिरस्कस्य जिज्ञासुरपि योगानुष्ठानाशक्त तः केवलयोगज्ञानमेवेच्छुरपि जनः शब्दब्रह्मभिरायोमलोकाद्यः ईश्वरमनोवृद्धिरेवदेवमादिशब्दैर्नामरूपात्मकस्याद्याभिव्यापराप्रकृ तिस्तामतिवर्तते अतिक्रम्यवर्तते प्रकृतिकार्यभूतस्य स्वर्गादिसुख भोगस्य प्राप्त्यभिलाषं न जनतीत्यर्थः यद्येवंभूतोऽपि जिज्ञासुरपि स्या न्नदिति दोषः विरताभ्यासः संक्रामो भवति सप्रकृतिमुल्लंघ्य वर्तनेन रतिं किमु वक्तव्यं ज्ञानाभ्यासीति अभिप्रायः ४४ ॥

मधुसूदनीटी॰

ननु योब्रह्मविदां ब्राह्मणानां सर्वप्रमादकारणशून्ये सकुले जातः तस्य मध्ये विषयभोगव्यवधानाभावा दव्यवहितप्राग्भवीयसंस्कारोद्बोधात्पुनरपि सर्वकर्मसंन्यासपूर्वकं ज्ञानसाधनलाभो भवतु नाम यस्तु श्रीमतां महाराजचक्रवर्तिनां कुले बहुविषयभोगव्यवधानेनोत्पन्नः तस्य विषयभोगवासना

गी॰
टी॰
म॰

प्राबल्यात्प्रमादकारणसंभवाच्च कर्मसंन्यासानर्हे सति कथं वा ज्ञान मधुसूदनी कथमतिव्यवहितज्ञानसंस्कारोद्बोधः तत्रियत्वेन सर्वसाधनलाभ इति तत्रोच्यते ॥

अतिचिरव्यवहितजन्मोपचितेनापि तेनैव पूर्वाभ्यासेन जागर्ति तज्ज्ञा
नसंस्कारेणावशोऽपि मोक्षसाधनाय प्रयत्नमानोऽपि क्रियते स्ववशी
क्रियते अकस्मादेव भोगवासनाभ्योऽप्युपायमोक्षसाधनेन सुखः
क्रियते ज्ञानवासनाया यावत्स्वकालाभ्यस्तयापि वस्तुविषयत्वेना
वस्तुविषयाभ्यो भोगवासनाभ्यः प्राबल्यामश्रयपद्यानमेव पुरुषं हतो
ज्ञानाय प्रयतमानोऽपि पूर्वसंस्कारप्राबल्यादकस्मादेव रागभ्रमोऽज्ञाने
नसुखो भूदिति अत एव शास्त्रं नेहाभिक्रमनाशोऽस्तीति अनेकजन्म
सहस्रव्यवहितेऽपि ज्ञानसंस्कारः स्वकार्यं करोत्येव सर्वविरोध्युपमर्दे
नेत्यभिप्रायः सर्वकर्मसंन्यासाभावेऽपि विहितक्रियस्य ज्ञानाधिकारः स्थि
तएव यथा पाटच्चरेण बहूनां रत्नानां मध्ये विद्यमानमपि प्रच्छादितं
वेष्टयमनिकृष्टपि ज्ञानं सर्वानभिभूय स्वसामर्थ्यविशेषादेवाभिव्य
ते पश्चात्तत्कर्तारः परदन्तमिति विमर्शो भवति एवं बहूनां ज्ञानप्रतिबं
धकानां मध्ये विद्यमानोऽपि योगभ्रष्टः स्वसामर्थ्यविशेषादेव सर्वानभिभूयानन्दो
वलवता स्वसामर्थ्यविशेषादेव सर्वान्प्रतिबंधकानभिभूयात्मवशी
क्रियते इति इतः प्रयोगेन स्वविनं अत एव संस्कारप्राबल्यात् जिता
त्मा न भिक्षुरपि योगभ्रष्टोऽपि ज्ञानसाधनेन ज्ञानस्य विषयं ब्रह्म प्रथमभू
मिकायां स्थितः संन्यासीति यावत् सापि न स्यामेव भूमिकायां स्तेन
गाले बहून्विषयानन्भुक्त्वा महाराजचक्रवर्तिनां कुले समुत्पन्नोऽपि यो
गभ्रष्टः प्राग्जन्मविततज्ञानसंस्कारप्राबल्यात् संन्यासमनिशब्द्ब्रह्म वेदक
मप्रतिपादकमनिवर्तनेनातिक्रम्यातिष्ठति कर्माधिकारातिक्रमेण
ज्ञानाधिकारी भवतीत्यर्थः एतेनापि ज्ञानकर्मसमुच्चयो निराकृतः इति
दृष्टव्यं समुच्चये हि ज्ञानिनोऽपि कर्मकोटिक्रमाभावात् ४४

[illegible]

४४ ॥

सहातेंदीटीका

पूर्वजन्मकृताभ्याससंस्कारेणावशोऽपि सन् मोक्षमार्गे प्रवृत्तोऽपि स
वशीक्रियते बलात् १ अकस्मादेव प्राप्यभोगवासनातो जनः तान् सं
स्कारप्राबल्यात् क्रियते साधनोन्मुखः २ अल्पकालमपि ज्ञानाभ्यासवा
सनया तया सम्यगभ्यस्तया न स्याद्वासनाया विशेषतः ३ महत्त्वविषय
त्वेन प्राबल्यादयमोचरात् यथानमेव पुडेस्मिन्पूर्वाभ्यासवशेन च ४ ज्ञा
नाभ्यासोऽनुवृत्तोऽकस्मादेवाभूरिति वाशयः अतः संस्कारप्राबल्यात्तानमि
कुरणीह्वयः ५ मोक्षसाधनबोधस्य विषयं ब्रह्मविद्वं भुक्ताभोगान्बहूनन्य
गेजन्मप्राप्योत्तमे कुले ६ योगभ्रष्टोऽपि वेदोक्तकर्मानुष्ठानजं फलं अ
तीत्य वर्तते नरः किं वाच्यं ब्रह्मवेदिनः ७४४ ॥

नीलकंठीटीका

कुतो यत्नते शितिनोपीमत आह पूर्वेति अवशोऽपि प्रज्ञानादिवमिश्रा
दिभिरपयानीयमानोपि तेनैव पूर्वाभ्यासेन बलवताक्रियते योगप्रव
णः क्रियते यतः योगस्य जिज्ञासुः ज्ञानमात्रमिच्छन्नपि भवति सोपि
शब्दब्रह्म कर्मकांडं वेदमपि अतिक्रम्य वर्तते किं पुनः पिज्ञाता २
स्यं पूर्वाभ्यासबलेयत्न्महानमपि पिज्ञादियत्नं स्पष्टयाकरोतीत्यर्थः ४४

आनंदीटीका

अत्र हेतुमाह अवशः अस्य प्राप्तासिद्धेः उत्तादिवशोऽपि सन् तेनैव पूर्वा
भ्यासेन प्राग्जन्मसंचितसंस्कारेणाक्रियते पितां ता भूमिकां प्रापयत्यपर
ब्रह्मप्रतिनीयते इत्यपि शास्त्रस्यार्थः तदेवं योगसिद्धेः अर्द्धेवपरमोपाय इ
ति श्रद्धं स्तौति विवेकख्यात्यासंयमात्स्मृदितप्रज्ञालोके शास्त्रं जेता
नमपार्थकं स्वर्गदीपवदिति योगानुष्ठानदृष्ट्या योगस्य जिज्ञासुः अह
या ज्ञातमिच्छुरपि प्रपिशास्त्रो योगमनुष्ठातमनारब्धोपि शब्दब्रह्मशास्त्र
मतिक्रमते अत्रेदं तात्पर्यम् अक्षरात्मा इंद्रियस्यचेतः तस्य प्रोक्तनमन
भ्यस्तीव्रसंस्कारापेक्षाकेमरासंयमेनावश्यं ब्रह्मप्राप्तिरिति ततः
परं ज्ञातव्यास्याभावात् शब्दब्रह्मरोत्ताने साधनस्यानापेक्षेति ४४

रामकंठीटीका

यस्मात्तेनैवपूर्वजन्मसंबद्धेनमहताभ्यासेनयोगविषयेणसंस्का
रात्मनावस्थितेनावशोप्यनिच्छन्नपिह्रियतेआत्मसात्क्रियते कस्मा
त्तेनाभ्यासयोगेनक्रियतेइत्याह यस्मात्कर्मसमाधिलक्षणस्ययो
गस्यजिज्ञासुरपिस्वरूपंज्ञातुकामोपिशब्दब्रह्मशास्त्रात्मकंनाम
तिवर्ततेनातिक्रामति निश्चयाभावाद्योगविषयाग्रहात्तिरेवनसंभवति
संशयितस्यैवशास्त्रमुपकारकमतोयोगजिज्ञासुःशब्दब्रह्मातिव
र्ततेइत्युक्तम् [illegible] ४४॥

लासिकी[illegible]टीका

ज्ञातस्यदेहान्तरप्राप्त्यावशोपिअनिच्छन्नपिसन् तेनैवतादृशेनैवमहताग
घ्नुरितेन पूर्वाभ्यासेनसंस्कारात्मनास्थितेनपूर्वदेहकृताभ्यासेना
त्रजन्मन्यभिव्यक्तेन सयोगभ्रष्टोह्रियतेआत्मसात्क्रियते ननुकृतो
स्ययोगाभ्यासस्यहदिवल्लवत्वंयदेहान्तरप्रयंसंभवेपिह्रियतेइत्यतोस्य
प्रभावमाह जिज्ञासुरिति योगस्यजिज्ञासुरपियोगस्यस्वरूपंज्ञातुकामो
पिशब्दब्रह्मवेदमस्यान्तरायभूतकर्मणोबलवत्प्रतिपादकमतिव
र्ततेतिक्रामति योगान्तरायभूतकर्मपरवशोनभवतीत्यर्थः किमुत
प्राप्तयोगः एवंमन्दप्रयत्नोपियोगीविघ्नानपमृद्याभ्यासक्रमेणपरां
गतिंप्राप्नोति [illegible] ४४॥

पंचोलीटीका

कथंपूर्वदेहबुद्धिसंयोगइतिनआह पूर्वाभ्यासेनेतिहियस्मात्सयोग
भ्रष्टःतेनैवपूर्वाभ्यासेनपूर्वजन्मनिकृतोभ्यासःपूर्वाभ्यासस्तेनैवअ
वशःअस्वतन्त्रःक्रियतेइतरःअपियोगाभ्यासेप्रवर्ततेयोगस्यजिज्ञासुर
पियोगस्वरूपंज्ञातुंइच्छन्नपियोगभ्रष्टःशब्दब्रह्मवेदोक्तकर्मफलम
तिवर्ततेउत्तमंलोकंगच्छति ४४

प्रणवीरमित्रोदयिनी॥

पूर्वाभ्यासेनेति तेनैवपूर्वाभ्यासेनप्राग्भवीयेनैवसंस्कारेणस
योगभ्रष्टोमहाकुलोत्पन्नः अवशोपिसन् यत्नकर्तुमनिच्छन्न

विसन् क्रियते प्रकृतिनिमित्तीभूतदुष्टसंकल्पेभ्यः परावृ
र्त्यंयत्तोभ्युदयः संपाद्यते योगस्य प्रोक्तलक्षणस्य कर्मयोगस्य
स्वरूपं ज्ञातुकामोपि शब्दब्रह्मशब्दस्वरूपं यत्तद्वैदमिति यत्तु
वैदप्रतिपादितेषु शुद्धेषु वर्त्तते हानिं करोति शुद्धादिनिष्ठो भवति
शुद्धत्वेन संस्कारस्य दुरुच्छेद्यत्वात् किं पुनर्यत्नं कुर्वन्नेवन
शुद्धादिकर्म पारयतीति कैमुतिकन्यायेन फलितं ४४॥

मधुभाष्य

भाषा अनुवाद

वह पूर्व देह का बुद्धि संस्कार कैसा है और उस का कारण यह है कि सोइ पूर्व देह की अभ्यासे अवश अर्थात् जो कोई कारण या विघ्न वलते इच्छा न भी होय तो भी मोक्ष सिद्धि के अर्थ पूर्व संस्कार के जोर से अवश की नाईं यत्न करते हैं अर्थात् विषयों से विमुख हो ब्रह्म निरत होते हैं और इस तरह पूर्व अभ्यास के कारण से मुक्ति के अर्थ यत्नकारी मनुष्य जिस क्रम से मुक्त। होते हैं सो कै मुक्तिक साधन डेढ श्लोक के द्वारा कहते हैं कि जिज्ञासु कहे योग स्वरूप जानने की इच्छा करने वाला क्रुश केवल योग ही को नहीं प्राप्त होता किन्तु योगप्रविष्ट मनुष्य पाप वशते योगभ्रष्ट होय भी शब्द ब्रह्म जो वेद तिस को अति वर्तन करता अर्थात् वेदोक्त फलकी अपेक्षा अधिक फल प्राप्त होय फेरि मुक्त होता है इतनाही नहीं इससे भी अधिक इस की केस तिक स्याय कहते हैं ४४

दोहा

सो पूर्व अभ्यास सें करें यत्न अवश सोय जान्यो चाहत योग कों
पाइ ब्रह्म स्थित होय ४४॥

प्रयत्नाद्यतमानस्तु योगी संशुद्धकिल्बिषः अनेकजन्मसंसिद्धस्ततो याति परां गतिं ४५॥

शांकरभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादिति प्रयत्नात् प्रयतमानादधिकं यतमान इत्यर्थः तत्र योगी विद्वान् संशुद्धकिल्बिषो विशुद्धकिल्बिषः संशुद्धपापोऽनेकेषु जन्मसु किंचित् किंचित् संस्कारजातमुपचित्य तेनोपचितेनानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धः ततो लब्धसम्यग्दर्शनः सन् याति परां प्रकृष्टां गतिं ४५॥

आनन्दगिरिकृतटीका

योगनिष्ठस्य श्रेष्ठत्वे हेत्वन्तरं वक्तुं उत्तरश्लोकमवतारयति कुतश्चेति। शुद्धप्रयत्नोत्कर्षेण मोक्षे वैरधिकप्रयत्नस्य क्लेशहेतोः किंचित्करत्वमित्याशंक्य हेत्वन्तरमेव प्रकटयति प्रयत्नादिति तत्र योगविषये प्रयत्नातिरेके सतीत्यर्थः ततः संचितसंस्कारसमुदायादिति यावत् सम्यक्सम्यग्दर्शनवशात् प्रकृष्टा गतिः मुक्तिस्तया सा लभ्यते तेन शीघ्रमुक्तिमिच्छताधिकप्रयत्नो भवेदस्य प्रयत्नस्य विशेषेण मुक्तिभागीत्यर्थः ४५॥

स्वामिकृतटीका

यदैवं मन्दप्रयत्नोऽपि योगी परां गतिं याति तदा यस्तु योगी प्रयत्नादुत्तरोत्तरमधिके योगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽनेकेषु जन्मसूपचितेन योगेन संसिद्धः सम्यग्ज्ञानी भूत्वा ततः श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः ४५॥

पैशाचभाष्यं

कुतश्च योगित्वं श्रेय इति प्रयत्नादधिकं प्रयतमान इत्यर्थः ततो योगी विद्वान् संशुद्धकिल्बिषः संशुद्धपापः अनेकेषु जन्मसु किंचित्संशुद्धसंस्कारजातमुपचित्य तेनोपचितेन संस्कारेणानेकजन्मकृतेन संसिद्धोऽनेकजन्मसंसिद्धस्ततो लब्धसम्यग्दर्शनः संन्यासी याति परां प्रकृष्टां गतिम् ४५

रामानुजभाष्यं

प्रयत्नादिति यत एवं योगमाहात्म्यं ततोऽनेकजन्मार्जितपुण्यसंचयैः

किं पुनः प्रयत्नादित्याह प्रयेति अथ प्रयत्नाद् उत्तरोत्तरमधिकयोगे यतमानो यत्नं कुर्वन् योगेनैव संशुद्धकिल्बिषो विधूतपापः सोऽप्यनेकेषु जन्मसु उपचितयोगेन संसिद्धः सम्यक् तानी भूत्वा श्रेष्ठां गतिं यातीति किं वक्तव्यमित्यर्थः यस्मादेवं तस्मात्

गी॰ टी॰ स

शुद्धकिल्बिषः संसिद्धस्य संजातः प्रयत्नाद्यतमानस्तु योगी च लितो पि पुनः परां गतिं यात्येव ४५ ॥

अभिनवगुप्तकृतटीका ~~यत्नार्थे~~ ४५ ततोजिज्ञासान

परमार्थप्रपाटीका

~~अथ सोऽपि समर्थ्यमाह सिद्धमुदिति योगभ्रष्टं जिज्ञासुरपि यो गवृत्तं प्रतिज्ञमपि प्रतिपत्तिमात्राविर्भावे शब्दब्रह्मातिवर्तते ॥ शब्दब्रह्म स्वरूपं प्रकाशाभिमुखीभावि अभिव्यञ्जनं ज्ञातिकर्मणि तु ल्यविकल्पे माध्यमं तु ध्यानेनार्थः एवं च सर्वज्ञत्वे योगी परां गतिं याति ४५ ॥~~

वनमालीटीका

प्रयत्नात्पूर्वकृतादप्यधिकमधिकं प्रयत्नं कुर्वन् योगी पूर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्धकिल्बिषः धौतज्ञानप्रतिबन्धकपापमलः अत एव संस्कारोपचयात् पुण्योपचयाच्चानेकैर्जन्मभिः संसिद्धः संस्कारातिरेकेण पुण्यातिरेकेण च प्राप्तसम्यग्ज्ञानः सम्यग्ज्ञानपरिपाकाद्याति परां प्रकृष्टां गतिं मुक्तिं ४५ ॥

कृष्णमैवेजयन्तीटीका

एवमैहिकी सर्वसमृद्धिं मुक्त्वा ध्यानचिकीर्षामाह प्रयत्नादिति तु शब्दः न त्वर्थवाचकोऽयं शब्दार्थः अयं हि कस्तव मा भ्रान्तेन त्वं सम्प्रयत्नात् पूर्वजन्मकृतयत्नादपि विशेषप्रयासाद्वा यातनयाप्रकर्षेणाधिकेन श्रेण्यप्रत्नादतिरेका भ्रासे योगान् यतमानः विक्षेपभयाद्धारवारयन् केवलं संशुद्धकिल्बिषो विषयवासनारूपपापेन सन्तमसा अनेकजन्मसंसिद्धः एवं निर्विघ्नेन प्रयत्नेन प्राप्तसकलसपरिकरसाधनैरनेकैरपरिमितैः कृतपुण्यपुञ्जैर्जन्मभिर्विद्याभक्तिमन्त्रविमलम्बने संसिद्धः सम्यक् परिपक्वयोगः सन्योगी आत्मदर्शी केन विहितेन प्रयत्नाद्विलीनोऽपि ततः प्राप्तपरिपक्वयोगाद्ध्येतः परां सर्वोत्कृष्टामात्मपरमात्मावलोकनरूपां गतिं मुक्तिं याति प्राप्नोति ४५

मधुसूदनीटीका

यदा चैवं प्रथमभूमिकायां मृतोऽपि अनेकभोगवासनाव्यवहितमपि विविधकारणमपि महाराजकुलेऽपि जन्मलब्धापि योगभ्रष्टः पूर्वोपचितज्ञानसंस्कारप्राबल्येन कर्माधिकारमतिक्रम्य ज्ञानाधिकारी भवति तदा किमु वक्तव्यं द्वितीयायां तृतीयायां वा भूमिकायां मृतो विषयभोगान्ते लब्धमहाराजकुलजन्मा यदि वा भोगम

लोकेवत्तब्रह्मविद्यासंपन्नकुलजन्मा योगभ्रष्टः कर्माधिकारातिक्रमेण ज्ञानाधिकारी भूत्वा तत्साध
नानि संपाद्य तत्फललाभेन संसारबंधनात् मुच्यत इति तदेतदाह ॥

+ प्रयत्नात् पूर्वकृतादप्यधिकमधिकं यतमानः प्रयत्नातिरेकं कु
र्वन् योगी पूर्वोपचितसंस्कारवान् तेनैव योगप्रयत्नपुण्येन संशुद्ध
किल्बिषः धौतज्ञानप्रतिबंधकपापमलः अत एव संस्कारोप
चयात्पुण्योपचयाच्च अनेकजन्मभिः संसिद्धः संस्कारातिरेकेण
पुण्यातिरेकेण च प्राप्तचरमजन्मा ततः साधनपरिपाकाद्याति
परां प्रकृष्टां गतिं मुक्तिं नास्त्येवात्र कश्चित्संशय इत्यर्थः [illegible]
[illegible]

सदानन्दी [illegible]

योगभ्रष्टो वंशे जन्म लब्ध्वा ब्रह्मविदां कुले तत्त्वज्ञानेऽधिकारी सन्
तत्साधनतत्परः १ ज्ञानलाभेन संसारबंधनान्मुच्यत इत्याह यतमा
नोऽधिकं योगी यत्नात्पूर्वकृतादपि २ योगप्रयत्नपुण्येन धौतपा
पमलोऽभितः संस्कारोपचयात्पुण्योपचयाद्बहुजन्मभिः संस्का
रातिशयात्सिद्धः पुण्यातिशययोगतः लब्धप्राप्तजन्मा सोऽसा
धनातिशयात्ततः ४ सात्त्विकः परां तत्त्वमुक्तिं प्राप्नोति सद्गतिं ५ ४५

नीलकंठीटीका

एवं योगभ्रष्टगतिमुक्त्वा यो विषये क्रियमाणोऽपि प्रयत्नेन योगमे
वाभ्यसितं प्रवर्तते तस्य गतिमाह प्रयत्नादिति प्रयत्नान्महतान्
हठात् वायुनिरोधादिरूपात् खेचर्यादिमुद्राविशेषाभ्यासाद्यायतः
मानः संशुद्धकिल्बिषो निष्पापो भवति यदाह मनुः प्राणायामैर्द
हेद्दोषानिति हठयोगानां सर्वपापनिर्हरणयोग्यत्वं ततश्च सादा
त्कारे सादात्म्यापन्नत्वमिति संसिद्धः अत एव सः अनेकैर्जन्मभिः संसिद्धः
यतेनचक्षुष्वांतरे शुद्धो
ऽप्रमयोगो भूत्वा ततः परां गतिं मोक्षं याति ४५॥
रिति पंचमांते यत्सूत्रितं तद्व्याख्यातं

आनंदटीका

यत्नेऽपि सिद्धिं न याति तत्र तेऽब्दहिंसयोगं लभते पूर्वदैहिकमित्युक्तप
यत्नेऽपि सिद्धांतयति तत्र तेऽब्दहिं संयोगं लभते पूर्वदैहिकमित्यादि
त्याग पूर्वाद्येकस्मिन्जन्मनि प्रयासमधिकं तं गृहीत्वा अयत्नाद्योगाद
नमानो योगमनुतिष्ठन् अत एव संशुद्धकिल्बिषः अपगतपरमभिज
यात् प्रक्षालितांतःकरणमलः अनेकैर्जन्मभिः संसिद्धः योगसिद्धिं
मारूढः ततः परां गतिं याति परब्रह्माधिगच्छति ४५ [illegible]

गी°
टी°ष°

सप्तनयोगी॥

२०५

[illegible] ४५॥

रामकंठीटीका

प्रयत्नादुद्योगाद्यतमानो योगमनुतिष्ठंस्तदनुष्ठानसंस्कारवशात्संशुद्धकिल्बिषः प्रक्षालिताज्ञानमयकलंको बहुभिर्जन्मभिः परांकाष्ठामधिरूढेन तादृशेन ज्ञानेन ततोऽनन्तरं संसिद्धः सम्यक्प्राप्तप्रापणीयः परांगतिं परमार्थसमापत्तिलक्षणां प्रकृष्टां भूमिं प्राप्नोति यतः परं गम्यान्तरं न विद्यते [illegible]

लासिकी [illegible] टीका

तद्व्यतिरेके यस्तु योगी प्रयत्नादुत्तरोत्तरमधिकं यतमानः परमात्मसमाधानमावर्तमानः अत एव संशुद्धकिल्बिषो विगतकर्मबंधोऽनेकजन्मसंसिद्धोऽनेकैर्जन्मभिरुपचितेन योगेन संसिद्धः सम्यगुद्गततत्त्वज्ञानोत्कर्षं प्राप्तः सन् ततः संसिद्ध्यनन्तरमेव परां गतिं मोक्षाख्यां प्राप्नोति न पुनरभ्यासकर्ममपेक्षते इत्यर्थः तदुक्तम् यथाग्निः पावकोज्वलनो हुतं समैधं स्वयं यथा याश्चनु केनेलसघ अज्ञानपंकेऽपि तथा निरस्तेकालेन कैवल्यमुपैति देहीति ४५ [illegible]

पंचोलीटीका

सात्त्विकयोगमाश्रितः फलविशेषमाह प्रयत्नादिति यः पुनः योगी प्रयत्नादपि के यतमानः संशुद्धकिल्बिषः निर्हृतपापः अनेकजन्मसंसिद्धः अनेकजन्माभ्याससंस्कारोपचयेन संसिद्धः सम्यग्दर्शनस्तत्तस्तदनन्तरं परां मोक्षाख्यां गतिं याति गच्छति ४५॥

रामवीरसमिद्धोधिनी॥

अथैतस्य गतिं स्पष्टयति प्रयत्नादिति प्रकृष्टयत्नात्कायवाङ्मनोभिः समेत्योत्तरोत्तरमधिकं यतमानः स्वकर्मणि व्याप्रियमाणो योगी कर्मकांडलक्षणयोगारूढः संशुद्धकिल्बिषः अंतराय

भूतजन्मांतरार्जितपापकर्मभ्यः शुद्धः सन् यतोनेकजन्मसंसि
द्धः अनेकेषुजन्मसुसम्यक्सिद्धः दृढीभूतयत्नविषयनिश्चय
त्वेन कर्मयोगेवुत्पन्नोयोगारूढ इति यावत् अनंतरंपरांगति
मुत्तमामैहिकीमामुष्मिकींचसर्वप्रधानांगतिंप्राप्नोति ४५॥

मधुभाष्य

प्रयत्नादिति जितात्मत्वे प्रयत्नंकरोति एकमनेकजन्म
भिः संसिद्धोपरोक्षज्ञानीभूत्वापरांगतिंयाति आह च अतीव
प्रहृष्याशुक्तो जितात्मा विस्मृतत्परः ज्ञात्वाध्यात्वातथादृष्ट्वा जन्म
भिर्बहुभिःशुमान् विशेषान्नारायणं देवंनान्यथातुकथंचनेति
नारदीये ज्ञानिभ्यः योगज्ञानिभ्यः तपस्विभ्यःकृच्छ्रादिचारि
भ्यः उक्तंचकृच्छ्रादेरपियत्नादेर्ध्यानयोगोविशिष्यते तथापिशे
षश्रीब्रह्मशिवादिध्यानतोहरेः ध्यानंकोटिगुणंप्रोक्तमधिकं
वामृगवल्लभमिति गारुडे अज्ञात्वाध्यायिनोध्यानाज्ज्ञानमेव
विशिष्यते ज्ञात्वाध्यानंज्ञानमात्रान्ध्यानादपितुदर्शनं दर्शना
द्वेवभक्तेश्चनकिंचित्साधनाधिकमितिनारदीये ४५॥

भाषा अनुवाद

जिस हेत मर यत्नकारी योगी श्रेष्ठगति प्राप्त होते हैं तो उ
त्तरोत्तर योग से अधिक यत्न करने वे योग से निःपाप होय
अनेक जन्म संचित योगसे संसिद्ध अर्थात सम्यक ज्ञानी हो
य श्रेष्ठगति पावेंगे इस मे और कुछ कहना या संदेह वा को
है सोई कहा कि अच्छी तरहसे यत्न करता योगी तो संशुद्ध।
किल्विष निःपाप अनेक जन्मसे सम्यक सिद्ध होय फेरि परम
गति को पाता है ४५॥

दोहा

यत्न करत सो यत्न सें योगी शुद्ध विनपाप जन्म अनेक संसि
द्धि सें परमगतिलहैं आप ४५॥

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिकः
कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६

शांकरभाष्यं

तस्मादेवं तस्मात् तपस्विभ्य इति तपस्विभ्योऽधिको योगी ज्ञानिभ्यो ऽपि ज्ञानमत्र शास्त्रार्थपाण्डित्यं तद्वद्भ्योऽपि मतो ज्ञातोऽधिकः श्रेष्ठः इति कर्मिभ्योऽग्निहोत्रादि कर्म तद्वद्भ्योऽधिको योगी विशिष्टः तस्माद्योगी भवार्जुन ४६ ॥

आनन्दगिरिकृतटीका

तस्य ज्ञानद्वारा मोक्षहेतुत्वे योगस्योक्तमनूद्य योगिनः सर्वाधिकत्वमाह तस्मादिति योगस्य सर्वस्मादुत्कर्षात्स्वरूपकर्तव्यत्वात् योगिनः सर्वाधिकत्वं साधयति तपस्वीति योगिनो ज्ञानित्वस्य पर्यायत्वात् कथं तस्य ज्ञानिभ्योऽधिकत्वमित्याशंक्याह ज्ञानमिति योगिनः सर्वाधिकत्वे फलितमाह तस्मादिति ४६ ॥

स्वामिकृतटीका

यस्मादेवं तस्मात्तपस्विभ्य इति कृच्छ्रचान्द्रायणादितपोनिष्ठेभ्यः ज्ञानिभ्यः शास्त्रज्ञानवद्भ्योऽपि कर्मिभ्य इष्टापूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभिमतः तस्मात्त्वं योगी भव ज्ञानविद्भव ४६ ॥

पिशाचभाष्यं

[illegible] तस्मादेवं तस्मात् तपस्विभ्योऽधिको योगी ज्ञानमत्र शास्त्रार्थ पाण्डित्यं तद्वद्भ्योऽपि मतः ज्ञातोऽधिक इति कर्मिभ्योऽग्निहो त्रादिकर्मिभ्यस्तद्वद्भ्योऽपि अधिको योगी तस्माद्योगी भवार्जुन ४६ ॥

रामानुजभाष्यं

अतिशयितपुरुषार्थनिष्ठतया योगिनः सर्वस्मादाधिक्यमाह तपस्विभ्य इति केवलतपोभिर्यः साध्यते ज्ञानव्यतिरिक्तज्ञानेनार्थः कश्चन केवलैरश्वमेधादिभिर्येभ्यः सर्वेभ्योऽधिक पुरुषार्थसाधनत्वात् योगस्य तपस्विभ्यः ज्ञानिभ्यः कर्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ४६ ॥

अभिनवगुप्तकृतटीका

योगस्य प्राधान्यमाह तपस्विभ्य इति तपस्विभ्योऽधिकत्वेऽपूर्वमेव [illegible]

गी.
टी.
व.

तेज्ञानिभ्योऽधिकत्वे ज्ञानस्य योगफलत्वात् कर्मिभ्य उत्कर्षः स्पष्ट एव कर्मणां
कर्तव्येति तपस्विभ्योऽधिकः योगमार्गे सिद्धिरित्यभिप्राये ४६ ॥

परमार्थप्रपा टीका

किंच यस्मादेवमाह तपस्वीति अत्यन्तपक्वान्तःकरणो ज्ञानविज्ञानवान् योगी
तस्माद्यतो योगी वेदं शुद्धं निर्मलं मनोविद्धं ज्ञानात्मा सोऽन्य इति
एतस्मात् समाधिना योगेन नित्यं तत्त्वमत्वात् सर्वप्रकारैर्योगी शिष्यते
निर्विकल्पसमाधिः यस्मादेवं ततः तपस्विभ्य इति तपस्विभ्यः
कृच्छ्रचान्द्रायणादिनिष्ठेभ्यः ज्ञानिभ्यः शास्त्रविद्भ्यः कर्मिभ्य इष्टा
पूर्तकारिभ्योऽपि योगी श्रेष्ठोऽभिमतः तस्मात्त्वं योगी भव ४६ ॥

वनमाली टीका

योगिनस्तौति तपस्वीति तपस्विभ्यः कृच्छ्रादिनिष्ठेभ्यः अधिकः उत्
कृष्टो योगी तत्त्वज्ञानेन तन्निरोधेन मनोनाशवासनाक्षयकारी योगी
ज्ञानवत्तानिभ्योऽपि श्रेष्ठः कर्मिभ्योऽपि ज्योतिष्टोमाद्यनुष्ठानेभ्योऽधिकः
धिको योगी कर्मिणस्तपस्विभ्यश्च तत्त्वे न मोक्षानर्हत्वात् ज्ञानिभ्यः परो
क्षज्ञानवद्भ्योऽपरोक्षज्ञानवानधिको मतः मम संमतः यस्मादेवं त
स्माद्धिकाधिकप्रयत्नवलात् योगभ्रष्टस्त्वं निर्वर्तनात् मनोनाशवा
सनाक्षयौ गृहाणत संपाते योगी जीवन्मुक्तोऽयः स योगी परमो मतः
तस्मादर्जुन सत्त्वहशो भव साधनपरिपाकात् ४६

कुसुमाञ्जली टीका

आत्मेतरविषयेभ्यस्तपोज्ञानकर्माधिसाधनेभ्यः फलानुसंधानरहि
तस्मात्तत्त्वगमैरष्टाङ्गयोगस्थिरस्कस्य कर्मयोगस्याधिक्यमाह त
पस्विभ्य इति हे अर्जुन यस्मात् तपस्विभ्यः आत्मविषयव्यतिरिक्तेभ्यः
कृच्छ्रचान्द्रायणादितपःकर्तृभ्यः ज्ञानिभ्यः आत्मविषयेतरेभ्यः केव
लार्थशास्त्रज्ञेभ्यश्च कर्मिभ्यो भगवदाराधनव्यतिरिक्तकेवलाश्वमेधा
दिकर्मकर्तृभ्यश्चापि योगी उक्तलक्षणयोगनिष्ठोऽधिकः श्रेष्ठ इति मतो
मम सम्मतो भवति तस्मात्कारणात्त्वमपि योगी योगानुष्ठाननिष्ठो भव ४६

इदानीं योगी स्तुयते सर्वेतं न श्रुतिश्रद्धानिश्रयोत्पादनपूर्वकं योगं विधानम् ॥

मधुसूदनी टीका

तपस्विभ्यः कृच्छ्रचान्द्रायणादितपःपरायणेभ्योऽप्यधिक उत्कृष्टो यो

गीनत्वज्ञानोमप्यवेतरं मनोनाशवासनाक्षयकारीविषयानदासोहमिति
पञ्चकामाः परागताः नत्वदति ज्ञानीतिनूविदांसस्तपस्विनश्चनिष्का
तेः श्रुतपवकर्मिभ्योदति ज्ञानमहितज्योतिष्टोमादिकर्मानुष्ठायिभ्यश्च
धिकोयोगीकर्मिभ्योतपस्विभ्योवाज्ञानेनमोक्षानर्हत्वात् ज्ञानिभ्योपि
परोक्षज्ञानवद्भ्योप्यपरोक्षज्ञानवानधिकोमतोयोगीपवमपरोक्षज्ञान
वद्भ्योपिमनोनाशवासनाक्षयाभावादजीवन्मुक्तेभ्योमनोनाशवा
सनाक्षयवत्वेनजीवन्मुक्तोयोग्यधिकोमतः ममसंमतोयस्मादेवंत
स्मादधिकप्रयत्नवलात्वंयोगभ्रष्टस्थानीतत्वज्ञानमनोनाशवास
नाक्षयेष्वेगपत्संपादितेयोगीजीवन्मुक्तोयः सयोगीपरमोमत
इतिप्रायशः सतादृश्योभवसाधनपरिपाकात् ह्येत्यंनेतिभ्रइति
संबोधनार्थः [illegible]

सदानंदीटीका

श्रद्धाधिकोदयायाथयोगीसंस्तूयतेश्रुत्वा तपःकृच्छ्रोपवासादितम
द्भ्योपियोग्यसौ १ अत्मशास्त्रविज्ञानीतिहृतिकमनायनः ज्योतिष्टोमा
दिकर्मानुष्ठायिभ्यश्चाधिकोमतः २ सोज्ञानर्हतयास्मात्कर्मिणाव
तपस्विनो परोक्षज्ञानवद्भ्योप्यपरोक्षज्ञानिनोवराः ३ तेभ्योप्येवंमनो
नाशंसनाक्षयसंयुतः जीवन्मुक्तोमुनियोगीश्रेष्ठः सर्वोत्तमोमतः ४ ४६

नीलकंठीटीका

एवंयोगिनंस्तौति तपस्विभ्यइति तपस्विनःकृच्छ्रचांद्रायणमासो
पवासादिकर्तारः ज्ञानिनःशास्त्रीयपाण्डित्यवंतः कर्मिणोग्निहोत्रा
द्यनुष्ठातारः तेभ्यः सर्वेभ्योयोगीयतोधिकोमतस्तस्माद्योगीभवा।
र्जुन ४६॥

श्रानंदीटीका

क्तिः योगश्चित्तवृत्तिनिरोधस्तेनुभयार्थंयोगिनंसर्वोत्कर्ष

योगः फलस्पृहांविनाकर्मकरणत्र

(margin: [illegible]स्तौति)

स्ततीव्रस्यापिकेवलस्यतपसोमुनीनांक्रोधादिनाक्षयश्रवणाद्योगी
ज्ञानकर्मसमनुष्ठातासंयमीतपस्विभ्योधिकः श्रेष्ठः ज्ञानिभ्यः
विदितंकर्मसंयमंचत्यक्त्वाकेवलज्ञानपरेभ्योधिकोयोगीकर्मिभ्यः ज्ञा
नंसंयमंचविनाकेवलंयज्ञादिकंकर्मस्वर्गादिकामनयाकुर्वद्भ्योप्यधिको
योगीतस्माद्योगीभवार्जुन सर्वकामेषांफलसमान्तरायतममन्नवतं

गी॰
टी॰ ४

वयोगिनस्तु निर्विघ्नमनंतयंफलमित्युत्कर्षः योगी भवेति वक्ष्यमाण क्रमस्य वस्तुमार्गस्य ज्ञानकर्मणोस्समुच्चय यस्मान्नुष्ठानपरो भव एतदनुष्ठान सिद्ध्यर्थं मन्योगयोगाभ्यासी भवेति ज्ञानकर्मसमुच्चयानुष्ठानोपदेशाद्युद्धोन्मुखो भवेत्यर्जुनं प्रति भगवन्नियोगः ४६ [illegible] [illegible] [illegible] ४६ ॥

एवंविधस्य कर्मयोगिनः प्रशंसार्थमाह ॥ रामकंठी टीका

स्वतीव्रस्यापि तपो मात्रस्यानंतस्फलत्वात्तपस्विभ्यो योगी नित्यनिरतरानंदमयसमाधिमानधिकः प्रकृष्टः ज्ञानिभ्योपि केवलं ज्ञानमात्रपरेभ्यः तथा कर्मिभ्यो यज्ञादिकेवलकर्मवद्भ्योधिकः तस्मात्त्वं यथोपदिष्टयोगस्वीकृत्यसर्वोत्कृष्टो योगी भव [illegible] [illegible] [illegible] ४६ ॥

अथ योगिनं प्रशंसति ॥ लासिकी [illegible] टीका

तपस्विभ्यः कृच्छ्रचांद्रायणादितपोनिष्ठेभ्यो ज्ञानिभ्यः परोक्षज्ञानसहितेभ्यः शास्त्रज्ञानवद्भ्योपि कर्मिभ्यश्चेष्टापूर्तादिकारिभ्योपि परमात्मना सह जीवस्य योजनं योगः इति योगशब्दस्य मुख्यो व्यापारः तदुक्तं कुलार्णवे ऐक्यं जीवात्मनोराहुर्योगं योगविशारदा इति अस्य च द्वियोगादौ गौणत्वात्तस्य प्रयोगः स विद्यते यस्येति योगी अनंतफलत्वादपरोक्षज्ञानवत्वान्मोक्षलाभहेतुत्वाच्च श्रेष्ठो मतः तस्मात्त्वं योगी आत्मस्वरूपमग्नो भवेत्यर्थः [illegible] [illegible] ॥

पंचोली टीका

यस्मादेवं तस्मात्तपस्विभ्य इति हे अर्जुन यस्मात्तपस्विभ्यस्तपः कृच्छ्रचांद्रायणादि तदनुष्ठातृभ्यो योगी अधिकः ज्ञानिभ्योपि ज्ञानं शास्त्रजनितं तत्प्रकेभ्योप्यधिकः कर्मिभ्यः कर्म अग्निहोत्रादिकं तत्प्रकेभ्योपि योगी आत्मवित् अधिकः तस्मात्कारणात्त्वमपि योगी भव ४६ ॥

रणवीरसमिद्धोयिनी ॥

अस्यैवमाहात्म्याय वर्णनेनार्जुनाय तत्रैव प्रवृत्तिं रोचयति त
पस्विभ्य इति कृच्छ्रचान्द्रायणादिकं तपः शास्त्रार्थवेदनं ज्ञानं
इष्टापूर्तरूपं कर्म तन्निरतयविशिष्टेभ्योपि कर्मयोगी अधिकः
श्रेष्ठो मतः हे अर्जुन अवदातबुद्धे त्वं योगी कर्मनिष्ठो भव स्ववर्णा
श्रमोचितकर्मणि तत्परयथि ४६॥

मधुभाष्य

४६॥

भाषा अनुवाद

जिस कारण ऐसा है कि कृच्छ्रचान्द्रायण आदि तपमे निरत श्री शास्त्र से जो ज्ञानी ईनसे भी योगी अधिक है तथा यज्ञ कुंवा ताल बाग दान कर्मकारी जो कर्मी तिससेभी अधिक है हमारे मतमे योगी इससे हे अर्जुन योगी होउ ४८ ॥

दोहा

अधिकतपस्विसें योगीहे अधिक ज्ञानीसें मान अधिककर्मिसें योगीजो तोहो पार्थ योगी प्रमान ४८॥

योगिनामपि सर्वेषां मद्गतेनान्तरात्मना श्रद्धावा
न्भजते यो मां स मे युक्ततमो मतः ४७ ॥
इति श्रीभगवद्गीतासु योगशास्त्रे श्रीकृष्णार्जुनसंवादे
ध्यानयोगो नाम षष्ठोऽध्यायः ६ ॥

शांकरभाष्यं

योगिनामिति योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये
मद्गतेन मयि वासुदेवे समाहितेनान्तरात्मनान्तःकरणेन श्रद्धावान् स
न्भजते सेवते यो मां स मे मम युक्ततमोऽतिशयेन युक्तो मतोऽभि
प्रेत इति ४७ ॥ इति श्रीमद्भगवद्गीताभाष्ये षष्ठोऽध्यायः ६ ॥

श्रद्दधानः

आनन्दगिरिकृतटीका

तत्त्वादिभ्यो विराडात्मा सूत्रं कारणमन्तरमितं तेषामुपासकाः भूयांसो
योगिनो गम्यन्ते तेषां कतमः श्रेयानिष्यते तत्राह योगिनामिति यो भ
गवन्तं सगुणं निर्गुणं वा यथोक्तेन चेतसा श्रद्दधानः सन्ननवरतमनुस
न्धत्ते स युक्तानामप्यतिशयेन युक्तः श्रेयानीश्वरस्याभिप्रेतः नहि त
दीयोऽभिप्रायो मया भवितुमर्हतीत्यर्थः तदनेनाध्यायेन कर्मयोग
स्य संन्यासहेतोर्मर्यादां दर्शयता साङ्ख्ययोगं विवृण्वता मनोनिग्र
होपायोपदेशेन योगभ्रष्टस्यात्यन्तिकनाशशङ्कां च शिथिलयता
त्वंपदार्थोऽभिलक्ष्य ज्ञाननिष्ठस्तस्मात् वाक्यार्थज्ञानान्मुक्तिरिति साधितं ४७
इति श्री आनन्दगिरिकृतटीकायां षष्ठोऽध्यायः ६ ॥

स्वामिकृतटीका

योगिनामपि यमनियमादिपराणां मध्ये मद्भक्तः श्रेष्ठ इत्याह योगिना
मिति मद्गतेन मय्यासक्तेनान्तरात्मना मनसा यो मां वासुदेवं परमेश्वरं
श्रद्धायुक्तः सन् भजते स योगयुक्तेषु श्रेष्ठो मम संमतः अतो मद्भक्तो
भवेति भावः ४७ आत्मयोगमवोचद्यो भक्तियोगशिरोमणिं तं
वन्दे परमानन्दं माधवं भक्तशेवधिं ॥ इति श्रीभगवद्गीतायां सबो
धिन्यां टीकायां आत्मसंयमयोगो नाम षष्ठोऽध्यायः ६ ॥

पिशाचभाष्यं

गी॰ टी॰ श्री॰

योगिनामपि सर्वेषां रुद्रादित्यादिध्यानपराणां मध्ये मद्गतेन मयि वासुदेवे समाहि-
तेनान्तरात्मनान्तःकरणेन श्रद्धावान् भजते यो मां स मे युक्ततमः अति-
शयेन युक्तो मतोऽभिप्रेत इति ॥४७॥ इति शांकरभाष्ये षष्ठोऽध्यायः ६

रामानुजभाष्यं

तदेवं परविद्यांगभूतं प्रजापतिवाक्योदितं प्रत्यगात्मदर्शनमुक्त्वा अ-
थ परविद्यां प्रस्तौति योगिनामिति पंचम्यर्थे षष्ठी सर्वभूतस्थमित्या-
दिनाऽनन्तरविद्यायोगिनः प्रतिपादिताः तेष्वनेन मतत्वाद्वक्ष्यमाणस्य यो-
गिनोऽन्तर्निर्धारणे षष्ठी भवति अपि सर्वेषामिति सर्वशब्दनिर्दिष्टास्तपस्वि-
प्रभृतयः तत्सापेक्ष्यकन्यायेन पंचम्यर्थे गृहीतव्याः योगिभ्योऽपि सर्वेभ्यो वक्ष्य-
माणो योगी युक्ततमस्तदपेक्षया वरतेन तपस्विप्रभृतीनां योगिनां च न कि-
ंचिद्विशेष इत्यर्थः मेरुसर्षपयोरिव यद्यपि सर्षपाणामितरेतरविषयेषु मेरोरसू-
नाधिकभावो विद्यते तथा मेरुपेक्षया वरत्वेन सर्वेषामित्यपि यद्यपि
सर्वेषु मेरोरन्यनाधिकभावो विद्यते तथापि मेरुपेक्षया वरत्वनिर्देशः
समानः मत्प्रियत्वातिरेकेणानन्यसाधारणस्वभावतया मद्गतेनान्त-
रात्मना मनसा वासनाभ्यन्तरस्थकलहासनिर्विशेषाश्रयमूर्तं मनोऽन्तरा-
त्माश्रयर्थं मत्प्रियत्वेन मया विना स्वधारणालाभान्मद्गतेन मनसा श्र-
द्धावानत्यर्थमत्प्रियत्वेन तत्क्षणमात्रवियोगासहनतयाऽन्यासमद्गमो
नशावामो मां भजते मां भजते मां विचित्रानन्तभोग्यभोगोपक-
रणभोगस्थानपरिपूर्णनिखिलजगदुदयविभवलयलीलमस्पृष्टाशे-
षदोषमनवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजः प्र-
भृत्यसंख्येयकल्याणगुणगणनिधिं स्वाभिमतानुरूपैकरूपाचिंत्यदिव-
व्याद्भुतनिरवद्यनिरतिशयौज्ज्वल्यसौगंध्यसौकुमार्यलावण्ययौवनाद्य-
नंतगुणनिधिदिव्यरूपं वाङ्मनसापरिच्छेद्यस्वरूपस्वभावमपारकारुण्य-
सौशील्यवात्सल्यौदार्यमहोदधिमनालोचितविशेषलोकशरण्यं
प्रणतार्तिहरमाश्रितवात्सल्यजलधिमखिलजननयनविषयतां गतम-
जहत्स्वभावं वसुदेवगृहेऽवतीर्णमनवधिकातिशयतेजसा निखिलज-
गद्भासयंतमात्मकांत्या विश्वमाप्याययंतं भजते सेवते उपास्त इत्यर्थः।
स मे युक्ततमो मतः स सर्वेभ्यः श्रेष्ठतम इति सर्वं सर्वदा यथावस्थितं स्व-
नयवमालोकयन्नहं मन्ये ॥४७॥ इति श्रीमद्रामानुजाचार्यवि-

इति श्रीगीताभाष्ये षष्ठोऽध्यायः ६ ॥

नवनितीश्वरं कष्टयोगमार्गं संसि ॥ श्रीमिनवगुप्तकृतटीका ॥ द्विरभिधीयते

योगिनामपीति सर्वयोगिमध्ये यएवं मन्तः करणो निवेश्य भक्ति श्रद्धान्वितो गुरुचरणसेवालब्धसंप्रदायक्रमेण मामेव वा भजते विमृश्यति स युक्ततम इति मे मतं स समानस्य सर्वप्राधान्यमुक्तमिति शिवम् ४७ संग्रहोऽत्र भगवन्नामसंप्राप्तिमार्गान्त सर्वमवाप्यते फलिनाः शान्तयः सम्यग्दृष्टिमात्रेवलोकिते इति श्रीमहाजानकाभि नवगुप्तविरचिते षष्ठोऽध्यायः ६ ॥

परमार्थप्रपाटीका

योगिनामपि मद्गतेः श्रेष्ठ इत्यादि योगि यमनियमपरायणानां योगिनामपि मद्गतेनान्तरात्मना मन्तरात्मनाम सायोमां परमेश्वरं श्रद्धावान् भजते स योगयुक्ते युक्ततमो मम मतः अतो मद्भक्तो भवेति भावः यतो मद्भक्तो मत्प्रसादेन सकलसाधनयोगपद्यवान् सतएव भवतीत्यर्थः श्रुतिरपि योगेयोगेन वस्तरे वाजे वाजे हवामहे सखाय इन्द्रमूतये इति भाष्यं श्रुतः शेषः प्राणापानयोर्योगे मनः पवनयोर्योगे वा साध्ये सति यत्र सत्रविघ्नकर्तृभिः कामक्रोधादिभिः परमात्मानं स्थिते सति वयं तान्मिंद्रं परमात्मानं सद्भूतः एतद्विजेसेवामस्युपस्थिते सति वयं त्वां स्मिन्द्रं परमात्मानं हवामहे आह्वयामः किमर्थं ऊतये रक्षणार्थं निर्विघ्नार्थं सखायः परं मंगलस्वरूपं किंभूतेवाजेनवस्त्रेरे अतिशयेनरक्षितारे किं भूतावयं सखायः परं स्पर्शः किंभूते वाजे न वस्त्रे अतिशयेन रक्षितारे किं भूतावयं भगवभीतिशास्त्रेगकाशुगोमये मासम्यत्वेनयासाः नद्रुके पक्षेहित्वद्रेभगभीतिशास्त्रेगकाशुगोमये मासम्यत्वे नयासाः तद्गुक्ते पदेहिवेद्भगवभीतिशास्त्रे ऋोशान भोरूहस्तोवने विदं पदारविंदं यथेन रानां विषयानि हतु क्रोशान्ते तत्र ४७ इति परमार्थप्रपाटीकायां षष्ठोऽध्यायः ६ ॥

वनमालीटीका

एतत्समाप्तिं प्राप्तमाविर्भूत मानसमाह सर्वयोगी आश्रेष्ठमसंप्रजानसमाधिं एवं सेह संनतिनलाभीमुक्त सर्वयोगी आश्रेष्ठमभवन्ते तेलधारावदविच्छिन्नेति योगिनामिति पंचस्वरूपतानेन श्रीहरिमत्रुभवंतेतेलधारावदविच्छिन्नरूप संहरतियोगिनामितिपंच त्वक्रमेण योगि न सकैत्र मवेनवर्णा यनुपसंहरति भगवति सदन्तेन गणा मध्येषष्ठी प्रायुक्तेभ्यः सर्वेभ्यो योगिभ्योमयि भगवति प्रवाहोत्तरा मामनो यस्यताद लेयशुम्यानेतेलधारावदविच्छिन्नहति प्रवाहोत्तरा

गी॰
टी॰
७

113

ष्टः सन् मां भजते मय्येवैतेन तथा रागवद् विच्छिन्नस्नेहसंतननतिं कुरुते स मे युक्तत
मो मतोऽतिशयेन युक्तो मम संमतः श्रद्धावान् गुरुवेदान्तवाक्ये विश्वास
युक्तः भगवान्नारायणः सर्वान्तर्यामी परमानंदमूर्तिर्मम स्वामी प्राणा
दिभ्योऽपि प्रियतम इति धीरागिणो विषयेष्विव स्वाभाविकानपायि
नी यस्य स युक्तात्मा न कालेऽप्यसंप्रज्ञातसमाधौ स्वरूपज्ञानेनैव मामनुभवति
समाहितचित्तैर्मद्गतमंतिचिंतयन् भक्तिप्रेमभ्यः श्रेष्ठो मे मम सर्वज्ञस्य म
तो निश्चितो मद्भक्तस्यैव सर्वोपेत्तया श्रेष्ठत्वात्त्वमपि मद्भक्तो भवेति भा
वः कर्माधिकारमर्यादामांगयोगाधियं स्तुतः सभक्तियोगिषु श्रेष्ठ
वदद्रमापतिः ४७ ॥ इति वनमालीटीकायां षष्ठोध्यायः ६ ॥

ॐ समवैजयन्तीटीका

नादिरूपे परापररूपयोः प्रजापतिवाक्योदितयोर्विद्ययोर्मध्ये परविद्यायां
परविद्योपायभूते जीवात्मस्वरूपदर्शनमभिधायेदानीं परविद्यां स्तवन्
पार्थसारथिर्भगवानाह योगिनामपीति योगिनामितीयपञ्चम्यर्थे ष
ष्ठी भवति न निर्धारणे यतः सर्वभूतस्थमित्यादिषु वक्ष्यमाणविधेषु योगिषु वक्ष्य
माणस्य योगिनोऽन्तर्गतत्वाभावः तपस्विभ्य इति पूर्वोक्तोपक्रमसंबंधभे
गाच्च न च यथा तपस्व्यादीनां परस्परं न्यूनाधिकभावोऽस्ति तथा वक्ष्यमा
णस्य योगिनोऽपि तत्त्रिप्राणामध्येः यत्परत्वम इति वृक्किंचिदधिकभावो
भवेदतो निर्धारणपञ्चषष्ठी न तु पञ्चम्यर्थ इति चेन्न निर्धारणार्थिकायाः
षष्ठ्याः प्रसक्तत्वात् तथा हि यथा सर्वगिरीणां गिरीणां मध्ये मेरुश्च
ववलेपि समेरोः सकाशादुत्कृष्टत्वमेव तथात्र सर्वेषामिति सर्वशब्दनिर्दि
ष्टानां सर्वभूतस्थितमित्यादिना तपस्विप्रभृतीनां योगिनामस्मद्योगिनः
सकाशादुत्कृष्टत्वमेवातः पंचम्यर्थिकैव षष्ठी संभवति न तु निर्धारणा
र्थिके स्यर्थः यः सर्वेषां सर्वेभ्यस्तपस्विप्रभृतिभ्यो योगिनो योगिभ्यो
मद्भक्तो वक्ष्यमाणो योगी श्रद्धावान् सन् मद्भक्तिप्रतिपादकेषु श्रुतिस्मृ
त्यागमवाक्येषु विश्वासः स एवकं श्रद्धावान् सन् मम स्वामी भवति शय्या
लेनानास्यर्थानुभवस्वभाववतेन मद्गतेनान्तरात्मना मद्भक्तेन मतिगतः प्राप्तो मद्भक्तेन मनसा निरतिशयमतिप्रिय
विशेषाश्रयभूतं मनो यस्य तेनान्तरात्मना निखिलवासनारहिते
विशेषाश्रयभूतमनोऽन्तरात्मा मय्युत्तमतिप्रियतातिरेकेण मद्वि

नातृणमात्रमपिस्वधारणमहमानेनमतस्मामोसकलवेतनास्म
कानेनकोटि ब्रह्माण्डोद्भवावनलयलीलेशाद्वयोनिमविस्मानन्ना
प्राकृतस्वाभाविककारुण्यवात्सल्यसौशीलार्जवमाधुर्यसौंदर्यला
वण्यतेजोबलशांतिक्षमादिमंगलगुणमहोदधिमनेनाविमर्शा।
त्किकंसकलक्लेशशेषसुरेशनरेशादिजीवनिकरमयामयप्रदेविवि
धाध्यात्मादिसंसारतापतप्तनतापिनस्सज्जनकैरवपोषणपूर्णकला
शारदशीतलकरंसजलजलदश्यामलातिसुभगसुंदरताभीरसारा
दर्शनीयहृदिविजमनुजमनोनयनानंदकराननकं दर्पद्युतिधरम
केव्होपानदेहहृद्दामिनीद्युतिधरवरपीताम्बरधरंनूपुरकटिसूत्रहारके
यूरकटकांगुलीयककुण्डलकिरीटमुकुटाद्यलंकारालंकृतंगोपा
गनापांगपंकेरुहपूजितंनंदनंदनंमम धर्मपालनायाधर्मविनाशाय
चप्रतियुगंनरहरिदाशरथ्याद्यनेकान्तिकमनीयशौर्यवीर्यकारु।
ण्याद्यनन्तगुणशक्तिविशिष्टाकृतिकंयदुवंशोद्भवंवसुदेवसु
तंभजतेसर्वसम्बन्धावच्छिन्नेनश्रवणकीर्तनादिलक्षणाभिर्भक्तिभि
स्सेवतेसमदेकशरणोमदेकनिष्ठस्सकलबाह्यवोमदनन्यभक्तोयुक्त
तमस्तपक्षिप्रमनयोयुक्तानिष्कामकर्मयोगयुक्तनराःमदेकभक्त
र्मस्लेभ्यःसर्वलोकेभ्योनिरतिशयश्रेष्ठतमस्समर्थः मेसकललोकहि
तावतारस्यसर्वेश्वरस्यसर्वनियन्तुःसर्वस्यपुरुषोत्तमस्यममतः
सुभिमतःसर्वेभ्यस्तपोयोगकर्मज्ञानादिसाधनवद्भ्योमद्भक्तिमतांश्रे
ष्ठतममहंसमेनामभिमतःमत्केष्वेष्ठतमोऽनुनयोप्याहुःभक्तिरस्यभग
वतिहामुत्रोपाधिवैराग्येनामुष्मिन्मनः कल्पनमेतदेवनैष्कर्म्यमा
त्मानमेवलोकमुपासीतआत्मावाअरेद्रष्टव्यःश्रोतव्योमन्तव्योनिदि
ध्यासितव्यः यस्यदेवेपराभक्तिर्यथादेवेतथागुरौतस्यैतेकथिताह्य
र्थाः प्रकाशन्तेमहात्मनः इत्याद्याः ४७ कर्मयोगंकामसूत्रंसतान
गर्भेस्सविस्तरम् प्रावोचद्योजगद्योनिस्तंवंदेपार्थसारथिम् १ ॥
इतिश्रीकृष्णमवेजपत्नीगीतानीटीकाषष्ठोऽध्यायः ६ ॥
इदानीं सर्वयोगिश्रेष्ठं योगिनं ~~मधुसूदनीटीका~~ वदन्नध्यायमुपसंहरति ॥
योगिनोवसुरुद्रादित्यादिलक्षदेवतानामभक्तानांसर्वेषामपिमध्येम

गी.
टी.
ष.

२१४

पि भगवति वासुदेवे पुण्यपरिपाकविशेषाद्भजनेन प्रीतिवशान्निविष्टेन म
द्गतेनांतरात्मनांतःकरणेन प्राग्भवीयसंस्कारपाटवात् साधुसंगा
द्वा मद्भजनप्रवणः श्रद्धावानतिशयेन श्रद्दधानः सन् भजते सेवते सततं चिं
तयति यो मां नारायणमीश्वरेश्वरं सगुणं निर्गुणं वा मनुष्योयमीश्वरा
न्तरसाधारणोयमित्यादिभ्रमं हित्वा स एवं मद्भक्तो योगी युक्ततमः सर्व
भ्यः समाहितचित्तेभ्यो युक्तेभ्यः श्रेष्ठो मम परमेश्वरस्य सर्वज्ञस्य मतो
निश्चितः समानेपि योगाभ्यासक्लेशे समानेपि भजनायासे मद्भक्तिशू
न्येभ्यो मद्भक्तस्यैव श्रेष्ठत्वान्मद्भक्तः परमो युक्ततमो नायसेन भवितुं
शक्नोति इति भावः । तदनेनाध्यायेन कर्मयोगस्य बुद्धिशुद्धिहेतोर्मर्या
दां दर्शयता तत्फलत्वेन सर्वकर्मसंन्यासस्य सांगयोगविहितस्य वा मनो
निग्रहोपायं वा लयविक्षेपनिरासपूर्वकमुपदिशता योगभ्रष्टस्य पुरुषार्थ
शून्यताशंकां च शिथिलयता कर्मकांडं त्वंपदार्थनिरूपणं च समा
पितं अनन्तः परं श्रद्धावान् भजते यो मां इति सूचितं भक्तियोगं भजनीयं
भगवंतं वासुदेवं तत्पदार्थं निरूपयितुं मग्रिममध्यायषट्कमारभ्य
त इति शिवम् ४७ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीवि
श्वेश्वरसरस्वतीश्रीपादशिष्यश्रीमधुसूदनसरस्वतीविरचितायां
श्रीभगवद्गीतागूढार्थदीपिकायां त्वंपदार्थनिरूपणं नाम षष्ठोऽध्यायः ६

सरावती टीका

सर्वयोगिवरिष्ठं श्रीश्यामकं श्रीगोवर्द्धनसूरिः उपसंहरतीदानीमध्यायं यो
गिनामपि १ योगिनां वसुरुद्रादिभक्तानामभेदेन सा योगिनां वसुरुद्रा
दिभक्तानामभेदेन सा सर्वेषामपि मध्ये यो वासुदेवमयीश्वरे २ पुण्य
पुंजोदयात्स्वमनो निविष्टेनांतरात्मना प्राग्भवार्जितसंस्कारपाटवा
त्साधुसंगमात् ३ श्रद्धावान् सदा भक्त्या चिंतयन्सादरात्स्वमां सगुणं नि
र्गुणं वापि नारायणमधीश्वरं ४ अनन्यभक्त्या परया मद्भक्तो यतः स
र्वः सर्वेभ्यो युक्तचित्तेभ्यः श्रेष्ठो निःसमाहितः ५ सर्वज्ञस्य मम
तनिश्चितो नात्र संशयः योगाभ्यासश्रमे तस्य समाने भजनश्रमे ६
मद्भक्तस्यैव मुख्यत्वं मम सर्वागुरुत्वयोगिनः त्वमद्भक्ततया तं तथुक्तो भवि
तमभंन ७ अनायासेन पीडेव शास्त्रसीमाश्रयो हरेः ८ योगी योगव

लेन संसृतिमिमां सुकान्तसो ऽवस्थितः कर्मीकर्मजलोकभोग
रसिकस्तस्मिन्नुपायेरतः अस्माकं तु नवीनवारिदरुचिर्मेदस्मि
नेनाचितैर्गोगोपीजनवत्सलः सुखनिधिः कृष्णः शरण्यो ग
तिः ४७॥ इति सदानंदटीका षष्ठोऽध्यायः ६॥

नीलकंठीटीका

सम्मासः कर्मप्रधानत्वं पदार्थविवेकः अतः परं उपासनाप्राधा
न्येन तत्पदार्थं निरूपयितुकामस्तदुपासनो महाफलत्वेन स्तौति
योगिनामिति दैवमेवापरे यज्ञमित्यादिना चतुर्थाध्याये श्रोक्ता
द्वादशयोगास्तद्वतो योगिनां सर्वेषां मध्ये यो मद्गतेन मयि वासु
देवे समर्पितेन अंतरात्मना चित्तेन श्रद्धावान्सन्मां भजते स मेम
मद्गतेन मोऽतिशयेन युक्तः स्याद्यो मतोऽभिमतः तस्मान्मद्गतो
भवेति भावः ४७॥ इति श्रीनीलकंठटीका समाप्तः ॥

आनंदटीका

एतिहितचित्तो योगी प्रकृष्टतम इति दर्शयन्नध्यायार्थ
मुपसंहरति॥ सर्वेभ्योपि योगिभ्यः परमेश्वरैकश
यः श्रद्धावानवश्यमीश्वरप्रणिधानैकपविता योगारूढत्वप्राप्तिसा
द्विति निश्चयवान् मद्गतेनांतरात्मना प्रतिपादितप्रभावसंयमात्
मदेकनिष्ठेन मनसा मां भजते स सर्वेषामपि योगिनां ममातिश
यितो योगी मतः लक्षणीयाया श्रद्धाया उद्देशायमिति सिद्धं ।
यमनियमासनप्राणायामप्रत्याहारध्यानधारणासमाधयो
ष्टावङ्गानि योगस्येति यमादिपंचकं बहिरंगं ध्यानादित्रयमंतरं
गम् तथाहि यमनियमैर्मनसो वाह्यगतीर्निरुध्य आसनेन भौतिक
पिंडात्मनः समरसत्वमभिसंपाद्य प्रत्याहारेणेंद्रियाणि वशीकृत्य
ध्यानेन तद्द्विधाश्रिमनोऽभिनिवेश्य धारणया तत्र स्थिरीकृत्य पुरुषस्य सम
नः समाधिना च पुरुषप्रकाशसामीप्योपलब्धिस्थाने कैवल्यमाप्ति
देवं संप्रज्ञातयोगोपलब्धिरिति योगाभ्यासनवाक्यार्थसंग्रहः संप्र
र्णमेतदुद्देशपर्वं ४७॥ इति श्री आनंदटीका षष्ठोऽध्यायः ६ ॥

४ षष्ठोऽध्यायः

गी॰
टी॰ ६॰

२५

ये केचन योगिनो दर्शनभेदात् संभवन्ति तेषामप्ययमेव विधियो योगी प्रकार
मरतिश्च निषादय त्वध्यायमुपसंहरति ॥

रामकंठीटीका

समस्तयोगिनां मध्ये स योगी युक्ततमो ऽतिशयेन युक्तः समाहितो मम
मतः को ऽसौ यः श्रद्धावान् सर्वसिद्धिहेतभूतया श्रद्धया युक्तः म
द्गतेनान्तरात्मना यथा प्रतिपादितज्ञानगम्यां मां परमात्मानं मा
त्मानमेकं तत्त्वं परमोपेतं योगेन प्रपन्नेनान्तःकरणेन भजन्ते वाङ्मनः तें
कायव्यापारात्मसेवनेन वर्जन्मद्भक्तो भवति यथोक्तज्ञानविधिना
यथोक्तमत्स्वरूपावगमपूर्वं मामेव यत उपास्ते स एव समाहितत
मः इत्येषाम् यातायस्मात् भावं दर्शयति यदि परं योगतामस्य योगास्ते
योगं ज्ञानकर्मव्यतिकरात्मकाभ्यासवैराग्यगम्यम् सम्यक्संप्रा
प्तकामैः परमगुरुरिति श्रद्धया पर्युपास्यः षष्ठो ऽध्यायो ऽयमार्थैरव
हितमतिभिस्त्यक्तसर्वान्यकार्यैः ४७ ॥ इति श्रीरामकंठीटीका
यां षष्ठो ऽध्यायः ६ ॥

योगिनामपि मध्ये विशेषोस्तीत्या

तासिकी टीका

ह॥ परमात्मना जीवस्य योजनं योगः स्मृतः स चापि कारिभूमिका
भेदेन षोढा तत्र प्रथमो ऽहि योगः कर्मस्वध्यात्मवाधेसमाधानम्
द्वितीयः कर्मयोग आरुरुक्षुविषयः कर्मस्वक्रियमाणेष्वध्यात्मनि
समाहितत्वम् तृतीयो ध्यानयोगः सर्वाश्रितवृत्तीर्निरुध्यात्मन्येवैक
तानता चतुर्थो ऽमाख्यो योगः आनन्दप्रादुर्भाववशः सर्वपरमात्मसा
मापत्तिः समाधिरूपः पंचमो ज्ञानयोगो यत्राद्वैतं प्रतिभासते स च द्वि
विधः श्वेतेन वर्णाश्रमभूतया चेतनाचेतनव्यापृत्याच षष्ठो भक्तियोग
ईश्वरं भक्त्याश्रित्य स्वात्मनि समाहितत्वं कर्मसंन्यासयोगस्य विक
ल्पनामभावेन शबलतया ऽफकल्पविषयस्य कर्मयोगेन भावः ।
संन्यासयोगस्य च विकल्पाभावेन ज्ञानयोगेन भावः एवं सर्वेषां यो
गिनां योगभूमिकानिष्ठानां मध्ये योगी श्रद्धावान् ईश्वरासक्तिर्विश्व
स्तः सन् तत्संस्कारविस्मरमपलपन्नुरुषमात्रपर्यवसितः मयि

प्रत्यगात्मनि स्थितेनान्तरात्मना मनसा मामीश्वरं भजते प्रेमातिशयात्स
ईश्वरहृतेन सर्वयोगिषु मध्ये परमः श्रेष्ठो मम मतो जीवन्मुक्तपदभाजनत्वात् तदु
क्तं समाधिसिद्धिरीश्वरप्रणिधानात् क्लेशकर्मविपाकाशयैरपरामृष्टः पुरु
षविशेष ईश्वर इति च तेश्वरस्य ज्ञानस्य सर्वप्राधान्यमुक्तम् यत्सर्वं गुरुभिः
स्तैतेच भवदुक्तममृतास्वादाह्लादस्य स्यात् पराधिया दृश्यतामांप्रतिरवा
न्मिन्नासवस्य वस्तु कृतेति एवमेतावता यस्त्वयैनेनतत्फलितं सांख्येन विनाबु
द्धियोगो न सिद्ध्यति बुद्धियोगं विना कर्मयोगो न सिद्ध्यति इत्येवं तं विना
ध्यानयोगस्तं विना भक्तियोगस्तं विना ज्ञानयोगः भक्तियोगस्तु सर्व
योक्तं तत्पद इति एवं सप्तकारणात्वमन्त्रस्य ज्ञानांतरीयकत्वं द्रष्टव्यमिति अतए
व योगभूमिकाभेदेन शैवैः सप्तप्रमातारो व्यवस्थापिताः तदुक्तम् महा
मंत्रेशमंत्रेशमंत्राश्शिवपुरोगमाः अकलौ सकलश्चेति शिवस्यैता विभूतयः
इति श्री[illegible] [illegible]टीकायां षष्ठोऽध्यायः ६ ॥

४०

पंचोलीटीका

उक्तमध्यायबीजं अद्यतिपन्न यमनियमपराणां मध्ये भगवद्भक्तस्य श्रेष्ठमा
ह भगवान् योगिनामपीति यः मद्गतेनान्तरात्मना मयि वासुदेवे समा
हितेन मत्परेणान्तःकरणेन श्रद्धावान् मां भजते स सर्वेषां रुद्रादित्यादि
पराणां योगिनां मध्ये मम युक्ततमः अतिशयेन युक्तो योगी ज्ञानी मेम
तः अभिप्रेतः ४७ इति श्री पांचोले षष्ठोऽध्यायः ६

[illegible]सिद्धोधिनी ॥

योगिनामपीति सर्वेषां योगिनां कर्मयोगिनामपि मध्ये ज्ञानि
घवीरः मद्गतेन परमेश्वरेणार्पितं तदवतारे स्वजात्युचितं कर्मानु
ष्ठितमिति स्ववर्णाश्रमोचितकर्माचरणे दृष्टान्तीभूतं मां विषयी
कृतवतान्तरात्मनान्तःकरणेन श्रद्धावान् शास्त्राचार्योपदेशेफ
लावमर्षं भावनिश्चययुक्तः सन् मां सर्वेश्वरं भजते सिद्ध्यसिद्ध्ययो

216

त्वांपरित्यज्यमत्परितोषणार्थंस्वधर्माचरणेनमेवर्तते परमेश्वरो
मेनेनप्रीयतामिति संकल्प्यस्वकर्मानुतिष्ठेदिति यावत् सउमा
न् मे ममयुक्ततमः प्रशस्तयोगारूढः सर्वभूतेष्वात्मौपम्यत
मोवामतइतिभद्रं ४७॥ इतिश्रीधरस्वामिसुबोधिन्यांश्री
गीताव्याख्यायांषष्ठोध्यायः ६॥

मधुभाष्य

४७॥ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्री
मद्गीताभाष्येषष्ठोध्यायः ६॥

भाषा अनुवाद

योगियों के मध्य अर्थात् यम नियम परायण लोगोंके बीच
मे मेरा भक्त ही श्रेष्ठ है यह कहते हैं कि मै जो परमेश्वर सो म
ज्ञेन अर्थात् मेरे मे मन लगाय श्रद्धासे जो हम को भजे है मेरे म
त मे कोई श्रेष्ठ इस से अर्जुन तुम मेरे भक्त होउ श्रीपर स्वामी
प्रभु को प्रणाम करते हैं कि परमानंद भक्त सेवित लक्ष्मीपति।
की मै वंदना करता हूं जिसने भक्तियोग शिरोमणि रूप ग्रन्थ
योग उपदेश किया है ४७ ॥

इति जगन्नाथ सुकृ विरचितायां मनभावनीटीकायां षष्ठाध्यायः ६

दोहा

योगीके सभ मध्यम हिं है मो मद जाको चित्त भजें जो श्रद्धयु
क्त मोहि सो योग श्रेष्ठ मो मत्त ४७॥ इति श्रीभगवद्गीताभ



षष्ठोध्यायः